काशीवासैकाग्रहस्त्यक्तवांस्तां वृत्तिं चान्यामर्धसाहस्रमुद्राम्।।४३।।
दृष्ट्वा तत्तनयस्य बाह्यजनतानिन्दास्पदं साहसं
धीराणां निजधर्मतत्त्वविदुषामेकान्तमाह्लादनम्।
सुप्रीतो जनको निरीक्ष्य दृढतां यूनोऽपि धर्मे स्वके
बाढं हर्षजवाष्पबिन्दुभिरलं भूयोऽभ्यषिञ्चत्सुतम्।।४४।।
दुर्दैवादथ भारतस्य विदुषामेको गुरुर्नन्दव-
न्द्यङ्कक्ष्मामितवत्सरे परपदं श्रीबालशास्त्री गतः।
तच्छोकाकुलचेतसोऽस्य विदुषो गुर्वाज्ञया तद्धुरां
वोढुः शोकमवारयद्बहुतरा कर्तव्यसूची पुरः।।४५।।

अथैष पूर्वगुरोरिव द्वितीयगुरोर्बालशास्त्रिणोऽपि जीवनचरितं गद्यपद्यमय्या गिरा निर्माय काशीपण्डितपत्रे सादरं प्रकाशयामास। यच्च,

परिणतकविवाचामेकमादर्शरूपं
गुरुवरपदभक्तिप्रोतभावप्रकर्षम्।
परभृतरुतरीतिव्यञ्जनं क्षीरसारा-
मलतरपदबन्धं सर्वतः सुप्रसन्नम्।।४६।।

यन्न क्वापि पुरातनेष्वपि कविष्वालोक्यते जातुचित्
श्रौतस्याऽपि च कर्मणः कविगिरा चेतोहरं वर्णनम्।
तच्छ्रीमद्बुधबालशास्त्रिचरिते यच्छास्त्रिवर्यैः कृतं
दर्शं दर्शममन्दमादरयुतं मोदं बुधा लेभिरे।।४७।।

अनन्तरं सहैव पाठशालीयकार्येण तात्कालिकाध्यक्ष डॉ. थिबोसाहिब–महाशयानुरोधेन पदमञ्जरी, रसगङ्गाधर, वाक्यपदीय, तन्त्रवार्त्तिकादिग्रन्थान् टिप्पणादिभिः पुरस्कृत्य पण्डितपत्रे प्रकाशयामास।

अथ सप्ताष्टवसुचन्द्रमिते १८८७ ख्रीस्ताब्दे भारतेश्वर्याः प्रथमजुबिलीमहोत्सवे सबहुमानं साम्राज्ञीदत्तं 'महामहोपाध्याय' इति परप्रतिष्ठास्पदं विरुदं लब्धवान् शास्त्रिमहोदयः।

यल्लब्धुं शतशो बुधाः प्रतिदिनं कुर्वन्ति यत्नान्बहून्
केचित्तेषु कथञ्चिदेव सुकृतैर्विन्दन्ति तद्वार्धके।
लब्धं तत्खलु पञ्चविंशतिमिताऽब्देनैव यूनाऽमुना
साकं वार्द्धकदुर्बलैस्त्रिभिरतिप्रख्यैः पुराणैर्बुधैः।।४८।।
नूनं सा पदवी समेत्य सुधियामीशं युवानं बुधं
सार्थक्यं समुपाजगाम जनुषो नूत्नावतारा तदा।
प्रागेव प्रतिभाविशेषजनितं ख्यातं तदीयं यशः
सम्प्रत्यञ्चितमञ्जिमाऽमरगुरोः कर्णान्तरं गाहते।।४९।।
काशीश्वरः प्रभुपदोपपदो वदान्यो
नारायणो गुणिगुणादरसुप्रवीणः।
गङ्गाधरं बुधवरं सममानयद् द्राक्
हेमाङ्कराङ्कवमहावसनार्पणेन।।५०।।

अथ सौभाग्यात्सुरभारत्याः श्रीमति महामहिमनि डॉ. ए.वेनिसमहोदये काशिकराजकीयपाठालयप्रधानाध्यक्षधुरां वहति सति अभिनवप्रर्त्तितायां विजयनगरसंस्कृतग्रन्थमालायां अध्यक्षानुरोधेन सिद्धान्तलेश, न्यायमञ्जरी, न्यायभाष्यादीन् टिप्पणादिभिः पुरस्कृत्य सुसम्पादितवान् शास्त्रिमहोदयः।

डॉ. थिबो साहिब महाशयाश्च श्रीरामानुजीयश्रीभाष्यानुवादावसरे प्रायो विषमस्थलेषु शास्त्रिवरसाहाय्यमवसरेऽवसरे समधिगम्य समापितवन्तः स्वकार्यम्।

डॉ. वेनिस महोदयास्तु बुद्धिप्रकर्षं वैदुषीं च सविशेषं निरीक्ष्य लब्धाऽवसरा अन्तरान्तरा शास्त्रिवरमुखारविन्दविगलदमृतास्वादसुभगोपदेशरसमास्वाद्य च शास्त्रिपादेषु श्रद्धातिशयमपुष्णन्। स च सत्पुरुषसंसर्गसंस्कारो डॉ. वेनिस महोदयस्य दृशं विशदय्य

आर्यशास्त्राणां गौरवं चाऽप्यवगमय्य धियमस्य भारतीयदिशैव प्रवर्तयामास।

शास्त्रसंस्कृतचेता डॉ. वेनिस महोदयोऽपि शास्त्रिवराणामुपकारान् यावज्जीवनं स्मरन् श्रद्धावशात् सर्वदैव 'गुरुजी' इति पदेनैव तन्नाम स्मरन्नसीत्। किं बहुना, प्रयागविश्वविद्यालये न्यायवैशेषिकदर्शनविषयके स्वकीयप्रथमव्याख्याने श्रीशास्त्रिवरप्रसादादेव स्वस्य योग्यतामुल्लिख्य 'प्रीयन्ताम् गुरवः' इति वाक्येन तत्राऽपि शास्त्रिपादान् सादरं सस्मार डॉ. वेनिसमहोदयः।

शास्त्रिवरं डॉ. वेनिसमहोदययोरव्याजं मिथः सौहार्दं समीक्ष्य-

किं प्राची बलशालिनीमपि बहिर्दृष्टिं प्रतीचीं सखीं
वाग्भिश्चोरुपदोदयाभिरसकृत्संस्थापयन्ती स्थितौ।
भावान् सत्त्वमयान् तदीयहृदये कृत्वा स्थिरान्सादरं
गङ्गेवात्मसमानतामभिमतां सम्पादयत्यद्‌भुतम्।।५१।।

इति प्रेक्षकाणां वितर्काः समुदपद्यन्त।

अथ व्योमाङ्कवसुचन्द्र १७९० मिते ख्रीस्ताब्दे काश्यामसीघट्टे जलनलयन्त्रिकाकार्यसौकर्याय तन्निकटवर्त्तिप्रथिततमश्रीगोस्वामितुलसीदास-प्रतिष्ठापितश्रीसीताराममन्दिरस्थदेवमूर्तीस्ततोऽपसार्याऽन्यत्र नवनिर्मितमन्दिरे प्रतिष्ठापयितुं कृतनिश्चयेऽधिकारिवर्गे वार्त्तयाऽनया सर्वतः संक्षुब्धे महाजनसमाजे धूर्तवञ्चकदस्युभिरवसरमिमं स्वार्थसाधनानुकूलं कलयित्वा समारब्धे प्रकृतिपीडने हन्यमानेषु निरपराधेषु प्रवृत्ते च घोरविप्लवे मण्डलाधीशेन विचारसभायां प्रवर्त्तितायां समाहूताः शास्त्रिवराः शतशः प्रमाणजातैर्देवमूर्तीनां स्थानादपसारणं मन्दिरपातनं च शास्त्रविरुद्धमित्येव प्रत्यपीपदन्। विप्लवशमनस्य सुकरमुपायं च निरदीदिशन्। सहर्षं मण्डलाधीशेन सह सभ्यसमाजैः स्वीकृते शास्त्रिवर्योपदेशे सद्यो निवारितं मन्दिरपातनं मूर्तीनामपसारणं च। शमितश्च विप्लवः शास्त्रिवर्योपदिष्टेनैव वर्त्मना।

एतेन प्रथितेन पण्डितपतेस्तस्यावदानेन च
प्रीतिः पौरमहीपयोरुदभवच्चित्ते समाना तदा।
नाऽयं केवलपण्डितो दृढकृताभ्यासश्च नीतौ पुन-
र्योग्यो भूपतिसान्धिविग्रहिकताव्यापारलीलास्वपि।।५२।।

अथ वह्निबाणाङ्कचन्द्रमिते १९५३ वैक्रमेऽब्दे काशीनिवासी आहिताग्निः सदाशिवदीक्षितनामकोऽकिञ्चनो ब्राह्मणो मनसि बलवदुद्‌भूतया ज्योतिष्टोमयागचिकीर्षया व्याकुलः स्वस्याऽधनतया च सुतरां विषण्णोऽपि सर्वतोमुखसाहाय्यसम्पादनपुरःसरं यागभारं शास्त्रिवरेषु साग्रहं न्यस्तवान्।

शास्त्रिवरा अपि तदानीमल्पवेतनवत्तया स्वयमर्थसाहाय्यं कर्तुमसमर्था अपि तस्य ब्राह्मणस्य पुण्यकर्मणि दृढां निष्ठाम्, अनेन द्वारेण श्रौतविद्यायाश्चोन्नतिं सम्भाव्य आत्मविश्वासेन साहसप्रायेऽप्यस्मिन् कर्मणि बद्धपरिकरा बभूवुः। ततो यज्ञेश्वरानुग्रहात् प्रचुरपुण्यबलाच्च शास्त्रिवराणां काशिकैर्वैदेशिकैश्च तथाविधं अर्थसाहाय्यमाचरितं यदन्ते बहूनामपि श्रद्धालूनां साहाय्यमनावश्यकतयाऽस्वीकरणीयमासीत्।

शास्त्रिवरानुध्याने सम्पादितशिक्षाविशेषाणां ऋत्विजां शस्त्रस्तोत्रसामगानानि पश्यन्तोऽनुष्ठाननैष्ठिकतां प्रत्यवायं विनैव समवसितां च वीक्षमाणाः सर्वे जनाः सर्वतः साधुवादान् गृणन्तः सत्ययुगे वसिष्ठादिप्रवर्त्तिताध्वरदर्शिन एवात्मनो मन्यमानाः जन्मसाफल्यं लेभिरे।

तस्मिन्नध्वरमण्डपे ऋषिनिभा ऋत्विग्वरास्तेजसा
वैतानाग्निसमा नवीनवसनाः पङ्क्तिक्रमात्संस्थिताः।
हस्ते सोमसमिद्धपात्रकलनात्क्षीरोदनिर्मन्थने
पीयूषद्रवपानसोत्कमनसो देवा इवाऽऽरेजिरे।।५३।।

इत्थं शास्त्रिवरैः सुसम्पादितेऽस्मिन्नध्वरे नियुक्तानां ऋत्विजां असाधारणं स्वकर्मकौशलं, अनुष्ठानसौष्ठवं, सुप्रबन्धं च प्रत्यक्षं निरीक्ष्य समुपजातश्रद्धातिरेकाः नेपालराजाश्रिता काशीनिवासिनः सुसम्पन्नाः विद्वद्वरा आचार्यशिरोमणिशर्माणः स्वयं सोमपुरःसरमाधानं त्रेताग्नेश्चिकीर्षन्तस्तत्सुसम्पादनभारं परमादरपुरःसरं शास्त्रिवरेषु विन्यस्य शुभे मुहूर्ते दीक्षामगृह्णन्।

शास्त्रिवरैः पुरेवाऽयमप्यध्वरः समीचीनतयैव सम्पाद्य समापितः। ततो बाणबाणाङ्कचन्द्रमिते १९५५ वैक्रमेऽब्दे आचार्यशिरोमणिदीक्षितमहाशयाः प्रथमाध्वरस्य सुसम्पादनेन सञ्जातद्विगुणोत्साहाः शास्त्रिवरानुध्याने अत्यग्निष्टोमं कर्तुं प्रावर्त्तन्त। सुसम्पादिते च तस्मिन्नप्यध्वरेऽधिकाधिकोत्साहाः शास्त्रिवरोपदर्शितेनाध्वना साग्निचित्सर्वपृष्ठाप्तोर्यामसोमयागं कर्तुं समारभन्त।

पुरः पश्चादपि बहोः कालादसौ यागो न केनाऽपि कृत आसादिति तत्पद्धतिप्रबन्धविधानानि तात्कालिकानां ऋत्विजामनभ्यस्तचराण्यासन्निति तत्सुसम्पादनाय नानाविधश्रौतग्रन्थावलोकनविमर्शनादिना भूरिप्रयासेन कायक्लेशमगणयित्वा सुशिक्षामापादिता ऋत्विजः सम्पादितश्च पूर्वापेक्षयाऽपि सुष्ठुतरमसौ यागः शास्त्रिमहाभागैः।

तस्मिन्नेवावसरे शास्त्रिवराणां साक्षादनुसन्धाने लब्धशिक्षा ये श्रौतविदस्तादृशेषु कर्मसु निपुणतामवापुस्ते तच्छिष्याश्चैवाद्याऽपि तत्कर्मकर्तुमीशते। सोऽयं शास्त्रिवरैरेव पुनः प्रवर्त्तितो लुप्तप्रायः श्रौतगङ्गाप्रवाहः कालक्रमेण शुष्यन्नपि अद्यावधि कथञ्चित् धृतप्राणोऽस्ति।

अद्यापि श्रौतविद्या विलसति यदियं काशिकायां कथञ्चित्
तन्नूनं शास्त्रिपादप्रगुणगुणगणोत्पन्नपुण्यप्रभावात्।
सन्त्येवाद्याऽपि केचित्कृतबहुसुकृता वैदिकास्तेषु यागे-
ष्वश्रान्ताचान्तसोमाः सुरभितमहविर्धूममाघ्राय तृप्ताः।।५४।।

अथ वह्निव्योमाङ्कचन्द्रमिते १९०३ खीस्ताब्दे श्रीमतः सम्राजः सप्तमैडवर्डस्य मुकुटधारणमहोत्सवे इन्द्रप्रस्थनगरे सम्राट्प्रतिनिधे लॉर्ड कर्झन महोदयस्य महत्यां सभायां सबहुमानमाहूता अपि शास्त्रिवराः शरीरदौर्बल्येन हेतुना तत्र गन्तुं नाशक्नुवन्, तथाऽपि तस्मिन्महोत्सवदिने काश्यामेव प्रवर्त्तितायामुत्सवसभायां मण्डलाधीशेन ससम्मानं शास्त्रिपादेभ्यः सी.आइ.ई. इति पदवीप्रदानमुद्घोषितम्। चमत्कृतश्च सर्वोऽपि महाजनसमाजः। गुणिजनगुणादरणेन परितुष्टा च सहृदयमण्डली।

वापूदेवबुधात्परं न च पुरा काशीस्थविद्वद्गणे
केनाप्येष बुधेन पूर्वसुकृतैः सम्मान आसादितः।
तं तादृङ्महनीयमानविषयं सम्पाद्य विद्वत्तमाः
श्रीमच्छास्त्रिवरा गुणग्रहिलतां भूपस्य तां मेनिरे।।५४।।

परिवर्त्तनैकलक्षणे संसारे सुखदुःखान्यतरसम्पातो हि निसर्ग एव। प्राकृतिकं नियममुलङ्घयितुं न कस्यापि शक्तिरस्ति। दशाक्रमेण तस्यैव नियमस्य शास्त्रिवरा अपि लक्ष्यतामन्वभूवन्।

शास्त्रिवराणां ज्येष्ठस्तनयो ढुण्ढिराजशास्त्री यः खलु बुद्धिमत्त्वे पतिमूर्तिरिव शास्त्रिवराणां, येन च साहित्याचार्य परीक्षायाः पञ्चसु खण्डेषु सम्यगुत्तीर्य आङ्गलभाषापरीक्षास्वपि सम्यगुत्तीर्णेन विदुषां मनसि भविष्यत्कालीनं किमपि रम्यं चित्रमुट्टङ्कितमासीत्, स एव वेदव्योमाङ्कमहीमिते १९०४ खीस्ताब्दे सहसा देवभूयं जगाम।

पुत्रे पितुः सदृशता कियतीति पृष्टे
योऽशब्दमुत्तरमभूद्बहुभिः किमुक्तैः।
दुर्भाग्यमेव बुधसंसद एतदास्ते
तद्वैदुषीं न चिरकालमसाववाप।।५४।।

निरन्तरवेदान्तचिन्तनदान्ताशयाः शास्त्रिवरा ईदृशमपि शोकशङ्कुं विवेकसहायेन सद्यो विधूय बलवच्छोकपरितप्ताया दयितायाः सान्त्वनाय राजकीयकार्यान्मासत्रयं गृहीताऽवकाशाः जगदीशरामेश्वरकाञ्चीपुरीप्रभृतितीर्थयात्राभिलाषेण निर्जग्मुः।

प्रतिनिवृत्य तीर्थयात्रायाः शास्त्रिवरैरेको दार्शनिको ग्रन्थोऽलिविलासि-संलापनामको निरमायि, यत्र द्वादशदर्शनीगताः सर्वेऽपि विषया अलिविलासिनोः पूर्वोत्तरपक्षविधया निवेशिताः, मध्ये स्वानुभूततत्तीर्थदेवतावर्णनमप्युपनिबद्धम्। किञ्च

दार्शनिकपदार्थनिरूपणपरेऽप्यस्मिन् ग्रन्थे तादृशं कवितासौष्ठवं निबद्धं, यत्तत: पूर्वं परतोऽपि न केनाऽपि कृतं, कर्तुं पारयिष्यते च।

आजन्मोपनिषद्विचारमहिमस्फूर्तिश्च याऽलौकिकी
तस्या: स्वात्मनि या च संस्कृतिरभूद्वैराग्यसम्पादिका।
साहित्यार्णवमन्थनोत्थितसुधापूराऽवगाहश्च य-
स्तत्सर्वं न परोक्षमस्ति विदुषां ग्रन्थेऽत्र सम्पश्यताम्।।५५।।

अपरोऽपि 'हंसाष्टक' नामको निबन्ध: शास्त्रिवरै: पूर्वमेव निबद्ध आसीत्, सोऽपि दार्शनिक एव। तत्र हंसपक्ष्यात्मनो: सुश्लिष्टवर्णनविधया प्राय: प्रसिद्धसकलदार्शनिकमतेनात्मस्वरूपं विवेचितम्।

सरलतरश्लेषसौन्दर्यविधया साहित्यसौहित्यपराकाष्ठाऽपि प्रदर्शिता। तदुपरि शास्त्रिवराणामनुजै: सकलशास्त्रपारावारपारङ्गमैर्गुरुवरैर्महामहोपाध्याय-तैलङ्गरामशास्त्रिभिरतिसमीचीना व्याख्याऽपि व्यधायि, मुद्रितं चैतद्ग्रन्थद्वयम्।

अथ प्रयागविश्वविद्यालयकार्यकारिसभायां सदस्यत्वेनाधिकृता: शास्त्रिवरा अनेकवारं एम.ए. परीक्षापरीक्षकत्वेनाऽपि वृता: अङ्कव्योमाङ्कचन्द्रमिते १९०९ खीस्ताब्दे श्रीमन्महामहोपाध्यायश्रीगङ्गानाथझामहोदयस्य डॉक्टरपरीक्षाया: परीक्षका भूत्वा तत्कार्यमपि साधु समपादयन्।

अथाऽनुपदमेव पाठशालीयकार्यस्यैकत्रिंशद्दिनोत्तरत्रिंशद्वर्षमिते कालेऽवसिते तद्दिन एव डॉ. वेनिससाहिबमहोदयस्य भूयांसमप्यनुरोधमुल्लङ्घ्य विश्रान्तिकामा: शास्त्रिवरा: परित्यक्तवन्त: सर्वमेव राजकीयकार्यभारम्।

अथ भारापगमलघूकृतशरीरमन:प्राणा: शास्त्रिवरा गङ्गास्नानदेवतार्चनजपवेदान्त-चिन्तनादिभिरेव कालं नयन्त: विविक्तैकान्तसेविन: मुनिवृत्तिमेवाऽऽदेहपातं सिषेविरे।

क्रमेण ज्वरजर्जरेऽपि वपुषि यथाशक्ति नित्यनैमित्तिककर्मलोपं परिहरन्त: सततजागरूका: प्रतिदिवसमेकमेकमिति क्रमेण काशीखण्डप्रथितसकलदेवतापूजनपूर्वकं तत्तीर्थं ब्राह्मणानीतं गृह्णन्त: क्रमेण सकलदेवतापूजनानि कारयामासु:।

दानानि महादानानि प्रायश्चित्तानि च धर्मशास्त्रोपदिष्टानि क्रमश: सम्पादयन्त: सर्वदा भगवदनुध्यानपरायणा: शान्तमनस: व्योमाश्वाङ्कशशाङ्कसम्मिततमे वैक्रमे वत्सरे ज्येष्टशुक्लप्रतिपदि प्रात: प्रहरमात्रोच्छ्रिते भगवति भास्वति विमुक्तसमस्तबन्धना: ब्रह्मचिन्तनमेव केवलं विदधानां योगवर्त्मना जहुरिमां पाञ्चभौतिकीं तनुं श्रीमन्त: पूज्यपादा: श्रीगङ्गाधरशास्त्रिसद्गुरुचरणा:।

व्योमाश्वाङ्कशशाङ्कसम्मिततमे संवत्सरे वैक्रमे
ज्येष्ठे मासि दले सिते प्रतिपदि प्रातर्गुरोर्वासरे।

अस्माकं रुदतां स्वयं भगवता स्नेहात्करालम्बिताः
श्रीगङ्गाधरशास्त्रिणो गुरुवरा जग्मुः पदं शाश्वतम्।।५५।।
विद्याम्भोधिरशोषि रम्यकविताकल्पद्रुरुन्मूलितो
व्याख्याने पटुता हता स्मृतिमिता सा वादकण्डूलता।
वेदान्तानुभवः स नाऽद्य बहुधाऽन्विष्याऽपि हा लभ्यते
यातेऽस्तं किल सद्गुरौ स गरिमा नाऽन्यत्र संलक्ष्यते।।५६।।
उद्यत्पार्वणशर्वरीश्वररुचः पीयूषसाराः क्व ता
वाचः कोकिलपञ्चमादचरमा निर्भीकता साऽद्भुता।
तैक्ष्ण्यं तत् क्व धियः क्षणक्षणनवोल्लासा क्व सा शेमुषी
श्रीगङ्गाधरशास्त्रिसद्गुरुवरादन्यत्र नालोकिता।।५७।।
ग्रन्थग्रन्थिविभेदनेषु पटुता व्याख्यानधाटी च सा
मध्ये हास्यकथाप्रसङ्गकलनात्तच्छिष्यधीशोधनम्।
शिष्येष्वात्मजनिर्विशेषमुदयत्स्नेहं च तद्वीक्षणं
सर्वं केवलमेकले गुरुवरे गङ्गाधरे वीक्षितम्।।५८।।
सा लोकव्यवहारधीरतिशिता सा वस्तुमर्मज्ञता
लोकाकर्षणकर्मठा द्युतिमयी दृष्टिश्च शम्पानिभा।
काये सा लघुता निसर्गजनिता सा वाचि गम्भीरता
सर्वं पण्डितपुङ्गवे गुरुवरे गङ्गाधरे संस्थितम्।।५९।।

श्रीमतां शास्त्रिवराणां देहावसानसमये द्वौ अनुजौ, एकः पुत्रो, एका जातापत्या कन्यका चेति परिवार आसीत्। तत्र प्रथमानुजाः साहित्यार्णवकर्णधारा महामहोपाध्याया अस्मद्गुरवः श्रीरामशास्त्रिपूज्यपादास्त्वचिरादेवोपरता इति नूनं परं दुर्भाग्यं सुरभारत्याः।

या प्रौढिः पण्डितानां सदसि समुचिता वाग्मिता या च चित्रा
नैपुण्यं यच्च सर्वेष्वपि च मधुरता या च वाचि स्थिताऽऽसीत्।।
आजन्मैकान्तचिन्तानुभवसमुदितः कोऽप्यपूर्वः स बोध-
स्तत्सर्वं यातमस्तं सपदि गुरुवैरः साकमत्यन्तमेव।।६०।।

ततः कनीयांसोऽनुजा विद्वत्कुलधौरेयाः साहित्यसम्पत्सम्राजो महामहोपाध्यायाः पूज्यपादाः श्रीलक्ष्मणशास्त्रिणः सन्ति यैरेवाद्य तातनृसिंहशास्त्रिसाहित्यसम्प्रदायधुरा धारिता।

गुरुचरणानां प्रियतनया विद्यायां विनये सौजन्ये च निजतातानुकारिणः प्रथितकीर्तयः काशिराजकीयसंस्कृतपाठशालायां साहित्यदर्शनप्रधानाध्यापकाः साहित्याचार्याः पूज्यवराः श्रीभालचन्द्रशास्त्रिनामधेयाः सन्ति।

यैरद्यापि निजान्वयस्य महिमा संरक्षितः सादरं
छात्रौघोऽपि सहस्रशः प्रतिदिनं यैः पाठ्यते निर्भयम्।
राकाचन्द्रसमानकीर्तिनिवहास्ते भालचन्द्राह्वया
नन्दन्तु प्रियपुत्रपौत्रसहिता नूनं समानां शतम्।।६१।।

श्रीमतां शास्त्रिवराणामगणितेषु सकलभारतवर्षव्यापिषु शिष्येषु ये सविशेषं प्रसिद्धिभाजः यैश्चाऽद्यापि सर्वविषयेषु विद्याः प्रतिष्ठापितास्तेषु कतिपयानां नामानुकीर्तनमिह नानुचितं भवेत्।

तत्र प्रथमतो विद्वद्वृन्दवन्द्यपादारविन्दा गुरुचरणाधिगततदीय सकलविद्याः प्रखरतरवैराग्यभास्करनिर्दग्धसांसारिकबन्धना महामहोपाध्यायाः श्रीनित्यानन्दपन्तपर्वतीय पूज्यपादाः सन्ति।

श्रीराजारामशास्त्रि प्रभृतिगुरुवरैर्वैदुषी शब्दशास्त्रे
याऽपूर्वाऽऽविष्कृताऽऽसीदथ च निपुणता धर्मशास्त्रे च यादृक्।
सा नित्यानन्दविद्वन्निकषमुपगता सम्प्रदायक्रमेण
सम्प्रत्यग्रे न पश्यत्यपरमभिमतं संश्रयं कञ्चिदेषा।।६२।।

श्रीमतां शास्त्रिवराणां सर्वतः कनीयांसोऽनुजाः श्रीमन्महामहोपाध्याय श्रीलक्ष्मणशास्त्रितैलङ्गपूज्यचरणा अपि शिष्यकोटिनिविष्टा एव।

द्राक्षापाकमुपेयुषीं रसमयीं वाचं यदीयां चिरं
शृण्वानेव सरस्वती न कुरुते वीणां प्रवीणां करे।
विद्वद्वन्द्यनृसिंहशास्त्रिकविताघाटी कुलानुक्रमात्
येष्वेवास्ति समाश्रिता कविकुलाचार्येषु सा केवलम्।।६३।।

श्रीमन्तोऽशेषदर्शनविमर्शनविभास्वरप्रतिभाविशेषाः तर्ककर्कशविचार-चातुरीधुरीणाः साहित्यपारावारपारङ्गमाः मध्वसम्प्रदायाचार्याः साहित्याचार्यतर्करत्नेत्यादि-बहुतरोपाधिविभूषिताः श्रीगोस्वामिदामोदरलालशास्त्रिपूज्यचरणा अपि शास्त्रिवराणां विशिष्टा एव शिष्याः-

नानाकल्पविकल्पजालकलितां प्रौढोक्तिगूढाशयां
साहित्याध्वविहारिणीमपि पुनस्तर्कैः सदैवोज्वलाम्।
येषां वाचमकुण्ठितां प्रतिपदप्राप्तप्रकर्षां चिरं
शृण्वन् गीष्पतिरात्तविस्मयभरव्यात्ताननो जायते।।६४।।

अशेषविद्याऽऽपगासङ्गमसङ्केतस्थलमहासागरायमाणाः न केवलं भारतवर्षेव अपि तु सर्वभूभागे स्फीतचन्द्रावदातसुयशसः कविकुलचक्रवर्त्तिनः पाटलिपुत्र-विश्वविद्यालयसंस्कृतप्रधानाध्यापकाः साहित्याचार्य एम्.ए. श्रीपाण्डेयरामावतारशर्माणोऽपि

सविशेषमनुगृहीताः शिष्याः शास्त्रिवराणाम्–

कवितावनितास्वयंवृता दयितास्ते महिता भुवस्तले।
बुधमण्डलसादरेक्षिता जनताविस्मयकारिकीर्तयः।।६५।।

प्रौढाः पण्डितमण्डले बहुविधे वादाहवे जित्वरा
विख्याता अपि वादिनः क्षणमलं स्थातुं न येषां पुरः।
वाग्देवी सततं यदीयरसनारङ्गस्थले नृत्यति
प्रीत्या, यैर्विहिता जनोपकृतयेऽनेके निबन्धा वराः।।६६।।

अशेषसद्गुणगणपरीक्षणनिकषोपलाः समस्तविद्यानिस्तुलव्याख्यातारः त्यागमूर्तयो महनीयचरिता ऋषिकल्पाः जयपुरराजकीयविश्वविद्यालये भूतपूर्वसंस्कृतप्रधानाध्यापकाः श्रीद्राविडवीरेश्वरशास्त्रिणोऽपि शिष्या एव शास्त्रिवराणाम्–

सत्पक्षस्य समर्थनाय सततं ये सादराः सर्वतो
विद्वत्संसदि गीष्पतेरपि पुरो येषां न भीर्लेशतः।
यैरात्मार्जितभूरिवित्तमखिलं सत्पाठशालाकृते
दत्वा दम्भजुषां धनैकजनुषां वैलक्ष्यमुत्पादितम्।।६७।।

श्रीमन्तोऽनेकमहीपालशिरोमुकुटमाणिक्यरञ्जितचरणनखद्युतयः श्रीमन्नेपालसम्राड्गुरवो विद्वद्धौरेयाः श्रीहेमराजगुरवोऽपि प्रियतमाः शिष्याः शास्त्रिवराणाम्–

नम्राः प्राञ्जलयो बुधाः प्रतिदिनं तिष्ठन्ति यत्प्राङ्गणे
नेपालाधिपतिर्बिभीर्विहरतेर्यन्मन्त्रते जोबलात्।
वाग्देवी च रमा च यान् बुधवरान् तुल्यात्मना सेवते
कीर्तिश्चन्द्रसमा हिमालयमपि प्रायो हसत्युच्चकैः।।६८।।

श्रीमन्तोऽनन्तसामन्तमौलिलालितचरणाः विद्यावतामग्रेसराः प्रबलप्रतापशालिनः काशिकाधीशाः श्रीमत्प्रभुनारायणसिंहशर्माणोऽपि सुचिरं शास्त्रिवराधिगतविद्याः शिष्यनिभा एव शास्त्रिवराणाम्–

यैरेवाऽद्य गुणोत्तरैर्विजयते राजन्वती भूरियं
येषां कर्मठतां विलोक्य सहसा सत्यं युगं स्मर्यते।
यद्दानोदकपूर एव बहुलो गङ्गात्मना निर्गतो
यत्कीर्त्या शशिशुभ्रया सह पुनः पाथोनिधिं गाहते।।६९।।

श्रीमन्तः सकलदर्शनकोविदाः बहुविधपरीक्षाम्बुधिसन्तरणाधिगतामन्द-बिरुदावलयः सम्प्रति काशिकराजकीयसंस्कृतपाठशालायां मीमांसाद्व्याध्यापकाः श्रीबालबोधमिश्रशर्माणोऽपि प्रियशिष्या एव शास्त्रिपादानाम्–

शास्त्राणि सर्वाण्यपि पाठयद्भि-
यैर्निर्भयं शान्तिमतां धुरीणैः।
अध्यापनोत्थं किल सद्गुरूणां
संरक्षितं गौरवमादरेण।।७०।।

अन्येऽपि श्रीमन्मुकुन्दझाशर्माणः श्रीमच्चक्रधरझाप्रभृतयश्च सङ्ख्यातिगा विद्वत्कुलालङ्काराः श्रीशास्त्रिवराणां शिष्या अद्याऽपि पण्डितमण्डले सुप्रतिष्ठितास्तिष्ठन्त्येव। येषां सर्वेषां नामानुकीर्त्तनमिह विस्तरभिया परिहृतम्।

श्रीमतां वैदिकमूर्धन्यानां श्रीबालकृष्णभट्टानां पौत्रः श्रीमान् व्याकरणाचार्यो धर्मशास्त्रादिष्वपि प्ररूढप्रौढव्युत्पत्तिर्नेने- इत्युपाख्यो गोपालशास्त्रिशर्माऽपि सुहृत्तमोऽस्माकं चरमशिष्यः शास्त्रिवराणाम्-

सम्राट्स्थापितकाशीस्थसुरगीर्मन्दिरे वरे।
अध्यापकपदे नूत्ने नियुक्तो यो विराजते।।७२।।

ये च शास्त्रिवराणां प्रथिता अपि शिष्या दुर्दैवादल्पायुषो दिवं गता स्तेष्वपि कतिपयानां नामानि कीर्त्यन्ते।

काशीस्थभट्टकुलरत्नमनन्तकीर्ति-
र्विद्वत्तमो विविधवादिगणस्य जेता।
नेता गणस्य च दिवाकरनामधेयो
भट्टो बभूव बत सद्गुरुपट्टशिष्यः।।७३।।
काशीस्थराजवरसंस्कृतपाठशाला-
संख्यावतां धुरि समेधितकीर्तिराशिः।
धर्माधिकारिकुलसागरकौस्तुभश्री-
र्नागेश्वरोऽपि च सुताधिक एव शिष्यः।।७४।।
आज्ञां प्राप्य गुरोरवेतनमलं यैः पठिता निःस्पृहै-
श्छात्राः सन्ति सहस्रशोऽत्र विदुषां वृन्देषु ये पूजिताः।
श्रीबाबाऽपरनामका गुरुवराः श्रीरामचन्द्राभिधाः
शिष्यास्ते प्रथिताः कृतं नु खलु यैर्लोकोपकारव्रतम्।।७५।।
शेषान्वयक्षीरसमुद्रजन्मा
बभूव विप्रः शिवरामनामा।
यः शास्त्रिवर्यस्य सुशिष्यभाव
मासाद्य विद्वन्मतकीर्तिरासीत्।।७६।।

श्रीकाशिकासुरगवीसदने प्रसिद्धे
योऽध्यापकत्वमधिगम्य बहुप्रयत्नैः।
विख्यातिमान् मदनमोहन पाठकाख्यः
शिष्यो गुरोः समभवद् बुधवृन्दमान्यः।।७७।।
पूनाऽभिधाननगरस्थितराजकीय-
पाठालये सुरगिरां प्रथमः प्रवक्ता।
षड्दर्शनीविमलधीस्तु मुकुन्दशास्त्री
शिष्यो गुरोर्विजितदक्षिणदिग्बुधेन्द्रः।।७८।।
नानानिबन्धरचनाजनितावदात-
कीर्तिर्गुरोश्चरणयोरतिभक्तिशाली।
सङ्गीतविद् बुधवरस्तु सुदर्शनाख्यः
शास्त्री बभूव गुरुवर्यविशिष्टशिष्यः।।७९।।
येऽस्मन्मूर्धनि सर्वदा समुदितास्तिष्ठन्ति तेजोमया
वर्षन्ति स्फुटमुच्छ्रितामनुपलं तां वाक्सुधां निस्तुलाम्।
येषां प्रेरणया मया विरचितः सोऽयं निबन्धोऽधुना
ते धन्याः सततं जयन्ति चरणाः श्रीमद्गुरूणां मम।।८०।।
नित्यानन्दवपुर्निरन्तरन्तरगलद्वात्सल्यपूरोत्तरो
नागेशप्रणयप्रसाधितमहाहारप्रकारोद्धुरः।
रामे लक्ष्मणसंयुते कृतमना यो भालचन्द्रात्मकः
श्रीदामोदरपाणिसेवितपदः पायात्स गङ्गाधरः।।८१।।
श्रीगङ्गाधरसद्गुरुप्रतिफलत्सारस्वतज्योतिषः
श्रीरामाङ्घ्रिनिषेवणाप्तसुमतेः सन्तीर्णशास्त्राम्बुधेः।
श्रीमद्भैरवनायकात्मजनुषः सद्धर्मलक्ष्मीजुषः
श्रीनारायणशर्मणः कृतिरियं विद्वन्मुदे जायताम्।।८२।।
वेदाष्टाङ्कधरासंख्ये विक्रमार्कस्य वत्सरे।
ज्येष्टशुक्लप्रतिपदि कृतिरेषा समापिता।।८३।।

।। इति श्रीखिस्ते-इत्युपनामकनारायणशास्त्रिणा प्रणीते विद्वच्चरितपञ्चके
श्रीगङ्गाधरशास्त्रिचरितं नाम प्रथमः परिच्छेदः।।

विषयानुक्रमः

गौरवग्रन्थमाला-१

म.म. गङ्गाधरशास्त्रिप्रणीतः

अलिविलासिसंलापः

(शास्त्रकाव्यम्)

विद्यावतीसुतरमाकान्तप्रणीतया गङ्गाख्यया व्याख्यया भाषानुवादेन च सनाथितः

नास्तिकदर्शनविमर्शात्मकः पूर्वार्द्धः

टीकाकारोऽनुवादकः सम्पादकश्च

डॉ. रमाकान्तपाण्डेयः

अलिविलासिसंलापः
(शास्त्रकाव्यम्)
डॉ. रमाकान्तपाण्डेयः

प्रथमशतकम्

विषयानुक्रमणिका

कामिव्याहार[१]मुक्ताचरण[२]गुरुगुणान्[३] पापिनामप्रबोधं,[४]
तत्सङ्गाद् भूरिकष्टं,[५] तदनुसृतिहठाच्चावमानानुतापौ[६]।
आत्मज्ञं,[७] वृत्तिभेदानिह कलुषधियां,[८]शिष्यसेवोपदेश-
ज्ञानोत्कर्षप्रकारान्[९]शतक इह बुधाः सूक्ष्मदृष्ट्या विदन्तु।।

---

१. ४ श्लोकमारभ्य २२ श्लोकपर्यन्तम्।
२. २५ श्लोकमारभ्य ३३ श्लोकपर्यन्तम्।
३. ३५ श्लोकमारभ्य ४२ श्लोकपर्यन्तम्।
४. ४३ श्लोकमारभ्य ४९ श्लोकपर्यन्तम्।
५. ५० श्लोकमारभ्य ५५ श्लोकपर्यन्तम्।
६. ५६ श्लोकमारभ्य ३६ श्लोकपर्यन्तम्।
७. ५७ श्लोकमारभ्य ६० श्लोकपर्यन्तम्।
८. ६३ श्लोकमारभ्य ६९ श्लोकपर्यन्तम्।
९. ७२ श्लोकमारभ्य ९८ श्लोकपर्यन्तम्।

म.म.गङ्गाधरशास्त्रिप्रणीतः

अलिविलासिसंलापः

विद्यावतीसुतरमाकान्तकृतया गङ्गाख्यया व्याख्यया

राष्ट्रभाषानुवादेन च समलङ्कृतः

प्रथमशतकम्

।।१।।

विद्या विद्यत एव यत्र सततं वेद्यो न यो रागिणां
यं वैद्यं मनसा प्रपद्य विषयव्यालेष्वभीका बुधाः।
वेदाशेषविचारसीमविलसत्सिद्धान्तभूमिः स मे
विद्युत्य द्यतु हृद्यवद्यमखिलं श्रीवैद्यनाथः शिवः।।

अन्वयः- यत्र सततं विद्या विद्यत एव, यः रागिणां न वेद्यः, बुधा यं वैद्यं मनसा प्रपद्य विषयव्यालेषु अभीका (भवन्ति)। सः वेदाशेषविचार-सीमविलसत्सिद्धान्तभूमिः श्रीवैद्यनाथः शिवः मे हृदि विद्युत्य अखिलम् अवद्यं द्यतु।

विद्यावतीसुतरमाकान्तविरचिता

।। गङ्गा ।।

स्मृत्वा गङ्गाधरं गङ्गाधरवागर्थवित्तये।
विद्यावतीसुतो गङ्गां रमाकान्तस्तनोत्यसौ ।। १।।

गङ्गालङ्कृतकेशपाशमहिभिर्व्याप्ताङ्गयष्टिं मुदा
नत्वा देवशिरोमणिं शिवमुमासंसेवितं शङ्करम् ।
श्रीगङ्गाधरशास्त्रिणा विरचिते काव्ये मया लिख्यते
गङ्गाख्या विदुषः प्रणम्य कुतुकाद् व्याख्या सुधीरञ्जिनी ।।२।।

मान्यो मनीषिणां राधावल्लभो यो विराजते।
गुरुं तं नौमि विद्यासु गतिर्येन प्रवर्तिता।।३।।

पितामहं दयारामं वेदान्ते श्रीधरोपमम्।
पितरौ गुरुविप्रांश्च नौमि सर्वार्थसिद्धये।।४।।

विद्यावतीसुतेनेयं रमाकान्तेन गुम्फिता।
गङ्गाधरकृतेष्टीका गङ्गा स्याद्विदुषां मुदे।।५।।

शिष्टाचारानुमितकर्तव्यताकं प्रारिप्सितस्य ग्रन्थस्य समाप्तिप्रतिद्वन्द्विनो दुरितस्य प्रशमाय प्रचाराय च मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातर्णिां श्रोतृणाञ्चाऽनेनैव मङ्गलवत्त्वसम्पादनाय च सर्वतन्त्रस्वतन्त्रस्तत्रभवान् महाकविर्गङ्गाधरशास्त्री ग्रन्थे निबध्नाति – **विद्येति**– तच्च नैकविधेषु मङ्गलेषु समुचितेष्टदेवप्रार्थनारूपम्। समुचितत्वञ्च सर्वविधविद्यामोक्षादिप्रदायकत्वम्। तथा चोक्तिः – ज्ञानमिच्छेन्महेश्वरात्। यत्र यस्मिन् भगवति शिवे विद्या सततं सर्वदा विद्यत एव । विद्यानामाधारत्वान्न कदाचिदपि विद्याभ्यस्तद्वियोगः। यश्च शिवः रागिणां मायामोहादिव्याप्तमनसां न वेद्यः, न ज्ञेयोऽपितु योगिनामेव । यं वैद्यं भवरोगहर्तारं मनसा प्रपद्य बुधा विद्वांसः विषयव्यालेषु कामादयो विषया एव व्यालाः सर्पाः। 'आशीविषो विषधरश्चक्री व्यालः सरीसृप' इत्यमरः। तेषु अभीका निर्भीका भयरहिता इति यावत्। 'अभीकाः कामुके क्रूरे निर्भये त्रिषु ना कवौ' इति मेदिनी। भवन्तीति शेषः। स तादृशो वेदाशेषविचारसीमविलसत्सिद्धान्तभूमिः, वेदानाम् अशेषाः समग्रा ये विचाराः कर्मोपासनादयस्तेषां या सीमा उपनिषदस्तत्र विलसतां सुशोभमानानां सिद्धान्तानां भूमिः आधारः। समग्रवेदप्रतिपाद्य इति भावः। श्रीवैद्यनाथः शिवः, वैद्यानां चिकित्सकानां नाथः स्वामी। भवरोगहर्तृत्वेन वैद्येषु शिवस्य प्राधान्यम्। मे मम हृदि हृदये, अन्तःकरण इति यावत्। विद्युत्य प्रकटीभूय अखिलं सम्पूर्णम् अवद्यं यद् यद् गर्ह्यं तत्सर्वं दोषजातं द्यतु खण्डयतु, विनाशयत्विति। 'निकृष्टप्रतिकृष्टार्वरेफ याप्यावमाधमाः। कुपूयकुत्सितावद्य खेटगर्ह्याणकाः समाः' इत्यमरः। कवेः काशीवासित्वात् काश्यां च सर्वविद्याधिष्ठातुः शिवस्य प्राधान्यात् शिव एवाऽत्र प्रार्थितः। अत्र रूपकं व्यतिरेकश्चाऽलङ्कारौ। शार्दूलविक्रीडितं वृत्तम्।

अनुवाद– विद्या जिसमें सर्वदा विद्यमान है, जो रागियों के द्वारा नहीं जाने जा सकते, सांसारिक रोगों को दूर करने वाले जिस वैद्य का ध्यान करके विद्वज्जन काम-क्रोध आदि विषयरूप सर्पों से निर्भीक हो जाते हैं । समग्र वैदिकविचारों की सीमा में सुशोभित हो रहे सिद्धान्तों की आधारभूमि वह वैद्यनाथ शिव मेरे हृदय में प्रकट होकर कामादि समस्त दोषों को दूर करें।

।। २ ।।

वैषयिकब्रह्मविदोः पूर्वोत्तरपक्षशिक्षणे दाक्ष्यम्।
व्यक्त्या विवेक्तुकामैर्दृश्योऽसावलिविलासिसंलापः ।।

अन्वयः – वैषयिकब्रह्मविदोः पूर्वोत्तरपक्षशिक्षणे दाक्ष्यं व्यक्त्या विवेक्तुकामैः असौ अलिविलासिसंलापः दृश्यः।

गङ्गा– स्वेष्टं नमस्कृत्य ग्रन्थरचनाप्रयोजनं निरूपयति– **वैषयिकेति**– वैषयिकः कामादिसांसारिकभोगलोलुपः ब्रह्मवित् ब्रह्मतत्त्ववेत्ता चेति वैषयिकब्रह्मविदौ तयोः वैषयिकब्रह्मविदोः सांसारिकाणां चार्वाकादीनां ब्रह्मविदां ब्रह्मविद्योपासकानां चेति भावः। पूर्वोत्तरपक्षशिक्षणे दाक्ष्यम्, वैषयिकाणां पूर्वपक्षशिक्षणे ब्रह्मविदां चोत्तरपक्षशिक्षणे नैपुण्यं व्यक्त्या अभिव्यक्त्या व्यञ्जनया वा विवेक्तुकामैः, विवेक्तुं सदसत्परीक्षितुं कामः समीहा येषां तैः असौ मम प्रणीतः 'अलिविलासिसंलाप' इत्याख्यः काव्यविशेषः दृश्यः अवलोकनीयः। शास्त्रेष्वपि तादृशसिद्धान्तानां प्रतिपादितत्वाद् व्यक्त्येह काव्यरूपेण प्रतिपादनम् । शास्त्रेष्वभिधया प्रतिपादनान्न तत्र सहृदयानां तथा प्रीतिरिति काव्यविधयाऽस्मिन् काव्ये तेषां सिद्धान्तानां प्रतिपादनमिति विशेषः। आर्यागीतिच्छन्दः।

अनुवाद– वैषयिक और ब्रह्मवेत्ता के पूर्वपक्ष और उत्तरपक्ष के प्रतिपादन में निपुणता का व्यञ्जना द्वारा विवेक करने के इच्छुक सहृदयों को इस 'अलिविलासिसंलाप' को देखना चाहिए।

टिप्पणी– अलिविलासिसंलाप शास्त्रकाव्य है। कवि ने इसमें द्वादश दर्शनों के सिद्धान्तों की स्थापना अलि और विलासी द्वारा प्रदर्शित पूर्व और उत्तर पक्षों के माध्यम से की है। यद्यपि शास्त्रों में भी इन सिद्धान्तों का प्रतिपादन किया गया है तथापि काव्य रूप में निबद्ध होने के कारण यहाँ इन सिद्धान्तों में अपूर्व रमणीयता आ गयी है। अतः कवि ने व्यञ्जना के माध्यम से पूर्वपक्ष और उत्तरपक्षों का आस्वाद करने के इच्छुक मनीषियों को इस काव्य का अध्ययन करने के लिए कहा है।

।। ३ ।।

कदाचिदासन्नतमे वसन्ते
रसालसालाभिमुखोऽप्यलोलः।

सरोजिनीसौहृदनिःस्पृहोऽलि –
र्विलासिना सस्मितमेवमूचे ।।

अन्वयः – कदाचित् आसन्नतमे वसन्ते विलासिना रसालसालाभिमुखः अपि अलोलः सरोजिनीसौहृदनिःस्पृहः अलिः सस्मितम् एवम् ऊचे।

गङ्गा – काव्यपृष्ठभूमिमवतारयन्नाह–**कदेति**– कदाचित् आसन्नतमे वसन्ते कश्मिंश्चित् काले सन्निकटतमे वसन्ततौं विलासिना वैषयिकेण विषयवासनारतेन सांसारिकेणेति यावत् । रसालसालाभिमुखः सरोजिनीं कमलिनीं परित्यज्य आम्रवृक्षं प्रत्युन्मुखः अपि अलोलः अचञ्चलः आम्रमञ्जरीरसास्वादनं प्रति अनाकृष्टः सरोजिन्याः कमलिन्याः सौहृदे प्रेम्णि रसास्वादने निःस्पृहः स्पृहायाः निष्क्रान्तः वीतरागः अलिः ब्रह्मवित्प्रतीकभूतो भ्रमरः सस्मितं स्मितेन सह यथा स्यात्तथा एवं वक्ष्यमाणप्रकारेण ऊचे जगदे। उक्त इत्यर्थः। 'आम्रश्चूतो रसाल' इत्यमरः। 'वृक्षो महीरुहः शाखी विटपी पादपस्तरुः, अनोकहः कुटः सालः पलाशी द्रुद्रुमागमा' इत्यमरः। उपेन्द्रवज्रावृत्तम्। विरोधाभासोऽलङ्कारः।

अनुवाद– एक बार वसन्त ऋतु के सन्निकट आने पर आम्रवृक्ष की ओर उन्मुख होता हुआ भी आम्रमञ्जरी के रसास्वादन के लिए अनाकृष्ट तथा कमलिनी के प्रेम के प्रति निःस्पृह भ्रमर से मुस्कुराते हुए विलासी ने इस प्रकार कहा ।

।। ४।।

सखे! हिमानीहतिहीनशोभां
पुरा चिरं चोरितचित्तवृत्तिम्।
उपस्थितामोदरसप्रसारां
सरोजिनीं सम्प्रति मावमंस्थाः।।

अन्वयः – हे सखे हिमानीहतिहीनशोभां पुरा चिरं चोरितचित्तवृत्तिं उपस्थितामोदर–सप्रसारां सरोजिनीं सम्प्रति मा अवमंस्थाः।

गङ्गा– विलासिनोक्तं विशदीकरोति– **सख इति**–हे मित्र! हिमानीहतिहीनशोभाम्, हिमान्याः हिमसंहत्याः 'हिमानी हिमसंहतिः' इत्यमरः। हतेः प्रहारात् हीना क्षीणतां गता शोभा यस्यास्तादृशीम्। शिशिरर्तौ तुषारपातेन नष्टशोभामित्यर्थः। पुरा पूर्वकाले शोभानाशात् पूर्वं चोरिता वशीकृता चित्तवृत्तिः यया तादृशीम्। उपस्थितामोदरसप्रसाराम् उपस्थितः आमोदरसयोः प्रसारः यस्यास्तादृशीं

सरोजिनीं कमलिनीं सम्प्रति वसन्तकालप्राप्तावस्यां यदा प्रियस्य आवश्यकता सर्वथानुभूयते तदा मा अवमंस्थाः तस्या अवमाननं मा कुर्विति भावः। पक्षे पतिव्रतधर्मपरायणायाः स्वकीयाया अपि तादृशावस्थापन्नाया बोधः।'सरोजिनीं सम्प्रति मावमंस्थाः' इत्यस्य परेणाऽप्यन्वयः।

अनुवाद- हे सखे! भ्रमर! तुषारपात से नष्ट हुई शोभा वाली, पूर्व में चिरकाल तक तुम्हारे चित्त को वश में करने वाली, जिसके आमोद रस का प्रसार उपस्थित है, उस कमलिनी की इस समय अवमानना मत करो।

टिप्पणी- यहाँ लम्पट प्रियतम द्वारा प्रतारित पतिव्रतधर्मपरायणा नायिका व्यङ्ग्य है।

।।५।।

अनेकधामाघविशालकुन्द -
लतापरागस्थगितात्मरूपः।
प्रभातमारभ्य निरस्तमानं
मधूनि सम्पाय्य ययाऽऽदृतोऽसि।।

अन्वयः - यया अनेकधामाघविशालकुन्दलतापरागस्थगितात्मरूपः त्वम् अलिः प्रभातम् आरभ्य निरस्तमानं मधूनि सम्पाय्य आदृतः असि (तां सरोजिनीं सम्प्रति मा अवमंस्थाः)।

गङ्गा- कीदृश्याः सरोजिन्या इति विशदयति - **अनेकेति**- अलिस्वभाव-प्रतिपादकम् अनेकधेत्यादिपदं श्लिष्टम्। कीदृशस्त्वमलिः ? अनेकधामाघविशाल-कुन्दलता-परागस्थगितात्मरूपः, अनेकधा अनेकप्रकारेण बहुविधैः आकारप्रकारैः विविधभावभङ्गिमभिर्वा माघे मासविशेषे विकसितायाः रजस उत्कर्षेण सौन्दर्यं प्राप्तायाः कुन्दलतायाः परागेण मकरन्दैः स्थगितं निलीनम् आत्मरूपं यस्य तादृशः। नीलवर्णोऽपि अलिः कुन्दलतायाः शुक्लपरागाणां सम्पर्कात् शुक्लत्वं प्राप्नोत्। कुन्दलताया रागेण रञ्जितोऽभवदित्यर्थः। स च शुक्लीभावः परस्त्रीलोलुपत्वं तया समागमञ्च तस्य द्योतयति। तथात्वेऽपि सम्पादितपरस्त्रीसम्भोगस्त्वं यया प्रभातमारभ्य तव परस्त्रीसम्भोगापराधं तिरस्कृत्य मधूनि सम्पाय्य पुष्परसान् सम्यक्तया पाययित्वा निरस्तमानं मानापगमनं यथा स्यात्तथा सादरं स्नेहभाजनं कृतोऽभूः। तस्याः सरोजिन्या अपमानो नोचित इति भावः।

अथवा – अनेकधामा अनेकानि धामानि रतिस्थानानि यस्य स: अनेकधामा। भ्रमरस्य इतस्ततो मकरन्दलोभात् नानालतासु भ्रमणस्वभावात् तस्य बहुनायिका–सक्तत्वम्। तस्य न सरोजिनीमात्रनिष्ठत्वम्। सरोजिनीप्रियस्य अले: प्रणयपात्रत्वात् अघै: पापैर्विशाला पापाधिक्ययुक्ता या कुन्दलता तत्समागमरूपं यत् परम् आगोऽपराधस्तेन लज्जया स्थगितं सङ्कोचं प्रापितम् आत्मरूपं येन तादृशम् अलिं प्रभातम् प्रातरारभ्य विकासकालादारभ्य निरस्तमानं मानापगमनं यथा स्यात्तथा मानरहिता सती आदिवसं मधूनि, मकरन्दं सम्पाय्य पुष्परसान् सम्यक्तया पाययित्वा आदरं कृतवती। तया सपत्नीसमागमो न परिगणित:। तादृशीं सरोजिनीं परित्यज्य अन्यत्र गमनमनुचितमिति भाव:। भ्रमरशब्दोऽत्र नायकस्योपलक्षक: कुन्दलताशब्द: परनायिकाया उपलक्षक:, सरोजिनी च प्रियाप्रतीकभूतेति।

अनुवाद– माघ में विविध वर्णों के साथ विकसित कुन्दलता के पराग से अपने रूप को छिपाने वाले तुझ भ्रमर को प्रात:काल से प्रारम्भ कर मान किये बिना जिसने तुझे अपने मकरन्द का पान करा कर तुम्हारा आदर कियाद,उस सरोजिनी को छोड़ कर तुम्हारा अन्य नायिका के प्रति आसक्त होना उचित नहीं।

अथवा जो सरोजिनी अनेक नायिकाओं में आसक्त रहने वाले तुझ भ्रमर के कुन्दलता के समागम रूप अपराध को भूल गयी और लज्जा से संकुचित शरीर वाले तुझ भ्रमर को जो प्रात:काल से मानरहित होकर अपने मकरन्द का पान कराती रही और तुम्हारा आदर करती रही (उस सरोजिनी को छोड़ कर तुम्हारा अन्य नायिका में आसक्त होना ठीक नहीं)।

टिप्पणी– प्रस्तुत प्रसंग में भ्रमर से परनायिकालोलुप नायक, सरोजिनी से नायक की प्रिया तथा कुन्दलता से परनायिका रूप अर्थ व्यङ्ग्य है।

।। ६ ।।

सहस्रवस्वागमरम्यरूपा
सहासवक्त्रैव रविं प्रतार्य।
निसर्गलोले त्वयि सादरा या
निशामशेषामुपगूह्य रेमे।।

अन्वय:– सहस्रवस्वागमरम्यरूपा सहासवक्त्रा एव रविं प्रतार्य या निसर्गलोले त्वयि सादरा सती अशेषां निशाम् उपगूह्य रेमे, (तां सरोजिनीं सम्प्रति मावमंस्था:)।

गङ्गा– सहस्रेति– पुनः कीदृशीं सरोजिनीम् ? सहस्रवस्वागमरम्यरूपेत्यत्र वसुशब्दः नानार्थकः। 'देवभेदेऽनले रश्मौ वसू रत्ने धने वसु' इत्यमरः। सहस्रवस्वागमरम्यरूपा, सहस्रं वसवो रश्मयो यस्य सः सहस्रवसुः असंख्यकिरणः सूर्यः। तस्य सहस्रवसोः आगमनेन उदयेन रम्यं विकासेन रमणीयं रूपं यस्याः सा सरोजिनी। अथवा सहस्राणाम् अपरिमितानां वसूनां धनधान्यरत्नादीनाम् आगमनेन प्रापणेन रमयितुं योग्यं रूपं यस्याः सा। सर्वस्वदानेनाऽपि समागमयोग्येत्यर्थः। सहासवक्त्रा हासयुक्तवक्त्रमात्रेण रविं प्रतार्य स्वपतिं सूर्यं वञ्चयित्वा निसर्गलोले प्रकृत्या चपले परस्त्रीसमागमासक्तस्वभावेऽपि त्वयि अलौ सादरा, आदरयुक्ता सती या सरोजिनी अशेषां समग्रां निशाम् उपगूह्य रेमे रमणं कृतवती। स्वपतिं सूर्यं हासमात्रेण वञ्चयित्वा या तस्मिन्नस्तङ्गते मुकुलतां प्राप्य अन्तःप्रविष्टेन त्वया आरात्रिं रमणं कृतवती तस्यास्त्वया अवमाननं न कर्तव्यम्। पक्षे तादृशनायिकाऽपि व्यज्यते।

अनुवाद– सहस्रकिरण सूर्य के आगमन से जो खिल उठती है, अथवा बहुमूल्य रत्न आदि देकर भी जो समागम करने योग्य है, हासमात्र से अपने प्रिय सूर्य को वंचित करके जिसने स्वभाव से चंचल तुझ भ्रमर का आदर किया और सम्पूर्ण रात तुम्हारा आलिङ्गन करके रमण किया (उस सरोजिनी की अवमानना करना उचित नहीं)।

टिप्पणी– सूर्य से नायक तथा सरोजिनी से नायिका व्यङ्ग्य है।

।।७।।

वसन्तमारभ्य शरन्निशान्तं
त्वदीयसङ्गीतकमात्रलुब्धा।
मुदा भवन्तं परिरभ्य हृष्टा
रसार्पणे या प्रणयं दधाति।।

अन्वयः – वसन्तमारभ्य शरन्निशान्तं त्वदीयसङ्गीतकमात्रलुब्धा मुदा भवन्तं परिरभ्य हृष्टा या रसार्पणे प्रणयं दधाति (तां सरोजिनीं सम्प्रति मावमंस्थाः)।

गङ्गा– वसन्तमारभ्य शरदन्तं यावत्कमलिनीकृतमुपकारं स्मारयति– **वसन्तेति**– पुनः कीदृशीम् ? वसन्तमारभ्य, वसन्तम् ऋतुविशेषम् आरभ्य शरन्निशान्तं यावत् त्वदीयसङ्गीतकमात्रलुब्धा, त्वदीयस्य भ्रमरस्य सङ्गीतकमात्रेण लुब्धा गानमात्रेण दत्तचित्ता या सरोजिनी भवन्तम् अलिं मुदा प्रसन्नमनसा परिरभ्य आलिङ्ग्य हृष्टा

रोमाञ्चिता सती, 'हृष्टो रोमाञ्चितेऽपि च। जातहर्षे प्रतिहते विस्मितेऽप्यभिधेयवत्' इति मेदिनी। या रसार्पणे प्रीतेः मकरन्दस्य च रसप्रदाने प्रणयं दधाति।'तां सरोजिनीं सम्प्रति मावमंस्थाः' इति पूर्वेणान्वयः।

अनुवाद- वसन्तकाल से लेकर शरद् ऋतु के प्रभात तक जो तुम्हारे संगीतमात्र में लुब्ध रही तथा तुम्हारे आलिङ्गनमात्र से रोमाञ्चित होती रही, जो अपनी प्रीति या मकरन्द का दान करने में ही प्रणय रखती है (उस सरोजिनी की अवमानना करना उचित नहीं)।

।।८।।

त्वमल्पकालं सुमनोभृतायां
प्रम्लानकान्त्यां नवमल्लिकायाम्।
चिरोपभोगक्षमरम्यरूपां
यां प्राप्य चित्ते न विषादमेषि ?।।

अन्वयः - त्वम् अल्पकालं सुमनोभृतायां प्रम्लानकान्त्यां नवमल्लिकायां चिरोपभोगक्षमरम्यरूपां यां प्राप्य चित्ते विषादं न एषि (तां सरोजिनीं सम्प्रति मा अवमंस्थाः)।

गङ्गा - मल्लिकाया वसन्तर्तुमात्रोपभोगक्षमत्वं वर्णयति- **त्वमिति**- हे भ्रमर! त्वम् अल्पकालं केवलं वसन्तौ सुमनोभृतायां पुष्पितायां तथा च गते वसन्ते प्रम्लानकान्त्यां तस्यां नवमल्लिकायां मालत्याम्। मालती केवलं वसन्ते पुष्यतीति कविसम्प्रदाये प्रसिद्धिः। त्वं च स्वल्पकालं विकसितायां तस्यामासक्तोऽल्पकालेन सौकुमार्यातिशयान्म्लानायां तस्यां तां विहाय समागतः सापराधोऽपि सरोजिन्या नावधीरितो भवसि। चिरोपभोगक्षमरम्यरूपां चिरकालं वसन्ताद् आरभ्य शरदृतुं यावत् उपभोगक्षमं भोगयोग्यं रूपं यस्यास्तादृशीं यां सरोजिनीं प्राप्य विषादं न एषि न प्राप्नोषि। सदैव भोगवान् भूत्वा सुखमनुभवसीत्यर्थः। तां सरोजिनीं सम्प्रति मा अवमंस्था इति चतुर्थश्लोकेनान्वयः। 'न स्याज्जाती वसन्ते' इति कविसम्प्रदायप्रामाण्यात् नवमल्लिकायाः केवलं वसतन्तौ विकासवर्णनम्।

अनुवाद- हे भ्रमर! केवल वसन्त ऋतु में खिल कर कुम्हला जाने पर मालती को छोड़ कर शरद् ऋतु से लेकर वसन्त ऋतु तक समान रूप से खिली रहने वाली जिस सरोजिनी को पाकर तुम कष्ट का अनुभव नहीं करते (उस सरोजिनी की

अवमानना करना उचित नहीं)।

।।९।।

गुणावलीपूर्णतमान्तरङ्गां
यामुत्सुकां त्वद्विरहेण नूनम्।
दूरागतः स्तोकरसैकगीति -
विनिद्रनेत्रां रमयन्नवात्सीः।।

अन्वयः - दूरागतः गुणावलीपूर्णतमान्तरङ्गां त्वद्विरहेण नूनम् उत्सुकां स्तोकरसैकगीतिविनिद्रनेत्रां यां रमयन् अवात्सीः (तां सरोजिनीं सम्प्रति मा अवमंस्थाः)।

गङ्गा- पुनः कीदृशीं सरोजिनीमिति वर्णयति- **गुणेति**- गुणावलीत्यत्र गुणशब्दः कमलिनीपक्षे नायिकापक्षे च श्लिष्टः। 'गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये' इति मेदिनी। 'गुणो ज्यासूत्रतन्तुषु' इति च हैमः। दूरागतः दूरात् नवमल्लिकायाः सकाशात् तया साकं रमणं विधाय समागतः त्वम्, गुणानां सौन्दर्यादीनाम् अवली पंक्तिः तया पूर्णतमोऽन्तरङ्गं यस्याः सा गुणावलीपूर्णतमान्तरङ्गा, ताम्। तादृशीं नायिकामित्यर्थः। अथवा गुणावलीभिः मृणालतन्तुभिः पूर्णतमान्तरङ्गाम्। मृणालान्तस्तन्तुभरितामित्यर्थः। त्वद्विरहेण अन्यनायिकासक्तस्य अलेस्तव अनागमनेन अतिशयेन उत्सुकाम् उत्कण्ठिताम्, स्तोकरसैकगीतिविनिद्रनेत्राम्, स्तोकः स्वल्पः रसः यस्यां तादृश्या एकया एव गीत्या तस्याः सविधे स्वागमनसङ्केतसूचिकया, विनिद्रनेत्राम्, विनिद्रे विकसिते नेत्रे यस्यास्ताम्। अथवा परनायिकासक्तत्वात् स्तोकः रसः प्रेमभावः यस्यां तादृश्या गीत्या आगमनसूचकगुञ्जनारवेण अपि विनिद्रनेत्रां विकसितकमललोचनाम्। अन्यनायिकासक्तत्वेऽपि तव कृत्रिमरागेणाऽपि प्रसन्नामिति भावः। रमयन् रमणं कुर्वन् अवात्सीः, सुखेन निवासम् अकार्षीरित्यर्थः। भ्रमरव्यवहारेण तादृशनायकोऽपि व्यज्यते।

अनुवाद- सौन्दर्य अथवा मृणालतन्तुओं से परिपूर्ण अंगो वाली, तुम्हारे विरह में उत्कंठित रहने वाली, दूर से (मल्लिका रूपी अन्य नायिका से रमण करके) आये हुए तुझ भ्रमर के स्वल्प रस या प्रेम से परिपूर्ण एक गीत को सुनकर जिसके नेत्र कमल खिल गये हैं, ऐसी जिस सरोजिनी के साथ रमण करते हुए तुमने निवास किया(उस सरोजिनी की अवमानना करना उचित नहीं)।

टिप्पणी–यहाँ सरोजिनी से नायिका तथा भ्रमर से नायक व्यंग्य है। भ्रमर द्वारा सरोजिनी के साथ किये गये व्यवहार से तादृश नायक और नायिका का व्यवहार भी व्यङ्ग्य है।

।।१०।।

स्वभावसिद्धातुलदण्डकोशा
भवन्तमालिङ्ग्य निशां नयन्ती।
मिलिन्द! मन्ये गजमीलिकाभि–
र्या राजतो नैव मनाग् बिभेति।।

अन्वयः – हे मिलिन्द! स्वभावसिद्धातुलदण्डकोशा भवन्तम् आलिङ्ग्य निशां नयन्ती या गजमीलिकाभिः राजतः मनाग् नैव बिभेति (इति) मन्ये (तां सरोजिनीं सम्प्रति मा अवमंस्थाः)।

गङ्गा – सरोजिन्या गुणान्तरं वर्णयति– **स्वभावेति**– हे मिलिन्द! हे भ्रमर! स्वभावसिद्धातुलदण्डकोशा दण्डश्च कोशश्चेति दण्डकोशौ सेनाधनसङ्ग्रहौ कमलनालः कुड्मलं चेति। स्वभावेन प्रकृत्या सिद्धौ अतुलौ दण्डकोशौ यस्याः तादृशी। दण्डकोशपदेऽत्र श्लिष्टे। सरोजिनीपक्षे दण्डशब्दः मृणालदण्डवाचकः कोशशब्दश्च कुड्मलवाचकः। चन्द्ररूपराजपक्षे दण्डः सैन्यवाचकः कोशश्च धनसङ्ग्रहवाचकः। तथा च विश्वः – 'दण्डो यमे मानभेदे लगुडे दमसैन्ययोः'। 'कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके'। जातिकोशेऽर्थसंघाते पेश्यां शब्दादिसंग्रहे' इति मेदिनी। प्रकृतिसिद्धातुलदण्डकोशा या भवन्तम् अलिम् आलिङ्ग्य निशां रात्रिं नयन्ती गमयन्ती गजमीलिकाभिः उपेक्षासूचिकाभिः क्रियाभिः राजतः नृपतेः चन्द्राच्च मनाग् अपि स्वल्पमपि न बिभेति, न भयं करोति। रात्रौ कुसुमानि मीलयित्वा त्वया सह रमणं कुर्वती सा सरोजिनी चन्द्ररूपराज्ञ उपेक्षां करोति। अतो न सा केवलं सौन्दर्यवती, बलवती अपीति हेतोर्न त्वया साऽवमान्येति तात्पर्यम्।

अनुवाद – हे भ्रमर! स्वभावसिद्ध अनुपम दण्ड और कोश से युक्त, तुम्हारा आलिंगन करके रात बिताने वाली जो सरोजिनी उपेक्षासूचक अपने अभिनय से चन्द्ररूपी राजा से जरा भी नहीं डरती (उस सरोजिनी की अवमानना करना उचित नहीं)।

टिप्पणी – यहाँ प्रयुक्त दण्ड और कोश शब्द श्लिष्ट हैं। सरोजिनी के पक्ष में दोनों क्रमशः मृणालदण्ड एवं बंद कली के वाचक हैं तथा राजा के पक्ष में सैन्य

तथा धन संग्रह आदि के। सरोजिनी के अनुपम दण्ड और कोश प्रकृत्या सिद्ध हैं, अत: वह रात में अपनी पंखुड़ियों को सिकोड़ कर चन्द्र की उपेक्षा करती हुई मानों उससे नहीं डरती। जानबूझ कर उसकी अवमानना करती है।

।। ११।।

अलं तपत्युत्कटहानिदाघे-
ऽप्यनारताभुग्नमृणालबाहु:।
त्वया समं या सरसीं विगाह्य
व्यात्युक्षिकां निर्वृतये तनोति।।

अन्वय: - उत्कटहानिदाघे अलं तपति अपि या अनारताभुग्नमृणालबाहु: त्वया समं सरसीं विगाह्य व्यात्युक्षिकां निर्वृतये तनोति (तां सरोजिनीं सम्प्रति मा अवमंस्था:)।

गङ्गा - वसन्ते सरोजिनीकृतमुपकारमुपवर्ण्य ग्रीष्मे तदुपकारं स्मारयति- **अलमिति**- 'उत्कटहानिदाघे' उत्कटां हानिं ददातीति उत्कटहानिदस्तादृशे अघे अन्यनायिकासक्तत्वरूपे अघे पापे सत्यपि अथवा कटात् उत्क्रान्त: उत्कट:, तत्सम्बुद्धौ उत्कट! इति भृङ्गविशेषणमिदम्। अस्मिन् पक्षे 'हे उत्कट! हा निदाघे' इति योजना। हा इति विषादसूचकमव्ययम्। 'हा विषादे च शोके च कुत्सादु:खार्थयोरपि' इति मेदिनी। निदाघे ग्रीष्मे अलं तपति सति। 'गण्ड: कट' इत्यमर:। हे उत्कट! गतमदजलात् गजगण्डस्थलात् समागत! न तु प्रीत्या, अनारताभुग्नमृणालबाहु:, अनारतं सततम् आभुग्न: आ सम्यक्तया भुग्न: शिथिल: वक्र: ग्रीष्मकारणात् विनत: पतितो वा मृणालरूपो बाहु: यस्यास्तादृशी सा सरोजिनी त्वया भ्रमरेण सह सरसीं सर: विगाह्य व्यात्युक्षिकां जलक्रीडां निर्वृतये सन्तृप्तये तनोति विस्तारयतीत्यर्थ:। ग्रीष्मे तपति शिथिले मृणाले भृङ्गभारेण कमलकुसुमेन सह भृङ्गस्य जले निपातोऽत्र कविना जलक्रीडात्वेनोत्प्रेक्षित:। 'कासार: सरसी सर:' इत्यमर:।

अनुवाद - ग्रीष्म ऋतु में गज के गण्डस्थल का मद सूख जाने के कारण, अथवा मल्लिकारूपी अन्य नायिका में आसक्ति रूप उत्कट हानि देने वाले पाप से युक्त होकर सरोजिनी के पास आये हे भ्रमर! शिथिल हुए अपनी मृणाल बाहु से सरोवर में गिर जाने के बाद भी जो तुम्हारे साथ उस सरोवर का अवगाहन करके जलक्रीडा का विस्तार करती है (उस सरोजिनी की अवमानना करना उचित नहीं)।

टिप्पणी – 'उत्कटहानिदाघे' पद की अनेक प्रकार से व्युत्पत्ति की जा सकती है। 'कटाद् गजगण्डस्थलात् उत्क्रान्तः इति उत्कटः' इस पक्ष में 'उत्कट' पद भृङ्ग का विशेषण सम्बोधन पद है। 'उत्कटाया हानेः दातरि अन्यनायिकासक्तिरूपे अघे सत्यपि त्वया सह व्यात्युक्षिकां निर्वृतये तनोति' जैसी अर्थयोजना भी की जा सकती है।

।। १२।।

दिनेशमभ्रान्तनिलीनमूर्तिं
दृष्ट्वाऽपि जालापदुपैष्यतीति।
अचिन्तयन्ती भवदेकसङ्गात्
पङ्केऽपि वासं बहु मन्यते स्म!।।

अन्वयः – (या) अभ्रान्तनिलीनमूर्तिं दिनेशं दृष्ट्वा अपि जालापत् उपैष्यति इति अचिन्तयन्ती भवदेकसङ्गात् पङ्के अपि वासं बहु मन्यते स्म (तां सरोजिनीं सम्प्रति मा अवमंस्थाः)।

गङ्गा – वर्षासु सरोजिन्युपकारं वर्णयति–**दिनेशेति**– दिने दिवसे ईशः स्वामीति दिनेशः, न तु रात्रौ। सूर्यः सरोजिन्या दिवस एव भवति पतिः न तु रात्रौ। तदानीं स भवति अस्तङ्गत इत्यभिप्रायः। कीदृशं दिनेशम्? अभ्रान्तनिलीनमूर्तिम्। अभ्रा मेघास्तेषामन्ते अन्तस्तले निलीना निह्नुता मूर्तिः शरीरं यस्य तम्। 'अभ्रं मेघो वारिवाह' इत्यमरः। अथवा अभ्रान्तं निलीनमूर्तिं, निश्चयेन गुप्तदेहम्। स्वच्छन्दचारिण्या अस्याः सरोजिन्याः चरित्रपरीक्षणाय तत्प्रियः सूर्यो निश्चयेन निलीनो विद्यत इत्यभिप्रायः। तादृशं स्वप्रियं दृष्ट्वा अपि, जालापत् जालस्य कपटस्य आपत्, अथवा जलसम्बन्धिनी आपत्तिः उपैष्यति मां सरोजिनीं प्राप्स्यति इति अचिन्तयन्ती न विचारयन्ती भवदेकसङ्गात् पङ्के कर्दमे पापे वा वासं बहु मन्यते स्म। 'अस्त्री पङ्कं पुमान् पाप्मा पापम्' इत्यमरः। निलीनदेहेन प्रियेण यन्निरीक्षणं तत्कृतामापदं च भ्रमरे त्वयि अनुरागातिशयेन अविगणय्य त्वया सह वासं बहु मन्यते स्म।

अनुवाद – मेघों में शरीर छिपाये हुए अपने दिन के पति सूर्य को देखकर भी, कपटजन्य आपत्ति की चिन्ता न करती हुई, अतिशय प्रेम के कारण तुम्हारे साथ कीचड़ में रहना भी जिसे अति प्रिय था (उस सरोजिनी की अवमानना करना उचित नहीं)।

टिप्पणी – सरोजिनी के स्वैराचार को छिपकर देखने के लिये मानो सूर्य मेघों में छिप गया है। अथवा निश्चय ही जिसने अपना शरीर छिपा लिया है, ऐसे प्रियतम सूर्य से प्राप्त होने वाली कपटजन्य आपत्ति या जलसम्बन्धिनी आपत् को कुछ न मानती हुई जो सरोजिनी तुझ भ्रमर के अनुरागातिशय के कारण कर्दम में भी आनन्दपूर्वक रहती थी। 'पङ्क' शब्द को श्लिष्ट मान लेने पर इसका अर्थ 'पाप' भी किया जा सकता है। अतः जार तुझ भ्रमर के साथ पाप में भी रहना जिसे प्रिय था, यह अर्थ भी किया जा सकता है।

।। १३ ।।

चलस्य ते रागपरीक्षणाय
वर्षासु शश्वत्कपटावृताङ्गी।
मालत्युपेते त्वयि या सरोगा-
ऽप्प्रशस्यमाना तनिमानमेति।।

अन्वयः – चलस्य ते रागपरीक्षणाय वर्षासु शश्वत् कपटावृताङ्गी अप्प्रशस्यमाना सरोगा या त्वयि मालत्युपेते तनिमानमेति (तां सरोजिनीं सम्प्रति मा अवमंस्थाः)।

गङ्गा – चलस्येति – चलस्य चञ्चलस्य अनेकप्रियासक्तस्य ते भ्रमरस्य रागपरीक्षणाय अनुरागस्य परिज्ञानाय वर्षासु शश्वत्कपटावृताङ्गी कपटेन व्याजेन जलरूपेण वस्त्रेण च आवृतानि अङ्गानि यस्याः सा तादृशी या सरोजिनी अप्रशस्यः अनभिनन्दनीयः मानो यस्याः, अथवा अद्भिर्जलैः प्रकर्षेण शस्यमाना हिंस्यमाना च त्वयि भ्रमरे मालत्युपेते सति सरोगा सरोवरगता भवति, अथवा रोगेण सहिता तनिमानं दौर्बल्यम् एति प्राप्नोति। कपटेन व्याजेन आवृतानि अङ्गानि यस्याः सा। अथवा कपटावृताङ्गी इत्यत्र कं जलमेव पटः कपटः तेन आवृतानि अङ्गानि यस्याः सा। 'सरोगा' सरसीजले निमज्जितशरीरा भवतीत्यर्थः। वर्षाकाले जलाधिक्यात् सरोजिन्या निमज्जनं भ्रमरस्य प्रेमपरीक्षणाय भवतीत्युत्प्रेक्षते कविः।

अनुवाद – तुझ चंचल भ्रमर की प्रेम परीक्षा के लिये वर्षा ऋतु में (जलाधिक्य के कारण) जो कपट से अपने अंगों को आवृत कर लेती है अथवा जल रूप वस्त्र में अपने अंगों को छिपा लेती है। वही तुम्हारे मालती के पास चले जाने पर अपने मान का अभिनन्दन न देख कर, अथवा जलाधिक्य की मार से दुर्बलता को प्राप्त करती है (उस सरोजिनी की अवमानना करना उचित नहीं)।

।। १४।।

कलापिकेकाक्षरयुग्मसूच्यं
'त्वं केतकीकामुक' इत्यनिष्टम्।
श्रुत्वेव या जीवितनिर्व्यपेक्षा
वर्षासु वापीषु तनुञ्जहाति।।

अन्वयः – त्वं 'केतकीकामुक' इत्यनिष्टं कलापिकेकाक्षरयुग्मसूच्यं श्रुत्वा इव या जीवितनिर्व्यपेक्षा (सती) वर्षासु वापीषु तनुञ्जहाति (तां सरोजिनीं सम्प्रति मा अवमंस्थाः)।

गङ्गा – कलापीति – 'त्वं भ्रमरः केतक्याः मालत्याः कामुकः' इति अनिष्टं वृत्तं कलापिकेकाक्षरयुग्मसूच्यं, कलापिनां मयूराणां केकाक्षरयुग्मसूच्यं, केका मयूरध्वनिः। 'केका वाणी मयूरस्य' इत्यमरः। मयूराणां केकाक्षरयुग्मसूच्यं केकारूपं यदक्षरयुग्मं तेन सूच्यम्। 'के' इत्यनेन केतकी 'का' इत्यनेन च कामुकता बोध्यते। तच्छ्रुत्वा विज्ञाय इव जीवितनिर्व्यपेक्षा प्राणेभ्योऽपेक्षारहिता सती या वर्षासु वापीषु तनुं शरीरं जहाति त्यजति। वर्षासु सरोजिन्याः मुमूर्षाहेतुत्वं भ्रमरस्य केतकीकामुकतैव भजत इत्युत्प्रेक्षते।

अनुवाद – 'तुम केतकी के कामुक हो' यह मयूरों की वाणी से सुनकर मानो प्राणों की परवाह न करती हुई जो सरोजिनी इस वर्षा ऋतु में वापिओं में शरीर त्याग देती है(उस सरोजिनी की अवमानना करना उचित नहीं)।

।। १५।।

शरद्यशङ्कं भवता विहर्तुं
सन्ध्यातमःसंहतिचन्द्रिकासु।
रक्तोत्पलेन्दीवरपुण्डरीक-
रूपैरभीसाररसं व्यनक्ति।।

अन्वयः – (या) भवता शरदि अशङ्कं विहर्तुं सन्ध्यातमःसंहतिचन्द्रिकासु रक्तोत्पलेन्दीवरपुण्डरीकरूपैः अभीसाररसं व्यनक्ति (तां सरोजिनीं सम्प्रति मा अवमंस्थाः)।

गङ्गा – शरदि सरोजिन्युपकारं वर्णयति–**शरद्येति** – भवता भ्रमरेण साकं शरदि अशङ्कं विहारं कर्तुं सन्ध्या च तमःसंहतिश्च चन्द्रिका चेति सन्ध्यातमः-

संहतिचन्द्रिकास्तासु रक्तोत्पलेन्दीवरपुण्डरीकरूपैः रक्तोत्पलं च इन्दीवरं च पुण्डरीकं चेति त्रिभी रूपैः अभीसाररसम् अभिसरणानुरागं व्यनक्ति प्रकटीकरोति। सा सरोजिनी त्रिविधवर्णैः स्वपुष्पैः त्वया सह निःशङ्कं विहर्तुं सर्वदोद्यता भवति। अभिसारे समयानुसारेण वेषधारणस्य आवश्यकत्वात् सन्ध्याकाले रक्तोत्पलं रूपं प्रकाशयति। सन्ध्याया रक्तवर्णत्वात् तदानीं रक्तस्वरूपप्रदर्शनम्। रात्रौ तमःसंहतौ इन्दीवररूपं प्रकटीकरोति चन्द्रिकासु च श्वेतपुण्डरीकाख्यम्। तस्यास्त्रिविधानि पुष्पाणि त्वया सह विहारार्थमेव सन्ति।'स्यादुत्पलं कुवलयम्,''इन्दीवरं च नीलेऽस्मिन्,''पुण्डरीकं सिताम्भोजम्' इत्यमरः। रक्तोत्पलादीनां सन्ध्यादिभिर्यथासंख्यमन्वय इति यथासंख्यालङ्कारः।

अनुवाद – तुझ भ्रमर के साथ शरदृतु में निःशङ्क विहार करने के लिये जो सन्ध्या, अन्धकार और चन्द्रिका में क्रमशः अपने रक्तोत्पल (लाल कमल), इन्दीवर (नील कमल)और पुण्डरीक (श्वेत कमल) रूप अपने त्रिविध पुष्पों से अभिसार के प्रति अनुराग व्यक्त करती है(उस सरोजिनी की अवमानना करना उचित नहीं)।

टिप्पणी – अभिसारिकाओं को समयानुरूप वस्त्र धारण करना आवश्यक होता है। सरोजिनी तुझ भ्रमर के साथ निःशङ्क अभिसार के लिए ही मानों अपने त्रिविध (रक्त, नील और श्वेत) पुष्पों में खिलती है। सन्ध्याकाल में अभिसरण के लिए रक्तवर्ण आवश्यक होने के कारण रक्तोत्पल, अन्धकार में नीलवर्ण आवश्यक होने के कारण इन्दीवर (नील कमल) तथा चाँदनी रात में श्वेतवर्ण आवश्यक होने के कारण पुण्डरीक (श्वेत कमल) को प्रकट करती है। इस प्रकार सरोजिनी तुझ भ्रमर पर पूर्णतः अनुरक्त रहती है।

।। १६ ।।

हिमर्तुदुःस्पर्शसमीरनीर–
सम्पर्कभीत्या भवतोज्झिता किम्?।
नवेऽपमानेऽवधृतातिकष्टा
सापत्रपातङ्कमपि प्रसेहे।।

अन्वयः – हिमर्तुदुःस्पर्शसमीरनीरसम्पर्कभीत्या भवता उज्झिता किम्? नवे अपमाने अवधृतातिकष्टा सा कम् अपि पत्रपातं प्रसेहे। अथवा 'वेपमाना इव धृतातिकृष्टा सापत्रपा आतङ्कम् अपि न प्रसेहे किम् ?

गङ्गा – हेमन्ते सरोजिन्युपकारं वर्णयन्नाह– **हिमेति**– हिमर्तौ दु:खेन स्प्रष्टुं योग्ययो: समीरनीरयो: सम्पर्कभीत्या भवता भ्रमरेण उज्झिता परित्यक्ता किम्? नवेऽस्मिन् भवत: परित्यागरूपे अपमाने अवधृतं निश्चितम् अतिकष्टं यया सा कमपि अपूर्वं पत्रपातं प्रसेहे सोढवती। यो हि हेमन्ते त्यजति स निदाघे कथं न त्यजेदिति धिया पत्रपातं पत्राणां दलानां पातं च्युतिं सोढवती। हेमन्ते कमलिनीपत्रपातो जायत इति प्रसिद्ध्यनुरोधादिदम्। अथवा वेपमाना इव कम्पमाना इव धृतमतिकष्टं यया सा तादृशी अपत्रपया लज्जया सहिता आतङ्कं भयं न प्रसेहे किम्? इति काकु:। अपत्रपा लज्जेति कोश:।

अनुवाद – हेमन्त ऋतु में अतिकष्ट से स्पर्श करने योग्य समीर और नीर (जल) के भय से तुम्हारे द्वारा छोड़ी गयी उस सरोजिनी ने इस नये अपमान से अत्यधिक दु:खप्राप्ति का निर्धारण कर पतझड़ को सहन किया। अथवा 'इस नये अपमान से अतिकष्ट प्राप्ति का निर्धारण कर क्या उसने लज्जा और आतंक को सहन नहीं किया?

।। १७।।

असोढभावत्कवियोगदु:खा
भवान्तरे त्वामधिगन्तुकामा।
असावविश्रान्तपतत्तुषार–
तुषानले देहमहो अहौषीत्!।।

अन्वय: – अहो! असोढभावत्कवियोगदु:खा भवान्तरे त्वाम् अधिगन्तुकामा असौ अविश्रान्तपतत्तुषारतुषानले देहम् अहौषीत्।

गङ्गा – शिशिरकाले कमलिन्या अदर्शनं मरणत्वेन उत्प्रेक्ष्यते – **असोढेति**– 'अहो' इत्याश्चर्यवाचकमव्ययम्। असोढभावत्कवियोगदु:खा न सोढम् असोढम्, भवत इदं भावत्कम्, असोढं भावत्कवियोगदु:खं यया सा इयं सरोजिनी भवान्तरे जन्मान्तरे 'भव: क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनो:' इति मेदिनी। त्वाम् अलिम् अधिगन्तुकामा प्राप्तुकामा, आविश्रान्तपतत्तुषानले अविश्रान्तं सातत्येन पतन् तुषार एव तुषानल: अन्तर्दाहकोऽग्नि: तस्मिन्। हिमतुषाणां कमलिनीदाहकत्वात् अग्नित्वेन तस्य व्यपदेश:। तुषस्याग्नि: अन्तर्दहति किन्तु तस्य तीव्रता बहिर्न दृश्यते। देहं शरीरम् अहौषीत्। जुहोतेर्लुङि रूपम्।

अनुवाद – आश्चर्य है कि तुम्हारा वियोग दुःख न सहन कर पाने वाली उस कमलिनी ने जन्मान्तर में तुम्हे पाने की इच्छा से (शिशिर ऋतु में) लगातार गिर रहे हिमकणों की आग में अपने को जला दिया।

।। १८।।

इत्यच्छलाविष्कृतभक्तिभावां
प्रतिक्षणं सम्प्रति सम्भृताभाम्।
सरोजिनीं मुञ्चसि चेन्मदान्ध!
मिलिन्द! नूनं भृशनिर्घृणोऽसि।।

अन्वयः – हे मदान्ध! मिलिन्द! इति अच्छलाविष्कृतभक्तिभावां प्रतिक्षणं सम्भृताभां सरोजिनीं मुञ्चसि चेत्, नूनं भृशनिर्घृणः असि।

गङ्गा – पुनरलिमुपदिशन्नाह– **इत्यच्छलेति**– हे मदान्ध! परनायिकासक्तिमदेन अन्धत्वं गत भ्रमर! इति पूर्वोक्तप्रकारेण, अच्छलाविष्कृतभक्तिभावां निश्छलतया प्रकटितो भक्तिभावोऽनन्योऽनुरागो यया ताम्, अथ च अस्मिन् वसन्ते प्रतिक्षणं सम्भृता आभा यस्याः तादृशीं सरोजिनीं कमलिनीं मुञ्चसि चेत् नूनं निश्चयेन भृशनिर्घृणः, भृशम् अतितरां निर्घृणः घृणायाः निष्क्रान्तः निष्करुणः इत्यर्थः। 'जुगुप्साकरुणे घृणे' इत्यमरः। असि भवसि। लोकास्त्वां निष्करुणत्वेन व्यवहरिष्यन्तीत्यर्थः।

अनुवाद – हे मदान्ध! मिलिन्द! इस प्रकार से निश्छल भक्तिभाव प्रकट करने वाली, प्रतिक्षण अभिनव सौन्दर्य को धारण करने वाली सरोजिनी को यदि तुम छोड़ते हो तो निश्चय ही अतिनिष्करुण हो।

।। १९।।

अनन्यसाधारणसौकुमार्य–
सौन्दर्यसौरभ्यसमष्टिभूमिः।
सरोजिनी कुत्र? मलीमसान्य–
पुष्टप्रिया चूतलता च कुत्र?।।

अन्वयः – अनन्यसाधारणसौकुमार्यसौन्दर्यसौरभ्यसमष्टिभूमिः सरोजिनी कुत्र? कुत्र च मलीमसाऽन्यपुष्टप्रिया चूतलता।

गङ्गा – सरोजिनीचूतलतयोर्भेदं प्रदर्शयति– **अनन्येति** – सौकुमार्यं च सौन्दर्यं चेति सौकुमार्यसौन्दर्ये अनन्यसाधारणयोः अनन्यसाधारणसौकुमार्य–सौन्दर्यसौरभ्य–

समष्टिभूमिः, सौकुमार्यसौन्दर्ययोः सौरभ्यस्य समष्टिभूमिः, असाधारणसुकुमारता-रूपवत्तयोश्च सुगन्धेः पूर्णतास्थलभूता सरोजिनी कुत्र? क्व सा सरोजिनी? क्व च मलीमसा मलोऽस्या अस्तीति सा मलीमसा। 'मलीमसं तु मलिनं कच्चरं मलदूषितम्' इत्यमरः। विहगगणरजोभिः मलिनवर्णेत्यर्थः। अन्येन काकेन पुष्टस्य पोषितस्य परभृतस्य कोकिलस्य प्रिया सा चूतलता आम्रलता च क्व? यद्वा मलीमसशब्दोऽन्य-पुष्टस्य विशेषणम्। तथात्वे मलीमसश्चासौ अन्यपुष्ट मलीमसान्यपुष्टस्तस्य प्रिया। विशेषणद्वयेन चूतलताप्रिये जुगुप्सामुत्पाद्य चूतलतां प्रत्यनादरं व्यनक्ति।

अनुवाद – असाधारण सुकुमारता और सौन्दर्य की सुगन्ध की समष्टिभूमि कहाँ वह सरोजिनी तथा कोयल की प्रियतमा मलिनवर्णा वह चूतलता कहाँ? अथवा मलिन तथा परभृत कोयल की प्रियतमा कहाँ वह चूतलता?

॥ २० ॥

प्रियान् विचेतुं विपिनं गतानां
शुचाकुलानां पथिकाङ्गनानाम्।
दृशोर्विकीर्यातुलधूलिमुष्टी-
रसौ हि पापानि समुच्चिनोति॥

अन्वयः – असौ हि प्रियान् विचेतुं विपिनं गतानां शुचाकुलानां पथिकाङ्गनानां दृशोः अतुलधूलिमुष्टीः विकीर्य पापानि समुच्चिनोति।

गङ्गा – चूतलतायां दोषान्तरं दर्शयन्नाह- **प्रियामिति** – असौ चूतलता प्रियान् विचेतुं विपिनं वनं गतानां शुचा शोकेन आकुलानां पतिविरहेण व्याकुलतां गतानामिति यावत्। पथिकाङ्गनानाम् अध्वगपत्नीनां दृशोः चक्षुषोः अतुलधूलिमुष्टीः अपरिमितपरागस्य मुष्टीः विकीर्य पापानि समुच्चिनोति एकत्रीकरोतीत्यर्थः। अत्र चूतलतायाः परागपाते धूलिमुष्टिविकरणत्वमुत्प्रेक्ष्यते।

अनुवाद – अपने प्रियतमों को पहचानने के लिये वन में गयी शोकाकुल पथिक प्रेयसियों की आँखों में अपरिमित परागमुष्टि गिरा कर मानो यह चूतलता पाप एकत्र कर रही है।

।। २१ ।।

सपल्लवान्तान्तवनोपयुक्ता-
मनर्हपुष्पावसराभिसाराम्।
श्रितां सुसम्पन्नरवंशकुन्तै-
श्चिरात्ततारुण्यफलामिमां धिक्!।।

अन्वयः - सपल्लवां तान्तवनोपयुक्ताम् अनर्हपुष्पावसराभिसारां सुसम्पन्नरवंशकुन्तैः श्रितां चिरात्ततारुण्यफलाम् इमां धिक् (अस्तु) अथवा सपल्लवां तव नोपयुक्तां ताम् अनर्हपुष्पावसराभिसारां सुसम्पन्नरवं शकुन्तैः श्रितां चिरात्ततारुण्यफलाम् इमां धिक् (अस्तु)।

गङ्गा - श्लेषेण चूतलताया अन्यान् दोषान्प्रदर्शयति- **सपल्लवेति**- सपल्लवां पल्लवैः किसलयैः यद्वा पल्लवैर्जारैः सह विद्यत इति सपल्लवा, ताम्। पल्लवोऽस्त्री किसलयम्' इत्यमरः। तान्तवनोपयुक्ताम् तान्ते श्रान्ते ग्रीष्मेण शुष्के वने छायादिना उपयुक्ताम्। अनर्हपुष्पावसराभिसाराम्, अनर्हः अयोग्यः पुष्पावसरे मञ्जरीविकासकाले अभिसारो यस्याः, अयोग्यः रजोदर्शनसमयेऽभिसारो वा यस्यास्ताम्। मञ्जरीविकासकाले पत्ररहितत्वात् प्रियमिलनं तस्या न उपयुक्तं भवतीत्यर्थः। (सुसम्पद्भिः धनैराढ्यैः महाधनैः नरवंशेषु मानवकुलेषु कुन्तैः कुन्ततुल्यैः क्रूरैः श्रिताम् आश्रयत्वेन स्वीकृताम् अथ च तैरेव चिरात् आत्तम् उपभुक्तं तारुण्यफलं यौवनरसः यस्यास्ताम्। इमां चूतलतां चूतलताप्रतीकभूतां नायिकां च धिक्। अस्त्विति शेषः।

अथवा चूतलताया व्याजेन कामपि नायिकां वर्णयति। पल्लवैः जारैः सह वर्तत इति सपल्लवता, ताम्। 'पल्लवः कामुक' इति हैमः। तव भ्रमरस्य नोपयुक्ताम् अनुपयुक्ताम् बहुभिर्जारैः सहितत्वात् तव भोगायोग्यामिति भावः तां चूतलातम् अनर्हः अयोग्यः पुष्पावसरे रजोदर्शनकाले अभिसारो यस्याः, ताम्। 'पुष्पं विकासिकुसुमस्त्रीरजःसु नपुंसकम्' इति मेदिनी। रजोदर्शनकाले धर्मशास्त्रनिषिद्धत्वाद् अभिसारस्य अयोग्यत्वं सूचयति। सुसम्पन्नरवं परिपूर्णशब्दं यथा स्यात् तथा शकुन्तैः पक्षिभिः श्रिताम् आश्रयत्वेन ग्रहीताम् अथ च तैरेव पक्षिभिः चिरात् चिरकालेन ततं व्याप्तम् आरुण्यं येषु तादृशानि फलानि यस्यास्ताम्। जारैः क्रूरैश्च आश्रयत्वेन स्वीकृता तैरेव भृशमुपभुक्ता सा चूलता न तवोपभोग्येत्यभिप्रायः।

अनुवाद - (चूतलतापक्ष) अभिनव पल्लवों से युक्त, ग्रीष्मकाल में मुरझाये वनों में छाया आदि के लिये उपयुक्त, मंजरी के विकास के समय स्वल्पपत्रों से युक्त

होने के कारण शीतलता के अभाव में जिसके पास जाना उपयुक्त नहीं, कलरव कर रहे पक्षियों के द्वारा आश्रय के रूप स्वीकृत, चिरकाल से जिसके फलों में लालिमा व्याप्त है, उस आम्रलता को धिक्कार है (वह मलिन चूतलता तुम्हारे भोगयोग्य नहीं है)।

(नायिकापक्ष) जारपतियों से युक्त, कुन्ततुल्य अनेक क्रूर धनाढ्यों ने जिसका आश्रय ले रखा है, रजोदर्शन के समय जिसका अभिसार उचित नहीं है तथा चिरकाल से उन्हीं के द्वारा जिसके यौवनफल का उपभोग किया जा रहा है, उस चूतलता (की प्रतीकभूत नायिका) को धिक्कार है।

।। २२।।

वयस्यशीते रुचिरेऽतियाते
प्रकामवृद्धावलिवल्गितानाम्।
निवासतामात्मनि मन्यमाना
कथं न सा सम्प्रति लज्जते स्म ?।

अन्वयः - हे वयस्य! रुचिरे शीते अतियाते अभिवल्गितानां प्रकामवृद्धौ (सञ्जातायां) आत्मनि निवासतां मन्यमाना सा सम्प्रति कथं न लज्जते स्म।

अथवा- रुचिरे वयसि अशीतेः अतियाते प्रकामवृद्धावलिवल्गितानाम् आत्मनि निवासतां मन्यमाना सा सम्प्रति कथं न लज्जते स्म।

गङ्गा - विलासिनोक्तं विशदयति- **वयस्येति**- हे वयस्य! हे मित्र अले! रुचिरे रुचिप्रदे सुन्दरे शीते शीतकाले अतियाते व्यतीते वसन्तर्तोश्च प्राप्ते समयेऽस्मिन् अलीनां वल्गितानां भ्रमरचापलानां प्रकामम् अत्यन्तं वृद्धौ सत्याम् आत्मनि सरोजिन्यां वसतिस्थानत्वं मन्यमाना सम्प्रति च तव अन्यनायिकासक्तिं दृष्ट्वा सा कथं न लज्जते स्म। तव चञ्चलस्य व्यवहारेणैतेनावश्यं लज्जते स्मेति भावः। स्मोत्तरे लङ्। 'आस्कन्दिहं धोरितकं रेचितं वल्गितं प्लुतम्' इत्यमरः। 'वल्ग गतौ' इति धातोः क्तः। 'वल्गितं पुनः अग्रकायसमुल्लासात्कुञ्चितास्यं नतत्रिकम्' इति नाममाला। शब्दस्यास्य गतिवाचकत्वादत्र चाञ्चल्यस्य बोधः।

अथवा - रुचिरे वयसि तरुणावस्थायाम् अशीतेः संख्याया अतियाते अतिक्रान्ते अत्यन्तं वृद्धत्वं प्राप्ता वर्षीयसी सा प्रकामम् अतिशयेन वृद्धावलेः वल्गितानां कम्पानामित्यर्थः। वल्गतेर्गतिवाचकत्वात् वार्द्धक्यजन्यकम्पस्य बोधः।

वृद्धभावजनितानां तेषां कम्पानां निवासताम् आधारत्वम् आत्मनि मन्यमाना जानन्ती सा कथं न लज्जत इत्यर्थः। प्रथमपक्षे तरुणे वयसि द्वितीये च चरमे वयसि सरोजिनीदशाया बोध इति विशेषः। वृद्धावलिस्तत्तदङ्गजनितवार्धक्यभावः।

अनुवाद – हे मित्र! सुन्दर शीतकाल के बीत जाने (तथा वन्त ऋतु के आ जाने) से तुझ भ्रमर के चाञ्चल्य में अत्यन्त वृद्धि को देखकर जो अपने में ही उस चाञ्चल्य का निवास मानती है (तुम्हे अन्यनायिका पर आसक्त देखकर) वह सरोजिनी इस समय क्या लज्जा का अनुभव नहीं करती?

अथवा– सुन्दर यौवनावस्था के अस्सी वर्ष बीत जाने के बाद अत्यन्त वार्धक्य से उत्पन्न कम्पन का आधार अपने को मानती हुई वह तुम्हारे इस व्यवहार से अवश्य ही लज्जा का अनुभव करती है।

।। २३।।

इति स्वकामित्वगुणानुरूप–
श्लिष्टोक्तिवैचित्र्यचमत्कृतार्थम्।
विलासिनं वाक्चतुरं विचिन्त्य
तं व्यङ्ग्यभङ्ग्यैव जगाद भृङ्गः।।

अन्वयः – इति स्वकामित्वगुणानुरूपश्लिष्टोक्तिवैचित्र्यचमत्कृतार्थं विलासिनं वाक्चतुरं विचिन्त्य भृङ्गः व्यङ्ग्यभङ्ग्या एव जगाद।

गङ्गा – श्रुतविलासिवचनोऽलिः किमकरोदिति वर्णयति– **इतीति**– इति एवं प्रकारेण स्वस्य यः कामित्वाख्यो गुणस्तदनुरूपाणां श्लिष्टोक्तीनां विविधार्थयुतानां वाचां वैचित्र्येण चमत्कृतश्चमत्कारयुक्तोऽर्थो यस्य तादृशं विलासिनं चतुरं वचःप्रयोगे प्रवीणं विचार्य भृङ्गः पूर्वोक्तः अलिः व्यङ्ग्यभङ्ग्या व्यङ्ग्यान्वितवाचःसौन्दर्येण एव जगाद प्रत्युत्तररूपेण वक्ष्यमाणं कथयामास। गदधातोर्लिटि–जगादेति।

अनुवाद – इस प्रकार अपने कामित्व गुण के अनुरूप श्लिष्टवचनों के सौन्दर्य से चमत्कृत करने वाले अर्थ से परिपूर्ण वचनों से युक्त उस विलासी को वाणी के प्रयोग में चतुर जानकर भ्रमर ने भी उसे व्यङ्ग्ययुक्त वचनों से उत्तर दिया।

।। २४।।

गतौ भ्रमं नापवदन्ति सन्तः
किन्त्वीक्ष्यते ते मनसि भ्रमोऽयम्।

अतोऽनुगृह्योपदिशामि यत्तत्
त्वयाऽवधानेन चिरं विभाव्यम्।।

अन्वयः – (हे विलासिन्!) सन्तः गतौ भ्रमं न अपवदन्ति किन्तु अयं भ्रमः ते मनसि ईक्ष्यते। अतः अनुगृह्य यत् उपदिशामि तत् त्वया अवधानेन चिरं विभाव्यम्।

गङ्गा – विलासिनमभिमुखीकुर्वन्नाह अलिः– **गताविति–** सन्तः विद्वांसः, औचित्यानौचित्यविवेकदक्षा मनीषिण इति यावत्। गतौ गमने भ्रमं भ्रमणं न अपवहन्ति, न निन्दन्ति, अपि तु भ्रमणं प्रशंसन्ति किन्तु अयं भ्रमः ते विलासिनः मनसि बुद्धौ ईक्ष्यते दृश्यते। स च बुद्धिस्थो भ्रमः सद्भिर्निन्द्यते। अतः अनुगृह्य त्वयि कृपां कृत्वा अहं भ्रमरः यत् उपदिशामि तत् त्वया विलासिना अवधानेन चिरं विभाव्यं श्रोतव्यम्। मया तव बुद्धौ भ्रमो दृश्यतेऽतस्तन्निकारणाय मया यद्यदुच्यते तत् त्वया सम्यक्तया शान्तेन मनसा श्रोतव्यमिति भावः।

अनुवाद – (हे विलासिन्!) विद्वज्जन गतिविषयक भ्रमण की निन्दा नहीं करते किन्तु तुम्हारे मन (बुद्धि) में भ्रम दिखाई पड़ रहा है (विद्वान् बुद्धिस्थ भ्रम की निन्दा करते हैं)। अतः (तुम्हारे इस भ्रम को दूर करने के लिये मैं) कृपा पूर्वक जो कुछ भी कह रहा हूँ, उसे चिरकाल तक सावधान होकर सुनो।

।। २५ ।।

अये विलासिन्! न हि विद्यते मे
रसालसालेऽभिनिवेशलेशः।
असक्तचेता जनकाननोद्य–
त्सर्वागमोत्थं रसमाद्रियेऽहम्।।

अन्वयः – अये विलासिन्! मे रसालसाले अभिनिवेशलेशः नहि विद्यते। असक्तचेता अहं जनकाननोद्यत्सर्वागमोत्थं रसम् आद्रिये।

गङ्गा – भूमिकां रचयित्वा सम्प्रति अलिसिनोक्तं विशदयति– **अये विलासेति–** हे विलासिन्! मे मम अलेः रसालसाले सहाकारवृक्षे अभिनिवेशलेशः यन्मम चाञ्चल्यं दृष्ट्वा त्वयोक्तं तत्, न विद्यते। असक्तचेताः, असक्तं कुत्रचिदपि अननुरक्तं चेतः मनो यस्य तादृशः सन्नहं जनकाननोद्यत्सर्वागमोत्थं जनानां लोकानां काननेषु उपवनेषु उद्यन्तो वृद्धिं गच्छन्तो ये सर्वे अगमा वृक्षाः सन्ति तेभ्य उत्थितं रसं

मकरन्दम् आद्रिये अभिनन्दामि। 'पलाशी द्रुर्द्रुमागमा' इत्यमरः। अथवा अहं जनकस्य विदेहाख्ययोगिनः आननात् मुखात् उद्यन्तः निःसरन्तः ये सर्वे आगमाः वेदोपनिषदादिसम्बन्धिनः सिद्धान्ताः तैः उत्थितं रसं ब्रह्मतत्त्वम् आद्रिये। तथा च श्रुतिः – रसो वै सः'। न तु यथा भवान् मां चिन्तयति तथाऽहमस्मीति भावः। यद्वा जनकशब्देनाऽत्र समेषां जनको ब्रह्मा गृह्यते। तस्यैव मुखात् समेषामागमानां जनिरिति पुराणादिषु प्रसिद्धम्। अथवा जनकः वेदेषु कीर्तितः पुरुषः। स एव समेषां पिता।

अनुवाद – हे विलासिन्! आम्रवृक्ष के प्रति मेरा स्वल्प भी अभिनिवेश नहीं है। मैं अनासक्त चित्त होकर लोगों के उपवनों में वृद्धि को प्राप्त हुये समस्त वृक्षों के मकरन्द का अभिनन्दन करता हूँ।

अथवा मैं अनासक्त चित्त होकर महात्मा जनक (ब्रह्मा या परम पुरुष) के मुख से निःसृत वेदादिविषयक ब्रह्मरूप रस का अभिनन्दन करता हूँ।

टिप्पणी – ग्रन्थ के प्रारम्भ में विलासी ने अलि को कामुक समझ कर बहुत कुछ कहा था। उसके प्रत्युत्तर में अलि ने यहाँ से अपना पक्ष रखना प्रारम्भ किया है। प्रस्तुत प्रसंग में प्रयुक्त 'जनकाननोद्यत्सर्वागमोत्थं रसम्' की अनेधा व्याख्या सम्भव है। वृक्ष पक्ष में 'जनानां लोकानां काननेषु उपवनेषु उद्यन्तः ये सर्वे अगमाः वृक्षाः तदुत्थितं रसं मकरन्दम्' जैसा अर्थ लिया जा सकता है। आगम पक्ष में 'जनकस्य आननात् मुखात् उद्यन्तः निःसरन्तो ये सर्वे आगमा वेदोपनिषदादयस्तदुत्थितं बोधितं रसं ब्रह्मस्वरूपम्' अर्थ किया जा सकता है। यहाँ प्रयुक्त जनक शब्द से ब्रह्मा या वेदों में कीर्तित पुरुष का भी ग्रहण किया जा सकता है।

।। २६ ।।

निरन्तरं माधवरम्यशोभा –
नवावतारस्तुतिक्लृप्तगीतिः।
स्ववर्ष्मणा विष्णुपदावलम्बी
यायावरोऽरण्यचरो द्विजोऽहम्।।

अन्वयः – अहं माधवरम्यशोभानवावतारस्तुतिक्लृप्तगीतिः स्ववर्ष्मणा निरन्तरं विष्णुपदावलम्बी यायावरः अरण्यचरः द्विजः (अस्मि)।

गङ्गा – पुनरलिना किमुक्तमिति वक्ति– **निरन्तरेति**– अत्र प्रयुक्तद्विजशब्दस्य ब्राह्मणपक्षिरूपद्विविधार्थे शक्तत्वाद् अस्य द्विविधोऽर्थः। ब्राह्मणक्षे यथा– माधवस्य

भगवतो नारायणस्य रम्या मनोहरा या शोभा तस्याः शोभाया नवावताराणां विविधकल्पेषु रामकृष्णादितत्तद्रूपेषु सञ्जाताभिनवप्रादुर्भावानां स्तुतेः क्लृप्ता सम्पादिता गीतिर्येन स तादृशः। पुनश्च कीदृशः ? स्ववर्ष्मणा स्वदेहेन। 'वर्ष्मदेहप्रमाणयोः' इत्यमरः। विष्णुपदावलम्बी विष्णोः नारायणस्य पदावलम्बी चरणानुरागी। यायावरः अनिकेतो मुनिः अरण्चरः वने विचरणशीलः द्विजः ब्राह्मणः अस्मि।

भ्रमरपक्षे– अस्मिन् पक्षे माधवशब्दः वसन्तर्तुवाचकः। तथात्वे माधवस्य वसन्तस्य रम्यशोभाया नवावताराणां स्तुतौ क्लृप्ता गीतिर्येन प्रसारितो गुञ्जनारवो येन तादृशोऽहं भ्रमरः। वसन्तस्य रम्यशोभाया विविधरूपाणां स्तुतौ प्रसारितगुञ्जनारव इत्यर्थः। स्ववर्ष्मणा देहेन उड्डीय विष्णुपदावलम्बी गगनावलम्बी। 'वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी' इत्यमरः। यायावरः गमनशीलः अरण्यचरः विपिनविहारप्रियः द्विजः पक्षी। 'द्विजः स्याद् ब्राह्मणक्षत्रवैश्यदन्ताण्डजेषु ना' इत्यमरः।

अनुवाद – (ब्राह्मणपक्ष) मैं निरन्तर भगवान् नारायण की सुन्दर शोभा के नवावतारों की स्तुतिगीति को सम्पन्न करने वाला, अपने शरीर से भगवान् नारायण के चरणों का अवलम्बन करने वाला, भवन रहित मुनि और वन में विचरण करने वाला ब्राह्मण हूँ।

(भ्रमरपक्ष) मैं सदैव वसन्त ऋतु की शोभा के अभिनव आयामों की स्तुति में अपने गुञ्जाररूप गीति का विस्तार करने वाला, अपने देह से आकाश को छूने वाला, गमनशील, विपिनविहारप्रिय पक्षी हूँ।

।। २७।।

सुहृद्यगन्धात् सुमनस्समूहात्
समस्तदोषज्ञचिरप्रशस्तम्।
रसं रसायां मधुरञ्जनाय
दातुं न दूष्यो मम पक्षपातः ।।

अन्वयः – सुहृद्यगन्धात् सुमनस्समूहात् रसायां समस्तदोषज्ञचिरप्रशस्तं मधु रसं रञ्जनाय दातुं (योऽयं) मम पक्षपातः (स) न दूष्यः।

अथवा – सुहृदि अगन्धात् सुमनस्समूहात् रसायां समस्तदोषज्ञचिर-प्रशस्तं मधुरं रसं जनाय दातुं मम (योऽयं) पक्षपातः (स) न दूष्यः।

गङ्गा – पुनरलिः किमाहेति वर्णयति– **सुहृद्येति**– सुहृद्यगन्धात् सुहृद्यो गन्धो यस्य तादृशात्। सुमनस्समूहात् सुमनसां पुष्पाणां समूहात् रसायां पृथिव्यां समस्तैः दोषज्ञैः चिरप्रशस्तं चिरात् प्रतिष्ठितं समस्तवैद्यकुलसमादरणीयं मधुरं रसं रञ्जनाय रोगिणां प्रीतये स्वास्थ्यप्राप्तये प्रीतये वा दातुं योऽयं मम सरोजिनीप्रभृतिपुष्पेषु पक्षपातः पक्षाभ्यां पातः इतस्ततो पुष्पेषु भ्रमणं स विलासिना नेदृशवचनैर्दूष्यः। तत्तु लोकोपकारायैव मया सम्पाद्यते न तु स्वार्थसिद्धये इति भावः। दोषं जानातीति दोषज्ञो वैद्यः। 'दोषज्ञौ वैद्यविद्वांसौ' इति कोशः। 'भूर्भूमिरचलानन्ता रसा' इत्यमरः।

यद्वा सुहृदि मित्रे अगन्धात् गर्वरहितात्। 'गन्धः सम्बन्धलेशयोः। गन्धकामोदगर्वेषु' इति हैमः। सुमनसां पण्डितानां समूहात् संघात्। रसायां पृथिव्यां समस्तैर्विद्वद्भिश्चिरं प्रशस्तम् आदृतं मधुरं रसं जनाय जनसामान्याय दातुं यो हि मम पक्षपातः एकभाग्रहः स न त्वया दूष्य इत्यर्थः।

अनुवाद – सुन्दर गन्ध से युक्त पुष्पों के समूह से वैद्यों द्वारा प्रशंसित मधु रस को रोगियों की प्रीति के लिये देने हेतु मेरा यह जो पक्षपात (पुष्पों पर इधर उधर उड़ना) है (तुझ विलासी को) उसकी निन्दा नहीं करनी चाहिए।

अथवा मित्र में गर्वरहित पंडितसमुदाय से समस्त विद्वानों द्वारा चिर वांछित मधुर रस जन समुदाय तक पहुँचाने का मेरा जो यह एकत्र आग्रह है (तुझ विलासी को) उसकी निन्दा नहीं करनी चाहिए।

॥ २८ ॥

अन्याविरोधेन सुमेषु सारं
श्रमेण सम्पाद्य विमुक्तभोगः।
गिरावहन्निर्वृतये प्रकाश्य
भूतोपकृत्यै भुवि पर्यटामि॥

अन्वयः – अन्याविरोधेन श्रमेण सुमेषु सारं सम्पाद्य विमुक्तभोगः अहं निर्वृतये गिरौ प्रकाश्य भूतोपकृत्यै भुवि पर्यटामि।

गङ्गा – पुनः किमर्थं भुवीतस्ततः पर्यटामीत्याह– **अन्येति**– अन्याविरोधेन अन्येषाम् अविरोधेन श्रमेण हेतुना सुमेषु पुष्पेषु सारं मधु सम्पाद्य विमुक्तभोगः स्वयमभुञ्जानः सन् अहं भ्रमरः गिरौ पर्वते जनानां निर्वृतये आनन्दाय प्रकाश्य प्रकटय्य भूतोपकृत्यै भूतानामुपकाराय भुवि पर्यटामि,परिभ्रमामि। एवं मम इतस्ततो भ्रमणं न

कामुकतापूर्त्यर्थमपितु लोकहितायैवेति विवक्षति। गिरा वाण्या वहन्नित्यप्यर्थयोजना। 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्' इत्यमरः।

अनुवाद – मैं अन्य किसी का विरोध किये विना श्रमपूर्वक पुष्पों में मधु सम्पादित करता हूँ तथा स्वयं उसका भोग न करता हुआ लोगों के आनन्द के लिए उसे पर्वत में प्रकट करता हूँ। मैं समस्त भूतों के उपकार के लिये पृथिवी पर भ्रमण करता हूँ।

टिप्पणी – 'गिरावहन्' का 'गिरा वाण्या वहन्' अर्थ भी किया जा सकता है। लोकोपकार के लिये वाणी से उस पुष्पसार को धारण करता हुआ लोकोपकार के लिये पृथ्वी पर भ्रमण करता हूँ।

।। २९ ।।

न वाजपेयाद् विरमामि नित्यं
न पौण्डरीकादथवा सवाच्च।
स्वयागमालासततप्रवृत्त्या
ध्रुवा हि मत्कर्मसुखोपलब्धिः ।।

अन्वयः – (अहम् अलिः) नित्यं च वाजपेयात् अथवा पौण्डरीकात् सवात् न विरमामि। हि स्वयागमालासततप्रवृत्त्या मत्कर्मसुखोपलब्धिः ध्रुवा (अस्ति)।

अथवा– न वा नित्यम् अजपेयात् अथवा पौण्डरीकात् सवात् च विरमामि। हि स्वया अगमालासततप्रवृत्त्या मत्कर्मसु खोपलब्धिः ध्रुवा (अस्ति)।

गङ्गा – पुनरलिराह– **न वेति**– अहं भ्रमणशीलो भ्रमरः नित्यं च वाजपेयात् तदाख्ययज्ञात् अथवा पौण्डरीकात् पौण्डरीकनामकात् सवात् यज्ञात् न विरमामि। हि निश्चयेन स्वस्य यागमालायां क्रतुपरम्परायां सततप्रवृत्त्या नैरन्तर्येण जायमानया प्रवृत्त्या मत्कर्मणा यागसम्पादनरूपव्यापारेण सुखोपलब्धिः आनन्दप्राप्तिः ध्रुवा आवश्यम्भाविनी, न तत्र सन्देहलेश इत्यर्थः।

अथवा– अहं भ्रमरः न वा अजपेयात् अजैः पातुं योग्यं यो हि तुच्छरसस्तस्मात्, पुण्डरीकस्येदं पौण्डरीकम्, कमलसम्बन्धिनः सवात्, आसवात्। 'पुण्डरीकं सिताम्भोजम्' इत्यमरः। स्वया स्वकीयया अगमालायां वृक्षपरम्परायां सततं नैरन्तर्येण प्रवृत्त्या मत्कर्मसु मया अलिना सम्पादितेषु व्यापारेषु

खस्याकाशस्योपलब्धिः प्राप्तिः ध्रुवा निश्चिता। आकाशप्राप्तौ न कश्चन सन्देह इति तात्पर्यम्। 'अगः स्यान्नगवत्तरौ शैले सरीसृपे भानौ' इति हैमः।

अनुवाद – मैं (विप्र) वाजपेय अथवा पौण्डरीक नामक यज्ञ के सम्पादन से कभी विरत नहीं होता। अपनी उस यज्ञपरम्परा की सतत प्रवृत्ति से मुझे निश्चय ही सुखोपलब्धि होगी।

अथवा मैं (भ्रमर) बकरों के द्वारा पिये जाने योग्य तुच्छ रस से अथवा कमल से बने हुए आसव से कभी भी विरत नहीं होता। वृक्षश्रेणी में होने वाली मेरी सतत प्रवृत्ति से मेरे कर्मों में आकाश की प्राप्ति अवश्य ही होगी।

।।३०।।

मया किलोच्चावचपार्थिवाना–
मपीडया भूतदयाप्रधाना।
स्वप्राणयात्रैकफला मुमुक्षू–
नध्यापिता माधुकरीह वृत्तिः।।

अन्वयः – इह मया किल उच्चावचपार्थिवानाम् अपीडया भूतदयाप्रधाना स्वप्राणयात्रैकफला माधुकरी वृत्तिः मुमुक्षून् अध्यापिता।

गङ्गा – स्वकृत्यं वर्णयन्नाह– **मयेति** – इह अस्मिन् भूमण्डले मया भ्रमरेण उच्चावचानाम् अनेकप्रकाराणां पार्थिवानां राज्ञां तरूणां वा। 'राज्ञि राट्पार्थिवक्ष्मा–भृन्नृपभूपमहीक्षितः' इत्यमरः। 'पार्थिवो नृपतौ भूमिविकारे पार्थिवोऽन्यवत्' इति च विश्वः। पार्थिवशब्दस्य पृथवीविकारवाचित्वात् वृक्षरूपोऽप्यर्थः। अपीडया पीडया विना, सुखेन भूतानां प्राणिनां दया अनुकम्पा प्रधाना मुख्या यस्यां तादृशी, स्वप्राणानां यात्रा केवलं फलं यस्यास्तादृशी। जीवननिर्वाहमात्रमेव वृत्तेरस्याः प्रयोजनं न तु सङ्ग्रहः। माधुकरी वृत्तिः मुमुक्षून् मोक्षेच्छून् अध्यापिता पाठिता।

वस्तुतस्त्विदं पद्यं श्रीमद्भागवतस्याधोलिखितपद्ययोः सङ्ग्रहः –
स्तोकं स्तोकं ग्रसेद् ग्रासं देहो वर्तेत यावता।
गृहानहिंसान्नातिष्ठेद् वृत्तिं माधुकरीं मुनिः॥
अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः।
सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः॥११.८.९, १०॥

एतयोर्भावमादायैव माधुकरी वृत्तिरिह भूतदयाप्रधाना स्वप्राणयात्रैकफला च कथिता।

अनुवाद – मुझ भ्रमर के द्वारा अनेक प्रकार राजाओं अथवा वृक्षों को पीड़ित किये बिना प्राणियों के प्रति दया ही जिसमें प्रधान है तथा अपने प्राणों की यात्रा मात्र ही जिसका फल है, ऐसी माधुकरी वृत्ति मुमुक्षुओं को सिखा दी गई है।

टिप्पणी – माधुकरी वृत्ति के विषय में श्रीमद्भागवत (११.८.९, १०) में कहा गया है कि ''संन्यासी को चाहिए कि वह गृहस्थों को किसी प्रकार का कष्ट न देकर जितने में शरीर की रक्षा हो सके उतने ग्रास घरों से माँग ले। जिस प्रकार भौंरा विभिन्न छोटे बड़े पुष्पों का सारसंग्रह करता है उसी प्रकार यति को भी मधुकरी का चयन करना चाहिए। श्रीमद्भागवत के इन श्लोकों का ही सार लेकर कवि ने माधुकरी वृत्ति को 'भूतदयाप्रधाना' और 'स्वप्राणयात्रैकफला' आदि कहा है।

।। ३१ ।।

अल्पोऽपि देहे मम नास्ति रागो
न कुत्रचिद् द्वेषमहं वहामि।
सदैकरूपस्थितिकृत्तमोऽहं
हंसादृतं पुष्करमाश्रयामि।।

अन्वयः – मम देहे अल्पः अपि रागः न अस्ति। अहं कुत्रचिद् द्वेषं न वहामि। सदैकरूपस्थितिकृत्तमः अहं हंसादृतं पुष्करम् आश्रयामि।

अथवा – मम देहे अल्पः अपि रागः न अस्ति। अहं कुत्रचिद् द्वेषं न वहामि। सदैकरूपस्थितिकृत्तमोहं हंसादृतं पुष्करम् आश्रयामि।

गङ्गा – प्राप्तावसरो भ्रमरस्य श्लिष्टोक्तिं प्रस्तौति– **अल्प इति**– मुनि-भ्रमरयोः पक्षमाश्रित्य नानार्थकमिदम्। भ्रमरपक्षे– मम अलेः देहे सर्वत्र नीलरूपस्य सत्त्वात् अल्पोऽपि रागः रक्तिमा नास्ति। अहं कुत्रचिद्द्वेषं कृत्रिममाकारं न वहामि। एकस्मिन् स्थल एकमपरस्मिन् स्थले चाऽन्यं रूपं न धारयामीत्यत्यर्थः। कुत्रचिद्द्वेषमित्यत्र दकारस्य द्वित्वम्। एकस्मिन्नेव नीलरूपेऽतिशयेन स्थितिकृदहम् भ्रमरः। स्थितेरतिशयद्योतनाय तमप्। हंसेन हंसाख्यपक्षिणा आदृतं पुष्करं कमलमाश्रयामि। 'पुष्करं पङ्कजे व्योम्नि' इति विश्वः।

मुनिपक्षे तु रागोऽनुरागवाचकः। द्वेषोऽमर्षवाचकः। सदैकरूपस्थितिकृत्तमोहम् इति तु मुनिपक्षे क्रियाविशेषणम्। सदा एकरूपया स्थित्या कृत्तश्छिन्नो मोहः यस्मिन् कर्मणि तत्। हंसेन यतिना आदृतं पुष्करं तदाख्यं तीर्थम् आश्रयामीति व्याख्या। 'हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे, योगिमन्त्रादिभेदेषु परमात्मन्यमत्सरे। निर्लोभनृपतौ हंसः शरीरमरुदन्तरे' इति विश्वः। 'पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले व्योम्नि खड्गफले पक्षे तीर्थौषधिविशेषयोः' इति चामरः।

अनुवाद– (भ्रमर पक्ष) मुझ भ्रमर के शरीर में तनिक भी रक्तिमा नहीं है (क्योंकि मैं सदैव नील ही रहता हूँ)। मैं कृत्रिम आकार को धारण नहीं करता। सदैव एकमात्र नील रूप में ही स्थित रहने वला मैं हंस के द्वारा आदृत पुष्कर (कमल) का आश्रय लेता हूँ।

अथवा – (मुनिपक्ष) मेरा शरीर में स्वल्प भी अनुराग नहीं है। मैं किसी के प्रति भी द्वेष धारण नहीं करता। सदैव एक रूप में स्थित होने के कारण मोह को छिन्न करने वाला मैं यतिजन द्वारा आदृत पुष्कर तीर्थ का आश्रय लेता हूँ।

।। ३२।।

जितेन्द्रियेष्वप्यनुवर्तमानं
त्रैगुण्यमेतन्मम पादमूले।
आलोक्य मां धारितकृष्णरूपं
सर्वत्रगं ब्रह्म विनिश्चिनु त्वम्।।

अन्वयः – (हे विलासिन्) त्वं जितेन्द्रियेषु अपि अनुवर्तमानम् एतत् त्रैगुण्यं मम पादमूले आलोक्य धारितकृष्णरूपं मां सर्वत्रगं ब्रह्म विनिश्चिनु।

गङ्गा – अलिनोक्तं पुनरपि विस्तारयति – **जितेन्द्रियेति**– हे विलासिन्! त्वं जितेन्द्रियेषु जितानि वशीकृतानि इन्द्रियाणि यैस्तेषु यतिषु अनुवर्तमानं मम पादमूले एतत् त्रैगुण्यमालोक्य दृष्ट्वा। यतयो भवन्ति पादद्वयवन्तः। भ्रमरः पुनः षट्पदो भवतीति प्रसिद्धिः। अतः पादद्वयवतां यतीनामपेक्षया भ्रमरस्य पादत्रैगुण्यम्। इत्थं पादमूले विद्यमानत्वात् बाधितत्रैगुण्यस्तत्त्वज्ञोऽहमिति तदभिप्रायः। ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः त्रैगुण्यं गुणत्रयकार्यभूतः संसार इति। त्रैगुण्यविषया वेदा' इत्यादि– श्रीमद्भगवद्गीतायां भाष्ये स्पष्टम्। एवं यत् त्रैगुण्यं यतीनां बुद्धावनुवर्तते तदेव मम भ्रमरस्य पादमूले विद्यत इति यत्यपेक्षयापि भ्रमरस्य श्रेष्ठत्वम्। एवं धारितकृष्णरूपं

धारितं कृष्णरूपं येन तत्, परं ब्रह्मैव लीलेच्छया कृष्णरूपेण आविर्बभूवेति श्रीमद्भागवतादिमहापुराणेषु प्रसिद्धम्, तादृशं मां सर्वत्रगं सर्वत्र व्याप्तं ब्रह्म विनिश्चिनु निर्धारय। भ्रमरपक्षे धारितकृष्णरूपमित्यस्य कृष्णवर्णं सर्वत्रगमित्यस्य च सर्वत्र सञ्चारीत्यप्यर्थो बोध्यः।

अनुवाद – (हे विलासिन्) तुम जितेन्द्रियों में भी अनुवर्तमान मेरे इस पादमूल के त्रैगुण्य (षट्पदत्व) को देखकर मुझे कृष्णरूप धारण करने वाला और सर्वत्र व्याप्त ब्रह्म समझो। अथवा कृष्ण वर्ण धारण करने वाला सर्वत्र संचरण करने वाला भ्रमर समझो।

टिप्पणी – जितेन्द्रिय यतियों के दो पैर होने तथा अपने षट्पद होने के कारण भ्रमर के पैरों की संख्या तीन गुना है। इसी को वह त्रैगुण्य मानता है। श्रीमद्भगवद्गीता आदि ग्रन्थों में त्रिगुण का संसाररूप कार्य ही त्रैगुण्य कहा गया है। यह त्रैगुण्य अलि के पैरों के नीचे दबा है। अर्थात् वह अलि संसार से ऊपर उठकर ब्रह्मस्वरूप हो गया है किन्तु यह त्रैगुण्य यतियों की बुद्धि में वर्तमान है। अतः भ्रमर अपने को ब्रह्मस्वरूप मानता है।

।। ३३ ।।

मदीयनीरन्ध्रविचिन्तनेन
कीटोऽपि मद्रूपमविन्दतेति।
ब्रह्मात्मताव्यञ्जननिःसपत्ना
लोकप्रसिद्धा हि मम प्रशस्तिः।।

अन्वयः – कीटः अपि मदीयनीरन्ध्रविचिन्तनेन मम रूपम् अविन्दत इति हि मम ब्रह्मात्मताव्यञ्जननिःसपत्ना प्रशस्तिः लोकप्रसिद्धा (अस्ति)।

गङ्गा – स्वस्वरूपस्मरणस्य महत्त्वं वक्ति– **मदीयेति**– कीटोऽपि मदीयस्य ब्रह्मरूपस्य अलेः नीरन्ध्रम् अविरतं विचिन्तनेन पुनः पुनः स्मरणेन। निदिध्यासनेनेति यावत्। ब्रह्मरूपम् अविन्दत् प्राप्नोत्। तदेतद् वेदान्तशास्त्रप्रसिद्धकीटभृङ्गन्यायेनोक्तम्। भ्रमरगृहीतकीटस्तत्कुड्यायां भयेन तमनुस्मरन् भृङ्गरूपतां प्राप्नोति। तथा चोक्तं श्रीमद्भागवते –

कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन्।
संरम्भभययोगेन विन्दते तत्सरूपताम्॥

एवं कृष्णे भगवति मायामनुज ईश्वरे।
वैरेण पूतपाप्मानस्तमापुरनुचिन्तया॥ (७.१.२७, २८)

अतश्च निदिध्यासनं लक्षयता वेदान्तपरिभाषाकृताऽप्युक्तम् – 'निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्यात्म-विषयकस्थैर्यानुकूलो मानसो व्यापारः'। तच्चेदं निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणमिति वेदान्तसिद्धान्तः।

इति एवं विधा। मम पुनः पुनः स्मरणेन कीटोऽपि ब्रह्मरूपतां प्रापदित्येतादृशी ब्रह्मात्मताव्यञ्जननिःसपत्ना ब्रह्मात्मताया ब्रह्मस्वरूपताया व्यञ्जने प्रकाशने निःसपत्ना विरोधरहिता मम प्रशस्तिः स्तुतिः लोकेषु प्रसिद्धा अस्तीत्यर्थः। न मादृशोऽन्यो ब्रह्मरूपताप्रकाशक इति भावः। आत्मशब्दोऽत्र स्वरूपार्थे प्रयुक्तः। प्रसङ्गोऽयं हनुमन्नाटकेऽपि लभ्यते –

बिभेमि सखि संवीक्ष्य भ्रमरीभूतकीटकम्।
तद्ध्यानादागते पुंस्त्वे तेन सार्धं कुतो रतिः॥ (६.४५)

अनुवाद – कीट ने भी मेरे सतत चिन्तन (निदिध्यासन) से ब्रह्मरूपता को प्राप्त किया। इस प्रकार ब्रह्मरूपता के प्रकाशन में मेरी विरोधरहित प्रशस्ति लोक प्रसिद्ध है।

टिप्पणी – अलि का यह कथन श्रीमद्भागवत से प्रमाणित है। ऊपर संस्कृतटीका में उद्धृत श्रीमद्भागवत के श्लोकों में भ्रमर के सतत स्मरण से कीट की ब्रह्मरूपता की प्राप्ति कही गयी है। प्रस्तुत काव्य में चर्चित यह अलि साक्षात् ब्रह्म है, यह बात उसने स्वयं कह दी है। अतः निदिध्यासन से ब्रह्म प्राप्ति का उसका प्रतिपादन शास्त्रसम्मत और कीटभृङ्गन्याय से लोक और शास्त्र में प्रसिद्ध है। गोस्वामी तुलसीदास ने भी 'भइ मैं कीट भृंग की नाँई' कहकर इसी तथ्य का उल्लेख किया है। इस विषय में कबीर का भी यह दोहा प्रसिद्ध है–

सुमिरन सो मन लाइये जैसे कीट भरिङ्ग।
कबिरा बिसरे आपके होत जात तेहि रङ्ग।।

हनुमन्नाटक में प्राप्त एतद्विषयक चर्चा भी टीका में उद्धृत है।

।। ३४।।

स्त्रीभावसम्भावनया लतासु
तरुष्वपि व्यक्तमनोजचेष्टे!
अलं भवत्यात्मनिरूपणेन
विप्रस्तुतं प्रस्तुतमेव वक्ष्ये।।

अन्वयः – लतासु तरुषु अपि स्त्रीभावसम्भावनया व्यक्तमनोजचेष्टे भवति आत्मनिरूपणेन अलम्। विप्रस्तुतं प्रस्तुतम् एव वक्ष्ये।

गङ्गा – पुनरलिराह– **स्त्रीभावेति** – लतासु वल्लीषु मल्लिकाप्रभृतिषु अथ च तरुषु वृक्षेषु सहकारादिषु स्त्रीभावस्य सम्भावनया कल्पनया व्यक्ता प्रकटिता मनोजस्य चेष्टा भावना यस्य तादृशे भवति विलासिनि आत्मनिरूपणेन आत्मन आत्मतत्त्वस्य निरूपणेन अलम्, न कोऽपि लाभः। यः खलु लतावृक्षादिष्वपि कामचेष्टामेव पश्यति तस्य भवतो विलासिनः पुरतो ममेदमात्मतत्त्वनिरूपणं व्यर्थमेव। अतः सम्प्रति विप्रैर्विद्वद्भिः स्तुतं प्रशंसितं प्रस्तुतमेव वक्ष्ये, कथयामीत्यर्थः।

अनुवाद – लताओं और वृक्षों में भी स्त्रीभाव को देखने से प्रकट हुई कामचेतना वाले तुझ विलासी के समक्ष आत्मनिरूपण करने से कोई लाभ नहीं। अतः विद्वानों द्वारा प्रशंसित प्रस्तुत को ही कहता हूँ।

।। ३५।।

अनेकशाखाप्रचुरप्रचार–
निवारितस्वाश्रिततीव्रतापः।
स्मरान्धभावाद् भवता रसालो
लतात्वमारोप्य न निन्दनीयः।।

अन्वयः – भवता स्मरान्धभावात् अनेकशाखाप्रचुरप्रचारनिवारित–स्वाश्रिततीव्रतापः रसालः लतात्वम् आरोप्य न निन्दनीयः (अस्ति)।

गङ्गा – विलासिनं रसालनिन्दातो वारयति– **अनेकेति**– अनेकशाखानां प्रचुरप्रचारेण भूरिविस्तारेण निवारितः दूरीकृतः स्वाश्रितानां स्वच्छायायां विद्यमानानां स्वाध्येतर्णां वा तीव्रः प्रचण्डः तापः येन सः। तादृशो वेदो वृक्षो वा। वेदः संसारजं तापं दूरीकरोति वृक्षश्च स्वाश्रितानामातपजं तापमिति तापवारकत्वमुभयोः निर्धारितम्। वेदोऽप्यनेकशाखो वृक्षोऽपीति शाखादृष्ट्याऽप्युभयोः साम्यसिद्धिः। स्मरान्धभावात्

कामान्धभावात् भवता विलासिना रसालस्तदाख्यवृक्षो लतात्वमारोप्य न निन्दनीयो न गर्हणीयः। 'मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः, कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मर' इत्यमरः।

अनुवाद – काम से अन्धे होकर अनेक शाखाओं के प्रचुर विस्तार से अपने आश्रितों (या अध्येताओं) के तीव्र ताप का हरण करने वाले रसाल (या वेद) पर लतात्व का आरोप करके उसकी निन्दा करना उचित नहीं।

टिप्पणी – प्रस्तुत प्रसंग में 'अनेकशाखाप्रचुरप्रसार' इत्यादि वाक्य वेद और वृक्ष अर्थ में श्लिष्ट हैं। वृक्ष और वेद अनेक शाखाओं की यथेच्छ वृद्धि से अपने आश्रितों और विधि का पालन करने वाले अध्येता विद्वानों के त्रिविध ताप को दूर करते हैं।

।। ३६ ।।

अकिञ्चनादिक्षितिपान्तलोक-
साधारणस्वादुफलोपभोगः।
परोपकारैकधृतावतारः
स्तुत्यो मयोपेत्य हि वस्तुतोऽयम्।।

अन्वयः – वस्तुतः अकिञ्चनादिक्षितिपान्तलोकसाधारणस्वादुफलोपभोगः परोपकारैकधृतावतारः अयं हि (रसालः) मया उपेत्य स्तुत्यः।

गङ्गा – अकिञ्चनेति– आदिशब्द आद्यवयवे रूढः। अकिञ्चन आदिः अकिञ्चनादिः। अन्तशब्दोऽन्तावयवे रूढः। क्षितिपोऽन्त इति क्षितिपान्तः। अकिञ्चनादिः क्षितिपान्तः यस्य तादृशो लोकः। अकिञ्चनो दरिद्रः क्षितिपश्च नृपः। स्वादुः स्वादिष्टः फलोपभोगः यस्य तादृशो रसालः। अकिञ्चनादिक्षितिपान्त-लोकसाधारणस्य स्वादुफलोपभोगोऽयं केवलं परोपकाराय धृतोऽवतारः गृहीतं जन्म येन तादृशो रसालो मया अलिना सह उपेत्य त्वया विलासिनाऽपि स्तुत्योऽभिनन्दनीयः पूज्यो वेत्यर्थः। वृक्षाणां परोपकारता सुप्रसिद्धैव।

अनुवाद – अकिंचन जिसका आदि है तथा राजा जिसका अन्त है, ऐसे लोक साधारण के द्वारा जिसके फल का उपभोग किया जाता है। परोपकार के लिये ही जिसने जन्म लिया है। इस प्रकार इस रसालवृक्ष की मुझ भ्रमर के साथ तुझ विलासी को भी पूजा करनी चाहिए।

।। ३७।।

निदाघकालातिकरालहेलि-
मयूखमालाकुलितोऽतिवेलम्।
अन्विष्य हृष्यन्निवसन्नमुष्य
च्छायासु विश्राम्यति पान्थसङ्घः।।

अन्वयः – निदाघकालातिकरालहेलिमयूखमालाकुलितः पान्थसंघः अन्विष्य अमुष्य छायासु हृष्यन् निवसन् अतिवेलं विश्राम्यति।

गङ्गा – रसालवृक्षस्योपकारं वर्णयति – **निदाघेति** – निदाघकालस्य ग्रीष्मसमयस्य अतिकरालस्य हेलेः सूर्यस्य या मयूखमाला किरणसमूहस्तया आकुलितः व्याकुलीकृतः पान्थसंघः पान्थानां मार्गे गच्छतां समूहः अन्विष्य अन्वेषणं कृत्वा अमुष्य रसालवृक्षस्य छायासु हृष्यन् हर्षमनुभवन् निवसन् निवासं कुर्वन् अतिवेलम्, भृशम् , अतिक्रान्तं वेलां मर्यादाम्, 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा. २.२.१८) इति समासः। वेलामतिक्रम्य विलम्बं यावद् विश्राम्यति शैत्यमनुभवतीत्यर्थः।'करालं दन्तुरे तुङ्गे भीषणे चाभिधेयवत्' इति मेदिनी।'किरणोस्रमयूखांशुगभस्तिघृणिधृष्णयः, भानुः को मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्' इत्यमरः।

अनुवादः – ग्रीष्मकाल के अतिकठोर सूर्य की किरणों से व्याकुल राहगीरों का समूह इसकी छाया को खोजता है और हर्ष पूर्वक निवास करता हुआ देर तक विश्राम करता है।

।। ३८।।

कान्तासु कान्तारपथेन यान्ती-
ष्वत्यन्ततान्तासु वसन्तकाले।
निशान्तशीघ्राप्तिविधानहेतोः
पिष्टातमध्वन्ययमुच्चिनोति।।

अन्वयः – अयं (रसालः) वसन्तकाले अत्यन्ततान्तासु कान्तारपथेन यान्तीषु कान्तासु निशान्तशीघ्राप्तिविधानहेतोः अध्वनि पिष्टातम् उच्चिनोति।

गङ्गा – रसालस्य गुणान्तरं वर्णयन्नाह– **कान्तेति**– अयं रसालवृक्षः वसन्तकाले अत्यन्ततान्तासु प्रियविरहेऽत्यन्तं श्रान्तासु। 'तान्तः श्रान्त' इति शब्दकल्पद्रुमः। कान्तारपथेन यान्तीषु।'कान्तारोऽस्त्री महारण्ये विले दुर्गमवर्त्मनि'

इति मेदिनी। वसन्तजन्यविरहपीडया दुर्गममार्गेण अतिकष्टेन कालं नयन्तीषु कान्तासु पथिकप्रियासु प्रियाणां निशान्ते भवने शीघ्रं सपदि आप्तिविधानहेतोः प्राप्तिनियमसम्पादनाय। 'निशान्तं त्रिषु शान्ते स्यात्क्लीबं तु भवनोषसोः' इति मेदिनी। अस्मत्प्रियाः शीघ्रं गृहमागच्छन्त्विति धिया पथिकप्रियाभिः क्रियमाणस्य विधेः पूर्तये इत्यर्थः। अध्वनि कान्तानां दुर्गममार्गे। 'अध्वा ना पथि संस्थाने सास्रवस्कन्धकालयोः' इति कोशः। पिष्टातं सुगन्धचूर्णम्। 'पिष्टातः पटवासकः' इत्यमरः। आम्रमञ्जरीपरागरूपं द्रव्यं राशीकरोतीत्यर्थः।

अनुवाद – यह रसाल वसन्तकाल में (विरहकातरता के कारण) अत्यन्त भ्रान्त अत्यधिक कठिनता से समय बिता रही पथिक प्रियाओं द्वारा 'हमारे प्रियतम शीघ्र घर आयें' इस इच्छा से किये जा रहे विधि विधान के सम्पादन हेतु (आम्र मंजरी के पराग रूप में) सुगन्धित चूर्ण की राशि एकत्र कर देता है।

।। ३९ ।।

फलातिभारेऽपि नतो विनीतो–
ऽवनोपयुक्तः सहकारराजः।
त्वया सदामोदरसप्रदायी
तर्प्यो न गर्ह्यस्त्वथ वारियुक्त्या।।

अन्वयः – त्वया वा फलातिभारे अपि नतः विनीतः अवनोपयुक्तः अथ सदामोदरसप्रदायी सहकारराजः तर्प्यः, न तु अरियुक्त्या गर्ह्यः।

गङ्गा – अयं रसालस्त्वया तर्प्य इति निर्दिशति– **फलेति** – त्वया विलासिना फलानामाधिक्यात् अतिभारे अपि नतः नम्रः, विनीतः विनयशीलः वृक्षास्तु फलागमैर्नम्रा भवन्तीति 'भवन्ति नम्रास्तरवः फलागमैः' इत्याद्युक्तिभिः प्रसिद्धमेव। अवनोपयुक्तः, 'अव रक्षणे' इति धातोर्ल्युटि रूपम्। रक्षणयोग्यः इत्यर्थः। अथ सदैव आमोदरसस्य प्रदायकोऽयं सहकारराजस्तर्प्यः तर्पणयोग्यः। न तु शत्रुभावेन विरुद्धभाषणेन वा गर्ह्यः निन्द्यः। अथवा 'विनीतो वनोपयुक्तः' इत्यपि पाठः स्वीकर्तुं शक्यते। तथात्वे वनोपयुक्तः वनयोग्य इत्यर्थः। आमोदशब्दस्य नानार्थकत्वात् मधुरसप्रदायी, हर्षस्य यो हि रसः सारः तस्य अनुरागस्य वा प्रदायीत्यपि अर्थयोजना। तथैव वारियुक्त्या जलयोगेन तर्प्यः इत्यप्यर्थः सम्भाव्यते।

अनुवाद – फलों के अत्यन्त भार से नम्र, विनयशील, रक्षण योग्य तथा आमोदरस देने वाले इस सहकारराज की तुम्हें स्तुति करनी चाहिए। शत्रुता अथवा विरुद्धभाषण से तुम्हारे द्वारा उसकी निन्दा उचित नहीं।

टिप्पणी – यहाँ 'विनीतोऽवनोपयुक्तः' के स्थान पर 'विनीतो वनोपयुक्तः' पाठ भी सम्भव है। आमोद शब्द के कोश में अनेक अर्थ होने के कारण इसका अर्थ मधुरस प्रदान करने वाला भी माना जा सकता है। यहाँ प्रयुक्त वारि शब्द को जलवाचक माना जा सकता है। ऊपर 'न वा अरियुक्त्या' पाठ स्वीकृत है। यहाँ 'वारियुक्त्या' पाठ भी माना जा सकता है। ऐसे में 'वन के योग्य, सुगन्ध, हर्ष, अनुराग रूप रस देने वाले उस सहकार राज का जल से तर्पण करना चाहिए' यह अर्थ भी किया जा सकता है।

॥ ४० ॥

विरुद्धदुर्दर्शनगानि हित्वा-
ऽफलानि तुच्छान्यधिया वनानि।
सुधावधीर्युच्चफलाभिलाषा-
दमुं समन्ताद् भजते द्विजौघः॥

अन्वयः – द्विजौघः विरुद्धदुर्दर्शनगानि अफलानि वनानि तुच्छान्यधिया सुधावधीर्युच्चफलाभिलाषात् हित्वा समन्तात् अमुं भजते।

अथवा – द्विजौघः विरुद्धदुर्दर्शनगानि तुच्छानि अधियावनानि फलानि हित्वा सुधावधीर्युच्चफलाभिलाषात् समन्तात् अमुं भजते।

गङ्गा – श्लिष्टोक्त्या ब्राह्मणसमूहपक्षे पक्षिसमूहपक्षे च रसालस्य गुणान् वर्णयति- **विरुद्धेति-** ब्राह्मणसमूहः विरुद्धानि विपरीतार्थकानि यानि दुर्दर्शनानि नास्तिकादीनि दुष्टशास्त्राणि तद्गानि तत्र स्थितानि वर्णितानि अफलानि परिणामरहितानि निष्फलानि वनानि अरण्यानि तुच्छान्यया विवेकवत्या बुद्ध्या हित्वा परित्यज्य सुधा अवधीर्यते तिरस्क्रियते यैस्तादृशानि यानि उच्चफलानि धर्मादीनि तेषाम् अभिलाषात् समन्तात् अमुं भजते। वेदवृक्षं सेवत इत्यर्थः॥

द्विजशब्दस्य पक्षिण्यपि श्लिष्टत्वात् तत्पक्षे भिन्नार्थयोजना- द्विजौघः पक्षिसमूहः। 'दन्तविप्राण्डजा द्विजा' इत्यमरः। विरुद्धदुर्दर्शनगानि विभिः पक्षिभिः रुद्धाः परिपूर्णाः दुर्दर्शाः नगाः। 'शैलवृक्षौ नगावगौ' इत्यमरः। वृक्षा येषु तानि

तुच्छानि अधियावनानि, अधिका यवना येषु तानि, अधिकं यवनसम्बन्धीनि व्याधादिहिंसकभरितानि । फलानि हित्वा त्यक्त्वा सुधावधीरिणाम् अमृताधिकस्वादूनाम् उच्चफलानां श्रेष्ठफलानां सहकारफलानामिति यावत् । अभिलाषात् कामनया द्विजौघः पक्षिसार्थः, अमुं सहकारराजं भजते आश्रयत्वेन स्वीकरोतीत्यर्थः ।

अनुवाद – (ब्राह्मणपक्ष) ब्राह्मण समूह विरुद्धार्थक शास्त्रों में वर्णित निष्फल वनों को विवेकपूर्ण बुद्धि से त्याग देते हैं तथा अमृत को भी तिरस्कृत करने वाले (धर्म आदि) उच्च फलों की अभिलाषा से इस वेदवृक्ष का आश्रय लेते हैं।

(पक्षी पक्ष) पक्षियों से परिपूर्ण दुदर्श वृक्षों से युक्त,तुच्छ और यवनों से अधिष्ठित फलों को छोड़कर पक्षिसमूह अमृत को भी तिरस्कृत करने वाले मधुर फलों की अभिलाष से इस रसाल वृक्ष का आश्रय लेता है।

।। ४१ ।।

विचित्रवर्णोज्ज्वलपत्रनिर्यद्–
द्रवं स्वकण्ठे सततं निधाय।
अन्तेवसन्नस्य वनप्रियोऽयं
द्विजो गिराऽशेषगिरोऽतिशेते ।।

अन्वयः – विचित्रवर्णोज्ज्वलपत्रनिर्यद्द्रवं सततं स्वकण्ठे निधाय अस्य अन्तेवसन् अयं वनप्रियः द्विजः गिरा शेषगिरः अतिशेते।

गङ्गा – पुना रसालस्य वैशिष्ट्यमाह– **विचित्रेति**– विचित्रवर्णैर्नानाविधाक्षरैः उज्ज्वलानि सुन्दराणि यानि पत्राणि पुस्तकपृष्ठानि तेभ्यो निर्यद् निःसृतं रवं शब्दम्। अनचि चेति दकारस्य द्वित्वे निर्यद्द्रवम्। 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु चाक्षरे' इत्यमरः। 'शब्दे निनादनिनदध्वनिध्वानरवस्वनाः' इति चामरः। सततम् अविरतं स्वकण्ठे निधाय धारयित्वा अस्य रसालरूपस्य गुरोः अन्तेवसन् शिष्यत्वं प्राप्तो वनप्रिय एकान्ते विद्योपासनायां संलग्नः ब्राह्मणः गिरा स्वकीयया वाण्या शेषगिरः शेषस्य पतञ्जलेरुक्तीरतिशेते तिरस्करोति। ततोऽप्यधिकं वाग्वैभववान् भवतीत्यर्थ इति अथवा वेदभिन्ना वाचोऽतिशेते इति वा ब्राह्मणपक्षेऽर्थयोजना। कोकिलपक्षे तु– विचित्रवर्णैर्नानारूपैः उज्ज्वलानि भासुराणि यानि पत्राणि दलानि तेभ्यो निर्यद् निर्गतं द्रवं रसं सततं स्वकण्ठे निधाय अस्य सहकारस्य अन्तेवसन् समीपे निवसन् अयं वनप्रियो द्विजः कोकिलाख्यः पक्षी गिरा वाण्या अशेषगिरः सकलशब्दान् अतिशेते,

अतिक्रामतीत्यर्थः। सहकारदलान्निःसृतं द्रवं पीत्वा कोकिलस्तथा मधुरं रौति यथा नान्यः कश्चिद् द्विज इति भावः।'वनप्रियः परभृतः कोकिलः पिक इत्यपि' इत्यमरः।

अनुवाद – (ब्राह्मण पक्ष)अनेक प्रकार के अक्षरों से सुशोभित पुस्तकों के पत्रों से निकले हुए वेद शब्दों को सदैव अपने कण्ठ में धारण करके इसके पास निवास करता हुआ विप्रशिष्य पतञ्जलि की उक्तियों का भी या वेदभिन्न समस्त वाणियों का अतिक्रमण करता है।

(कोकिल पक्ष) अनेक प्रकार से सुशोभित पत्तों से निकले हुए द्रव को सदैव अपने कण्ठ में धारण करके इस (रसाल वृक्ष) के पास निवास करता हुआ कोकिल नामक पक्षी वाणी से सभी शब्दों का अतिक्रमण करता है।

।। ४२।।

अत्रापतन्व्या सहितः शुकोऽपि
श्रुत्वा मुहुः कोकिलमञ्जुलोक्तीः।
तृप्तः प्रखण्ड्यैव फलानि मुञ्चन्
प्रक्षीणबन्धोऽमुमुपाससाद।।

अन्वयः – (शुकपक्षे) मुहुः कोकिलमञ्जुलोक्तीः श्रुत्वा शुकः अपि अत्र तन्व्या सहितः आप। प्रखण्ड्य एव तृप्तः (सः) फलानि मुञ्चन् प्रक्षीणबन्धः (सन्) अमुम् उपाससाद।

अथवा – (योगीन्द्रशुकदेवपक्षे) मुहुः कोकिलमञ्जुलोक्तीः श्रुत्वा अत्र व्यासहितः शुकः अपि आपतन्॥ (अन्यत् समानम्)।

गङ्गा – रसालस्य पुनर्वैशिष्ट्यं वर्णयति– **अत्रेति** – शुकशब्दोऽत्र श्लिष्टः। मुहुः वारम्बारं कोकिलस्य मञ्जुला उक्ती रवान् श्रुत्वा शुकः अपि अत्र तन्व्या भार्यया सहितः आप प्राप। प्रखण्ड्य विखण्ड्य एव तृप्तः सः फलानि सुपक्वानि फलानि मुञ्चन् पञ्जरे प्रक्षीणबन्धः सन् अमुं सहकारम् उपाससाद आजगाम।

शुकदेवपक्षे–व्यासाय हितः व्यासहितः आपतन् आगच्छन् शुको योगीन्द्रः। प्रखण्ड्य विखण्ड्य सांसारिकाणि फलानि त्यजन् संसारे प्रक्षीणबन्धः सन् अमुम् उपाससाद।

अनुवाद – (शुकपक्ष) बार–बार कोयल के सुन्दर कूजन को सुनता हुआ अपनी भार्या के साथ शुकपक्षी भी यहाँ आया। फलों के कुतरने से ही सन्तुष्ट होकर

उसने उन्हें छोड़ दिया और पिंजरे से बन्धन रहित होकर इस सहकार के पास आया।

(शुकदेव पक्ष) – व्यास के हित शुकदेव भी यहाँ आये। सांसारिक फलों को तोड़ने में ही तृप्ति पाकर उन्होंने संसार से मुक्त होकर इस सहकार को प्राप्त किया।

।। ४३ ।।

महाफलं निश्चलभावरम्यं
विहाय मोहात्सहकारमेनम्।
जलाशयान् गूढपथेन यान्त्या-
ऽनया व्रतत्यागविनिन्द्ययाऽलम्।।

अन्वयः – मोहात् महाफलं निश्चलभावरम्यम् एनं सहकारं विहाय गूढपथेन जलाशयान् यान्त्या अनया व्रतत्यागविनिन्द्यया अलम्।

गङ्गा – विलासिनं प्रबोधयति– **महाफलमिति–** हे विलासिन्! मोहात् अज्ञानात् महाफलं विपुलफलदातारं निश्चलैर्भावै रम्यम् एकनिष्ठप्रीत्या मनोहरम् एनं बहुगुणोपेतं सहकारं रसालवृक्षं विहाय परित्यज्य गूढपथेन गुप्तमार्गेण जलाशयान् सरोवरादीन् यान्त्या अनया व्रतत्यागविनिन्द्यया व्रतस्य पातिव्रत्यव्रतस्य नियमस्य त्यागेन दूषितया, यद्वा 'व्रतत्या गवि निन्द्यया' इति पाठः। गवि पृथ्व्यां निन्द्यया अनया सरोजिन्या व्रतत्या अलमित्यर्थः। अथवा 'व्रतत्याऽगविनिन्द्यया' इति पाठयोजना। तथात्वे अगैः वृक्षैः विनिन्द्यया त्यक्तया व्रतत्या अलमित्यर्थबोधः।'शैलवृक्षौ नगवगौ' इत्यमरः। एवमेव 'जलाशयान्' इत्यत्र डलयोरभेदनियमात् 'जडाशयान्' इति पाठं परिकल्प्य मूर्खान् इत्यप्यर्थ ऊह्यः।

अनुवाद – (हे विलासिन्) अज्ञान से महान् फल देने वाले, निश्चलभावों से सुन्दर इस सहकारवृक्ष को छोड़कर गुप्तमार्ग से जलाशयों (या मूर्खों) की ओर जा रही, पतिव्रतधर्म को छोड़ने से दूषित इस कमलिनी की प्रशंसा अब मत करो।

टिप्पणी – 'डलयोरभेदः' नियम से यहाँ प्रयुक्त 'जलाशयान्' की जगह 'जडाशयान्' पाठ मान कर मूर्खों के पास जाती हुई जैसा अर्थ किया जा सकता है। इसी प्रकार 'व्रतत्यागविनिन्द्यया' की अनेक प्रकार से अर्थयोजना सम्भव है। व्रतत्या गवि निन्द्यया' पृथ्वी में निन्दित लता व्रतत्याऽगाविनिन्द्यया' वृक्षों द्वारा छोड़ी गयी

लता आदि अर्थ भी सम्भव हैं।

।। ४४।।

इयं पुरा घोरनिदाघतप्तं
पिपासयाऽव्यक्तरवं कृशं माम्।
स्वपाणिना वातजवेन तोये
निमज्जयन्ती स्वगुणैश्चकर्ष।।

अन्वयः – इयं पुरा घोरनिदाघातप्तं पिपासया अव्यक्तरवं कृशं मां वातजवेन स्वपाणिना तोये निमज्जयन्ती स्वगुणैः चकर्ष।

गङ्गा – पुनरपि सरोजिन्याः कर्म वर्णयति– **इयमिति**– इयं सरोजिनी पुरा पूर्वकाले घोरनिदाघतप्तम्, घोरेण प्रचण्डेन निदाघेन तप्तम् अथ च पिपासयाऽव्यक्तरवम्, पिपासया पिपासाकुलतया शुष्ककण्ठत्वात् अव्यक्तो रवो यस्य तादृशं कृशं दुर्बलं माम् अलिं वातस्य वायोः जवेन वेगेन स्वपाणिना तोये जले निमज्जयन्ती जलमग्नं कुर्वती स्वगुणैः सुगन्धादिभी रज्जुभिर्वा चकर्ष कर्षितवती। कर्षतेर्लिटि रूपम्।

अनुवाद – इस (सरोजिनी) ने पूर्व में प्रचण्ड ग्रीष्म से तपे हुए, पिपासा के कारण बोल पाने में असमर्थ, मुझ दुर्बल भ्रमर को वायु के वेग के द्वारा अपने हाथों से जल में डुबाती हुई अपने गुणों से आकृष्ट किया।

।। ४५।।

मदोद्धतैरावणहस्तपातै–
र्वनेऽवनीजेव निपीड्यमाना।
विदश्य विद्राव्य च तं मयाऽसौ
त्राता यथाशक्ति जटायुनेव।।

अन्वयः – महोद्धतैरावणहस्तपातैः वने अवनीजा इव निपीड्यमाना असौ मया तं यथाशक्ति विदश्य विद्राव्य च जटायुना इव यथाशक्ति त्राता (अभवत्)।

गङ्गा – सरोजिन्यां स्वोपकारं वर्णयन्नाह– **मदेति**– मदोद्धतैरावणहस्तपातैः, मदेन दानेन। 'मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः' इति विश्वः। उद्धत उद्दण्डो य ऐरावणः इन्द्रगजस्तस्य हस्तपातैः शुण्डापातैः। 'ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभा' इत्यमरः। 'हस्तः करे कटिकरे सप्रकोष्ठकरेऽपि च। ऋक्षे केशात् परो वाते' इति

मेदिनी। वने जले 'वने सलिलकानने' इत्यमरः। अवनीजेव सीतेव निपीड्यमाना असौ सरोजिनी मया अलिना तं मत्तगजं विदश्य विद्राव्य च दूरं प्रक्षिप्य च जटायुना इव यथाशक्ति त्राता रक्षिता। अभवदिति शेषः।

सीता पक्षे 'मदोद्धतै रावणहस्तपातैः' मदेन गर्वेण उद्धतै रावणस्य हस्तपातैः अवनीजा सीता जटायुना इव यथाशक्ति त्रातेत्यर्थयोजना।

अनुवाद – मद से उद्धत ऐरावत के शुण्डा प्रहार से (अथवा गर्वोद्धत रावण के हाथों के प्रहार से) सीता के समान पीड़ित इस कमलिनी की मैंने उसे तितर बितर या भयभीत करके यथाशक्ति जटायु के समान रक्षा की।

।। ४६ ।।

सदारुणोल्लासितपद्मनेत्रा
विश्राव्य या सारसनिष्ठुरोक्तीः।
पदानतं मां कटुकण्टकाग्रै–
स्तुतोद माद्यद्धृदया ऽदयाऽसौ ।।

अन्वयः – सदारुणोल्लासितपद्मनेत्रा सारसनिष्ठुरोक्तीः विश्राव्य या असौ माद्यद्धृदया अदया पदानतं मां कटुकण्टकाग्रैः तुतोद।

गङ्गा – पुनः किमाचरितं सरोजिन्या इति वर्णयति– **सदारुणेति**– सदा अरुणेन सूर्येण उल्लासितानि पद्मनेत्राणि यस्याः सा।'अरुणो भास्करेऽपि स्यादर्णभेदेऽपि च त्रिषु' इत्यमरः। अथवा दारुणेन सहितं यथा स्यात्तथा सदारुणं क्रूरम् उल्लासितानि पद्मनेत्राणि यया सा। सारसपक्षिणः निष्ठुरोक्तीः दुःश्रवशब्दान्, यद्वा अरसेन सहिताः सारसास्तादृशीः निष्ठुरोक्तीः विश्राव्य या असौ, माद्यद्धृदयं यस्याः सा तादृशी तव विलासिनो दयापात्रभूता सरोजिनी अदया दयारहिता, पदानतं, पदे चरणे आनतं विनम्रतां प्राप्तं माम् अलिं कटुकण्टकाग्रैः, कटूनि यानि कण्टकानि तेषाम् अग्रैस्तीक्ष्णाग्रभागैस्तुतोद पीडयामास। तुदतेर्लिटि।

अनुवाद – सदैव सूर्य जिसके पद्मनेत्रों को विकसित करता है (अथवा क्रूरता से जिसके पद्मनेत्र विस्फारित होते हैं), सारसपक्षियों के कटुशब्दों (अथवा नीरस उक्तियों) को सुना कर यह मतवाले हृदय वाली निर्दय सरोजिनी पैरों पर पड़े हुए मुझ भ्रमर को कठोर काँटों के अग्रभाग से पीड़ित करती थी।

।। ४७।।

इयं मुहुर्वाडवजातरूप–
स्तेयार्जितश्रीकसरोजहस्ता।
लोभाद् भयाद्वा द्विजराजदृष्टे–
र्निगूहति स्वं दृढबद्धमुष्टिः।।

अन्वयः – वाडवजातरूपस्तेयार्जितश्रीकसरोजहस्ता दृढबद्धमुष्टिः इयं लोभाद् भयाद् वा द्विजराजदृष्टेः स्वं मुहुः निगूहति।

गङ्गा – इयमिति– वाडवजातरूपस्तेयार्जितश्रीकसरोजहस्ता, वाडवे समुद्रानले जातस्य अरुणरूपस्य स्तेयेन चौर्येण अर्जिता प्राप्ता श्रीर्येन तादृशं सरोजं हस्तो यस्याः सा 'वाडवं करणे स्त्रीणां घोटकौघो नपुंसकम्। पाताले न स्त्रियां पुंसि ब्राह्मणे वडवानले' इति कोशः। यद्वा वाडवस्य ब्राह्मणस्य जातरूपस्य सुवर्णस्य स्तेयेन अर्जिता प्राप्ता श्रीर्येन तादृशं सरोजं तादृशो हस्तो यस्याः सा। दृढबद्धमुष्टिः मुकुलितपुष्पा लुब्धा कृपणा वा इयं सरोजिनी लोभाद् भयाद्वा स्वम् आत्मानं द्विजराजानां ब्राह्मणानां नृपाणां चन्द्रस्य वा दृष्टेः मुहुः पौनः पुन्येन निगूहति प्रच्छादयति। स्वकीयस्वर्णरूपस्य लोभाद् भयाद् वा द्विजराजेभ्यः स्वं स्वरूपं निगूहतीति भावः।

अनुवाद – वडवानल में उत्पन्न (अथवा ब्राह्मण के) अरुणरूप को चुराकर सुन्दर सरोज रूपी हाथों को प्राप्त करने वाली, लुब्धा या मुकुलित पुष्पा यह सरोजिनी लालच या भय से ब्राह्मणों, राजा या चन्द्र की दृष्टि से अपने को छिपाती है।

।। ४८।।

निगूढभावान्निशि विप्रसूना
दोषानुषङ्गात्सततं विगीता।
तपः सहस्यानवलोक्यरूपा
मुदं विधत्ते न सरोजिनी मे।।

अन्वयः – निशि निगूढभावात् विप्रसूना दोषानुसङ्गात् सततं विगीता तपःसहस्य अनवलोक्यरूपा सरोजिनी मे मुदं न विधत्ते।

गङ्गा – निगूढेति – निशि रात्रौ निगूढभावात् गुप्तभावात् मुकुलिरूपत्वात्। विप्रसूना, विगतानि प्रसूनानि यस्याः सा। यद्वा विप्राणां सूना वधस्थानम्। दोषानुसङ्गात्,

दोषा रात्रिः तस्या अनुषङ्गात्, अथवा दोषाणाम् अनुषङ्गात् सततम् अहर्निशं विगीता निन्दिता गीतशून्या वा। 'अथ दोषा च नक्तं च रजनाविति' इत्यमरः। 'सूना पुत्र्यां वधस्थानगलशुण्डिकयोरपि' इति विश्वः। तपः सहस्य तपस्विनः। माघपौषयोः वा। 'तपो लोकान्तरेऽपि च। चान्द्रायणादौ धर्मे च पुमाञ् शिशिरमाघयोः' इति कोशः। अनवलोक्यरूपा, अनवलोक्यं रूपं यस्याः सा सरोजिनी मेऽलेः मुदमानन्दं न विधत्ते न तनुत इत्यर्थः।

अनुवाद – रात में मुकुलित रहने के कारण पुष्परहित, रात्रि (दोषों) के अनुषङ्ग से सदैव निन्दनीय या गीत रहित, माघ और पौष में (अथवा तपस्वियों के लिये) अदर्शनीय रूप वाली यह कमलिनी मुझ अलि को आनन्द प्रदान नहीं करती।

।। ४९ ।।

निरीक्ष्य पङ्के पतितां सदाहं
हा हन्त चक्रेण विनाऽश्यमानाम्।
गिरोपदिश्यानिशमुद्दिधीर्षु-
र्विमोह्य मत्या मधुना न्यबध्ये।।

अन्वयः – हा! हन्त! अहं सदा पङ्के पतितां चक्रेण विना अश्यमानां निरीक्ष्य अनिशं गिरा उपदिश्य उद्दिधीर्षुः मत्या मधुना विमोह्य न्यबध्ये।

गङ्गा – निरीक्ष्येति– हा! हन्तेति दुःखसूचकेऽव्यये। अहम् अलिरेनां सरोजिनीं सदा सदैव पङ्के कर्दमे पापे वा पतितां मग्नां पातित्ययुक्तां वा। अथवा सदाहमित्येकं पदम्। दाहेन सन्तापेन सहितं यथा स्यात्तथा। चक्रेण शस्त्रेण विना विःपक्षी तेन विना चक्रेण विना अश्यमानां, विनाश्यमानां, सम्भुज्यमानां वा, निरीक्ष्य दृष्ट्वा। 'चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथाङ्गयोः। राष्ट्रे दम्भान्तरे कुम्भकारोपकारणास्त्रयोः' इति मेदिनी। 'पङ्कोऽस्त्री कर्दमे पापे' इति च मेदिनी। अनिशं सततं गिरा वाण्या उपदिश्य उद्दिधीर्षुः उद्धारं चिकीर्षुः मत्या बुद्धिपूर्वकं मधुना मद्येन पुष्परसेन वा विमोह्य न्यबध्ये बद्धोऽभवम्।

अनुवाद – हा! हन्त! मैंने कीचड़ या पाप में डूबी हुई, चक्रवाकपक्षी के द्वारा (अथवा अस्त्र के विना ही) नाश की जा रही देखकर, सदैव वाणी से उपदेश देकर उद्धार करने की कामना से इसके पास आया किन्तु मैं इसके द्वारा बुद्धिपूर्वक मधु (मद्य या पुष्प रस) से विमोहित करके बाँध लिया गया।

टिप्पणी – प्रस्तुत प्रसंग में पङ्कशब्द पाप और कर्दम का 'पतिताम्' मग्न और पातित्य युक्त का 'चक्र' शब्द शस्त्र और चक्रवाक का 'विना' राहित्य और पक्षी (वि: = पक्षी, तृतीया एकवचन) का अश्यमानाम् नाश और भोग का अर्थ देते हैं। तदनुसार इनकी योजना करनी चाहिए।

।।५०।।

कष्टाऽत्र पीडाकरपत्रजात–
निपातजा मोहवशाद्दशा मे।
सकोशभूसङ्कटवासदुःखं
सोढो मया केसरसूचिवेधः।।

अन्वयः – अत्र मोहवशात् मे पीडाकरपत्रजातनिपातजा कष्टा दशा (अभूत्), मया सकोशभूसङ्कटवासदु:खं केसरसूचिवेध: सोढ: ।

गङ्गा – कष्टेति– अत्र अस्यां सरोजिन्यां मोहवशात् अज्ञानकारणात् निवसतो मे भ्रमरस्य पीडाकरपत्रजातनिपातजा, पीडाकराणि पीडादायकानि यानि पत्रजातानि दलानि तेषु निपातान्मग्नताया कष्टा कष्टप्रदा दशा अवस्था जाता। यद्वा 'कष्टाऽत्र पीडा करपत्रजातनिपातजा' इति पाठ:। तथात्वे करपत्राणां क्रकचानां जातेन निपातेन जन्या उद्भूता पीडेत्यर्थ:। 'क्रकचोऽस्त्रीकरपत्रम्' इत्यमर:। कष्टा कष्टप्रदा दशा। अभवदिति शेष:। मया अलिना च सकोशभूसङ्कटवासदु:खम् कोशस्य कलिकाया अन्त:स्थाने धनस्थाने वा सङ्कटे वासस्य निवासस्य दु:खम्। 'कोषोऽस्त्रीकुड्मले खड्गपिधानेऽर्थौघदिव्ययो:' इत्यमर:। केसराणां किञ्जल्कानाम्। 'केसरं हिङ्गुनि क्लीबं किञ्जल्के न स्त्रियां पुमान्' इति मेदिनी। सूचीनां कण्टकानां वेध: सोढ:।

अनुवाद – अज्ञान के कारण (इस सरोजिनी के साथ रहते हुए) पीडा जनक पत्रों के निपात से मेरी कष्टप्रद दशा हो गयी। मैंने कोशरूप संकीर्ण स्थान में कष्ट से निवास करने का दु:ख सहा और किंजल्कों के सूचीवेध को सहन किया।

।।५१।।

निशां कथञ्चिद् व्यपनीय मुक्त्यै
हरिं स्मरन् मौनविनिश्चलाङ्गः।
सरोषमस्या अवमत्य पत्या
करैर्निशान्ते गलहस्तितोऽस्मि।।

अन्वयः – मौनविनिश्चलाङ्गः (अहम्) मुक्त्यै हरिं स्मरन् कथञ्चिद् निशां व्यपनीय निशान्ते सरोषम् अस्याः पत्या अवमत्य करैः गलहस्तितः अस्मि।

गङ्गा– निशामिति– मौनविनिश्चलाङ्गः, मौनेन विनिश्चलानि अङ्गानि यस्य सः मौनविनिश्चलाङ्गस्तादृशोऽहमलिः मुक्त्यै सरोजिन्याः सकाशान्मुक्त्यै मोक्षप्राप्तये वा हरिं स्मरन् विष्णोः स्मरणं कुर्वन् कथञ्चिद् येन केन प्रकारेण निशां रात्रिं व्यपनीय सरोषं रोषेण सहितं यथा स्यात्तथा अस्याः सरोजिन्याः पत्या सूर्येण अवमत्य अवमतिं विधाय निशान्ते प्रातःकाले। 'निशान्तं त्रिषु शान्ते स्यात् क्लीबं तु भवनोषसोः' इति मेदिनी। रात्र्यपगमे गृहे वा करैः किरणैः हस्तैर्वा गलहस्तितोऽस्मि बलाद् बहिष्कृतोऽस्मि। सरोजिनीपक्षे पतिशब्दः सूर्यवाचको नायिकापक्षे तु तस्याः पत्युः। एवमेव करशब्दः सूर्यपक्षे किरणवाचको नायिकापतिपक्षे तु हस्तवाचकः।

अनुवाद – मौन से निश्चल अङ्गों वाले मुझ अलि ने मुक्ति (या छूटने) के लिये हरि का स्मरण करते हुए किसी तरह रात बिताई। प्रातः काल (नायिका पक्ष में घर में) इस सरोजिनी के पति सूर्य (या नायिका के पति) द्वारा किरणों से (या हाथों से) पकड़ लिया गया हूँ।

टिप्पणी – यहाँ 'निशान्त', 'पति' और 'कर' शब्द श्लिष्ट हैं। नायिका पक्ष में निशान्त का अर्थ 'घर', पति का अर्थ उसका प्रियतम और 'कर' का अर्थ हाथ होगा। सरोजिनी पक्ष में ये क्रमशः प्रातः काल, सूर्य और किरण के वाचक हैं।

।।५२।।

तथाऽवधूतं च मदेन सार्धं
विहाय मार्गं त्रपया निवृत्तम्।
स्फुटारविन्दद्वयदत्ततालं
प्रियंवदं मां सुतरां जहास।।

अन्वयः – (अलिपक्षे)त्रपया सार्धं निवृत्तं मार्गं विहाय मदेन च तथा (पत्या) अवधूतं प्रियंवदं मां सुतरां स्फुटारविन्दद्वयदत्ततालं जहास। (यतिपक्षे) मदेनसा त्रपया निवृत्तम् अर्धं मार्गं विहाय प्रियंवदं माम् अवधूतं च सुतरां (पत्या) स्फुटारविन्दद्वयदत्ततालं जहास।

गङ्गा – तथेति – त्रपया लज्जया सार्धं साकम्। 'मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा' इत्यमरः। निवृत्तं निष्पन्नं मार्गं विहाय परित्यज्य, मदेन गर्वेण। 'मन्दो रेतसि

कस्तूर्यां गर्वे हर्षेभदानयोः' इति मेदिनी। तथा तेन प्रकारेण पत्या कमलिनी प्रियेण सूर्येण नायिकाप्रियेण अवधूतं तिरस्कृतं प्रियंवदं मधुररवकारिणं माम् अलिं सुतरां स्फुटारविन्दद्वयदत्ततालं, स्फुटं च तत् अरविन्दं चेति स्फुटारविन्दम्, तस्य द्वयं स्फुटारविन्दद्वयम्', तेन स्फुटारविन्दद्वयेन दत्तस्ताल इति स्फुटविन्दद्वयदत्तालः। क्रियाविशेषणत्वात् कर्मत्वं क्लीबत्वमेकत्वं चेति। जहास। हसतेर्लिटि रूपम्। भृशमुपहसितवतीत्यलिपक्षेऽर्थः। यतिपक्षे तु मदेनसा मदीयेन पापेन 'एनः पापापराधयोः' इत्यमरः। त्रपया लज्जया निवृत्तम् अर्धं मार्गं विहाय प्रियंवदं समेषां प्रियवक्तारं माम् अवधूतं यतिं च पत्या प्रियेण सह स्फुटारविन्दद्वयदत्ततालम्। उभयत्र क्रियाविशेषणमिदम्। जहास। यतिं मां स्वप्रियेण सह उपहासं कृत्वा तिरश्चकारेति भावः।

अनुवाद - (भ्रमर पक्ष) (उस सरोजिनी या नायिका ने)लज्जा से निवृत्त मार्ग को छोड़कर मद के कारण पति (सूर्य या प्रियतम) के द्वारा तिरस्कृत मधुर गुंजार करने वाले मुझ भ्रमर (या अतिप्रिय बोलने वाले कामुक जार) का खिले हुए दो कमलों से ताली देकर उपहास किया। (यतिपक्ष) मेरे पाप के कारण लज्जा से निष्पन्न मार्ग को छोड़कर प्रिय बोलने वाले मुझ अवधूत (यति) का पति (सूर्य या प्रियतम) के साथ खिले हुए दो कमलों से ताली देकर उपहास किया।

।।५३।।

तथाऽप्यमुष्यां बहुमानवत्या-
मत्यादृतोऽसौ जलजाऽबलेति।
उपादिशं यद्धितवेदमस्म-
न्मनस्ततोऽजायत भूरिदुःखम्।।

अन्वयः - 'असौ जलजा अबला' तथापि बहुमानवत्याम् अमुष्याम् अत्यादृतः 'इदम् अस्मन्मनः तव' इति यद्धि उपादिशम्, ततः भूरिदुःखम् अजायत।

गङ्गा - सरोजिनीं मूर्खसुतात्वेन च परिकल्प्य वक्ति - **तथेति**- असौ सरोजिनी जलजा अबला जलादुत्पन्ना अबला स्त्रीति तथापि अमुष्यां बहुमानवत्याम् अतिमानयुक्तायाम् अत्यादृतः भृशम् आदरयुक्तः सन् 'इदम् अस्मन्मदीयं मनः तव' तवैव इति यद्धि उपादिशम्, कथितवान् अस्मि, ततः तस्मात् भूरिदुःखं महत्कष्टम् अजायत अभवत्।

यद्वा डलयोरभेदनियमात् 'असौ जडजाबला' मूर्खसुता। 'बहुमानवत्यामत्या-दृत:' इत्यत्र च 'बहुमानवत्या मत्या आदृत:' इति पाठ:। तथात्वे 'बहुमानयुक्त्या बुद्ध्या' इत्यर्थोऽङ्गीकार्य:। 'यद्धितवेदमस्मन्मन:' इत्यत्र 'यद् हितवेदम्' इति योजना हितकरं वेदं श्रुतिमित्यर्थ:। एवं कमलिनीपक्षे मूर्खसुतायाश्च पक्षेऽस्यान्वय:। मूर्खसुतापक्षे तु 'असौ जडजाबला' तथापि अमुष्यां बहुमानवत्या मत्या अत्यादृत: (सन्) 'हितवेदम् अस्मन्मन:' इति यद् उपादिशं तत: भूरिदु:खम् एव अजायत' इति सम्बन्ध:।

अनुवाद – (कमलिनीपक्ष) यह जल से उत्पन्न स्त्री है, तथापि अत्यन्त मानयुक्त इस कमलिनी पर मेरा अत्यधिक आदर था। इसी आदर के कारण मैंने इसे यह कह दिया कि 'यह मेरा मन तुम्हारा है'। इस कथन से मुझे अत्यन्त दु:ख हुआ।

(मूर्खसुतापक्ष) यह मुर्खसुता है तथापि इसे अतिआदरयुक्त बुद्धि से मैंने यह जो कहा कि हमारा मन हितकारी वेद (श्रुति) है, इससे मुझे अत्यन्त दु:ख हुआ।

।।५४।।

सुनीचकासारकुलेऽप्प्रसूता
दिवैव काम्या न ममाभिगम्या।
असारसंसारसमुत्सुकाऽसौ
वहत्यखर्वं निभृतं च दण्डम्।।

अन्वय: – (कमलिनीपक्षे) सुनीचकासारकुले अप्प्रसूता (इयं)दिवा एव काम्या मम अभिगम्या न। सारसम् उत्सुका असौ अखर्वं निभृतम् असारसं च दण्डं वहति। (नीचकुलजातकन्यापक्षे) सुनीचकासारकुलप्प्रसूता (इयं) दिवा एव काम्या मम अभिगम्या न। असारसंसारसमुत्सुका असौ अखर्वं निभृतं च दण्डं वहति।

गङ्गा – सुनीचेति– सुनीचे अध:स्थिते कासारकुले सर:समूहे। 'कासार: सरसी सर:' इत्यमर:। अप्सु जलेषु प्रसूता जाता अप्प्रसूता। मया भ्रमरेण इयं दिवा दिवस एव काम्या न तु अभिगम्या, अभिगन्तुं रन्तुं योग्येति भाव:। असौ सरोजिनी सारसं प्रत्युत्सुका सती अखर्वम् अनल्पं निभृतं च असारसं सारसपक्षिरहितं दण्डं मृणालदण्डं च वहतीति कमलिनीपक्षेऽर्थ:।

नीचकुलजातकन्यापक्षे तु– सुनीचेऽत्यन्तं विनिन्दिते कासारे सारहीने कुले प्प्रसूता समुत्पन्ना। अनचि चेति पकारस्य द्वित्वम्। दिवा एव काम्या वाञ्छिता नीचकुलजातत्वान्न मम अभिगम्या भोगयोग्या। धर्मशास्त्रे तथा भोगस्य निषिद्धत्वात्। असारे साररहिते संसारे समुत्सुका उत्कठिता अखर्वं निभृतं च दण्डं वहति, अभिमानं धारयतीत्यर्थः। 'दण्डो यमे मानभेदे लगुडो दमसैन्ययोः व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थानयोरपि। अभिमाने ग्रहे दण्डश्चण्डांशोः पारिपार्श्विके' इति विश्वः।

अनुवाद – (कमलिनीपक्ष) यह नीचे बने हुए सरोवर समूहों में जल से उत्पन्न हुई है। यह मेरे द्वारा दिन में ही काम्य है, मेरे भोग के योग्य नहीं है। सारस पक्षी के लिए उत्सुक होती हुई भी यह पूर्णतः सारसपक्षियों से रहित कमलदण्ड को धारण करती है।

(नीचकुलोत्पन्न कन्या के पक्ष में) अतिनिन्दित निःसार और कुत्सित कुल में उत्पन्न यह मेरे द्वारा दिन में ही काम्य है। यह मेरे द्वारा अभिगम्या नहीं है। पूर्णतः असार संसार के प्रति उत्कठित होने के कारण यह केवल अभिमान को धारण करती है।

॥५५॥

तथाऽऽत्तगन्धोऽप्यनिषेव्य रोषं
तत्त्वं वदन् मञ्जुलगुञ्जितेन।
कृपामपात्रे कृतपापमात्रां
कर्तव्यदृष्ट्या विफलामकार्षम्॥

अन्वयः – तथा आत्तगन्धः अपि रोषम् अनिषेव्य मञ्जुलगुञ्जितेन तत्त्वं वदन् कर्तव्यदृष्ट्या अपात्रे कृतपापमात्रां विफलां कृपाम् अकार्षम्।

गङ्गा – तथेति– तथा पूर्वोक्तप्रकारेण आत्तः प्राप्तो गन्धो येन तादृशोऽहं रोषं क्रोधम् अनिषेव्य अकृत्वा स्वकीयेन मञ्जुलगुञ्जितेन सुन्दरेण गुञ्जारवेण तत्त्वं सारं वदन् कर्तव्यदृष्ट्या मया अस्यां गन्ध आत्त इति कर्तव्यविचारणया अपात्रे कुपात्रे कृतं पापमात्रं यया तादृशीं कृतपापमात्रां विफलां फलरहितां कृपाम् अकार्षम्, अकरवम्। यद्यपीयं ममोपभोग्या न, तथापि मया अस्या गन्ध आत्त इति धिया अस्या उपरि भ्रमता मया मञ्जुलगुञ्जितेन या कृपा कृता सा कुपात्रे कृतकृपेव निष्फलैवेत्यलेत्यभिप्रायः।

अनुवाद – इसके गन्ध को पाकर भी मैंने रोष नहीं किया और अपने मधुर

गुञ्जारव से तत्त्व का कथन किया। इस प्रकार कर्तव्य की दृष्टि से कुपात्र में की गयी यह निष्फल कृपा निश्चय ही मेरे द्वारा किया गया पापमात्र है।

।। ५६ ।।

इत्थं प्रयस्याऽपि चिरं मयाऽस्यां
कदापि नादृश्यत नित्यबोधः।
तदाऽऽविरासीन् मनसाऽप्रसह्यो
दिने दिने मेऽतुलभानुतापः।।

अन्वयः – इत्थं चिरं प्रयस्य अपि मया अस्यां कदा अपि नित्यबोधः न अदृश्यत। तदा मे दिने दिने मनसा अप्रसह्यः अतुलभानुतापः आविरासीत्।

गङ्गा – इत्थमिति– इत्थम् एवम्प्रकारेण चिरं चिरकालं यावत्, प्रयस्य प्रयासं कृत्वा अपि मया अलिना अस्यां सरोजिन्यां कदा अपि कस्मिन् काले अपि नित्यबोधः नित्यविकासो न दृष्टः। अथवा नित्यबोध आत्मसाक्षात्कारो न दृष्टः नैवावलोकितः। मम अलेः बहुधा मञ्जुलगुञ्जितेन कृतेऽपि तत्त्वकथने नाऽस्यां तत्त्वबोधजन्य आत्मसाक्षात्कारः सञ्जात इति भावः। तदा पूर्णविकासम् आत्मसाक्षात्कारं वा अदृष्ट्वा मे मम अलेः दिने दिने मनसा अप्रसह्यः अतुलभानुतापः अतुलो महान् भानोः सूर्यजनितः तापः सन्तापः आविरासीत् प्रादुरासीत्। अथवा 'अतुलभानुतापः' इत्यत्र हे अतुलभ! अतुला अनुपमा भा शोभा यस्येति अतुलभः। तस्य सम्बोधने हे अतुलभ विलासिन्!, अनुतापः पश्चात्तापः प्रादुरासीदिति योजना।

अनुवाद – इस प्रकार चिरकाल तक प्रयास करके भी मैं (इस कमलिनी में) नित्यविकास नहीं देख सका। तब मुझ में मन द्वारा न सहा जाने योग्य अपूर्व सूर्य का ताप आविर्भूत हुआ। अथवा हे अतुल भा (कान्ति) वाले विलासिन् मुझे पश्चात्ताप हुआ।

टिप्पणी – यहाँ प्रयुक्त 'नित्यबोध' आत्मसाक्षात्कार का भी वाचक है। मञ्जुलस्वर से मुझ अलि द्वारा तत्त्व कथन करने के बाद भी इस सरोजिनी को आत्मसाक्षात्कार नहीं हुआ। इसी प्रकार 'अतुलभानुतापः' हे अतुलभ! अनुपमशोभाशालिन्! यह विलासी का सम्बोधन माना जा सकता है। इस योजना में भानुतापः के स्थान पर 'अनुतापः' पद शेष रहता है जिससे पश्चात्ताप रूप अर्थ का बोध होता है।

।।५७।।

अथैकमत्याद् गतिगीतकीर्तिः
शुचिश्च मुक्ताशनताव्रती च।
हंसः प्रसङ्गाद् बहुरूपसम्पद्-
द्युतो विमुक्त्यै मम शीघ्रमागात्।।

अन्वयः – अथ ऐकमत्यात् प्रसङ्गात् गतिगीतकीर्तिः शुचिः च मुक्ताशनताव्रती च बहुरूपसम्पद् (अथवा बहुरूपसम्पद्द्युतः) हंसः द्युतः विमुक्त्यै मम शीघ्रम् आगात्।

गङ्गा – यतिं हंसं च विषयीकृत्य वक्ति– **हंसेति**– अथ एतदनन्तरम् ऐकमत्यात् प्रसङ्गात् समानविचारजन्यात् सन्दर्भात्, गतिगीतकीर्तिः गत्या ज्ञानेन गीता प्रशंसिता इतस्ततो वा प्रसारिता कीर्तिर्यस्य सः, तादृशः, शुचिः पवित्रः, मुक्ताशनताव्रती च मुक्तम् अशनं भोजनं येन सः मुक्ताशनः, मुक्ताशनस्य भावो मुक्ताशनता, मुक्ताशनता व्रतम् अस्य सः मुक्ताशनताव्रति। बहुरूपसम्पद्द्युतः बहुरूपाभिः सम्पद्भिर्युतः। यमनियमादिसम्पद्भिः संयुक्त इति भावः।'अनचि च' इति दकारस्य द्वित्वम्। अथवा द्युतः प्रकाशितः। यति पक्षे 'बहुरूपसम्पद्द्युत' इत्येकं पदम्। हंसपक्षे तु पृथक् पृथक् पदद्वयमिति विवेकः। 'हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे। योगिमन्त्रादिभेदेषु परमात्मन्यमत्सरे निर्लोभनृपतौ हंस' इति विश्वः। हंसः कश्चन यतिः विमुक्त्यै मोक्षाय मम अलेः सविधे शीघ्रं सपदि आगात् प्रापदिति यतिपक्षेऽर्थः।

हंसपक्षे– गतिगीतकीर्तिः गत्या सञ्चरणेन गीता प्रसारिता कीर्तिर्यस्य सः। शुचिर्धवलः। 'शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि। ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु।' इति मेदिनी। मुक्ताशनताव्रती मुक्ता मौक्तिकं मुक्ताफलं वा अशनं भोजनं मुक्ताशनम्। तस्य भावो मुक्ताशनता। सा एव नित्यं व्रतं यस्य सः। बहुरूपसम्पद् रूपमेव सम्पद् रूपसम्पद्, बहुः रूपसम्पद् यस्य सः। तादृशो हंसः पक्षिविशेष इत्यर्थः। विमुक्त्यै सरोजिन्यां मे तथाभिनिवेशत्याजनाय द्युतः आकाशात्। द्यु शब्दात्तसिल्। मम अलेः आगात्। हे अले! सरोजिनीमिमां त्यजत्विति शिक्षयित्वा मम विमुक्तिं कारयितुं कश्चन हंसः समागत इत्यभिप्रायः।

अनुवाद – (यतिपक्ष) एक जैसा अवसर पाकर ज्ञान के कारण प्रसृत कीर्ति वाला, पवित्र, भोजनत्याग ही जिसका व्रत है, 'यम नियम आदि' अनेक

प्रकार की सम्पत्तियों से युक्त (अथवा प्रकाशित) कोई यति मोक्ष प्रदान करने के लिये मेरे पास आया।

(हंसपक्ष) एक समान अवसर पाकर प्रसिद्ध गति वाला, धवल, मुक्ताफलों का व्रती, प्रचुर रूप सम्पत्ति से युक्त हंस (मेरी) मुक्ति (कराने के) लिए आकाश से उतरा।

।।५८।।

कथं परागाकुलितेन्द्रियेण
स मादृशाऽलं मलिनेन दृश्यः ?।
तथाऽपि सत्येन कृतानुतापं
स सर्वसाक्षी वृणुते मिषेण।।

अन्वयः – सः परागाकुलितेन्द्रियेण मादृशा मलिनेन अलं कथं दृश्यः ? तथापि स सर्वसाक्षी सत्येन मिषेण कृतानुतापं वृणुते।

गङ्गा – कथमिति– सः यतिः हंसो वा परागाकुलितेन्द्रियेण परागाणि पराञ्चि बहिर्मुखानि वा आकुलितानि इन्द्रियाणि यस्य तेनेति यति पक्षेऽर्थः। परागेण रजसा आकुलितानि इन्द्रियाणि यस्येति अलिपक्षेऽर्थः। मलिनेन अपवित्रेण रागकलुषितेन नीलवर्णेन वा। अलं पर्याप्तरूपेण सामग्र्येण वा कथं दृश्यः साक्षात्कार्यः। तत्कृते तु शुद्धेन्द्रिया एव प्रभवन्ति। तथापि स सर्वसाक्षी सर्वदर्शी वा आत्मा सत्येन कृतानुतापं कृतः अनुतापः प्रायश्चित्तं येन तं वृणुते मिषेण केनचिद् व्याजेन वृणीते।

अनुवाद – मुझ जैसे बहिर्मुख और व्याकुल इन्द्रिय वाले (पराग से व्याकुल इन्द्रिय वाले) अपवित्र के द्वारा वह (यति या हंस) पूर्णतः कैसे देखा जा सकता है ? तथापि सर्वदर्शी आत्मा सत्य से प्रायश्चित्त करने वाले का वरण तो (किसी व्याज से) करता ही है।

टिप्पणी – यहाँ हंस और यति पक्ष में 'परागाकुलित' और 'मलिन' शब्द श्लिष्ट है।

।।५९।।

तनुं वहन् ब्रह्मसरस्वतीष्टां
दूरे स्थितः काममनोरथानाम्।
भाग्यैकलभ्यो विमलस्वरूपो
दयार्द्रदृष्टिः सहसाऽऽविरासीत्।।

अन्वयः - ब्रह्मसरस्वतीष्टां तनुं वहन् काममनोरथानां दूरे स्थितः भाग्यैकलभ्यः विमलस्वरूपः दयार्द्रदृष्टिः (सः) सहसा आविरासीत्।

गङ्गा - तनुमिति- ब्रह्मसरस्वतीष्टां, ब्रह्मा च सरस्वती चेति ब्रह्मसरस्वत्यौ, ताभ्याम् इष्टां वाञ्छितामधिकृतां वा। तयोर्वाहनत्वेन हंसः पाण्डित्येन ज्ञानेन च यतिः वा तनुं शरीरं वहति। ब्रह्मसरस्वत्योर्वाहनत्वेन हंसः प्रसिद्धः पाण्डित्येन संसारस्य असारतादिज्ञानेन च यतिः। काममनोरथानां कामजनितसङ्कल्पानां दूरे स्थित इति यतिपक्षेऽर्थस्तस्य कामादिरहितत्वात्। हंसपक्षे तु अथवा वेदवाण्या अभीष्टां तनुं वहन्निति यतिपक्षेऽर्थः। काममनोरथानामित्यत्र कामम् अनोरथानां च कामं दूरे स्थितः, अनः शकटं रथः स्यन्दनस्तादृशानां वाहनानां दूरे स्थितः। पक्षयुक्तत्वान्न हंसो वाहनमपेक्षत इत्यर्थः। 'क्लीबेऽनः शकटोऽस्त्री स्याद्' इत्यमरः। भाग्यैकलभ्यः भाग्येन केवलं लभ्यः प्राप्यः। हंसो यतिश्च। विमलस्वरूपः धवलशरीरः वा दयया आनन्दात् आर्द्रनेत्रः इति हंसपक्षेऽर्थः। यतिपक्षे तु 'विमलस्वरूपोदयार्द्रदृष्टिः' इत्येकं पदम्। विमलस्वरूपस्योदयात् आर्द्रदृष्टिरार्द्रनेत्रः करुणापूरितहृदय इति यावत्। सहसा झटिति आविरासीत् प्रादुरासीत्।

अनुवाद - (यतिपक्ष) ब्रह्मा और सरस्वती के अधिष्ठान से युक्त (पाण्डित्यपूर्ण) शरीर को धारण करने वाला, कामजनितसंकल्प से दूर स्थित, एक मात्र भाग्य से लभ्य, विमलस्वरूप के उदय से आर्द्रनेत्र (वह यति) सहसा प्रकट हुआ।

(हंसपक्ष) ब्रह्मा और सरस्वती के वाहन के रूप में प्रसिद्ध शरीर को धारण करने वाला, गाड़ी और रथ की कामना से अतिदूरस्थित, एकमात्र भाग्य से लभ्य, धवलस्वरूप आनन्द से आर्द्रनेत्र (वह हंस) सहसा प्रकट हुआ।

।। ६०।।

यदीयसङ्गेन समानसस्य-
पूर्णस्य तोयेन शरद्दिनस्य।
प्रकर्षयोगः सरसश्च लोके
वेदे तु योगाङ्गमधुव्रतस्य।।

अन्वयः - लोके यदीयसङ्गेन समानसस्यपूर्णस्य शरद्दिनस्य सरसः च प्रकर्षयोगः (तथैव) वेदे तु योगाङ्गमधुव्रतस्य (प्रकर्षयोगः आसीत्)।

गङ्गा - यदीयेति- यदीयसङ्गेन, तत्रागतस्य यदीयेन हंसस्य सङ्गेन साहचर्येण, समानसस्यपूर्णस्य समानं सर्वत्रैकरूपं यत्सस्यं तेन पूर्णस्य परिपूर्णस्य शरद्दिनस्य शरत्कालिकदिवसस्य, प्रकर्षयोग आसीत्। धवलोऽपि शरद्दिवसो धवलस्य तस्य हंसस्य साहचर्येण अधिकं बभावित्यर्थः। अथ च यदीय सङ्गेन मित्रभूतेन तोयेन जलेन सरसः तडागस्य च प्रकर्षयोगः उत्कर्षसंयोगः। हंसस्य सान्निध्यात्तडागस्य शोभा वृद्धिं गतेतिभावः। यद्वा सरस इति प्रकर्षयोगस्य विशेषणम्। तथात्वे सरसः समानः। लोके यथा शरद्दिनस्य तथैव वेदे योगाङ्गमधुव्रतस्य योगाङ्गानि यमनियमादीन्येव प्रीतिजनकत्वान् मधूनि तद्व्रतस्य तन्निरतस्य च समानः प्रकर्षयोगः। तादृशो हंसः यतिर्वा आविरासीत्।

अथवा- समानसस्य मानसेन सदृशस्य तोयेन पूर्णस्य सरसः प्रकर्षयोगः। जलपूर्णोऽपि तडागः हंसराहित्ये मानसेन साम्यं न भजते स्म। सम्प्रति हंसस्यास्य आगमेन जलपूर्णः सः मानसेन सादृश्यं भजन् प्रकर्षं प्राप्नोति।

अलिपक्षे 'सरसः' इत्यत्र 'स रसः' इति पाठोऽङ्गीकार्यः। स इति पृथक्पदं प्रकर्षविशेषणम्। योगाङ्गमधुव्रतस्य' इत्यत्रापि 'यः गाङ्गस्य गङ्गासम्बन्धिनो मधुव्रतस्य भ्रमरस्य। 'मधुव्रतो मधुकरो मधुलिण्मधुपालिनः। द्विरेफपुष्पलिड्भृङ्गषट्-पदभ्रमरालयः' इत्यमरः।

अनुवाद - संसार में जिस हंस के संग से एक रूप सस्य से परिपूर्ण शरत्कालीन दिन का तथा उस हंस के मित्र जल से तालाब का उत्कर्ष हुआ तथा वेद में योगाङ्गों के मधुव्रत (यति) को प्रकर्ष प्राप्त हुआ।

।। ६१ ।।

तस्मिन् समागच्छति सत्ययत्नात्
कृत्स्नाऽपि मृत्स्नाजनता नितान्तम्।
विस्मृत्य कार्याण्यखिलान्यकस्मा-
दाकाशमार्गार्पितदृष्टिरासीत्।।

अन्वयः – अयत्नात् तस्मिन् समागच्छति सति कृत्स्ना अपि मृत्स्नाजनता नितान्तम् अखिलानि कार्याणि विस्मृत्य अकस्मात् आकाशमार्गार्पितदृष्टिः आसीत्।

गङ्गा – तस्मिन्निति– अयत्नात् यत्नं विनैव स्वभावेन आकाशमार्गात् तत्र आगच्छति। कृत्स्ना समग्राऽपि मृत्स्नाजनता जनः नितान्तम् अखिलानि सम्पूर्णानि कार्याणि विस्मृत्य अकस्मात् सहसा आकाशमार्गार्पितदृष्टिः आकाशमार्गे ब्रह्ममार्गे वा हंसागमनपथि गगने ब्रह्मणि अर्पिता दत्ता दृष्टिर्यया सा। हंसदर्शनकुतूहलेन समग्रोऽपि लोकस्तन्मार्गं पश्यन्नासीदित्यर्थः।

अनुवाद – स्वाभाविक रूप से उस हंस को आकाश मार्ग से आता हुआ देख कर सम्पूर्ण जनता अपने समस्त कार्यों को भूल गयी और अकस्मात् आकाशमार्ग (ब्रह्ममार्ग) की ओर आँख लगा कर उसे देखने लगी।

।। ६२ ।।

आनन्दने नन्दनतोऽपि तस्मिन्
समागते दिव्यहिरण्यपक्षे।
स्तब्धः क्षणं स्वस्वमनोऽनुरूपं
नानाविधं भावमुवाह लोकः।।

अन्वयः – नन्दनतः अपि आनन्दने तस्मिन् दिव्यहिरण्यपक्षे समागते (सति) क्षणं स्तब्धः लोकः स्वस्वमनोऽनुरूपं नानाविधं भावम् उवाह।

गङ्गा – आनन्देति– नन्दनतः इन्द्रवनादपि आनन्दने सुखजनके। नन्दनं वनमित्यमरः। यद्वा आनन्दने तस्मिन् नन्दनतः समागत इत्यन्वयः। नन्दनतः आरामादित्यर्थः। दिव्यहिरण्यपक्षे हंसे समागते। हंसानां धवलपक्षत्वमेव लोके प्रसिद्धम्। अस्य पुनरसामान्यत्वद्योतनाय दिव्यहिरण्यपक्षत्वं निरदेशि। नायं सामान्योऽपितु दिव्यो हंस इति विशेषः। तदागते सति तद्रूपदर्शनात् क्षणं क्षणमात्रं स्तब्धश्चकितो लोकः जनः। लोकस्तु भुवने जन इत्यमरः। तद्विषये स्वस्वमनोऽनुरूपं

यन्मनसि यादृशो भाव आसीत् तादृशं नानाविधं भावम् उवाह। वह धातोर्लिटि रूपम्। दधारेत्यर्थः।

अनुवाद – नन्दन (इन्द्रवन) से भी अधिक आनन्ददायी दिव्य हिरण्यपक्षों से युक्त उस हंस के आ जाने से (अथवा आनन्दप्रद उस हंस के नन्दन से आ जाने पर) लोग क्षण भर के लिये स्तब्ध हो गए। उन लोगों ने उसके विषय में अपने अपने मन के अनुरूप अनेक प्रकार के भावों को धारण किया।

।।६३।।

न नाकलोके स्थितिरस्य दृष्टा–
ऽस्वप्नेऽपि भूम्यां किल न श्रुताऽपि।
आयात्ययं विष्णुपदादिहेति
कश्चिद्विनिश्चित्य विपश्चिदूचे।।

अन्वयः – अस्य स्थितिः नाकलोके स्वप्ने अपि न दृष्टा। (अथवा दृष्टाऽस्वप्ने नाकलोके अस्य स्थितिः न) न किल भूम्याम् अपि श्रुता। अयं विष्णुपदात् इह आयाति इति विनिश्चित्य कश्चिद् विपश्चिद् ऊचे।

गङ्गा – न नाकलोक इति– अस्य दिव्यहिरण्यपक्षवतो हंसस्य स्थितिः नाकलोके स्वर्गलोके स्वप्ने अपि न दृष्टा। 'नाकस्तु त्रिदिवेऽम्बरे' इति कोषः। यद्वा 'दृष्टास्वप्ने' इत्येकं पदम्। दृष्टाः अस्वप्नाः सुराः यत्र तस्मिन् नाके स्वर्गे अस्य स्थितिर्नेति सम्बन्धः। 'आदित्या ऋभवोऽस्वप्ना' इत्यमरः। अस्य स्थितिः भूम्यामपि न श्रुता। अयं विष्णुपदात् आकाशात् वैकुण्ठाद्वा आयातीति विनिश्चित्य कश्चिद् विपश्चिद् विद्वान् ऊचे वक्ष्यमाणप्रकारेण जगाद। 'वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी'–त्यमरः।

अनुवाद – स्वर्ग में इसकी स्थिति स्वप्न में भी नहीं देखी गयी। (अथवा जहाँ देवता देखे जाते हैं उस स्वर्गलोक में इसकी स्थिति नहीं है।) पृथ्वी में भी इसकी स्थिति नहीं सुनी गयी। यह 'आकाश या वैकुण्ठ से आ रहा है' ऐसा निश्चय कर किसी विद्वान् ने कहा।

।। ६४।।

तिष्ठेत् कथं विष्णुपदे सुखेन
शून्ये पुराणश्रुतिनिर्विवादा।
तद्ब्रह्मलोकस्थितिरित्यथाऽमुं
प्रत्यब्रवीत्कोऽपि बुधाभिमानी।।

अन्वयः – (अयं) शून्ये विष्णुपदे सुखेन कथं तिष्ठेत्? अथ (अस्ति) तद्ब्रह्मलोकस्थितिः इति पुराणश्रुतिः निर्विवादा (अस्तीति) अमुं कोऽपि बुधाभिमानी प्रत्यब्रवीत्।

गङ्गा – तिष्ठेदिति– अयं दिव्यहिरण्यपक्षः आधाररहितत्वात् शून्ये विष्णुपदे आकाशे कथं तिष्ठेत्। यद्वा विष्णुपदेऽसुखेन शून्ये इति पाठः। तथात्वे असुखेन दुःखेन शून्ये रहिते विष्णोः पदे स्थाने वैकुण्ठे कथं तिष्ठेदित्यर्थः। अनाधारत्वाद् आकाशे दुःखेन शून्ये वैकुण्ठे च दिव्यहिरण्यपक्षस्याऽस्य स्थितिर्न सम्भाव्यते। अथ तत् तस्मात् कारणादयं ब्रह्मलोकस्थितिः ब्रह्मलोके ब्रह्मणो विधातुर्लोके स्थितिः यस्येति तादृशोऽयं हंसः इति पुराणश्रुतिनिर्विवादा। पुराणानां श्रुतिः प्रसिद्धिः निर्विवादा अस्ति। पुराणेषु ब्रह्मलोके हंसस्थितिः प्रतिपादिताऽस्तीति भावः। इत्येवं प्रकारेण अमुं पूर्वश्लोके वर्णितं विद्वांसं कश्चिद् बुधाभिमानी प्रत्यब्रवीत् प्रत्यकथयत्।

अनुवाद – दिव्यहिरण्यपक्षों से युक्त यह हंस शून्य आकाश में कैसे रह सकता है? अथवा यह दुःख से शून्य वैकुण्ठ में कैसे रह सकता है? अतः यह ब्रह्मलोक का निवासी है, यह पुराणों की श्रुति निर्विवाद है। इस प्रकार से (पूर्वश्लोक में वर्णित विद्वान् को) किसी बुधाभिमानी ने प्रत्युत्तर दिया।

।। ६५।।

ऐतिह्यमात्रं शरणं प्रविश्य
तं मानसादागतमाह कश्चित्।
काव्येषु विश्वस्य च चित्रकूट–
गिरिस्थितिं तस्य परो जगाद।।

अन्वयः – कश्चित् ऐतिह्यमात्रं शरणं प्रविश्य तं मानसात् आगतम् आह। परः विश्वस्य च तस्य काव्येषु चित्रकूटगिरिस्थितिं जगाद्।

गङ्गा – ऐतिह्यमात्रमिति– कश्चित् तत्रोपस्थितेषु जनेषु कश्चिज्जनः ऐतिह्यमात्रं शरणं प्रविश्य पुराणादिग्रन्थप्रामाण्यमङ्गीकृत्य तं दिव्यहिरण्यपक्षं हंसं मानसात् मानसरोवरात्। मानसं स्वान्तसरसोरिति कोशः। आगतं प्राप्तम् आह कथयामास। विविधेषु पुराणेषु हंसानां वर्णनात् तेषां च मानससरोवरे स्थितिवर्णनादत्र ऐतिह्यविदस्तादृशोक्तिवर्णनम्। अन्यस्तत्रोपस्थितो जनः विश्वस्य विश्वासं कृत्वा। अथवा विश्वस्य व्यापकस्य। 'विश्वं कृत्स्ने च भुवने विश्वे देवेषु नागरे इति विश्वः। दिव्यहिरण्यपक्षस्य हंसस्य काव्येषु चित्रकूटगिरिस्थितिम्। चित्रा अलङ्कृता कूटा श्लेषयुक्ता गीः वाणी यस्मिन् तत् चित्रकूटगीस्तादृशे चित्रकूटगिरि काव्ये तस्य स्थितिं जगाद्। कथयामास। काव्येष्वित्यत्र बहुवचनन्तु निर्धारणार्थम्। काव्येषु चित्रकूटगिरि काव्य एव तस्य स्थितिर्न तु सर्वेष्वित्यर्थः। यतश्च निर्धारणमित्यनेन सप्तमी। यद्वा चित्रकूटगिरिस्थितिमित्येकं पदम्। तथात्वे विश्वस्य निखिलस्य संसारस्य चित्रकूटाख्ये गिरौ तस्य दिव्यहिरण्यपक्षस्य स्थितिं जगादेत्यर्थः। यद्वा चित्रा कूटा च या गीः वाणी तस्याम्। तस्य हंसस्य कूटस्थतां जगाद।

अनुवाद – इतिहासमात्र की शरण लेकर किसी ने उस हंस को मानसरोवर से आया हुआ बताया। किसी दूसरे ने उसे संसार के सुन्दर पर्वतों और अलंकृत श्लिष्ट काव्यों में रहने वाला बताया।

।। ६६ ।।

अन्यो विलासी नलभीमकन्या–
ऽन्योन्यानुरागैकनिदानमेनम्।
आलोच्य कान्तागुरुमानभङ्गे
दौत्योपयुक्तं गणयाम्बभूव।।

अन्वयः – अन्यः विलासी एनं नलभीमकन्याऽन्योन्यानुरागैकनिदानम् आलोच्य कान्तागुरुमानभङ्गे दौत्योपयुक्तं गणयाम्बभूव।

गङ्गा – अन्येति– अन्यः कश्चिद् विलासी एनं दिव्यहिरण्यपक्षं नलभीमकन्याऽन्योन्यानुरागैकनिदानम्, नलश्च भीमकन्या दमयन्ती च तयोरनुरागस्यैकं निदानमालोच्य विचार्य। नलभीमकन्ययोर्मिथः प्रणयकथा महाभारतनैषधीयचरितादौ वर्णिता। तत्र हंसदौत्यमपि। कान्तागुरुमानभङ्गे कान्तानां प्रियतमानां गुरुमानभङ्गे प्रौढमानापगमे दौत्योपयुक्तं दौत्यकार्योचितं गणयाम्बभूव निर्धारयामास। यद्वा कान्ता

गुरुमानभङ्गे इति पदद्वयम्। तथात्वे गुरुमानभङ्गे गुरूणां मानभङ्गे अनादरे दौत्योपयुक्तं दौत्यकार्योचितं निर्धारयामासेत्यर्थः।

अनुवाद – अन्य विलासी ने इस हंस को देखकर इसे नल और दमयन्ती के परस्पर अनुराग का एकमात्र निदान बताया तथा प्रियतमा के महान् मान को भंग करन में इसे दूतकार्य के लिए उचित माना।

।।६७।।

प्रतारितोऽन्यः शठगोपकान्ता–
पात्रेण तुल्यद्विपयोधरेण।
तदीयपार्थक्यविधौ क्षमोऽयं
सङ्ग्राह्य इत्याग्रहतोऽभ्यधावत्।।

अन्वयः – तुल्यद्विपयोधरेण शठगोपकान्तापात्रेण प्रतारितः अन्यः 'तदीयपार्थक्यविधौ क्षमः अयं सङ्ग्राह्यः' इति आग्रहतः अभ्यधावत्।

गङ्गा – प्रतारित इति– तुल्यद्विपयोधरेण तुल्यौ द्वौ पयोधरौ स्तनौ यस्य तेन, समानस्तनद्वययया भाजनसदृश्या दुष्टया गोप्येति गोपकान्तापक्षेऽर्थः। पात्रपक्षे तु तुल्ययोः अभिन्नयोः द्वयोः पयसोः दुग्धजलयोः धरेण। शठगोपीसदृशेन पात्रेणेत्यर्थः। 'पयः क्षीरं पयोऽम्बु च' इत्यमरः। प्रतारितः वञ्चितः। तयोः तुल्यद्विपयोधरयोरिति गोपकान्तापक्षेऽर्थः। तयोः दुग्धजलयोरिति हंसपक्षेऽर्थः। पार्थक्यस्य भेदस्य विवेकस्य मर्दनस्य च विधाने क्षमः समर्थः अयं हंसः सङ्ग्राह्यः ग्रहीतव्य इति आग्रहतः सम्मुखम् अभ्यधावत् धावनमकरोत्।

अथवा कश्चिद् दुग्धस्य क्रेता द्विपयोधरेण जलदुग्धधरेण शठायाः जलमिश्रदुग्धविक्रयेण परं प्रतारयन्त्या गोपकान्तायाः गोप्याः पात्रेण दुग्धभाजनेन प्रतारितः सन् 'जल–दुग्धपार्थक्यविधौक्षमोऽयं हंसो ग्राह्य' इति बुद्ध्याऽधावदित्यभिप्रायः।

अनुवाद – (गोपकान्ता पक्ष) समान आकार के दो स्तनों को धारण करने वाले शठ गोपकान्ता रूप पात्र द्वारा वंचित कोई अन्य 'उस शठगोपकान्तापात्र के समान आकार वाले दोनों स्तनों के विदारण में समर्थ यह हंस अवश्य ही संग्रह योग्य है' इस आग्रह से सम्मुख दौड़ा।

अथवा कोई दुग्धक्रेता किसी दुष्ट गोपी के जल और दूध को धारण करने वाले पात्र से प्रतारित होकर 'जल तथा दूध को अलग करने में यह हंस समर्थ है'

ऐसा सोचकर हंस के आगे दौड़ा।

(हंस पक्ष) – समान रूप से दोनो पयों (दूध और जल) को धारण करने वाला शठ गोपी सदृश पात्र द्वारा ठगा गया कोई अन्य 'दूध और पानी को पृथक् करने में समर्थ यह हंस अवश्य ही संग्राह्य है' इस आग्रह से सामने दौड़ पड़ा।

।। ६८ ।।

लुब्धः परः काञ्चनपत्रमात्रे
द्यावापृथिव्योः प्रवितत्य जालम्।
जिघृक्षुरेनं सहसा विदार्य
यातेऽत्र मूलक्षतितः शुशोच।।

अन्वयः – काञ्चनपत्रमात्रे लुब्धः एनं जिघृक्षुः परः द्यावापृथिव्योः जालं प्रवितत्य, सहसा विदार्य याते अत्र मूलक्षतितः शुशोच।

गङ्गा – लुब्धः पर इति– काञ्चनपत्रमात्रे, दिव्यहिरण्यपक्षस्य हंसस्य स्वर्णसम्बन्धिपक्षमात्रे लुब्धः लोभं गतः, अथ च एनं जिघृक्षुः ग्रहीतुमिच्छुः परः कश्चन द्यावापृथिव्योः आकाशस्य धरित्र्याश्च मध्ये जालं पक्षिग्रहणपाशं प्रवितत्य प्रसार्य। स्थित इति शेषः। किन्तु तेन दिव्यहिरण्यपक्षेण सहसा पाशं विदार्य याते गते सः अत्र अस्मिन् विषये मूलक्षतितः मूलस्य पाशस्य क्षतिस्तस्मात्। लोभात् कृते कार्ये मूलस्याऽपि विनाशात् शोकं गत इति भावः।

अनुवाद – उस हंस के स्वर्णनिर्मित पंखों पर लुब्ध होकर इसे पकड़ने के इच्छुक किसी ने पृथ्वी और आकाश के मध्य जाल फैला दिया किन्तु हंस के सहसा उस जाल को फाड़कर चले जाने पर मूलक्षति से वह शोकग्रस्त हो गया।

।। ६९ ।।

हा हेतरः स्वोदरपूरणाय
धृतामिषं स्वीयकरं प्रसार्य।
जिघांसुरेनं पटुचञ्चुकोटी–
विकुट्टिताङ्गो धरणौ पपात।।

अन्वयः – हा! हा! इतरः स्वोदरपूरणाय धृतामिषं स्वीयकरं प्रसार्य एनं जिघांसुः पटुचञ्चुकोटी विकुट्टिताङ्गो (सन्) धरणौ पपात।

गङ्गा – इतरः किं कृतवानिति वर्णयति– **हा हेतर इति**– हा! हा! इति खेदजनकमव्ययम्। स्वोदरपूरणाय स्वस्य निजस्य उदरस्य पूरणाय भरणाय। धृतामिषं, गृहीतविलोभनीयवस्तुकं स्वीयकरं स्वकीयं हस्तं प्रसार्य। 'आमिषं पुन्नपुंसकम् भोग्यवस्तुनि सम्भोगेऽप्युत्कोचे पललेऽपि च' इति मेदिनी। करविशेषणमिदम्। अथवा धृतम् आमिषं मासं येन तं हंसम्। एनं हंसं जिघांसुः हन्तुमिच्छुः। पटुचञ्चुकोटीविकुट्टिताङ्गो, तीक्ष्णचञ्चुकोटीभिः विकुट्टितानि व्रणीकृतानि अङ्गानि यस्य स तादृशः सन् धरणौ पपात। हंसस्य चञ्चुप्रहारेण त्रुटिताङ्गो भूत्वा अपतदित्यर्थः।

अनुवाद – हा! हा! दूसरा कोई अपना पेट भरने के लिए आमिष धारण किये हुए अपने हाथों को फैला कर (अथवा आमिष धारण करने वाले) हंस को मारने की इच्छा से आगे बढ़ा किन्तु इसकी तीक्ष्ण चंचुओं के प्रहार से उसके अंग टूट गये और वह पृथ्वी पर गिर पड़ा।

।। ७० ।।

एवंविधे पण्डितपामराणां
कोलाहले सम्भ्रमतः प्रवृत्ते।
निर्विण्णचेता निभृतं निलीय
प्रापं विविक्तं परिणामदर्शी।।

अन्वयः – पण्डितपामराणां सम्भ्रमतः एवं विधे कोलाहले प्रवृत्ते (सति) निर्विण्णचेताः परिणामदर्शी (अहम् अलिः) निभृतं निलीय विविक्तं प्रापम्।

गङ्गा – अत्रान्तरे जायमानां स्वीयां दशां वर्णयन्नाद् अलिः– **एवं विध इति**– पण्डितपामराणां पण्डितास्तत्त्ववेत्तारश्च पामराश्चेति तेषाम्। 'जाल्मस्तु पामरे' इति हैमः। तेषां पण्डितपामराणां सम्भ्रमतः त्वरया भ्रमेण वा एवंविधे उपर्युक्तप्रकारके हंसस्वरूपविषयके कोलाहले प्रवृत्ते निर्विण्णचेताः निर्विण्णं खिन्नं चेतो यस्य तादृशोऽथ च परिणामदर्शी परिणामस्य फलस्य द्रष्टा साक्षात्कर्ता अहमलिः निभृतं यथा स्यात्तथा एकान्ते निलीय विविक्तं विजनं प्रापम्, अगच्छम्। 'विविक्तौ पूतविजनौ' इत्यमरः। पण्डितपामराणां हंसस्वरूपविषयके विवादे सम्प्रवृत्ते अलिरहमेकान्तमगच्छमिति तात्पर्यम्।

अनुवाद – पण्डितों और पामरों की त्वरा या भ्रम से इस प्रकार का कोलाहल फैल गया। इससे दुखी होकर परिणामदर्शी मैं अलि गुप्त स्थान में छिप गया।

।। ७१ ।।

हंसो महामोहहतान् हसंस्तान्
नानाविधाभिर्गतिभिर्निपीड्य।
उपेत्य मामेष भयाद्रुदन्तं
परीक्षमाणः क्षणमात्रमासीत्।।

अन्वयः – एष हंसः महामोहहतान् तान् हसन् नानाविधाभिः गतिभिः उपेत्य भयात् रुदन्तं मां निपीड्य क्षणमात्रं परीक्षमाणः आसीत्।

गङ्गा – हंस इति– एष दिव्यहिरण्यपक्षो हंसः महामोहहतान् महामोहेन अज्ञानेन हतान् ग्रस्तान् तान् पण्डितान् पामरांश्च हसन्। एतेषु न कोऽपि मम स्वरूपं जानातीति तेषामुपहासं कुर्वन्। 'मूर्च्छा तु कश्मलं मोहोऽपी'त्यमरः। नानाविधाभिः बहुप्रकारिकाभिः सांसारिकीभिरुड्डीनादिभिश्च गतिभिः उपेत्य समीपे आगत्य। तस्य समीपागमनेन भयात् रुदन्तं माम् अलिं निपीड्य चञ्च्वादिप्रहारेण प्रपीड्य क्षणमात्रं परीक्षमाणः मम धैर्यस्य विवेकस्य वा परीक्षणं कुर्वन् आसीत्।

अनुवाद – यह हंस इन पण्डितों और पामरों का उपहास करता हुआ सांसारिक और उड्डयन आदि विविध प्रकार की गतियों से मुझे पीड़ित करने लगा। वह भय से रो रहे मुझ अलि का क्षणमात्र परीक्षण करने लगा।

।। ७२ ।।

अत्ता नु मामेष मदीयसत्ता–
ऽऽयत्ताऽस्य शङ्काऽद्य न याति चित्तात्।
मत्तानवं तस्य च शक्तिमत्ता
हृत्तापिनी धीर्मम सम्प्रमत्ता।।

अन्वयः – एष नु माम् अत्ता। मदीय सत्ता अस्य आयत्ता (इति) शङ्का अद्य चित्तात् न याति। मत्तानवं तस्य हृत्तापिनी शक्तिमत्ता च (इति) मम धीः सम्प्रमत्ता (अभवत्)।

गङ्गा – अत्तान्विति– एष दिव्यहिरण्यपक्षो हंसः नु निश्चयेन माम् अत्ता। अद् भक्षणे इति धातोः लुटि रूपम्। मां भोक्तेत्यर्थः। मदीया अलेः सत्ता अस्तित्वम् अस्य दिव्यहिरण्यपक्षस्य हंसस्य आयत्ता अधीना। अस्तीति शेषः। इति शङ्का चित्तात् मानसान्न याति, न गच्छति। 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः।

मत्तानवं ममाले: दौर्बल्यम्। तस्य हंसस्य च हृत्तापिनी हृदयतापप्रदायिनी सोढुमशक्या शक्तिमत्ता शक्तिशालिता। इत्येवं विचार्य मम मेऽले: धी: बुद्धि: सम्प्रमत्ता विवेकहीना। भवतीति शेष:। हंसप्रदत्तपीडयाऽलेर्मम मनसि तत्सम्बधिनो नानाभावा उदपद्यन्त इति भाव:।

अनुवाद – यह हंस निश्चय ही मुझे खा जायेगा। मेरी सत्ता इसके अधीन है। इस प्रकार की शंका मेरे मन से नहीं जा रही। मैं दुर्बल हूँ और इस हंस में मेरे हृदय को अभितप्त करने वाली शक्तिमत्ता है। (यह विचार कर) मेरी बुद्धि विवेकरहित हो गयी।।७३।।

।। ७३ ।।

किं प्राप्तकालं ? किमु मे हितं स्याद् ?
भवेत्कदैतद्भवभीतिभङ्ग: ?।
प्रसादये तावदमुं परस्ता–
दस्तु स्वमस्ते यदलेखि वस्तु।।

अन्वय: – (इदं मम अले:) किं प्राप्तकालम्? मे हितं किमु स्यात्? एतद्भवभीतिभङ्ग: कदा भवेत्? तावत् अमुं प्रसादये। परस्तात् स्वमस्ते यद् वस्तु अलेखि (तत्) अस्तु।

गङ्गा – हंसं दृष्ट्वा विचारयन्नलि: पुनराह– **किं प्राप्तकालमिति**– सम्प्रति मम किं प्राप्तकालम्? किं कर्तव्ययोग्यम्। किं मे हितं स्यात्? केन कार्येण करणेन वा स्यात्? केन कार्येण करणेन वा कस्य वा विधे: सम्पादनेन मे मम अले: हितं स्वात्मलाभ: भवेत्? एतद्भवभीतिभङ्ग:, एतस्मात् हंसाद् भवाया उत्पन्नाया भीते: भयस्य भङ्ग: कदा स्यात् कदा भवेत्। अथवा भवस्य संसारस्य भीति: भवभीति:, एषा चासौ भवभीति:, एतद्भवभीति:, तस्या भङ्ग: विनाश इति यावत्। मम अलेर्मोक्षलाभ: कदा स्यादित्यर्थ:। पुन: स्वकर्मनिर्धारयन्नाह– तावत् अमुं पुरो विद्यमानं परमात्मरूपं हंसं प्रसादये। पूजार्चनाभि: पूजयामि। परस्तात् स्वकर्मसम्पादनानन्तरं स्वमस्ते। मसी परिणामे परिमाणे वेति धातो: क्त:। मस्तक इत्यार्थ:। अले: मस्तके भाग्ये यद् वस्तु अलेखि, यद् भोग्यं निर्धारितम् विधिनेति शेष:। तत् अस्तु भवतु। न तेन मे प्रयोजनमिति तात्पर्यम्।

अनुवाद– मुझे इस समय क्या करना चाहिए? क्या करने से मेरा हित हो सकता है? इस हंस से उत्पन्न अथवा सांसारिक भीति का अन्त कब होगा? प्रथमतः मैं इस हंस को प्रसन्न करता हूँ। बाद में मेरे भाग्य में जो लिखा हो, वह होता रहे।

।। ७४।।

अस्य प्रसादेन विना न मोक्ष–
स्त्रातव्य आत्मा ह्यखिलैरुपायैः।
इत्थं विचार्य स्वयमग्रयायी
तं प्राणमं प्राणमपेक्षमाणः।।

अन्वयः – अस्य प्रसादेन विना मोक्षः न (भवितुमर्हति)। हि अखिलैः उपायैः आत्मा त्रातव्यः। प्राणम् अपेक्षमाणः अग्रयायी (अहं) इत्थं विचार्य तं प्राणमम्।

गङ्गा – अस्य प्रसादेनेति– अस्य प्रसादेन प्रसन्नतया विना मोक्षः अपवर्गः न। भवितुमर्हतीति शेषः। अत एव अखिलैः मोक्षप्राप्तिसाधनभूतैः उपायैः आत्मा त्रातव्यः रक्षणीयः। प्राणम् अपेक्षमाणः। 'प्राणो हृन्मारुते बोले काव्यजीवेऽनिले बले' इति मेदिनी। हृन्मारुतं प्राणवायुमपेक्षमाणोऽहमलिः। अग्रयायी अग्रे यातुं गन्तुं शीलमस्येति अग्रयायी। तादृशोऽहमित्थम् एवम्प्रकारेण विचार्य तं दिव्यहिरण्यपक्षं प्राणमं प्रणाममकरवम्।

अनुवाद – इस दिव्यहिरण्यपक्ष हंस के प्रसाद के बिना मोक्षप्राप्ति संभव नहीं है। समस्त उपायों से आत्मा की रक्षा करनी चाहिए। इस प्रकार अग्रगामी मैंने स्वयं विचार करके उस हंस को प्रणाम किया।

।। ७५।।

मुहुर्नमन्तं शतशः स्तुवन्तं
मामापदन्तं चिरमर्थयन्तम्।
प्रसन्नयाऽसावनुगृह्य दृष्ट्या
विश्वासमापादयति स्म चित्ते।।

अन्वयः – मुहुः नमन्तं शतशः स्तुवन्तं चिरम् आपदन्तम् अर्थयन्तं माम् असौ प्रसन्नया दृष्ट्या अनुगृह्य चित्ते विश्वासम् आपादयति स्म।

गङ्गा – मुहुर्नमन्तमिति– मुहुः बारम्बारं नमन्तं नमनं कुर्वन्तं शतशः स्तुवन्तं स्तुतिं कुर्वन्तं चिरम् आपदन्तं आपदां विपत्तीनां सांसारिकव्याधीनां हंसभयजन्यपीडायाः तापत्रयाणां दैहिकादीनां वा अन्तम् अर्थयन्तं प्रार्थयन्तं माम् अलिम् असौ हंसः प्रसन्नया दृष्ट्या अनुगृह्य मम चित्ते विश्वासं भयराहित्यम् आपादयति प्रतिपादयति स्म। मत्तः सम्प्रति न ते भयमित्युपदिशति स्मेति भावः।

अनुवाद – बार बार नमस्कार कर रहे, चिरकाल तक विपत्ति का नाश चाह रहे मुझ अलि को उस हंस ने प्रसन्न दृष्टि से अनुगृहीत किया और मेरे चित्त में विश्वास उत्पन्न किया।

।।७६।।

स्थिरप्रसादत्वमवेक्ष्य तस्य
शङ्काकलङ्के मनसोऽपयाते।
लौल्येन लालाटिकतां विहाय
जिज्ञासमाने मयि तस्य तत्त्वम्।।

अन्वयः – तस्य स्थिरप्रसादत्वमवेक्ष्य मनसः शङ्काकलङ्के अपयाते लौल्येन लालाटिकतां विहाय मयि तस्य तत्त्वं जिज्ञासमाने (मौनी बभूव इति परेणान्वयः)।

गङ्गा – स्थिरप्रसादत्वमिति– त्रिभिः कुलकम्। तस्य दिव्यहिरण्यपक्षस्य हंसस्य स्थिरप्रसादत्वं दृढानुग्रहभावम्। 'प्रसादोऽनुग्रहे काव्यप्राणस्वास्थ्यप्रसत्तिषु' इति मेदिनी। अवेक्ष्य दृष्ट्वा मनसः तद्विषयके शङ्काकलङ्के पूर्वोक्तभयादिशङ्कापङ्के अपयाते दूरीभूते सति लौल्येन चाञ्चल्येन। लोलश्चले सतृष्णे चेति हैमः। लालाटिकतां स्वामिनो हंसस्य ललाटदर्शितां विहाय परित्यज्य। 'लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः' इत्यमरः। तस्य हंसस्य तत्त्वं रहस्यं मयि अलौ जिज्ञासमाने सति स हंसः मौनी बभूवेति परेणान्वयः।

अनुवाद – उस दिव्यहिरण्यपक्ष हंस के दृढ़ अनुग्रह भाव को देखकर मेरे मन से शङ्का का कालुष्य नष्ट हो गया। चंचलता के कारण मैंने उसकी मुखापेक्षिता छोड़ दी। मेरे द्वारा उसके रहस्य की जिज्ञासा करने पर (वह मौन हो गया)।

।। ७७।।

त्वं कोऽसि ? कं द्रष्टुमिहागतोऽसि ?
प्रवर्तितः केन ? ददासि कस्मै ?।
कस्माज्जनिस्ते ? ऽसि च कस्य गृह्यः ?
कस्मिंस्त्वदास्थेत्यभिधातुकामे।।

अन्वयः – त्वं कः असि ? इह कं द्रष्टुम् आगतः असि ? के न प्रवर्तितः असि ? कस्मै ददासि ? कस्मात् ते जनिः ? कस्य गृह्यः असि ? कस्मिन् (च) त्वदास्था (अस्ति) इति अभिधातुकामे (मौनी बभूव)।

गङ्गा – त्वं कोऽसीति– हे हंस ! त्वं कः असि भवसि ! पक्षिरूपस्त्वं देवादिषु कोऽसीत्यलेर्जिज्ञासा। इह लोके च कं द्रष्टुम् आगतोऽसि ? तत्रापि केन प्रवर्तितः प्रेरितः सन्नागतः। कस्मै ददासि प्रयच्छसि ? ते जनिः जन्म कस्मात् ? कस्ते जनक इति भावः। कस्य च गृह्यः ग्रहणयोग्यः ! तव आस्था च कस्मिन् विद्यत इति मयि अलौ जिज्ञासमाने स हंसः 'मौनी बभूव' इति परेणाऽन्वयः।

अनुवाद – तुम कौन हो ? यहाँ किसे देखने आये हो ? किसने तुम्हें इस कार्य में लगाया है ? तुम किसे देते हो ? तुम्हारा जन्म कहाँ से है ? किसके द्वारा गृह्य हो ? तुम्हारी आस्था किस पर है ? मेरे ऐसा पूछने पर (वह हंस मौन हो गया)।

।। ७८।।

हृष्यन्नपीर्ष्यन्निव सर्वजीव–
भावैकवेदी मम चापलेन।
मनागनादिष्टमहारहस्य–
पिपृच्छिषोत्थेन बभूव मौनी।।

अन्वयः – अनादिष्टमहारहस्यपिपृच्छिषोत्थेन मम चापलेन सर्वजीवभावैक–वेदी (सः) हृष्यन् अपि मनाक् ईर्ष्यन् इव मौनी बभूव।

गङ्गा – हृष्यन्नपीति– सर्वजीवभावैकवेदी सर्वप्राणिभावैकवेत्ता अभिप्रायज्ञ इति यावत्। 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मस्वि'त्यमरः। यद्वा जडवस्तूनां तत्त्वैकवेत्ता सः दिव्यहिरण्यपक्षो हंसः हृष्यन्नपि प्रसन्नतामनुभवन्नपि अनादिष्ट–महारहस्यपिपृच्छिषोत्थेन अनादिष्टा अननुमता या तद्विषयकमहारहस्यस्य पिपृच्छिषा प्रष्टुं समीहा तया उत्थेन जनितेन मम अलेः चापलेन चाञ्चल्येन मनाक् ईर्ष्यन्

ईर्ष्यामनुभवन् इव मौनी बभूव। निरुत्तरं तस्थाविति भावः।

अनुवाद – मेरी इस अननुमत महारहस्य को पूछने की इच्छा से उत्पन्न चंचलता से समस्त जीवों के अभिप्राय (अथवा जड़ वस्तुओं) को जानने वाला वह हंस प्रसन्न होता हुआ भी मानों ईर्ष्या करने लगा और मौन हो गया।

।। ७९ ।।

मूको न्वयं ? किं बकवृत्तिरेष ?
सादृश्यमात्रान्न विशङ्क्यमेतत्।
आश्वासयत्यत्र मनःप्रसादो
मया प्रतीक्ष्योऽयमिति व्यचिन्ति।।

अन्वयः – अयं मूकः नु ? एष बकवृत्तिः किम् ? एतत् सादृश्यमात्रात् न विशङ्क्यम्। मनः प्रसादः अत्र आश्वासयति। 'अयं मया प्रतीक्ष्यः' इति व्यचिन्ति।

गङ्गा – अलिः तस्य मौनभावं दृष्ट्वा स्वचिन्तितं विशदयन्नाह– **मूकोन्वयमिति**– अयं दिव्यहिरण्यपक्षः हंसः मूकः वा ? तस्य समाधिमग्नतां द्रष्ट्वा शङ्कते एष बकवृत्तिः किम् ? एतत् सर्व सादृश्यमात्रात् मौनित्वात् मूकत्वं बकवृत्तित्वं वाऽस्य न विशङ्क्यं शङ्कनीयम्। मनः प्रसादः मनसः प्रसन्नता अयं दिव्यहिरण्यपक्षः मया अलिना प्रतीक्ष्यः पूज्यः अथवा अयं प्रतीक्षणीयः। इति एवं प्रकारेण मया अलिना व्यचिन्ति विचारः कृतः।

अनुवाद – क्या यह मूक है ? अथवा यह बगुले जैसा व्यवहार करने वाला है ? सादृश्यमात्र से मुझे यह शङ्का नहीं करनी चाहिए। मन की प्रसन्नता मुझे आश्वस्त कर रही है। इस दिव्य हिरण्यपक्ष की मुझे पूजा करनी चाहिए। (अथवा मुझे प्रतीक्षा करनी चाहिए।) इस प्रकार मैंने विचार किया।

।। ८० ।।

ममाधिकालापकदर्थ्यमानः
समाधिकालापगमे स हंसः।
मुहुर्निषेधन्निव नेति नेती–
त्यव्यक्तमेवोपदिदेश पूर्वम्।।

अन्वयः – समाधिकालापगमे मम अधिकालापकदर्थ्यमानः स हंसः मुहुः नेति नेति निषेधन् इव पूर्वम् अव्यक्तम् एव उपदिदेश।

गङ्गा – हंसाचरितं वर्णयति– **ममाधिकालापेति**– समाधिकालापगमे व्यपगते समाधिसमये। समाधितो मुक्त्यनन्तरं मम अलेः अधिकालापकदर्थ्यमानः अधिकेन आलापेन वार्तालापेन कदर्थ्यमानः पीड्यमानः स दिव्यहिरण्यपक्षः मुहुः वारम्वारं नेति नेति निषेधन्निव पूर्वं प्रथमम् अव्यक्तमेव अस्पष्टं पक्षे ब्रह्म एव उपदिदेश उपदिष्टवान्।

अनुवाद – समाधिकाल के बीत जाने के अनन्तर वह हंस मेरे अधिक वार्तालाप से दुःखी हो गया। तदनन्तर बार बार 'नेति नेति' कह कर जगत् का निषेध करते हुए उसने पहले अव्यक्त (अस्पष्ट या ब्रह्म का) उपदेश दिया।

।।८१।।

तन्मूकभावं मनसोऽवधूय
प्रदक्षिणीकृत्य पुनः पुनस्तम्।
तदाभिमुख्यं स्पृहयन् प्रनृत्यन्
प्रपञ्चयामि स्म पुरेव वाचम्।।

अन्वयः – मनसः तन्मूकभावम् अवधूय तं पुनः पुनः प्रदक्षिणीकृत्य तदाभिमुख्यं स्पृहयन्, प्रनृत्यन् पुरा इव वाचं प्रपञ्चयामि स्म।

गङ्गा – पुनः स्वकृत्यं निर्दिशति– **तन्मूकभावमिति**– मनसः मानसात् तन्मूकभावं तस्य दिव्यहिरण्यपक्षस्य हंसस्य मूकभावं मौनित्वम् अवधूय दूरीकृत्य तं च पुनः पुनः भूयोभूयः प्रदक्षिणीकृत्य परिक्रम्य तदाभिमुख्यं तस्य हंसस्य आभिमुख्यं साम्मुख्यं स्पृहयन् वाञ्छन् प्रनृत्यन् नृत्यं कुर्वन् पुरा इव पूर्वकाल इव वाचं स्वप्रश्नवाणीम् आलापं वा प्रपञ्चयामि स्म विस्तारयामि स्म।

अनुवाद – मन से उस हंस के मूकभाव को दूर करके मैने बार बार उसकी परिक्रमा किया। उसके साम्मुख्य को चाहते हुए मैंने नाचते हुए अपनी वाणी का विस्तार किया।

।।८२।।

वनात्समाहृत्य रसानभीक्ष्णं
समर्प्य शक्त्या मयि सेवमाने।
हृदि प्रसन्नोऽपि स गूढभावो
निरुत्तरः क्वाऽपि रयात् प्रतस्थे।।

अन्वयः – वनात् अभीक्ष्णं रसान् समाहृत्य समर्प्य (च) शक्त्या मयि सेवमाने (सति) गूढभावः सः हृदि प्रसन्नः अपि निरुत्तरः क्वापि रयात् प्रतस्थे।

गङ्गा – हंसाचरितं विशदयति– **वनादिति**– वनात् अरण्यात् अभीक्ष्णं निरन्तरम्।'अभीक्ष्णं शश्वदनारते' इत्यमरः।रसान् कुसुमरसान् समाहृत्य एकत्रीकृत्य तस्मै हंसाय समर्प्य च शक्त्या मयि सेवमाने सति गूढभावः अज्ञाताभिप्रायः सः हंसः हृदि हृदये प्रसन्नः प्रसन्नतामनुभवन्नपि निरुत्तरः उत्तरवाचमदत्वैव अथवा सर्वाधिकः रयात् वेगात् प्रतस्थे प्रस्थानं चक्रे।

अनुवाद – वन से निरन्तर रस एकत्र करके मैंने उस हंस को समर्पित किया। इस प्रकार शक्तिपूर्वक मैंने उस हंस की सेवा की तथापि मैं उस हंस के अभिप्राय को नहीं समझ सका। वह हंस हृदय में प्रसन्न होता हुआ वह हंस बिना कोई उत्तर दिए (अथवा सर्वाधिक) वेग से कहीं प्रस्थान कर गया।

।।८३।।

तदीयरूपेक्षणमात्रलुब्धो
विहाय गन्धान् विविधान् रसांश्च।
शनैः शनैरन्वगमं कथं नु
मन्दो गतिं विन्दतु मादृशोऽस्य ?।।

अन्वयः – तदीयरूपेक्षणमात्रलुब्धः (अहम् अलिः) विविधान् गन्धान् रसान् च विहाय शनैः शनैः (तं हंसम्) अन्वगमम्। मादृशः मन्दः अस्य गतिं कथं नु विन्दतु?

गङ्गा – तस्य हंसस्य तात्पर्यज्ञाने स्वाऽसामर्थ्यं प्रकटयत्यलिः– **तदीयरूपेक्षणेति**– तदीयरूपेक्षणमात्रलुब्धः तदीयस्य दिव्यहिरण्यपक्षस्य हंसस्य रूपेक्षणमात्रेण दर्शनमात्रेण लुब्धः अहम् अलिः वनस्थान् विविधान् रसान् गन्धान् पुष्परसान् तद्गन्धान् च विहाय परित्यज्य शनैः शनैः तं हंसम् अन्वगमम् अन्वगच्छम्। मादृशः मम अलेः सदृशः क्षुद्रप्राणी कीटस्तस्य दिव्यहिरण्यपक्षस्य परमात्मरूपस्य हंसस्य गतिं तात्पर्यं द्रुतगमनं च कथं विन्दतु जानातु। सः साक्षात् ब्रह्मरूपोऽहं च कीट इति तदभिप्रायज्ञाने द्रुतगतिज्ञाने च न मम सामर्थ्यमित्यभिप्रायः।

अनुवाद – मैं उस हंस के रूपदर्शनमात्र से लुब्ध हो गया। मैंने विविध रसों और गन्धों को छोड़कर धीरे धीरे उसका पीछा किया। मुझ जैसा क्षुद्र कीट भला

उसकी तीव्रगति या अभिप्राय को कैसे जान सकता है।

।।८४।।

अपेक्षमाणं स च मां दयालु-
विलम्बमानो विधिनोपनिन्ये।
आहूय हुङ्काररवेण मन्दं
मन्दाकिनीतीरमुपाजगाम।।

अन्वयः – विलम्बमानः स दयालुः च अपेक्षमाणं मां विधिना उपनिन्ये। हुङ्काररवेण (माम्) आहूय मन्दाकिनीतीरम् उपाजगाम।

गङ्गा – अपेक्षमाणमिति- विलम्बमानः विलम्बं क्रियमाणः स दयालुः दिव्यहिरण्यपक्षो हंसः तमपेक्षमाणं माम् अलिं विधिना विधिपूर्वकम्, उपनिन्ये समीपं प्रापयामास। अथवा विधिना शास्त्रोक्तविधानेन, उपनिन्ये सञ्चस्कार। मां च हुङ्काररवेण आहूय मन्दं यथा स्यात्तथा मन्दाकिनीतीरम्, उपाजगाम, उपागच्छत्।

अनुवाद – विलम्ब कर रहा वह दयालु हंस विधिपूर्वक अपेक्षा कर रहे मुझ अलि के पास आया। अथवा उसने शास्त्रोक्तविधि से मेरा संस्कार किया। उसने हुंकाररव से मुझे बुलाया और मन्दगति से मन्दाकिनी के तट पर आ गया।

।।८५।।

तदीयवीक्षाक्षण एव पक्षान्
विधूय सर्वान् सहसोत्थितेषु।
द्विजेषु पद्मासननिश्चलाङ्गः
क्षणं विशश्राम स नाम हंसः।।

अन्वयः – तदीयवीक्षाक्षण एव सहसा उत्थितेषु द्विजेषु सर्वान् पक्षान् विधूय पद्मासननिश्चलाङ्गः स हंसः नाम क्षणं विशश्राम।

गङ्गा – पुनः स हंसः किं कृतवानिति वर्णयति- **तदीयवीक्षाक्षणेति**- तदीयस्य दिव्यहिरण्यपक्षस्य हंसस्य वीक्षाक्षणे दर्शनकाले एव सहसा उत्थितेषु द्विजेषु। द्विजशब्दोऽत्र श्लिष्टः।'दन्तविप्राण्डजा द्विजा' इत्यमरः। पक्षिषु विप्रेषु वा। सर्वान् पक्षान्। पक्षशब्दोऽपि नानार्थकः। 'पक्षो मासार्धके पार्श्वे ग्रहे साध्याविरोधयोः'। केशादेः परतो वृन्दे बले सखिसहाययोः। चुल्लीरन्ध्रे पतत्रे च वाजिकुञ्जरपार्श्वयोः' इति मेदिनी। पक्षिपक्षेऽयं पतत्रवाचको विप्रपक्षे च नानाशास्त्रसिद्धान्तवाचकः।

हंसदर्शनसमकाल एव सहसा समागतेषु विप्रेषु नानाशास्त्रसिद्धान्तान् पूर्वोत्तरपक्षान् विधूय तिरस्कृत्य। अथवा सहसा समागतेषु पक्षान् छदान् विधूय। पद्मासननिश्चलाङ्गः कमलासनस्थिराङ्गः। अथवा पद्मासनं योगाङ्गासनविशेषः। तत्र निश्चलाङ्गः। स हंसो नाम। नामशब्दोऽत्र प्रसिद्धौ। यद्वा नाम्ना हंसः परमार्थतस्तु परमात्मा क्षणं मुहूर्तं विशश्राम। विश्रामं कृतवान्।

अनुवाद – पक्षिपक्ष– उस हंस को देखते ही वहाँ सहसा अनेक पक्षी आ गये। उनके आने पर उस हंस ने अपने पंखों को हिलाया। पद्मासन (कमलासन) या पद्मासन नामक योगासनविशेष में निश्चल अंगों वाले उस हंस ने क्षण भर विश्राम किया। ब्राह्मण पक्ष– उस हंस को देख कर सहसा ब्राह्मणों के आ जाने पर उस हंस ने सभी पूर्वोत्तरपक्षों का समाधान किया। पद्मासन (कमलासन) या पद्मासन नामक योगासनविशेष में निश्चल अंगों वाले उस परमात्मा रूपी हंस ने क्षण भर विश्राम किया।

।। ८६ ।।

प्रत्युद्‌गमेनैव कृतादरेषु
स्वाभ्यस्तनानाविषयोन्मुखेषु।
तेषु प्रयातेषु स मां निरीक्ष्य
तारं स्वरं साधु रहस्युवाच।।

अन्वयः – प्रत्युद्‌गमेन एव कृतादरेषु स्वाभ्यस्तनानाविषयोन्मुखेषु तेषु प्रयातेषु स मां निरीक्ष्य रहसि तारं स्वरं साधु उवाच।

गङ्गा – पुनः स हंसः किं कृतवानिति वर्णयति– **प्रत्युद्‌गमनेति**– प्रत्युद्‌गमेन एव आसनादुत्थायैव न त्वन्येन विधिना, कृतादरेषु सम्पादितसत्कारेषु स्वाभ्यस्तनानाविषयोन्मुखेषु विषयशब्दोऽत्र देशगन्धादिवाचकः। 'विषयो गोचरे देशे तथा जनपदेऽपि च' इति मेदिनी। स्वाभ्यस्तनानाविषयोन्मुखा ये पक्षिणः विप्राश्च तेषु प्रयातेषु गतेषु सत्सु स हंसः माम् अलिं निरीक्ष्य दृष्ट्वा रहसि एकान्ते तारं स्वरम्, उच्चैः स्वरं प्रणवं वा। 'तारं च रजतेऽत्युच्चस्वरेऽध्यन्यवदीरितम्' इति विश्वः। साधु सम्यक् प्रकारेण उवाच उपदिदेश।

अनुवाद – आसन से उठ कर ही जिनका सत्कार किया गया था तथा जो अपने अभ्यस्त विषयों (देश और गन्ध आदि) की ओर उन्मुख थे उन (पक्षियों

और विप्रों) के चले जाने पर उस हंस ने मुझे देखा। उसने एकान्त में मुझे उच्च स्वर या प्रणव का उपदेश दिया।

।।८७।।

तेनादिमप्रश्नकृतोत्तरोऽहं
विचारयन् प्राच्यनकारवाचम्।
जगन्निषेधात्मविधानतत्त्व-
मस्याशयं तन्मननादबुध्ये।।

अन्वयः - तेन आदिमप्रश्नकृतोत्तरः अहं प्राच्यनकारवाचं विचारयन् तन्मननात् अस्य ''जगन्निषेधात्मविधानतत्त्वम् असि'' इति आशयम् अबुध्ये।

गङ्गा - तदुपदेशजन्यबोधं वर्णयति- **तेनादिमेति-** तेन दिव्यहिरण्यपक्षेण हंसेन आदिमप्रश्नकृतोत्तरः, आदिमः प्रथमश्चासौ प्रश्नः आदिमप्रश्नः। आदिमप्रश्नस्य कृतमुत्तरं यस्य स आदिमप्रश्नकृतोत्तरः। 'त्वं कोऽसि' इति सप्तसप्ततितमे पद्ये अलिना प्रश्नः कृत आसीत्। अत्र प्रणवोच्चारणेन हंसः 'अहम् आत्मा' इत्युदतरत्। तस्योत्तरेण, प्राच्यनकारवाचम्, पूर्वं सप्तसप्ततितमे पद्ये उच्चारिता ये ''कं द्रष्टुमिहागतोऽसि, केन प्रवर्तितः, कस्मै ददासि, कस्माज्जनिस्ते, कस्य गृह्यः असि, कस्मिन् त्वदास्था'' इत्येते भेदविषयकाः षट् प्रश्नास्तेषां नकार एवोत्तरम्। तन्नकारवाचं विचारयन् तन्मननात् तस्य हंसस्य अनुध्यानात् जगन्निषेधात्मविधानतत्त्वम्, जगन्निषेधेन यदात्मविधानं तत्त्वमसीति हंसस्य आशयमभिप्रायमबुध्ये, ज्ञातवान्। अस्य हंसस्य पूर्वोक्तद्वय एव तात्पर्यम्। जगन्निषेधे आत्मतत्त्वविधाने च। अथवा महावाक्यतात्पर्यम्। तत्तत्त्वं प्रतिपादितमेव उपनिषत्सु। श्रीमद्भागवतादौ बहुत्र निषेधमुखेन जगद् व्याख्यातम्। तथा च भागवते-

निषेधशेषो जयतादशेषः। एवमन्यत्रापि-
द्युपतय एव ते न ययुरन्तमनन्ततया
त्वमपि यदन्तराण्डनिचया ननु सावरणाः।
ख इव रजांसि वान्ति वयसा सह यच्छ्रुतय-
स्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः।। (१०.८७.४१)
जगतो निषेधं कृत्वा श्रुतयो यत्प्रतिपादयन्ति तदात्मतत्त्वं त्वमसीति भावः।

अनुवाद – उस हंस के द्वारा अपने प्रथम (कस्त्वम्) प्रश्न का उत्तर पाकर मैंने पूर्वोक्त अन्य निषेधवाक्यों पर विचार किया। मुझे उसके मनन से ''जगत् के निषेध से जिस आत्मतत्त्व का विधान किया जाता है, वह तत्त्व तुम हो, उस हंस का यह आशय समझ में आया।

।। ८८ ।।

विस्पष्टदृष्टस्य कथं निषेधो ?
दृश्यः कथं वा भविताऽयमात्मा।
अकृत्रिमा वाक् कथमप्रमाणं ?
कथं नु याथार्थ्यमिहावधार्यम्।।

अन्वयः – विस्पष्टदृष्टस्य निषेधः कथम्? अयम् आत्मा कथं वा दृश्यः भविता? अकृत्रिमा वाक् कथम् अप्रमाणं (भवति)? इह नु याथार्थ्यं कथम् अवधार्यम्?

गङ्गा – सम्प्रति स्वदुस्तर्कान् निवेदयति– **विस्पष्टेति**– विस्पष्टदृष्टस्य विस्पष्टतया हस्तामलकवत्स्पष्टतया दृष्टस्य प्रत्यक्षीक्रियमाणस्य जगतः निषेधः कथम्? तदभावः कथम्? अस्त्विति शेषः। अयं जगन्निषेधमुखेन वेदान्तेषु प्रतिपादितः आत्मा चैतन्यं कथं केन प्रकारेण दृश्यः साक्षात्कार्यो भविता। आत्मसाक्षात्कारः कथं भवेदित्याशयः। अकृत्रिमा वाक् स्वाभाविकी वाणी, वेदवाक् च। वेदा अपौरुषेया न तु केनापि कृता इति तेषामकृत्रिमत्वम्। जगत्प्रत्यक्षमस्ति इति स्वाभाविकी वाक् कथमप्रमाणं भवेत्। तथैव वेदवाक् 'ब्रह्म सत्यं जगन्मिथ्या' इत्यादिरूपेण जगन्नास्तीति प्रतिपादयतीति सापि कथमप्रमाणं स्यादिति भावः। एवं द्वैविध्ये सति इह अस्मिन् जगति याथार्थ्यं यथार्थज्ञानं कथमवधार्यम्? कथं प्राप्तव्यमिति तर्कः। द्वैधीभावस्तु भ्रममेवोत्पादयति।

अनुवाद – स्पष्ट रूप से दिखायी पड़ रहे इस संसार का निषेध कैसे हो सकता है? इस आत्मा को कैसे देखा जा सकता है? अकृत्रिम वाणी (स्वाभाविक वाणी या वेदवाक्य) कैसे अप्रमाण है। इस संसार में यथार्थज्ञान कैसे हो?

टिप्पणी – यहाँ प्रयुक्त 'अकृत्रिमा वाक्' स्वाभाविक वाणी तथा वेद दोनो का वाचक है। दृष्ट सत्य का प्रतिपादन करने वाली वाणी कृत्रिम नहीं है। इसी प्रकार वेदवाणी भी अपौरुषेय होने से कृत्रिम नही है। अलि का प्रश्न है कि जगत् दृष्टिगत हो रहा है, अतः इस स्वाभाविक कथन को अप्रमाण कैसे माना जाय। इसी प्रकार

''ब्रह्म सत्यं जगन्मिथ्या' जैसे वेदसम्मतवचन भी अप्रमाण नहीं हो सकते। ऐसे में यथार्थ का ज्ञान कैसे हो ?

।।८९।।

इत्यादिदुस्तर्कसमीरवेगै-
र्विक्षिप्यमाणोऽपि विरुद्धदिक्षु।
श्रद्धाय तद्धारितवानमुष्य
पदद्वयं मूर्ध्नि मुखेऽपि चाऽहम्।।

अन्वयः – इत्यादिदुस्तर्कसमीरवेगैः विरुद्धदिक्षु विक्षिप्यमाणः अपि अहं श्रद्धाय अमुष्य तद् पदद्वयम् मूर्ध्नि मुखे अपि च धारितवान्।

गङ्गा – दुस्तर्काहतोऽलिर्हंसस्य पदद्वयं जग्राहेत्याह– **इत्यादिदुस्तर्केति–** इत्यादिदुस्तर्कसमीरवेगैः पूर्वोक्तविस्पष्टदृष्टस्य कथं निषेधेत्यादिरूपेण प्रदर्शितकुतर्कवायुजवैः विरुद्धदिक्षु विपरीतासु काष्ठासु विक्षिप्यमाणः अपि निक्षिप्यमाणः अपि। पूर्वोक्ततर्करूपपवनवेगैरपसिद्धान्तपक्षे निपातितोऽपीत्याशयः। तस्मिन् हंसे श्रद्धाय श्रद्धां कृत्वा। श्रद्धातोरुपसर्गवद्वृत्तित्वाल्ल्यप्। अहमलिः अमुष्य परमात्मरूपहंसस्य तत् पदद्वयं प्रणवनकाररूपं पदद्वयं चरणयुगं वा मूर्ध्नि मुखे च धारितवान्। प्रणवनकाररूपं पदद्वयं मुखे चरणयुगं च मूर्ध्नि धारितवान्। यद्वा प्रणवनकाररूपं पदद्वयं मूर्ध्नि मुखे चोभयत्रापि धारितवान्। तथैव चरणयुगमपीत्यर्थः।

अनुवाद – (यह स्पष्ट जगत् कैसे निषेध्य है) इत्यादि पूर्वोक्त दुस्तर्करूप पवन के वेगों से मैं विरुद्ध दिशाओं की ओर फेक दिया गया तथापि मैंने श्रद्धापूर्वक इसके दोनो पदों (प्रणव और नकाररूप अथवा चरणयुगल रूप) को शिर और मुख में धारण किया।

।।९०।।

तत्र प्रसङ्गान्मिलितैः सपक्षै-
र्जल्पन्ननल्पं शिखिभिः शुकैश्च।
सिष्णासयाऽऽयातबुधैः स्ववाचा
मध्यस्थभावेऽपि कृतप्रशंसः।।

अन्वयः – तत्र प्रसङ्गात् मिलितैः सपक्षैः शिखिभिः शुकैः च अनल्पं

जल्पन् सिष्णासया आयातबुधैः स्ववाचा मध्यस्थभावे अपि कृतप्रशंसः (बहुश्रमेण युक्तोऽस्मीति परेणाऽन्वयः)।

गङ्गा – तत्र प्रसङ्गादिति– तत्र तस्मिन् स्थाने प्रसङ्गात् व्याजात् मिलितैः प्राप्तैः, सपक्षैः मित्रैः पक्षधारिभिश्च। शिखिभिः मयूरैः कर्मठैश्च। शुकैः कीरैर्योगिभिश्च। अनल्पं जल्पन् बहु वार्तां कुर्वन्नहमलिः सिष्णासया स्नातुमिच्छया आयातबुधैः समागतविद्वद्भिः स्ववाचा निजमुखेन भ्रमरवाणीमाधुर्यगुणेन च मध्यस्थभावे अपि तटस्थभावेऽपि कृतप्रशंसः कृता प्रशंसा यस्य तादृशोऽहमलिः। बहुश्रमेण युक्तोऽस्मीति परेणाऽन्वयः।

अनुवाद – मैं वहाँ प्रसंग वश मिले मित्रों (या पक्षियों), मयूरों (या कर्मठों), शुकों (या मुनियों) के साथ बातचीत करता रहा। स्नान करने की इच्छा से वहाँ आये हुए विद्वानों के द्वारा अपने मुख से (अथवा भ्रमरवाणी के माधुर्य गुण से) तटस्थभाव रहकर भी प्रशंसित हुआ (मैं अत्यधिक श्रम (ज्ञान) से युक्त हूँ)।

।।९१।।

विपक्षमातङ्गकबृंहितेषु
तद्गण्डमाक्रम्य मदं विलुम्पन्।
प्राप्तारिराजीजयपत्रयोगा–
न्निर्बाधसम्पन्नमतप्रचारः।।

अन्वयः – विपक्षमातङ्गकबृंहितेषु तद्गण्डम् आक्रम्य मदं विलुम्पन् प्राप्तारिराजीजयपत्रयोगात् निर्बाधसम्पन्नमतप्रचारः (बहुश्रमेण युक्तोऽस्मीति परेणाऽन्वयः)।

गङ्गा – विपक्षेति– विपक्षमातङ्गकबृंहितेषु विपक्षाः पक्षशून्याः प्रतिवादिनश्च, मातङ्गकाः गजाः नीचाश्च तेषां बृंहितेषु गर्जनेषु सत्सु। 'बृंहितं करिगर्जितम्' इत्यमरः। तद्गण्डं कपोलस्थलम् आक्रम्य, मदं मदजलं गर्वं वा विलुम्पन् पिबन्, प्राप्तारिराजीजयपत्रयोगात्, प्राप्तः अरिराजीजयो यैस्तादृशानि पत्राणि पक्षास्तेषां योगात् संयोगात्, यद्वा प्राप्तं यत् प्रतिवादिजयसूचकं पत्रं तद्योगात्, निर्बाधसम्पन्नमतप्रचारः, निर्बाधः सम्पन्नः सम्पादितः मतस्य स्वपक्षस्य प्रचारः येन तादृशोऽहं बहुश्रमेण युक्तोऽस्मीति परेणान्वयः।

अनुवाद – पक्षरहित (या प्रतिवादियों) और हाथियों (या नीचों) के गर्जन से उनके गण्डस्थल पर आक्रान्त हो कर मैं मदजल (या गर्व) का पान करने लगा। शत्रुओं पर विजय पाने योग्य पंखों के योग से (अथवा प्राप्त हुए प्रतिवादियों के जय सूचक पत्रों के योग से) बाधा रहित होकर अपने मत का प्रचार सम्पन्न करने वाला मैं अत्यधिक श्रम (ज्ञान) से युक्त हूँ।

।।९२।।

गुरोरमुष्याऽथ सुरस्रवन्त्याः
स्थित्वाऽनुकूलं सुचिरं निशम्य।
श्रौतप्रमोदावहतद्वचांसि
क्रमेण युक्तोऽस्मि बहुश्रमेण।।

अन्वयः – अथ सुरस्रवन्त्याः अनुकूलं स्थित्वा अमुष्य गुरोः श्रौतप्रमोदावहतद्वचांसि क्रमेण सुचिरं निशम्य बहुश्रमेण युक्तः अस्मि।

गङ्गा – गुरोरमुष्येति– अथ सुरस्रवन्त्याः गङ्गायाः 'स्रोतस्वती द्वीपवती स्रवन्ती निम्नगाऽपगा' इत्यमरः। अनुकूलं तटे, हितमाचरन् वा। स्थित्वा अमुष्य हंसरूपस्य गुरोः श्रौतप्रमोदावहतद्वचांसि कर्णसुखकराणि वदसम्बन्धीनि वा सुखकराणि तस्य वचनानि क्रमेण क्रमशः सुचिरं निशम्य श्रुत्वा बहुश्रमेण युक्तोऽस्मि, सम्पन्नज्ञानोऽस्मीत्यर्थः। श्रान्तोऽस्मीति वाऽर्थः। अलिपक्षे श्रान्तिः। परिव्राजकपक्षे च ज्ञानसम्पन्नो युक्तयोगी जात इत्यर्थः।

अनुवाद – तदनन्तर गङ्गा के तट पर बैठ कर मैंने चिरकाल तक इस गुरु के वेदसम्बन्धी सुखकारी (अथवा कर्णसुखद) वचनों को क्रमशः सुना। उससे मैं सम्पन्नज्ञान (अथवा श्रान्त) हो गया हूँ।

।।९३।।

अयत्नतः कल्पतरूपनीते
शतक्रतुप्राप्यफलेऽपि तर्षः।
यदा न मेऽभूत् स तदा सहर्षो
बभावनाकाङ्क्षितसन्निकर्षः।।

अन्वयः – अयत्नतः कल्पतरूपनीते शतक्रतुप्राप्यफले अपि यदा मे तर्षः न अभूत् तदा सहर्षः अनाकाङ्क्षितसन्निकर्षः स बभौ।

गङ्गा – तद्वचोधारणानन्तरं हंसस्य स्थितिमाह– **अयत्नत इति**– अयत्नतः यत्नं प्रयासं वा विना कल्पतरूपनीते देववृक्षेण प्रापिते। कल्पतरुः समीहितं वस्तु यत्नं विना ददातीति प्रसिद्धिः। 'सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्' इत्यमरः। शतक्रतुप्राप्यफले, शतक्रतुः इन्द्रः तेन शतक्रतुना प्राप्यफले अपि। अथवा क्रतुः यज्ञः। यागशतकसाध्येऽपीत्यर्थः। 'यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः' इत्यमरः। तादृशफलेऽपि यदा मे अलेस्तर्षः पिपासा। 'उदन्या तु पिपासा तृट् तर्षः' इत्यमरः। प्राप्तिलोभ इति यावत्। न अभूत्, तदा सहर्षः हर्षेण सहितः, अनाकाङ्क्षितसन्निकर्षः अयाचितसन्निधिः स हंसः बभौ शुशुभे। प्रसन्नो बभूवेत्यर्थः।

अनुवाद – विना किसी यत्न के कल्पवृक्ष से अथवा शतक्रतु (इन्द्र) को प्राप्त होने वाले या सौ यज्ञों से साध्य फलों में भी मेरी इच्छा नहीं हुई। यह देख कर किसी भी सम्बन्ध को न चाहने वाला वह हंस हर्ष से प्रसन्न हो उठा।

।।९४।।

कदाचिदुड्डीय वियत्यकस्मा–
द्विस्मापिताशेषपतत्रिचेताः।
मां मण्डलाकारगतिच्छलेन
दिशश्चरेत्यादिशति स्म हंसः।।

अन्वयः – कदाचित् वियति उड्डीय अकस्मात् विस्मापिताशेषपतत्रिचेताः (स) हंसः मण्डलाकारगतिच्छलेन मां ''दिशः चर'' इति आदिशति स्म।

गङ्गा – हंसस्यादेशं वर्णयति– **कदाचिदिति**– कदाचित् सहसा वियति आकाशे उड्डीय उड्डयनं कृत्वा। 'वियद्विष्णुपदं वातु पुंस्याकाशविहायसी' इत्यमरः। अकस्मात् विस्मापिताशेषपतत्रिचेताः न शेषा अशेषाः। सम्पूर्णा इत्यर्थः। अशेषाश्च ते पतत्रिणः अशेषपतत्रिणः। अशेषपतत्रिणां चेतांसि अशेषपतत्रिचेतांसि। विस्मापितानि अशेषपतत्रिचेतांसि येन सः। आश्चर्यायितसमग्रपक्षिमना इत्यर्थः। स हंसः दिव्यहिरण्यपक्षः मण्डलाकारगतिच्छलेन तादृशगतिव्याजेन, दिशः काष्ठाः। 'काष्ठोत्कर्षे स्थितौ दिशि' इत्यमरः। चर भ्रम। इति आदिशति स्म। निरदिशत्। सर्वं सांसारिकं परित्यज्य दिग्भ्रमणं कुर्वित्युपदिदेशेति भावः।

अनुवाद – सहसा आकाश में उड़कर उस हंस ने अकस्मात् ही पक्षियों के चित्त को विस्मित कर दिया। मंडलाकारगति के बहाने उसने मुझे दिशाओं में भ्रमण करने का आदेश दिया।

।। ९५ ।।

भयं द्वितीयाद्भवतीति युक्त्या
व्यङ्क्तुं विविक्तस्थितिमीहमानः।
उपास्यमानोऽपि मया कदाचिच्-
चक्राङ्गराजः स रयादयासीत्।।

अन्वयः – 'द्वितीयाद् भयं भवति' इति युक्त्या व्यङ्क्तुं विविक्तस्थितिम् ईहमानः मया उपास्यमानः अपि स चक्राङ्गराजः कदाचित् रयात् अयासीत्।

गङ्गा – हंसाचरितं वर्णयति– **भयं द्वितीयेति**– द्वितीयाद् देहाद्यात्मभिन्नात् तत्राभिनिवेशाद्वा भयं जरामरणभीतिः भवति। तदेतत्तथ्यं श्रीमद्भागवतेऽप्युक्तम्–

भयं द्वितीयाभिनिवेशतः स्या-
दीशादपेतस्य विपर्ययोऽस्मृतिः।
तन्माययातो बुध आभजेत्तं
भक्त्यैकयेशं गुरुदेवतात्मा।। (११.२.३७)

द्वितीयाद् भयं भवतीति तथ्यं युक्त्या व्यङ्क्तुं विविक्तस्थितिम् एकान्तवासम् ईहमानः वाञ्छन्। 'विविक्तौ पूतविजनौ' इत्यमरः। मया अलिना उपास्यमानः चक्राङ्गराजः हंसराजः सः। 'हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः' इत्यमरः। कदाचिदेकदा रयात् वेगात् अयासीत् अगमत्। 'या प्रापणे' इति धातोर्लुङिरूपम्।

अनुवाद – 'देह आदि आत्मभिन्न पदार्थ में अभिनिवेश से जरामरण' का भय होता है इस तथ्य को युक्ति से व्यक्त करने के लिये वह हंस एकान्त स्थिति चाह रहा था। मुझ अलि के द्वारा उपास्यमान भी वह हंसराज सहसा वेग से चला गया।

।। ९६ ।।

तस्य प्रसङ्गाद्विषयेऽखिलेऽपि
न्यक्कृत्य भावं कृतकृत्यभावम्।
प्राप्तोऽस्मि तृप्तोऽस्मि तमेव नित्यं
स्वच्छन्दचारी हृदये वहामि।।

अन्वयः – तस्य प्रसङ्गात् अखिले अपि विषये भावं न्यक्कृत्य कृतकृत्यभावं प्राप्तः अस्मि। तृप्तः (च) अस्मि। स्वच्छन्दचारी (अहं) नित्यं तम् एव हृदये वहामि।

गङ्गा – तद्दर्शनाज्जायमानां स्वावस्थां वर्णयत्यलि:– **तस्य प्रसङ्गादिति**– तस्य दिव्यहिरण्यपक्षस्य हंसस्य प्रसङ्गात् सम्बन्धात् अखिले अपि समग्रेऽपि विषये सांसारिकभोग्यवस्तुनि भावं प्रीतिं न्यक्कृत्य तिरस्कृत्य कृतकृत्यभावं प्राप्तोऽस्मि गतोऽस्मि। तेन च कृतकृत्यभावेन तृप्तोऽस्मि। सन्तोषं भजे। न कदाचिदपि विषयाभिलाषो मयि जागर्तीति भाव:। स्वच्छन्दचारी स्वेच्छया विचरणशीलोऽहं भ्रमर: परिव्राजको वा नित्यं सदैव तमेव परमात्मरूपं हंसं हृदये वहामि धारयामि। तद्भिन्नो न कश्चिद् विषयो हृदये विद्यत इत्यर्थ:।

अनुवाद – उस हंस के प्रसंग से मैंने समग्र विषयों का तिरस्कार कर दिया। अब मैं कृतकृत्यभाव को प्राप्त हो गया हूँ तथा तृप्त हूँ। स्वच्छन्दचारी मैं (भ्रमर या संन्यासी) सदैव उसी हंस को हृदय में धारण करता हूँ।

।। ९७।।

नितान्तमृद्वी नवमल्लिका वा
सकण्टका सम्प्रति केतकी वा।
दैवोपपन्ना मम तुल्यरूपा
रमे न तस्यां न च तां त्यजामि।।

अन्वय: – दैवोपपन्ना नितान्तमृद्वी नवमल्लिका वा सम्प्रति सकण्टका केतकी वा मम तुल्यरूपा (अस्ति)। (अहं) तस्यां न रमे न च तां त्यजामि।

गङ्गा – अलिर्निखिलेऽपि विषये स्वदशां वर्णयन्नाह– **नितान्तमृद्वीति**– दैवोपपन्ना भाग्यात् प्राप्ता नितान्तमृद्वी नितान्तम् अत्यधिकं मृद्वी सुकोमला नवमल्लिका एतन्नाम्नी पुष्पलता वा भवतु सम्प्रति कालेऽस्मिन् सकण्टका कण्टकोपेता केतकी वा भवतु। उभयत्र मम समा दृष्टि:। मम कृते सा नवमल्लिकाऽपि तुल्यरूपा केतकी अपि। अस्तीति शेष:। द्वयोरपि समदर्शिस्वभावात् न कमपि विशेषं पश्यामि। अहं तस्यां केतक्यां न रमे न वा नवमल्लिकां त्यजामि। विलासिन: पूर्वोक्तिनिरासायेदमिति ध्येयम्।

अनुवाद – भाग्य से प्राप्त अत्यधिक कोमल नवमल्लिका हो या फिर इस समय भाग्य से प्राप्त कंटक युक्त केतकी हो, मेरे लिए दोनों ही समान हैं। न मैं केतकी में रम रहा हूँ और न ही नवमल्लिका का त्याग कर रहा हूँ।

।। ९८।।

भिक्षार्थमेवोपसरामि सर्वं
गायामि चाव्यक्तमहं स्ववाचा।
दिनान्तलब्धागनिशान्तवासी
निःसङ्ग्रहो मुक्तदुराग्रहोऽस्मि।।

अन्वयः – सर्वं भिक्षार्थम् एव उपसरामि। अहं स्ववाचा अव्यक्तं गायामि। दिनान्तलब्धागनिशान्तवासी निःसङ्ग्रहः मुक्तदुराग्रहः च अस्मि।

गङ्गा – स्वकृत्यं वर्णयति– **भिक्षार्थेति–** सर्वं केतकीं नवमल्लिकां चूतलतां वा सर्वं भिक्षार्थम् एव भिक्षाप्रयोजनादेव उपसरामि उपगच्छामि। स्ववाचा अहम् अव्यक्तम् अस्पष्टं पक्षे च ब्रह्म एव गायामि भजे। दिनान्तलब्धागनिशान्तवासी दिनान्ते सायंकाले लब्धो योऽगः वृक्षो वा पर्वतो वा तत्र निशान्तं प्रातः कालं यावद् वस्तुं शीलमस्य। वासकर्तेति यावत्। 'शैलवृक्षौ नगावगौ' इत्यमरः। एकस्मिन् वासे रात्रिं नीत्वा दिग्भ्रमणस्वभावादन्यत्र गच्छामि। एकस्मिन्नेव स्थले न रमे। अत एवाऽहं निःसङ्ग्रहः सङ्ग्रहरहितः मुक्तदुराग्रहः परित्यक्तदुराग्रहश्चास्मि। मम न सङ्ग्रहेच्छा न वा कुत्रचिद् दुराग्रह एवेति भावः। परिव्राजकप्रवृत्तिरिह दर्शिता।

अनुवाद – मैं सबके पास भिक्षा के लिए ही जाता हूँ। अपनी वाणी से अव्यक्त (अस्पष्ट या ब्रह्म का) ही गान करता हूँ। सायंकाल प्राप्त पर्वत या वृक्ष पर प्रातःकाल तक रहता हूँ। मैं संग्रहरहित तथा दुराग्रहमुक्त हूँ।

।। ९९।।

विलासिनाऽऽलस्यवशेन गेह–
बिलासिना किं भवता व्यलोकि ?।
अहन्तया मोहित! याहि दूरं,
हा हन्त! यामो हितकृद्विविक्तम्।।

अन्वयः – हे अहन्तया मोहित! आलस्यवशेन गेहबिलासिना विलासिना भवता हा हन्त! किं व्यलोकि। दूरं याहि। हितकृद्विविक्तं यामः।

गङ्गा – हंसकथनं वर्णयति– **विलासिनेति–** हे अहन्तया मोहित! अहङ्कारेण लोभं गत! अज्ञानिन्! आलस्यवशेन आलस्यस्य वशीभूतेन गेहबिलासिना गेह एव बिलं निवासस्थानं तत्र आसितुं शीलमस्य तादृशेन विलासिना रमणशीलेन पूर्वपक्षिणा

भवता। हा हन्तेति खेदजनकमव्ययम्। किं व्यलोकि, किमदर्शि। यत्त्वया दृष्टं तत्सर्वमसत्यमनर्थो वा। वस्तुतो नाहं भोगी, परमात्मोपासको निःसङ्ग्रहः परिव्राजकः। दूरं गच्छ, अपसर। न मे बिलासिना त्वया किमपि प्रयोजनम्। हितकृद्विविक्तं यामः, हितं करोतीति हितकृत्। परमात्मचिन्तनसहायकम्। तादृशं विविक्तं निर्जनस्थानं यामः गच्छामः। अत्र त्वया सह कालक्षेपेण न कोऽपि लाभः। त्वं तु अयथार्थद्रष्टेति भावः। यथार्थस्य ज्ञानं तु विविक्त एव भवतीति। 'विविक्तं पूतविजनौ' इत्यमरः। यद्वा हितसाधकं परमात्मचिन्तनसहायं पवित्रस्थानं गच्छाम इत्यर्थः।

अनुवाद – हे अहंकार से मोहित! आलस्य के कारण घर रूपी बिल में ही रहने वाले तुझ विलासी, ने क्या देखा? दूर हटो। हम हितकारी एकान्तस्थान में जा रहे हैं।

।। १००।।

समानकान्ताचरणप्रसाद–
नित्योद्यमो यद्यपि नाऽवभिन्नः।
अयत्नमेकान्तमुखे विभेद–
प्रथाऽऽवयोः किं वितथा तथाऽपि?।।

अन्वयः – यद्यपि आवयोः समानकान्ताचरणप्रसादनित्योद्यमः न अवभिन्नः तथापि एकान्तसुखे अयत्नं विभेदप्रथा वितथा किम्?

गङ्गा – श्लेषेणाऽलिविलासिनोः समानतां प्रतिपाद्य तत्र भेदं प्रदयर्शयन्नाह– **समानकान्तेति–** यद्यपि आवयोरलिविलासिनोः समानकान्ताचरणप्रसाद–नित्योद्यमः मानसहितायाः कान्तायाः प्रियतमायाः चरणप्रसादे पदप्रणामे नित्योद्यमः सन्ततमुद्योगः यस्य। पक्षे– समानकान्ताचरणप्रसादयोः समाने तुल्यरूपे सर्वत्र समे कान्ते सुन्दरे शास्त्रप्रतिपादिते आचरणे आचारे सन्ध्यावन्दनयज्ञयागादिसम्पादने परमात्मानुध्याने प्रसादे वा नित्योद्यमः निरन्तरप्रवृत्तिः यस्य सः। न अवभिन्नः एक एव। यथा भवतो नित्योद्यमो भवति समानकान्ताचरणप्रसादे तथैव मम अलेरपीत्यर्थः। तथापि एकान्तसुखे नियतसुखे, पक्षे विविक्तसुखे अयत्नं स्वाभाविकं विभेदप्रथा भेदपरम्परा आवयोः वितथा अनृता किम्? नेत्यर्थः। आवयोः कश्चन भेदोऽस्त्येव।

अनुवाद – यद्यपि मानवती कान्ता के चरणों को प्रसन्न करने में सतत प्रयत्न (भ्रमरपक्ष में) तुल्यरूप सुन्दर आचरण और प्रसाद में निरन्तर प्रयत्न करने

वाले हम दोनो में एक समान है तथापि नियतसुख (भ्रमर पक्ष में) निर्जन निवास सुख में हम दोनों की स्वाभाविक भेदपरम्परा क्या झूठी है ?

।। १०१ ।।

न्यस्यन् सभङ्गानि पदानि शङ्के
कौटिल्यदोषात् पतितासि पङ्के।
स्वपक्षदाक्ष्येण ममानिरुद्धा
सर्वेषु मार्गेषु गतिर्मतिश्च ।।

अन्वयः – कौटिल्यदोषात् सभङ्गानि पदानि न्यस्यन् पङ्के पतितासि (इति) शङ्के। स्वपक्षदाक्ष्येण मम गतिः मतिः च सर्वेषु मार्गेषु अनिरुद्धा (अस्ति)।

गङ्गा – पुनर्विलासिनः स्वभेदं प्रदर्शयन्नाहाऽलिः– **न्यस्यन्निति–** कौटिल्यदोषात् कुटिलतारूपदोषदूषितत्वात् सभङ्गानि भङ्गयुक्तानि भङ्गश्लेषोचितसुप्तिङन्तानि पदानि न्यस्यन् पङ्के कर्दमे पापे वा। 'पङ्कोऽस्त्री कर्दमे पापे' इति मेदिनी। पतितासि इति शङ्के मन्ये। स्वपक्षदाक्ष्येण स्वपक्षाणां छदानां शास्त्रीयमते च दाक्ष्येण चातुर्येण मम गतिः गमनं मतिर्बुद्धिश्च सर्वेषु मार्गेषु गगनादिषु दार्शनिकसम्प्रदायेषु विषयेषु च अनिरुद्धा निरोधरहिता। अस्तीति शेषः।

अनुवाद – कुटिलता दोष से दूषित होने के कारण भङ्गयुक्त पैरों (सभङ्ग सुप्तिङन्त पदों) के रखने से तुम कीचड़ या पाप में गिरोगे, यह मेरा मानना है। अपने पंखों की दृढ़ता (या अपने मत की दृढ़ता) से मेरी गति और बुद्धि आकाश आदि सभी मार्गों में (या समस्त शास्त्रीय सिद्धान्तों में) अविहत है।

।। १०२ ।।

अपत्रपेऽपात्रविबोधनेन
व्यर्थेन किं कार्यमिहास्त्यनेन ?।
त्वं गच्छ यत्रेच्छसि वेष एष
त्वां वक्त्यहो वैषयिकं विशेषात् ।।

अन्वयः – अपात्रविबोधनेन अपत्रपे। अनेन व्यर्थेन इह किं कार्यम् अस्ति ? त्वं यत्र इच्छसि (तत्र) गच्छ। अहो ! एष वेष (एव) त्वां विशेषात् वैषयिकं वक्ति।

गङ्गा – विलासिनं स्वनिष्कर्षं श्रावयति– **अपत्रप इति–** अपात्रस्य तव विलासिनः विबोधनेन भूयोभूयः सत्यप्रतिपादनेन अपत्रपे लज्जे। इह अत्र अनेन

व्यर्थेन वार्तालापेन किं कार्यमस्ति। न किमपीत्यर्थः। त्वं विलासी यत्र इच्छसि यस्मिन् देशे गन्तुं वाञ्छसि तत्र गच्छ। एष वेष एव त्वया धारितः त्वां विशेषात् वैषयिकं भोगलिप्सुं वक्ति वदति। स्ववेषेणैव त्वं वैषयिकः भासि।

अनुवाद – तुझ अपात्र को समझाने में मैं लज्जा का अनुभव कर रहा हूँ। इस व्यर्थ के वार्तालाप से क्या प्रयोजन? तुम जहाँ चाहते हो वहाँ जाओ। तुम्हारा यह वेष ही तुम्हें विशेष रूप से वैषयिक बता रहा है।

।। १०३।।

निरन्तरायत्नवचोऽन्तराय–
कारी विकारी न मतोऽधिकारी।
भवान् शमारीन् मदमाननारी–
मुखानखेदं हृदि यद्दधाति।।

अन्वयः – निरन्तरायत्नवचोऽन्तरायकारी विकारी अधिकारी न मतः। यत् भवान् मदमाननारीमुखान् शमारीन् अखेदं हृदि दधाति।

गङ्गा – विलासिनोऽनधिकारं वर्णयति–**निरन्तरेति**– निरन्तरायत्नवचोऽन्तरायकारी निरन्तराणां व्यवधानरहितानाम् अयत्नानां स्वाभाविकीनां वैदिकीनां च वचसाम् अन्तरायं व्यवधानं कर्तुं शीलमस्य सः। विकारी कामादिविकारवान्। अधिकारी शास्त्रोक्ततत्त्वप्रभुर्न मतः न स्वीकृतः। यत् यस्मात् भवान् विलासी मदमाननारीमुखान् मदः गर्वः। 'मदो रेतसि कस्तूर्यां गर्वे हर्षेभमानयोः' इति विश्वः। मानः अहङ्कारः। 'गर्वोऽभिमानोऽहङ्कारः' इत्यमरः। नारी स्त्री च। मदमाननार्यः मुखानि प्रमुखाणि येषां तान् शमारीन् शान्तिशत्रून् अखेदं सुखं हृदि हृदये दधाति धारयति। अधिकारी पुनरेतेभ्यो रहितो भवतीत्यर्थः।

अनुवाद – व्यवधानरहित अकृत्रिम (स्वाभाविक और वैदिक) वचनों में विघ्न या व्यवधान उत्पन्न करने वाला विकारवान् (ब्रह्मोपदेश का) अधिकारी नहीं माना गया। तुम अपने हृदय में सुख पूर्वक मद, मान और नारीप्रमुख शान्ति के शत्रुओं को धारण करते हो।

।। १०४।।

मधुमधुरगभीरभावपूर्णावितथ–
सयुक्तिकनिस्तुलालिसूक्तीः।

इति निशमयता विलासिनाऽन्तः-
स्तिमितहृदोपलवच्चिराय तस्थे।।

अन्वयः - इति मधुमधुरगभीरभावपूर्णवितथसयुक्तिकनिस्तुलालिसूक्तीः अन्तःस्तिमितहृदा निशमयता विलासिना चिराय उपलवत् तस्थे।

गङ्गा - विलासिनोऽवस्थां वर्णयति- **मधुमधुरेति-** इति एवम्प्रकारेण मधुमधुरगभीरभावपूर्णावितथसयुक्तिकनिस्तुलालिसूक्तीः मधु इव मधुराश्च गभीराश्च भावपूर्णाश्च अवितथाश्च सयुक्तिकाश्च निस्तुलाश्चेति तादृशीः अलिसूक्तीः भ्रमरसदुक्तीः विलासिना अन्तःस्तिमितहृदा। 'स्तिमितस्तरले क्लिन्ने' इति रुद्रः। अन्तःस्तिमितेन तरलेन हृदा हृदयेन निशमयता शृण्वता विलासिना पूर्वपक्षिणा उपलवत् प्रस्तरवत् हतप्रभः सन् चिराय तस्थे। तत्रैव स्थितिं चक्रे। पुष्पिताग्रा वृत्तम्।

अनुवाद - इस प्रकार मधु के समान मधुर, गंभीर, भावपूर्ण, सत्य, सयुक्तिक और तुलना रहित अनुपम अलिसूक्तियों को निश्चल हृदय से सुनता हुआ वह विलासी चिरकाल तक पत्थर की तरह वहीं खड़ा रहा।

।। १०५।।

मधुझरपरिपूरितालवालः
कुसुमसमूहतिरोहितप्रवालः।
सकलरवपिकालिचक्रवालो
व्यहसदमुं दशया स्वया रसालः!।।

अन्वयः - मधुझरपरिपूरितालवालः कुसुमसमूहतिरोहितप्रवालः सकलरवपिकालिचक्रवालः रसालः स्वया दशया अमुं व्यहसत्।

गङ्गा - रसालकृतविलासिप्रहासं वर्णयति- **मधुझरेति-** मधुझरपरिपूरिताल-बालः मधोः पुष्परसस्य झरेण प्रपातेन परिपूरितः आलवालो यस्य सः। 'मधु मद्ये पुष्परसे क्षौद्रेऽपी'त्यमरः। कुसुमसमूहतिरोहितप्रवालः कुसुमानां पुष्पाणां समूहेन तिरोहिताः प्रवालाः नवपल्लवाः यस्य सः। 'प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे' इति मेदिनी। सकलरवपिकालिचक्रवालः पिकश्च अलिश्च चक्रवालश्चेति पिकालिचक्रवालाः। कलरवेण सहिताः सकलरवाः। सकलरवाः पिकालिचक्रवालाः यस्मिन् सः। 'लोकालोकश्चक्रवाल' इत्यमरः। तादृशो रसालः आम्रवृक्षः स्वया स्वीयया दशया अमुं विलासिनं व्यहसत्। पिकादीनां कलरवेण

विलासिनस्तस्योपहासमकरोदित्यर्थः। पुष्पिताग्रावृत्तम्।

अनुवाद – पुष्परस के प्रपात से अपने आलवाल को परिपूर्ण करने वाला, कुसुमों के समूह से (अत्यन्त पुष्पित होने के कारण) अपने नवपल्लवों को छिपा लेने वाला, कलरव कर रहे कोकिल, भ्रमर और चक्रवाकों के द्वारा आम्रवृक्ष ने अपनी दशा से उस विलासी का उपहास किया।

।।१०६।।

किमुपशममुपैष्यति क्रुधं वा
मम वचसाऽयमिति स्फुटं बुभुत्सुः।
अवसरमदसीयवाचि दित्सुः
सशममलिर्निजविस्तराद् व्यरंसीत्।।

।। इत्यलिविलासिसंलापे खण्डकाव्ये प्रथमशतकम्।।

अन्वयः – 'अयं किं मम वचसा उपशमं क्रुधं वा उपैष्यति' इति स्फुटं बुभुत्सुः अदसीयवाचि अवसरं दित्सुः अलिः निजविस्तरात् सशमं व्यरंसीत्।

गङ्गा – सम्प्रत्यलिकृतं वर्णयति– **किमुपशमेति**– अयं मम पुरो विद्यमानो विलासी मम अलेः वचसा कथनेन उपशमं शान्तिं क्रुधं रोषं वा उपैष्यति गमिष्यतीति स्फुटं यथा स्यात्तथा बुभुत्सुः ज्ञातुमिच्छुः अदसीयवाचि विलासिनो वचसि अवसरं समयं दित्सुः। द्वितीयशतके पूर्वपक्षानुपस्थापयितुमित्यर्थः। अलिः निजविस्तरात् वचः प्रसारात् सशमं यथा स्यात्तथा व्यरंसीत् विराममगमत्।

।। इति विद्यावतीसुतरमाकान्तविरचितायां म.म. गङ्गाधरशास्त्रि-
कृतालिविलासिसंलापगङ्गाटीकायां प्रथमशतकम्।।

अनुवाद – मेरे वचनों से यह शान्त होगा अथवा क्रुद्ध होगा यह स्पष्ट रूप से जानने के लिए इस विलासी के वचनों को अवसर देने के लिए अलि अपने वचनविस्तार से रुक गया।

।। इति विद्यावतीसुतरमाकान्तपाण्डेयकृते हिन्द्यनुवादे प्रथमं शतकम्।।

***

द्वितीयशतकम्

विषयानुक्रमणिका

रागद्वेषविहीनबोधसुखता[१], तस्यात्मनोऽनन्यता[२],
तत्सत्ता[३], ऽनुमितिप्रमात्व[४], मखिलोद्योगेषु तद्धेतुता[५], ।
तद्बाधेऽनुपलब्धिहीनबलता[६], शाब्दप्रमाङ्गीकृति–[७]
र्युक्त्यैवेश्वरसिद्धि[८]रत्र गदिता वेदानुसारौचिती[९] ।।

---

१. ३४ श्लोकमारभ्य ३६ श्लोकपर्यन्तम्।
२. ६३ श्लोकमारभ्य ६९ श्लोकपर्यन्तम्।
३. २८ श्लोकमारभ्य ३३ श्लोकपर्यन्तम्।
४. ४५ श्लोकमारभ्य ५९ श्लोकपर्यन्तम्।
५. ६०श्लोकमारभ्य ६२ श्लोकपर्यन्तम्।
६. ८२ श्लोकमारभ्य ८७ श्लोकपर्यन्तम्।
७. ९४ श्लोकमारभ्य ९९ श्लोकपर्यन्तम्।
८. ८८ श्लोकमारभ्य ९४ श्लोकपर्यन्तम्।
९. १०२ श्लोकमारभ्य १०४ श्लोकपर्यन्तम्।

अथ द्वितीयशतकम्

।। १ ।।

अथ तथाऽलिवरेण विगर्हितो-
ऽप्यविवृतेङ्गित एव विलास्यसौ।
उपहसन् मनसा सहसाहसं
सकलदार्शनिकप्रथमोऽब्रवीत्।।

अन्वयः - अथ अलिवरेण तथा विगर्हितः अपि अविवृतेङ्गित एव असौ सकलदार्शनिकप्रथमः विलासी मनसा उपहसन् सहसाहसम् अब्रवीत्।।१ ।।

गङ्गा - चार्वाकमतप्रतिपिपादयिषया भूमिकामारचयन्नाह- **अथ तथेति-** अथ अनन्तरम्, अलिवरेण ब्रह्मवित्प्रतीकभूतेन भ्रमरश्रेष्ठेन। परमात्मनिष्ठत्वाद् अलेः श्रेष्ठत्वम्। तथा प्रथमसर्गान्ते प्रतिपादितविषयमिषेण विगर्हितो निन्दितोऽपि अविवृतेङ्गित एव न विवृतम् अविवृतम्। अविवृतम् इङ्गितं येन सः। अनुद्घाटितात्माभिप्राय इत्यर्थः। स तादृश एव सकलदार्शनिकप्रथमश्चार्वाकः विलासी मनसा उपहसन्, उपहासं कुर्वन्। अलिमिति शेषः। सहसाहसं साहसेन सहितं यथा स्यात्तथा, अब्रवीत् अवदत्। आत्माभिप्रायं प्रकटयितुमारभत। द्रुतविलम्बितं वृत्तम्। तल्लक्षणम्- द्रुतविलम्बितमाह नभौ भरौ।

अनुवाद - तदनन्तर अलिश्रेष्ठ के द्वारा उस प्रकार निन्दित होकर भी इस विलासी ने अपने अभिप्राय का उद्घाटन नहीं किया। सकल दार्शनिकों में प्रथम (चार्वाक) वह विलासी मन में (अलि का) उपहास करता हुआ बोला।

।। २ ।।

अयि वयस्य! वयस्यतुले नवे
नृपवरैरवरैश्च सदाऽऽदृतान्।
जडधिया विषयाननयाऽनयात्
क्व नु विहाय विहायसि यास्यसि ?।।

अन्वयः – अयि वयस्य! अतुले नवे वयसि नृपवरैः अवरैः च सदा आदृतान् विषयान् अनया जडधिया विहाय अनयात् विहायसि क्व नु यास्यसि?

गङ्गा – विलासिनोक्तमाह– **अयि वयस्येति**– हे वयस्य! हे मित्र! 'वयस्यः स्निग्धः सवयाः' इत्यमरः। अतुले अनुपमे अस्मिन् नवे वयसि आयुषि। तारुण्य इत्यर्थः। नृपवरैः राजश्रेष्ठैः, अवरैः अधमैः धनश्रीकान्त्यादिरहितैः दरिद्रैरित्यर्थः। सदा आदृतान् समानरूपेण वाञ्छितान्। विषयान् सांसारिकभोगविषयान् अनया स्वीयया जडधिया मूढमत्या, विहाय त्यक्त्वा, अनयात् न नयो नीतिः अनयः तस्मात् नीतिरहितमार्गात्। नृपवरैरवरैश्च समानरूपेण वाञ्छितत्वात् विषय एव सर्वस्वमिति चार्वाकमते तत्स्वीकार एव नयः। तद्विना विहायसि आकाशे। 'विहायाः शकुनौ पुंसि गगने पुन्नपुंसकम्' इति मेदिनी। नयरहिते शून्य इत्यर्थः। चार्वाकमते तु विषयोपभोग एव नयः। तत्सर्वं प्रपञ्चितं सर्वदर्शनसंग्रहादिग्रन्थेषु। अत्र कविनाऽनेनापि तन्नयो वक्ष्यत एव। क्व नु यास्यसि, कुत्र गमिष्यसि? न क्वापि गन्तुं शक्नोषीत्यर्थः।

अनुवाद – हे मित्र! तुम इस अनुपम नवीन आयु में राजश्रेष्ठों तथा धनादिरहित दरिद्रों के द्वारा समान रूप से चाहे गये विषयों को अपनी जड़मति से कैसे छोड़ सकते हो? बिना किसी नीति के इसे छोड़कर तुम आकाश (नयरहित शून्य) में कहाँ जाओगे।

।। ३ ।।

शृणु वचो मम भृङ्ग! सुधोपमं
ननु तनुर्विषयानुभवं विना।
विफलतामयते न च सा स्थिरा
वितनुतेऽत्र कुधीरवधीरणाम्।।

अन्वयः – हे भृङ्ग! मम सुधोपमं वचः शृणु। ननु विषयानुभवं विना तनुः विफलताम् अयते। सा च स्थिरा न (अस्ति)। अत्र कुधीः अवधीरणां वितनुते।

गङ्गा – विषयास्वादं विना शरीरस्य वैफल्यं प्रतिपादयन्नाह– **शृण्विति**– हे भृङ्ग! हे भ्रमर! मम चार्वाकमतानुयायिनो विलासिनः सुधोपमम् अमृततुल्यं वचः शृणु। ननु निश्चयेन, विषयानुभवं विना सांसारिकभोगानाम् अनुभवं विना तनुः शरीरं विफलताम् अयते, व्यर्थतां गच्छति। सा च तनुः स्थिरा नास्ति। अद्य तारुण्यं श्वो वार्धक्यमनन्तरं मृत्युरिति न शरीरस्य स्थिरता वक्तुं शक्यते। तथा च चार्वाकोक्तो

न्यायः सङ्कलितो माधवाचार्येण–

अङ्गनालिङ्गनाज्जन्यसुखमेव पुमर्थता।
कण्टकादिव्यथाजन्यं दुःखं निरय उच्यते।।
यावज्जीवेत् सुखं जीवेन्नास्ति मृत्योरगोचरः।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।

अत्र अस्मिन् विषयोपभोगविषये कुधीः कुत्सितमतिः, शास्त्रान्तरप्रतिपादितपरलोकसुखेच्छुरित्यर्थः। अवधीरणां तिरस्क्रियां वितनुते विस्तारयति। वस्तुतो विषयस्तु समेषां प्रियः।

अनुवाद – हे भ्रमर! मेरे अमृततुल्य वचनों को सुनो। निश्चय ही विषयों के अनुभव के विना शरीर व्यर्थ है। यह शरीर तो स्थिर है नहीं। कुत्सित बुद्धि वाला (वेदान्तादि शास्त्रों में प्रतिपादित ब्रह्मादि परलोकज सुख को चाहने वाला) इस विषय का तिरस्कार करता है।

।।४।।

स्फुरति कायमृते क्व नु चेतना?
तनुगताऽनुमता सकलैश्च सा।
तदितरः कथय क्व स चेतनो ?
दृढतरानुपलब्धिहतो ह्यसौ।।

अन्वयः – कायम् ऋते चेतना क्व नु स्फुरति! सा च सकलैः तनुगता अनुमता। तदितरः स चेतनः क्व (इति) कथय। हि असौ दृढतरानुपलब्धिहतः (अस्ति)।

गङ्गा – तर्कान्तरं प्रस्तौति– **स्फुरतीति**– कायं शरीरम् ऋते विना चेतना आत्मा क्व नु स्फुरति प्रकाशते। न क्वापीत्यर्थः। सकलैः शास्त्रविद्भिः सा चेतना तनुगता शरीरनिष्ठा एव अनुमता स्वीकृता। अस्तीति शेषः। तदितरः शरीरभिन्नः स चेतनः आत्मा क्व? इति कथय। हि निश्चयेन असौ आत्मा दृढतरानुपलब्धिहतः ज्ञानस्य प्रकृष्टाभावेन विनाशितः। विद्यत इति शेषः। शरीरातिरिक्तश्चेतनाख्यो न कश्चित्पदार्थो विद्यत इति भावः।

अनुवाद – शरीर के अतिरिक्त चेतना कहाँ स्फुरित होती है? सभी लोग उसे शरीरगत ही मानते हैं। शरीर से भिन्न वह चेतना कहाँ है, यह बताओ। वह तो

दृढ़तर अनुपलब्धि से हत है।

।।५।।

सुखमपि त्यज दुःखसमन्वया-
दिति वदन्त्यबुधाः परवञ्चकाः।
कृतिशतेन विनाऽशनमाप्यते
क्व ? तदपास्य न कोऽपि हि जीवति।।

अन्वयः - 'दुःखसमन्वयात् सुखम् अपि त्यज' इति परवञ्चकाः अबुधाः वदन्ति। कृतिशतेन विना अशनं क्व आप्यते ? हि कोऽपि तत् अपास्य न जीवति।

गङ्गा - पुनः स्वमतं प्रतिपादयति विलासी- **सुखमपीति**- दुःखसमन्वयात् दुःखेन युक्तत्वात्। अलिमते वैषयिके सुखे दुःखं विद्यत इति तदेव स्मारयति। सुखम् अपि, वैषयिकं सुखमपि त्यज इति तु परवञ्चकाः अबुधा मूर्खा एव वदन्ति। वैषयिकसुखस्य दुःखरूपत्वं प्रतिपादितं सर्वदर्शनसङ्ग्रहेऽक्षपाददर्शने-

'ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः क्षीरं विहायाऽरोचकग्रस्तस्य सौवीररुचिमनुभावयतीति चेत्- तदेतन्नाटक-पक्षपतितं त्वद्वच इत्युपेक्ष्यते। सुखस्य सातिशयतया सादृक्षतया बहुप्रत्यनीकाक्रान्ततया साधनप्रार्थनपरिक्लिष्टतया च दुःखाविनाभूतत्वेन विषानुषक्तमधुवद् दुःखपक्षनिक्षेपात्।

नन्वेकमनुसन्धित्सतोऽपरः प्रच्यवत इति न्यायेन दुःखवत्सुखमप्युच्छिद्यत इत्यकाम्योऽयं पक्ष इति चेत्- मैवं मंस्थाः। सुखसम्पादने दुःखसाधनबाहुल्या-नुषङ्गनियमेन तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्तमानेन साम्यापातात्। तथा हि- न्यायोपार्जितेषु विषयेषु कियन्तः सुखखद्योताः कियन्ति दुःखदुर्दिनानि। अन्यायोपार्जितेषु तु यद् भविष्यति तन्मनसाऽपि चिन्तयितुं न शक्यमिति।

एतत्स्वानुभवमप्रच्छादयन्तः सन्तो विदाङ्कुर्वन्तु विदां वरा भवन्तः। तस्मात्परिशेषात् परमेश्वरानुग्रहवशात् श्रवणादिक्रमेण आत्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यम्'।

कृतिशतेन यत्नबहुत्वेन विना अशनं भोजनं क्व आप्यते ? हि निश्चयेन कोऽपि जनः तत् अशनम् अपास्य त्यक्त्वा न जीवति ?। अतो न परवञ्चकानां ब्रह्मवादिनां सिद्धान्तस्त्वयाऽङ्गीकार्य इति भावः। एतेन भोजनानन्देऽपि कृतिशतरूपदुःखस्य समन्वयो निरूपितः।

अनुवाद – 'दु:ख से समन्वित होने के कारण सुख को भी छोड़ो', यह बात दूसरों को ठगने वाले धूर्त बोला करते हैं। सैकड़ों यत्नों के बिना भोजन कहाँ मिलता है ? निश्चय ही कोई उस भोजन को छोड़ कर जीवित नहीं रहता।

।। ६ ।।

उदरपूर्तिकृते परिधाव्य य-
स्तदितरत्सुखजातमुपेक्षते।
अलसतामथ वा मतिमन्दतां
स नियतं प्रकटीकुरुते नरः ।।

अन्वयः – यः उदरपूर्तिकृते परिधाव्य तदितरत् सुखजातम् उपेक्षते, स नरः अलसताम् अथवा मतिमन्दतां प्रकटीकुरुते (इति) नियतम्।

गङ्गा – पुनः स्वसिद्धान्तं दृढयन्नाह- **उदरपूर्तीति**- यः कश्चित् सामान्यो जनः भवादृशो परिव्राजको वा उदरपूर्तिकृते बुभुक्षाशमनाय परिधाव्य परिधावनं कृत्वा मधुकरीवृत्त्यादिमिषेण बुभुक्षां शमयित्वा इतरत् भोजनभिन्नं सुखजातम् उपेक्षते। स नरः अलसतां सुखप्राप्तौ आलस्यं स्वीयां मतिमन्दतां जडतां च प्रकटीकुरुते इति नियतं निश्चितम्। एतेन परिव्राजकधर्मोपहासो व्यज्यते।

अनुवाद – जो उदरपूर्ति के लिए तो दौड़ता है , किन्तु उससे भिन्न सुख की उपेक्षा करता है। वह मनुष्य आलस्य अथवा अपनी मूर्खता को प्रकट करता है, यह निश्चित है।

।। ७ ।।

निजमतेर्भ्रमता शुचिताऽथ वा
बहुमतैक्यपथेन परीक्ष्यते।
विविधकायसुखाय विचेष्टते
हलधरादिबुधावधिचेतनः ।।

अन्वयः – बहुमतैक्यपथेन निजमतेः शुचिता अथवा भ्रमता परीक्ष्यते। हलधरादिबुधावधिचेतनः विविधकायसुखाय विचेष्टते।

गङ्गा – निजमतेरिति- बहुमतैक्यपथेन बहुभिः सम्मतेनैक्यमार्गेण निजमतेःस्वबुद्धेः शुचिता पवित्रता, स्वच्छतेति यावत्। भ्रमता बुद्धेर्भ्रमयुक्तता वा

परीक्ष्यते। स्वज्ञानस्य याथार्थ्यमयाथार्थ्यम् औचित्यानौचित्यं वा बहुभिर्लोकैः सम्मतेन मार्गेण परीक्षणीयं भवति। केवलमेकेनाऽभिमतसिद्धान्तेन ज्ञानस्य परीक्षणं न कर्तुं शक्यत इत्यभिप्रायः। हलधरादिबुधावधिचेतनः हलधरः कृषकोऽशास्त्रज्ञ इत्यर्थः। हलधरादारभ्य बुधं मनीषिणं शास्त्रज्ञं यावत् सकलोऽपि चेतनः प्राणी विविधकायसुखाय विविधप्रकारकशरीरसुखाय विचेष्टते चेष्टां क्रियां वा करोति। न केवलोऽशास्त्रज्ञो लोकः ,बुधोऽपि शारीरिकसुखायैव सर्वविधकर्तव्येषु प्रवर्तत इत्याशयः। अतश्च बुधैरज्ञानिभिश्च सर्वैरादृतो यो मदीयो मार्गो विद्यते स त्वयाऽपि अनुसरणीयः।

अनुवाद – अपनी बुद्धि की स्वच्छता या भ्रमता की परीक्षा बहुमत मार्ग से की जाती है। लोक में हलवाहे से लगाकर विद्वान् तक चेतन विभिन्न शारीरिक सुखों के लिए ही चेष्टाएँ करते हैं। अतः शरीरसुख को सर्वस्व मान कर उसका आनन्द लो।

॥८॥

सकलसम्प्रतिपन्नमदूषिता –
ऽक्षजमबाधितबोधमुपेक्षसे।
शठमठाधिपकण्ठलुठत्पदे –
ष्वथ च विश्वसिषीति महाद्भुतम्॥

अन्वयः – अथ च 'सकलसम्प्रतिपन्नम् अदूषिताक्षजम् अबाधितबोधम् उपेक्षसे। शठमठाधिपकण्ठलुठत्पदेषु च विश्वसिषि' इति महाद्भुतम्।

गङ्गा – सकलेति–त्वमलिः सकलसम्प्रतिपन्नं सकलैः समस्तैः लोकैः सम्प्रतिपन्नं सम्यक्तया सिद्धम् , अथ च अदूषिताक्षजं निर्दोषेन्द्रियजन्यम् अबाधितबोधं प्रतिबन्धकरहितं 'शरीरसुखमेव सर्वस्वम्' इति प्रमात्मकं ज्ञानमुपेक्षसे। शरीरातिरिक्तो न कश्चिदात्मेति प्रत्यक्षसिद्धवस्तुनि न तव विश्वासः। दूषितेन्द्रियजन्यज्ञानस्य न प्रमात्वं किन्त्वदूषितेन्द्रियजन्यम् अबाधितबोधं प्रतिबन्धकरहितं ज्ञानमुपेक्षसे तिरस्करोषीति न योग्यम्। अपि च शठमठाधिपकण्ठलुण्ठत्पदेषु शठा धूर्ता ये मठाधिपास्तेषां कण्ठेषु लुठन्ति यानि पदानि शब्दास्तेषु। धूर्तमठाधिपानामविश्वास–योग्योपदेशेष्वित्यर्थः। अनाप्तवचनेष्विति यावत्। विश्वसिषि, विश्वासं श्रद्धां वा करोषीति महाद्भुतम् आश्चर्यकारि विद्यते।

अनुवाद – लोक में शरीरसुख विषयकज्ञान सभी को मान्य है। यह ज्ञान निर्दुष्ट इन्द्रिय से जन्य और अबाधित है। तुम इस ज्ञान की उपेक्षा कर रहे हो तथा

धूर्त मठाधिपों के कण्ठों में लोटने वाले अविश्वसनीय वचनों पर विश्वास कर रहे हो, यह महान् आश्चर्य है।

।। ९ ।।

अनुपजीव्य न हीन्द्रियजां मतिं
किमपि मानमुदेति तदात्मनः।
जनकमेव विबाधितुमुद्यतं
भवति विश्वसनीयमहो कथम्?।।

अन्वयः – इन्द्रियजां मतिम् अनुपजीव्य तदात्मनः किमपि मानं न हि उदेति। (स च आत्मा) जनकम् एव विबाधितुम् उद्यतं भवति। अहो (तत्) कथं विश्वसनीयम्।

गङ्गा – अनुपजीव्येति– इन्द्रियजां मतिं चक्षुरादीन्द्रियजन्यं ज्ञानमनुपजीव्य अनाश्रित्य, स चासौ आत्मा तदात्मा तस्य त्वदभीष्टस्य आत्मन आत्मतत्त्वस्य किमपि मानं प्रमाणं न हि उदेति न सम्भवति। सर्वाण्यप्यनुमानादीनि प्रमाणानि इन्द्रियजन्यज्ञानमुपजीव्यैव प्रवर्तन्ते। स चेन्द्रियजन्यज्ञानेन निर्धारितसत्ताक आत्मा स्वजनकप्रमाणमेव विबाधितुमुद्यतं भवतीति तत्कथं विश्वासयोग्यं भवितुमर्हति? न कथमपीत्यर्थः। अत्रेदं तात्पर्यम्– वेदान्तमते आत्मानुभवेन प्रत्यक्षमिन्द्रियजन्यं ज्ञानं बाध्यते। प्रत्यक्षसिद्धोऽपि आत्मा स्वज्ञानेन इन्द्रियजन्यं प्रत्यक्षं बाधते। आत्मज्ञानेन समस्तेऽपि सांसारिकवस्तुनि भेदबुद्धिर्विनश्यति– 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतिरत्र प्रमाणम्। तदेवेह चार्वाकः प्रतिपादयति यदिन्द्रियजन्यप्रत्यक्षज्ञानं विना आत्मज्ञानं न भवितुमर्हति। एवं प्रत्यक्षमुपजीव्यम् आत्मज्ञानं चोपजीवकम्। अत उपजीवकेन आत्मज्ञानेन उपजीव्यस्य प्रत्यक्षस्य बाधो न विश्वासयोग्यः।

अनुवाद – इन्द्रियजन्य ज्ञान की उपजीव्यता के बिना उस आत्मा का कोई प्रमाण सम्भव नहीं है। चक्षु आदि इन्द्रियों से जन्य ज्ञान से सिद्ध वह आत्मा अपने साधक ज्ञान को ही बाधित करने के लिए उद्यत हो जाता है, अतः उस पर कैसे विश्वास किया जाय।

टिप्पणी – 'अहमस्मि' यह प्रत्यक्ष अनुभव आत्मा की सत्ता में प्रमाण है। प्रत्यक्षसिद्ध यह आत्मा स्वज्ञान (आत्मज्ञान) से इन्द्रियजन्य प्रत्यक्ष को बाधित करता है। अर्थात् आत्मज्ञान होने के अनन्तर प्रत्यक्षदृष्ट सांसारिक वस्तुओं का बाध

हो जाता है, उनसे भेदबुद्धि नष्ट हो जाती है– 'ब्रह्मविद् ब्रह्मैव भवति' आदि अनेक श्रुतिवचन इसमें प्रमाण हैं। चार्वाक का अभिप्राय है कि प्रत्यक्ष के बिना आत्मा का ज्ञान नहीं हो सकता। इस प्रकार प्रत्यक्ष उपजीव्य तथा आत्मज्ञान उपजीवक है। उपजीवक आत्मज्ञान से उपजीव्य प्रत्यक्षज्ञान का बाध विश्वास योग्य कैसे हो सकता है ?

।। १० ।।

यदि च वैषयिके सकले सुखे
किमपि पश्यसि दुःखमवर्जितम्।
सुखतयैव तदात्मसुखेऽपि न
व्यभिचरेन्नियमो न विलङ्घ्यते।।

अन्वयः – यदि च (त्वं) सकले वैषयिके सुखे किमपि अवर्जितं दुःखं पश्यसि तत् सुखतया एव आत्मसुखेऽपि न व्यभिचरेत् ? नियमः न विलङ्घ्यते।

गङ्गा – यदीति– त्वमलिः यदि सकले वैषयिके विषयजन्ये सुखे किमप्यपूर्वम् अवर्जितं दुःखं पश्यसि अनुभवसि तर्हि तत् दुःखं सुखतया सुखत्वरूपेण किमात्मसुखे न व्यभिचरेत्। अवश्यं व्यभिचरेदित्यर्थः। या हि सुखता वैषयिके सुखे वर्तते सैव आत्मसुखेऽपि। सुखत्वावच्छिन्नत्वादुभयं सुखं समानम्। अतो वैषयिक-सुखवदात्मसुखमपि अवर्जितदुःखवद् भवेदेव। यतो हि नियमः कदाचिदपि न विलङ्घ्यते न व्यभिचर्यते। सर्वत्र तस्य समानी गतिर्भवतीत्याशयः।

अनुवाद – यदि तुम समस्त वैषयिक सुखों में अवर्जित दुःख ही देखते हो तो आत्मसुख में भी इस दुःख सत्ता माननी होगी। सुख में जो सुखत्व धर्म है, वह वैषयिकसुख और आत्मसुख दोनो में ही समान रूप से रहता है। अतः यह नियम बनता है कि जहाँ सुखत्व होता है, वहाँ दुःखत्व भी होगा। इस प्रकार सुखत्वसामान्य के कारण आत्मसुख भी दुःख से युक्त ही होगा क्योंकि नियम का कभी भी विलंघन नहीं होता। आत्मसुख में दुःख को न मानने पर उक्त नियम का व्यभिचार होगा।

।। ११ ।।

अथ विनाशितया सुखमीप्सितं
त्वमवधीरयसीदमसाम्प्रतम्।

त्वरितमेव तथा सति भुज्यतां
वपुरिदञ्च यथा न भवेद् वृथा।।

अन्वयः – अथ त्वम् ईप्सितं सुखं विनाशितया अवधीरयसि (चेत्) इदम् असाम्प्रतम् (अस्ति)। तथा सति (तत् सुखं) त्वरितम् एव भुज्यताम्। यथा च इदं वपुः वृथा न भवेत्।

गङ्गा – अथेति– अथेत्यनेन पक्षान्तरं सूचयति। त्वम् अलिः ईप्सितमभीष्टसुखं विनाशितया स्वशरीरस्य विनाशित्वेन अवधीरयसि तिरस्करोषि चेत्। इदं तव चिन्तनम् असाम्प्रतमेव!, उचितं नास्तीत्यर्थः। तथा सति शरीरस्य विनाशित्वे तत् सुखं त्वरितं यथाशीघ्रं भुज्यताम्। यथा इदं वपुः वृथा न स्यात्। सुखभोग एव शरीरस्योपयोगिता, न तत्परित्यागे। सुखभोगाभावेऽपि शरीरस्य विनाशस्त्ववश्यम्भावीति।

अनुवाद – और यदि तुम इस शरीर के विनाशशील होने के कारण अभीष्ट सुख का भोग नहीं कर रहे तो शीघ्र ही इस सुख का भोग करो, जिससे यह शरीर व्यर्थ न हो।

।। १२।।

असुख आत्मनि चेत्त्वमदुःखतां
परमवेत्य रतोऽसि न तत् क्षमम्।
असुखतैव निवर्तयतीदृशा–
न्नयविदं न बुधो यतते मुधा।।

अन्वयः – त्वम् असुखे आत्मनि अदुःखतां परम् अवेत्य रतः असि चेत्, तत् न क्षमम्। असुखता एव नयविदम् ईदृशात् निवर्तयति। बुधः मुधा न यतते।

गङ्गा – असुख इति– त्वम् अलिः असुखे सुखरहिते आत्मनि अदुःखतां दुःखराहित्यम्, परं सम्यक्। उत्कर्षेण इति यावत् अवेत्य ज्ञात्वा रतः असि चेत्, संलग्नोऽसि चेत्, तत् तव तादृश आत्मनि रतत्वं न क्षमम्, न योग्यम्। न सर्वे तादृशात्मनि सादरा भवन्तीत्यर्थः। नयविदं सुखदुःखयोर्विवेककर्तारं नीतिवेत्तारं व्यवहारवेत्तारं मम चार्वाकसदृशमित्यर्थः। ईदृशात् सुखरहिताद् आत्मनः असुखता एव तत्र सुखाभाव एव निवर्तयति रतिं न कारयति। अस्मादृशो बुधो ज्ञानी सुखार्थी मुधा व्यर्थं न यतते। कृतेऽपि प्रयत्ने यत्र न सुखप्राप्तिस्तत्र न रमत इत्यर्थः।

अनुवाद – यदि तुम सुख रहित आत्मा में परम दु:खराहित्य समझ कर उसका ज्ञान करने में लगे हो तो यह उचित नहीं। यह असुखता ही ऐसे आत्मा से न्यायविद् को दूर करती है। बुद्धिमान् व्यर्थ में यत्न नहीं किया करते।

।। १३।।

अपि च नित्यसुखानुभवाद्भवेद–
रुचिरेव नृणां श्रममन्तरा।
ननु सिता मधुराऽपि न रोचते
कटुरसेन विनाऽनिशमाशिता।।

अन्वयः – अपि च, श्रमम् अन्तरा नृणां नित्यसुखानुभवात् अरुचि: एव भवेत्। ननु मधुरा अपि अनिशम् आशिता सिता कटुरसेन विना न रोचते।

गङ्गा – स्वपक्षसाधनाय तर्कान्तरं प्रस्तौति। अपि चेत्यनेन– **अपीति–** न केवलमुपर्युक्तमपितु नित्यसुखानुभवात् त्रिकालाबाधितं तवाभिमतं यत् सुखं विद्यते तस्य श्रमम् अन्तरा परिश्रमं विना सर्वदा भोगात् नृणां मनुष्याणाम् अरुचिरप्रीतिरेव भवेत्। स्वकथ्यं दृष्टान्तेन समर्थयन्नाह नन्विति निश्चयार्थकमव्ययम्। मधुरा माधुर्यगुणयुक्ता अपि अनिशं सततम् अहर्निशमिति यावत्। आशिता सिता भोजिता शर्करा कटुरसेन विना न रोचते। यथा मधुरसिताया भक्षणे मध्ये कटुरसोऽपेक्ष्यते तथैव नित्यसुखभोगे मध्ये दु:खभोगोऽपेक्ष्यत एवेति भाव:।

अनुवाद – और भी सुनो, श्रम के बिना नित्यसुख के भोग से लोगों के मन में अरुचि ही होगी। लगातार खिलाई गयी मीठी शक्कर भी कटुरस के बिना अच्छी नहीं लगती।

।। १४।।

अचतुरा अलसा अथ वा स्वयं
सुखमुपार्जयितुं धृतमत्सराः।
सुखिसमाजसमागमसत्रपा
रहसि वासमुशन्ति पटच्चराः।।

अन्वयः – अचतुरा: अलसा: अथ वा सुखिसमाजसमागमसत्रपा: स्वयं सुखम् उपार्जयितुं धृतमत्सरा: पटच्चरा: रहसि वासम् उशन्ति।

गङ्गा – अचतुरा इति– अचतुरा बुद्धिरहिताः। अलसाः आलस्ययुक्ताः, कर्मप्रवृत्तिरहिता इति यावत्। अथ वा सुखिसमाजसमागमसत्रपाः, त्रपया सहिताः सत्रपाः, सुखिनां सुखवतामस्माकं समाजैः सह समागमे मिलने सत्रपाः लज्जायुक्ताः, स्वयं सुखम् उपार्जयितुं धृतमत्सरास्तत्र मात्सर्ययुक्ताः। निर्जने वसन्तः परोपार्जितसुखभोगलोलुपाः परमात्मध्यानवादिनः परिव्राजका इत्यर्थः। पटच्चराः चौरा रहसि एकान्ते वासम् उशन्ति इच्छन्ति। 'वश कान्तौ' इति धातो रूपम्। वाराणसीसंस्करणे 'वासमुशन्त्यपटच्चराः' इति पाठस्तथात्वे नार्थसङ्गतिरिति 'वासमुशन्ति पटच्चरा' इति पाठोऽस्माभिरङ्गीकृतः।

अनुवाद – मूर्ख, आलसी अथवा सुखीजनों के समाज के साथ समागम में लज्जा का अनुभव करने वाले, स्वयं सुख का उपार्जन करने में मात्सर्ययुक्त चोर ही एकान्त में निवास करना चाहते हैं।

।।१५।।

बहुलदृष्टफला धृतषड्गुणा
नयविदुक्तिरिहाऽर्हति मानताम्।
कथमतीन्द्रियसंशयितेप्सिता–
ऽविदितवक्तृकवाचि तवाऽऽग्रहः ?।।

अन्वयः – इह बहुदृष्टफला धृतषड्गुणा नयविदुक्तिः मानताम् अर्हति। तव अतीन्द्रियसंशयितेप्सिताऽविदितवक्तृकतवाचि आग्रहः कथम् (अस्ति) ?

गङ्गा – बहुलदृष्टफलेति– इह अस्माकं सम्प्रदाये बहुलदृष्टफला बहुलानि दृष्टफलानि यास्यां सा, न तु अदृष्टफलेत्यर्थः। धृतषड्गुणा धृता गृहीताः षड्गुणा उपाया यया सा। ते च षड् गुणाः – सन्धानासनं यात्रासन्धानं विगृह्यासनं यात्रां सम्परिगृह्यासनं द्वैधीभावः अन्येषां संश्रयश्चेति राजनीतावुक्ताः। अथवा अनिद्रा,अतन्त्रा, अभयम्, अक्रोधः, अनालस्यम्, अदीर्घसूत्रतेति षड्गुणाः। ''षड्दोषाः पुरुषेणेह' इत्यादिपद्येन **गीतायां** दोषकथनद्वारा सूचिताः। इह अस्माकं सम्प्रदाये सैव नयविदुक्तिः नीतिविदां वचनं मानतां प्रमाणतामर्हति न तु अदृष्टफला त्रिगुणा सत्त्वरजस्तमोयुक्ता तवेति भावः। तव अलेः, अतीन्द्रियसंशयिते–प्सिताऽविदितवक्तृकवाचि, अतीन्द्रियमिन्द्रियातीतं संशयितं सन्देहविषयो वर्तते ईप्सितं स्वर्गादिफलं यस्याः तस्यामतीन्द्रियसंशयितेप्सितायाम् अविदितवक्तृकायाम् अज्ञातकर्तृकायां वाचि श्रुतौ वेदे वा आग्रहः कथम्? अस्तीति शेषः। तव यत्राऽऽग्रहः तस्य वेदस्य कः कर्ता

इत्येव ज्ञानं नास्ति। स च वेदः अतीन्द्रियं ज्ञानं स्वर्गादि वा प्रयच्छतीति न तत्र तवाग्रहः स्यादिति पूर्वपक्षिणश्चार्वाकस्याऽभिप्रायः।

अनुवाद – हमारे सम्प्रदाय में बहुत से दृष्टफलों से युक्त छः गुणों को धारण करने वाली न्यायवेत्ता की उक्ति ही प्रमाण मानी जाती है। तुम्हारा, अतीन्द्रिय और संशयित ईप्सित फल देने वाले तथा जिसके वक्ता का पता नहीं है, उस (वेद) के वचनों पर आग्रह क्यों है?

।।१६।।

परिहरन् किल दुःखमुपायतः
सुखमुपास्स्व सखे! सति सम्भवे।
इतरथा विषहस्व तदापतन्,
नयविदो न भजन्त्यतिभीरुताम्।।

अन्वयः – हे सखे! सम्भवे सति उपायतः दुःखं परिहरन् सुखम् उपास्व किल। इतरथा आपतत् तत् विषहस्व। नयविदः अतिभीरुतां न भजन्ति।

गङ्गा – परिहरन्निति– हे सखे! मित्र भ्रमर! सम्भवे सति उत्पन्ने सति उपायतः नयविदुक्तिसाधनात् दुःखं परिहरन् सुखं सांसारिकभोगसुखम् उपास्व भुङ्क्ष्व। किलेति निश्चयार्थकमव्ययम्। इतरथा अन्यथा आपतत् आगच्छत् तत् दुःखं विषहस्व सोढुं सज्जो भव। नयविदः नीतिवेत्तारः अतिभीरुतां त्वादृशं भयाधिक्यं न भजन्ति न सेवन्ते। ते तु प्राप्तं भोक्तुं भवन्ति सर्वथोद्यता इत्यर्थः।

अनुवाद – हे मित्र! उत्पन्न होने पर कहे गये उपायों से दुःख का परिहार करते हुए सुख का भोग करो। अन्यथा आ रहे दुःख को सहो। न्यायवेत्ता अतिभीरु नहीं होते।

।।१७।।

करितुरङ्गनिरन्तरसङ्गरे–
ष्वरिशिरांसि पदेन रुषाऽर्दयन्।
अगणयन् रिपुहेतिततिक्षती–
र्बहुसुखं भुवि वीरवरोऽश्नुते।।

अन्वयः – वीरवरः रुषा पदेन करितुरङ्गनिरन्तरसङ्गरेषु अरिशिरांसि अर्दयन् रिपुहेतिततिक्षतीः अगणयन् भुवि बहु सुखम् अश्नुते।

गङ्गा – वीरेति– वीरवरः वीरेषु श्रेष्ठोऽग्रगण्यः युद्धभूमौ रुषा क्रोधेन पदेन करितुरङ्गनिरन्तरसङ्गरेषु करिणो गजास्तुरङ्गा अश्वाश्च तैर्निरन्तरेषु व्याप्तेषु अविच्छिन्नेषु सङ्गरेषु युद्धेषु। गजाश्वव्याप्तरणेष्वित्यर्थः। 'सङ्गरो युधि चापदी'ति मेदिनी। हस्त्यश्वभरितयुद्धेषु अरिशिरांसि शत्रुमस्तकानि अर्दयन् विदारयन्। अर्द हिंसायामिति धातोः शतृप्रत्यये रूपम्। कण्ठतः शिरः पृथक्कुर्वन्निति यावत्। रिपुहेतिततिक्षतीः रिपूणां शत्रूणां हेतिततिक्षतीः शस्त्रसमूहहानीः अगणयन् अपरिगणयन्, तच्चिन्तां परित्यज्य भुवि पृथ्व्यां बहुसुखम् अश्नुते भुङ्क्ते। 'रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतय' इत्यमरः।

अनुवाद – वीरश्रेष्ठ क्रुद्ध होकर पैर से ही हाथी घोड़ों से व्याप्त युद्धों में शत्रुओं के शिर काट देता है। वह शत्रुओं के शस्त्रसमूह से होने वाली क्षति को नहीं गिनता और पृथ्वी पर असीम सुख प्राप्त करता है।

।।१८।।

विविधदेशगतागतसञ्चिता–
ऽगणितभोग्यपदार्थभृतालयः।
वणिगकिञ्चनबान्धवपालनात्
सुखयशःसुकृतान्यधिगच्छति।।

अन्वयः – विविधदेशगतागतसञ्चिताऽगणितभोग्यपदार्थभृतालयः वणिक् अकिञ्चनबान्धवपालनात् सुखयशःसुकृतानि अधिगच्छति।

गङ्गा – विविधेति– विविधदेशगतागतसञ्चिताऽगणितभोग्यपदार्थभृतालयः, विविधदेशानां गतागतेन गमनागमनेन सञ्चितैः एकत्रीकृतैः अगणितैः असंख्यैः भोग्यपदार्थैः भृतः परिपूर्ण आलयः गृहं यस्य स तादृशो वणिक् अकिञ्चनबान्धवपालनात् दरिद्रबन्धुजनानां पोषणात् सुखयशःसुकृतानि सुखं च यशश्च सुकृतं पुण्यं चेति सुखयशःसुकृतानि अधिगच्छति प्राप्नोति। सा चेयं सुखादिप्राप्तिर्धनेनैव सम्भवति न तु धनाभाव इति तात्पर्यम्।

अनुवाद – वणिक् विभिन्न देशों में गमनागमन करके अपने घर में अनेक भोग्य पदार्थों को एकत्र करता है। वह उन भोग्य पदार्थों से अपने अकिंचन बान्धवों का पालन करता है और सुख, यश तथा सुकृत को प्राप्त करता है।

।।१९।।

मदविलोलविलोचनमानिनी-
मन उपायशतैर्वशयन् युवा।
सरभसस्मिततत्परिरम्भणा-
च्छतमखादधिकं लभते सुखम्।।

अन्वयः -युवा उपायशतैः मदविलोलविलोचनमानिनीमनः वशयन् सरभसस्मिततत्परिरम्भणात् शतमखात् अधिकं सुखं लभते।

गङ्गा - स्त्रीभोगस्य महत्त्वं दर्शयन्नाह- **मदेति**- युवा तरुणः उपायशतैः उपायानां स्त्रीवशीकरणसमर्थोपायानां शतैः समूहैः। समूहरमपार्थप्रदर्शनाय शतशब्दस्य बहुवचने प्रयोगः। तादृशोपायैः मदविलोलविलोचनमानिनीमनः मदेन तारुण्य-जन्योन्मत्ततया विलोले चञ्चले विलोचने यस्यास्तादृशमानिन्याः प्रणयवत्याः कामिन्या मनः वशयन् वशीकुर्वन्। सरभसस्मिततत्परिरम्भणात् रभसस्मिताभ्याम्। 'रभसो वेगहर्षयोः' इति विश्वः। तस्याः मदविलोलविलोचनमानिन्याः परिरम्भणात् आलिङ्गनात् शतमखात् इन्द्रादपि अधिकं सुखं लभते। 'परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम्' इत्यमरः। स्त्रीसंसर्गात्तरुणः इन्द्रादप्यधिकम्। यद्वा शतमखाद् शतयज्ञादप्यधिकं सुखमश्नुते। शतयज्ञसम्पादनापेक्षया मानिन्या आलिङ्गन-चुम्बनादावधिकमानन्दं प्राप्नोतीति यज्ञफलस्य वैयर्थ्यमेव।

अनुवाद - युवा अनेक उपायों से मद से चंचल नेत्रों वाली कामिनी के मन को वशीभूत करता है तथा प्रसन्नता और स्मितपूर्वक उस कामिनी का आलिंगन करके इन्द्र से भी (अथवा सैकड़ो यज्ञों से भी) अधिक सुख का अनुभव करता है।

।।२०।।

नयमुपायतया बहु मानयन्
फलतया स्मरशास्त्रकृतादरः।
उपलभस्व सुखं त्वमतोऽन्यथा
जड! लुठन्नटवीषु विपत्स्यसे।।

अन्वयः - अतः हे जड! त्वम् उपायतया नयं बहु मानयन् फलतया स्मरशास्त्रकृतादरः सुखम् उपलभस्व। अन्यथा अटवीषु लुठन् विपत्स्यसे।

गङ्गा – स्वोक्तिनिष्कर्षं प्रतिपिपादयिषयाऽऽह– **नयेति**– अतः पूर्वोक्तकारणात् हे जड! आत्मसुखवादिन् अले! त्वम् उपायतया भोगानां साधनरूपेण नयं तत्सम्बन्धिनीं विद्यां बहु मानयन् तस्याः फलतया फलवत्तया स्मरशास्त्रकृतादरः स्मरशास्त्रे कामशास्त्रे कृत आदरः येन सः, तादृशस्त्वं सुखम् उपलभस्व प्राप्नुहि। अन्यथा स्वर्गादिफलेच्छया अटवीषु अरण्येषु लुठन् इतस्ततो दिग्भ्रान्तः विपत्स्यसे विनष्टो भविष्यसि।

अनुवाद – हे जड़ (अले)! तुम उपाय के रूप में नीति का बहुत आदर करते हुए उसकी फलवत्ता से कामशास्त्र में आदर करो और सुख प्राप्त करो। अन्यथा स्वर्गादिफल की इच्छा से जंगल में भटकते हुए तुम विनष्ट हो जाओगे।

।। २१।।

अनृतचौर्यविवादपराङ्गना–
ऽभिगमनादि दुराचरणं त्यज।
नृपतिदण्डभयाद्यदि शक्यते
निभृतमत्र कृते किमु दूषणम्?।।

अन्वयः– नृपतिदण्डभयात् यदि शक्यते (तर्हि) अनृतचौर्यविवादपराङ्गनाभिगमनादि दुराचरणं त्यज। अत्र निभृतं कृते किमु दूषणम्?।

गङ्गा – अनृतेति– नृपतेः परमेश्वरभूतस्य राज्ञो भयात् यदि शक्यते सम्भाव्यते तर्हि अनृतचौर्यविवादपराङ्गनाभिगमनादि, अनृतं च चौर्यं च विवादश्च पराङ्गनया परस्त्रिया अभिगमनं सम्भोगश्चेति अनृतचौर्यविवादपराङ्गनाभिगमनानि, तान्यादौ यस्य तादृशं दुराचरणं त्यज परित्यज। अत्र एतेषामनृतादिपूर्वोक्तानां निभृतं प्रच्छन्नतया कृते सम्पादिते किमु दूषणम्? को दोषः। न कोऽपीति तात्पर्यम्।

अनुवाद – यदि संभव है तो राजा के दण्ड के भय से झूठ, चोरी, विवाद और परस्त्रीगमन छोड़ दो। छिप कर इनको करने में दोष क्या है?

।। २२।।

नरपतेः परमेश्वरतोचिता
स परिपाति हिनस्ति सतोऽसतः।
मरणमप्यपवर्गपदास्पदं
धनरती भजतः पुरुषार्थताम्।।

अन्वयः – नरपतेः परमेश्वरता उचिता। सः सतः परिपाति असतः (च) हिनस्ति। मरणम् अपि अपवर्गपदास्पदं (भवति)। धनरती पुरुषार्थतां भजतः।

गङ्गा – स्वाभिमतेश्वरपुरुषार्थयोः स्वरूपं वक्ति– **नरपतेरिति**– नरपतेः राज्ञः परमेश्वरता ब्रह्मरूपता ईश्वररूपता वोचिता। तदतिरिक्तो न कोऽपि परमेश्वरः। राजा सतः सज्जनान् साधु पुरुषान् पाति रक्षति असतः दुष्टांश्च हिनस्ति हन्ति। मरणं देहत्यागः अपवर्गपदास्पदं मोक्षपदभाक्। भवतीति शेषः। धनरती धनम् अर्थः रतिः कामश्चेति पुरुषार्थत्वं भजतः। अतो द्वावेव पुरुषार्थौ न चत्वारस्त्वदभिमताः।

चार्वाकमते राजैव ब्रह्मस्थानीयः स्वीकृतः। अर्थकामयोरेव पुरुषार्थता मरणस्य च मोक्षरूपता। तथा चोक्तं सर्वदर्शनसङ्ग्रहे–

अङ्गनालिङ्गनाज्जन्यसुखमेव पुमर्थता।
कण्टकादिव्यथाजन्यं दुःखं निरय उच्यते।।
लोकसिद्धो भवेद्राजा परेशो नापरः स्मृतः।
देहस्य नाशो मुक्तिस्तु न ज्ञानान्मुक्तिरिष्यते।।

अनुवाद – राजा को ही परमेश्वर मानना उचित है। वह सज्जनों की रक्षा करता है और दुर्जनों का विनाश करता है। मरण ही मोक्ष है और अर्थ तथा काम ही पुरुषार्थ हैं।

।। २३ ।।

प्रमितिरक्षभवैव मतिर्मता–
ऽवनिजलाऽनलवायुषु तत्त्वता।
नरकनाकजदुःखसुखे ध्रुवं
निशितकण्टकसप्रणयाङ्गने।।

अन्वयः – अक्षभवा प्रमितिः एव मतिः मता (अस्ति)। अवनिजलाऽनलवायुषु (एव) तत्त्वता (विद्यते)। निशितकण्टकसप्रणयाङ्गने ध्रुवं नरकनाकजदुःखसुखे (स्तः)।

गङ्गा – पुनः स्वाभिमतं विशदयति– **प्रमितिरिति**– अक्षभवा इन्द्रियजन्या

प्रमितिः प्रमा एव मतिः ज्ञानमस्ति। एवकारेण प्रत्यक्षेतरप्रमितीनां व्यवच्छेदः। अवनिजलाऽनलवायुषु अवनिः पृथ्वी जलम् अनलोऽग्निः वायुश्चेत्येतेष्वेव तत्त्वता भूततत्त्वता। विद्यत इति शेषः। निशितकण्टकसप्रणयाङ्गने निशितं तीक्ष्णं च तत् कण्टकं निशितकण्टकम्, प्रणयेन सहिता अङ्गना सप्रणयाङ्गना निशितकण्टकं च सप्रणयाङ्गना चेति निशितकण्टकसप्रणयाङ्गने ध्रुवं नरकनाकजदुःखसुखे नरक-स्वर्गजन्यदुःखसुखे स्तः। निशितकण्टकं नरकजन्यं दुःखं सप्रणयाङ्गना च नाकजन्यं सुखमिति यथासंख्यमन्वयः। 'नाकस्तु त्रिदिवेऽम्बरे' इति कोषः।

अनुवाद – इन्द्रियजन्य प्रमिति (प्रत्यक्ष) ही प्रमाण है। पृथ्वी, जल, अनल और वायु ही भूततत्त्व हैं। भौतिक कारणों से उत्पन्न पीड़ा ही नरकजन्य दुःख है और प्रणययुक्त अंगना ही स्वर्गजन्य सुख है।

।।२४।।

तनुनिसर्गत एव हि चेतना
भवति किण्वचये मदशक्तिवत्।
लयमुपैति निसर्गत एव सा
श्रुतिवचस्सु हितो न समादरः।।

अन्वयः – किण्वचये हि मदशक्तिवत् तनुनिसर्गत एव चेतना भवति। सा निसर्गत एव लयम् उपैति। श्रुतिवचस्सु समादरः हितः न (अस्ति)।

गङ्गा – पुनः स्वसिद्धान्तं विशदीकरोति– **तन्विति**– किण्वचये किण्वस्य मादकपदार्थविशेषस्य चये राशौ समूहे वा मदशक्तिवत् मादकशक्तिर्यथा तनुनिसर्गत एव शरीरस्वभावादेव तत्र चेतना चैतन्यं भवति। 'किण्वं पापे सुराबीजे' इति विश्वः। 'तनुः काये त्वचि स्त्री स्यादि'ति मेदिनी। शरीरे चैतन्यं स्वाभाविकं भवति न पृथगिति भावः। सा चेतना च निसर्गतः एव स्वभावादेव लयं विनाशम् उपैति गच्छति। श्रुतिवचस्सु 'आत्मावाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादि श्रुतिवचनेषु समादरः हितः हिताय हितकरो वा नास्ति। शरीरव्यतिरिक्तो न कोऽप्यात्मेति बृहस्पतिसिद्धान्तः। तदेतत् सर्वं सर्वदर्शनसंग्रहे प्रतिपादितं चार्वाकमतमुपजीव्य प्रतिपादितम्। तथा चोक्तं तत्र-तत्र पृथ्व्यादीनि भूतानि चत्वारि तत्त्वानि। तेभ्य एव देहाकारपरिणतेभ्यः किण्वादिभ्यः मदशक्तिवत् चैतन्यमुपजायते। तेषु विनष्टेषु सत्सु चैतन्यं स्वयं विनश्यति। तदाहुः– 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति स न प्रेत्य संज्ञास्तीति' (वृहदारण्यकोपनिषदि– २.४.१२)।

तच्चैतन्यविशिष्टदेह एवात्मा। देहातिरिक्ते आत्मनि प्रमाणाभावात्। प्रत्यक्षैकप्रमाण-वादितया अनुमानादेः अनङ्गीकारेण प्रामाण्याभावात्।

अनुवाद – किण्व की राशि (मादक सुरा के बीजविशेष) में मदशक्ति की तरह शरीर में स्वभाव से ही चेतना रहती है। वह शरीरनिष्ठ चेतना शरीर के नष्ट होने पर स्वाभाविक रूप से नष्ट हो जाती है। इसलिए आत्मज्ञानविषयक श्रुतिवचनों पर विश्वास करना हितकर नहीं है।

।। २५।।

इति बृहस्पतिभाषितदर्शना-
ऽनिशविमर्शविभक्तहिताऽहितः।
अनुभवामि सुखं त्वयि सौहृदा-
दुपदिशामि हृदा तदुपास्यताम्।।

अन्वयः – इति बृहस्पतिभाषितदर्शनाऽनिशविमर्शविभक्तहिताहितः (अहं) सुखम् अनुभवामि। त्वयि सौहृदात् उपदिशामि। तत् हृदा उपास्यताम्।

गङ्गा – स्वसिद्धान्तसारं प्रकटयन्नाह– **इति बृहस्पतीति**–इति उपर्युक्तप्रकारेण बृहस्पतिभाषितदर्शनाऽनिशविमर्शविभक्तहिताहितः हितं च अहितञ्चेति हिताहिते, बृहस्पतिना तन्नामकाचार्येण देहात्मवादिना चार्वाकगुरुणा भाषितस्य प्रतिपादितस्य दर्शनस्य अनिशं सततं विमर्शेन विचारेण विभक्ते निर्धारिते हिताहिते येन तादृशोऽहं विलासी सुखमनुभवामि, वैषयिकसुखानुभवं करोमि। त्वयि अलौ सौहृदात् सख्यभावात् तत् सर्वमुपदिशामि। तत् तस्मात् मदुपदिष्टं सर्वं हृदा हृदयेन उपास्यताम् अङ्गीक्रियताम्। देहातिरिक्तो न कश्चिदात्मा। चैतन्यविशिष्टदेह एव आत्मा। अतोऽङ्गनोपभोगादिभि-स्सुखमनुभूयतामिति तात्पर्यम्।

अनुवाद – इस प्रकार मैंने बृहस्पति के द्वारा उपदिष्ट दर्शन के सतत चिन्तन से हित और अहित का निर्धारण कर लिया है और सुख का अनुभव कर रहा हूँ। तुझ (अलि) में मेरा सख्यभाव है, अतः वह सब अपना अनुभव कह रहा हूँ। तुम हृदय से इसकी उपासना करो।

।। २६ ।।

इति विलासिवचःकशयाऽऽहतो-
ऽप्यचल एव निमीलितलोचनः।
अविरमन् स समाधिसुखादलि -
श्चिरमशिश्रियदश्रुतिनाटनम्।।

अन्वयः - इति विलासिवचःकशया आहतः अपि अचल एव निमीलितलोचनः समाधिसुखात् अविरमन् सः अलिः चिरम् अश्रुतिनाटनम् अशिश्रियत्।

गङ्गा - विलासिवचनश्रवणजन्याऽलिदशां निरूपयन्नाह- **इति विलासीति-** इत्युपर्युक्तप्रकारेण विलासिवचःकशया विलासिनो वचः एव कशा अश्वादेस्ताडनी। 'अश्वादेस्ताडनी कशा' इत्यमरः। तया विलासिवचःकशया आहतः पीडितः अपि अचल एव निश्चल एव समाधिसुखात् अविरमन् अलिः ब्रह्मवित्प्रतीकभूतो भ्रमरः चिरं चिरकालं यावद् अश्रुतिनाटनम् अश्रुतेः अश्रवणस्य नाटनम् अभिनयम् अशिश्रियत् आश्रितवान्। विलासिनोक्तवचनानि नाहं श्रुतवानस्मीत्यभिनीतवान्।

अनुवाद - इस प्रकार विलासी के वचनरूप कोड़े से आहत होकर भी वह अलि निश्चल ही रहा। उसने आँखों को बन्द कर लिया और समाधि सुख से विराम नहीं लिया। चिरकाल तक वह (विलासी के वचनों को) न सुनने का नाटक ही करता रहा।

।। २७।।

अतिगते समये बहुले मनाङ्
मनसि बाह्यकथासु सकौतुके।
अनुजिघृक्षुरमुं बुधमानिनं
तदुदितेन पथैव तमब्रवीत्।।

अन्वयः - बहुले समये अतिगते मनाक् सकौतुके मनसि बाह्यकथासु अमुं बुधमानिनम् अनुजिघृक्षुः (अलिः) तदुदितेन पथा एव तम् अब्रवीत्।

गङ्गा - अतिगत इति- बहुले समये अतिगते अधिके काले व्यतीते सति मनाक् सकौतुके कौतुकयुक्ते मनसि बा७ह्यकथासु तं बुधमानिनं विलासिनम् अनुजिघृक्षुः ग्रहीतुकामः सः अलिः तदुदितेन तेन विलासिना कथितेन पथा मार्गेण एव तं विलासिनम् अब्रवीत् अवदत्। प्रत्युत्तरं दातुं सन्नद्धोऽभवदित्यर्थः।

अनुवाद – कुछ समय बीत जाने पर तथा मन के कुछ कौतुक युक्त हो जाने पर इस पण्डितम्मानी विलासी को बाह्य कथाओं में ले जाने के इच्छुक अलि ने उसी के द्वारा कहे गये मार्ग से उसे जवाब देना शुरू किया।

।। २८।।

अयि! विलासिसमाजशिरोमणे!
न तनुमात्रमुपाश्रयते चितिः।
अपि तु सर्वगतैव विभाव्यते
विवदते परमत्र तु बालिशः।।

अन्वयः – अयि विलासिसमाजशिरोमणे! चितिः तनुमात्रं न उपाश्रयते, अपि तु सर्वगता एव विभाव्यते। परम् अत्र तु बालिशः विवदते।

गङ्गा – अलिनोक्तं प्रस्तौति– **अयि! विलासीति–** अयि! विलासि–समाजशिरोमणे! विलासिनां समाजस्य शिरोमणिः प्रधानस्तत्सम्बोधने। विलासिप्रमुख इति यावत्। चितिः चैतन्यमात्मा वा तनुमात्रं शरीरमात्रं न उपाश्रयते, न आश्रयति। आत्मा शरीरमात्रमाश्रित्य न भवति। सा तु सर्वगता एव विभाव्यते। परमत्र अस्मिन् विषये बालिशः अज्ञः विवदते। 'शिशावज्ञे तु बालिश' इत्यमरः। यस्य आत्मविषयकं ज्ञानं नास्ति स एवाऽत्र विवदत इति भावः। आत्मा तु विभुर्नित्यश्च। तथा चोक्तं मुण्डके– नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः (१.१.६) गीतायामपीदं तथ्यं प्रतिपादितम्– 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः' (१०.२०) अतो न चितेस्तनुमात्रगतत्वमपि तु सर्वगतत्वमेव।।२८।।

अनुवाद – हे विलासी समाज के शिरोमणे! चेतना शरीरमात्र का आश्रय लेकर नहीं रहती। वह तो सर्वव्यापक है, किन्तु इस विषय में अज्ञ लोग विवाद करते हैं।

।। २९।।

यदि चितिर्न तनोर्बहिरिष्यते
कथय बाह्यमसंस्पृशती कथम्।
विषयवृन्दमियं प्रतिभासयेत्?
तनुरिहास्ति शशी तु नभस्तले।।

अन्वयः – यदि चितिः तनोः बहिः न इष्यते (तर्हि) बाह्यं विषयवृन्दम् असंस्पृशती इयं कथं प्रतिभासयेत्?(इति त्वं)कथय। तनुः इह अस्ति शशी तु नभस्तले (विद्यते)।।२९।।

गङ्गा – विलासिवचननिराचिकीर्षया स्वसिद्धान्तं स्थापयति– **यदि चितिरिति**– यदि नाम चितिः चैतन्यं केवलं तनाविष्यते बहिः शरीराद् बाह्यप्रदेशे न इष्यते न स्वीक्रियते तर्हि बाह्यं वस्तु असंस्पृशती स्पर्शमकुर्वती इयं चित् विषयवृन्दं विषयसमूहं कथं प्रतिभासयेत्, बाह्यस्थविषयसमूहस्य प्रतिभासं कथं कारयेत्। सा तनुमात्रगता चेत्, तनुस्तु लोक एव विद्यते, शशी पुनः नभस्तले आकाशे विराजते। सा चितिरेव आकाशस्थं शशिनं प्रतिभासयति। तत्तनुमात्रगतत्वे विषयप्रतिभासो नैव सम्भाव्यते। सर्वगतं चैतन्यमेव बाह्यवस्तु प्रतिभासयति न तु शरीरम्। तथा च श्रुतिः – 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (मुण्डके, २.२.१०)। प्रकाशस्वरूप आत्मा एव सर्वाणि वस्तूनि प्रकाशयति। गीतासु भगवताऽप्युक्तम्–

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत।।१३.३३।।

स चायमात्मा स्वयं ज्योतिः। अयमेव सर्वं प्रकाशयति। वेदान्तेऽस्य चिद्रूपत्वं स्वयं प्रकाशकत्वं च बहुत्र प्रतिपादितम्। तदेवोपसंहृत्य चित्सुखाचार्येणोक्तम्–

चिद्रूपत्वादकर्मत्वात् स्वयं ज्योतिरिति श्रुतेः।
आत्मनः स्वप्रकाशत्वं को निवारयितुं क्षमः।। चित्सुखी, ३८।।

तथा च बृहदारण्यके– 'अत्राऽयं पुरुषः स्वयं ज्योतिः' (४.३.९) अतो न तनोर्विषयसमूहप्रकाशकत्वम्। आत्मैव सर्वमिदं प्रकाशयतीति निश्चितम्।

अनुवाद – यदि चेतना को शरीर से बाहर नहीं माना गया तो बाह्य वस्तु का संस्पर्श किये बिना यह विषय समूह को कैसे प्रतिभासित करेगी, क्योंकि शरीर तो लोक में है और चन्द्रमा आकाश में । स्वयं प्रकाशस्वरूप आत्मा ही बाह्य वस्तुओं को प्रकाशित करता है।

।।३०।।

विषयसङ्गमृते यदि भासयेत्
सकलमेव कुतो न विभासते ?।

करणसङ्गवियोगभिदा फलं
नियमयेदिति धीर्बहिरिष्यताम्।।

अन्वयः – (चितिः) यदि विषयसङ्गम् ऋते भासयेत्, सकलम् एव कुतः न विभासते? 'करणसङ्गवियोगभिदा फलं नियमयेत्' इति धीः बहिः इष्यताम्।

गङ्गा – विषयसङ्गेति– यदि नाम चितिः विषयसङ्गम् ऋते विषयस्य पदार्थस्य सङ्गं सन्निकर्षं विना तं पदार्थं भासयेत्, ज्ञानविषयं कारयेत् तर्हि सकलं जगत्यस्मिन् विद्यमानं सम्पूर्णं वस्तु किमर्थं न विभासते, ज्ञानविषयतां भजते। बहिष्ठ आत्मा विषयसन्निकर्षेणैव तत्प्रकाशने क्षमो भवति। सन्निकर्षाभावे तत्प्रकाशकत्वस्वीकारे जगत्यस्मिन् विद्यमानवस्तूनां समेषामपि प्रकाशकता प्रसज्येत। तदेव वदति– करणसङ्गवियोगभिदा करणानाम् इन्द्रियाणां सङ्गवियोगभिदा सन्निकर्षाऽसन्निकर्षभेदेन फलं ज्ञानं नियमयेत्। सन्निकृष्टवस्तूनि प्रकाशयेद् असन्निकृष्टानि च न प्रकाशयेत्। इति इत्यस्माद् धीः बुद्धिः, चितिरिति यावत्। बहिः बाह्यप्रदेशेऽपि इष्यतां स्वीक्रियताम्। न केवलं तनुगता सेति भावः।

अनुवाद – यदि वह चेतना विषय के सन्निकर्ष के बिना ही उसे भासित करती तो संसार के सभी विषय क्यों नहीं भासित होते। चेतना इन्द्रियों के सन्निकर्ष और असन्निकर्ष के भेद से ज्ञान का नियमन करती है। जिस वस्तु से सन्निकर्ष होता है चिति उसे प्रकाशित करती है तथा असन्निकृष्टवस्तु का प्रकाशन नहीं करती। इस प्रकार चेतना को शरीर से बाहर स्वीकार करना ही चाहिए।

।। ३१ ।।

नयनरश्मिभिरिन्दुसमागमे
सति मतिर्भवति स्वतनौ यदि।
शशिनि तज्जनिरस्तु तनौ कथं?
न खलु हेतुफले पृथगाश्रये।।

अन्वयः – यदि नयनरश्मिभिः इन्दुसमागमे सति स्वतनौ मतिः भवति (तर्हि) शशिनि तज्जनिः अस्तु। (सा) तनौ कथं (भवति)? हेतु फले पृथगाश्रये न (भवतः) खलु।

गङ्गा – नयनरश्मिभिरिति– नयनरश्मिभिः नेत्रकिरणैः इन्दुसमागमे सति चन्द्रस्य सन्निकर्षे सति स्वतनौ स्वशरीरे मतिः ज्ञानं जायते। तर्हि तज्जनिः तस्य

ज्ञानस्य उत्पत्तिः शशिनि चन्द्रे अस्तु। सा ज्ञानोत्पत्तिः तनौ शरीरे कथं भवति? हेतुफले हेतुः कारणं फलं परिणामश्च पृथक् आश्रये अधिकरणे न भवतः। तयोस्तु सामानाधिकरण्यमेव अपेक्ष्यते। यथा 'पर्वतो वह्निमान्' इत्यत्र हेतोर्धूमस्य फलस्य वह्नेश्चोभयोः पर्वत एवाश्रयस्तथैव चन्द्रप्रत्यक्षस्थलेऽपि स्यात्।

चक्षुरिन्द्रियेण चन्द्रस्य सन्निकर्षेण 'अयं चन्द्रः' इति ज्ञानं द्रष्टुः शरीरे भवति। अत्र हेतुः इन्द्रियार्थसन्निकर्षः फलं च ज्ञानम्। अतो हेतौ चन्द्र एव ज्ञानोत्पत्तिर्भवतु, हेतुफलयोरेकाश्रयतानियमात्। तत्पुनः शरीरे कथं भवति?

अनुवाद – यदि नयनरश्मियों से चन्द्र का सन्निकर्ष होने पर द्रष्टा के शरीर में ज्ञान उत्पन्न होना मानें तब तो उसे चन्द्रमा में ही होना चाहिए, शरीर में नहीं। यदि ज्ञानस्वरूपफल की उत्पत्ति शरीर में मानी जाय तब हेतु और फल का वैयधिकरण्य हो जायेगा क्योंकि सन्निकर्षरूप हेतु चन्द्रमा में है । हेतु और फल तो एकाश्रय होते हैं।

टिप्पणी – प्रत्यक्षप्रमाण में इन्द्रियार्थसन्निकर्ष कारण होता है और प्रत्यक्षप्रमा उसका फल होती है। जब तुम चार्वाक शरीर को ही सब कुछ मानते हो; तुम्हारे मत में चेतना शरीरगत ही है। तब तो नेत्रेन्द्रिय से चन्द्र का सन्निकर्ष होने पर चन्द्र में ही चन्द्रविषयक ज्ञान होना चाहिए। वह शरीर में ही कैसे होता है? हेतु और फल का एक ही आश्रय हुआ करता है, पृथक् पृथक् नहीं। जैसे पर्वत में धूम को देखने से 'पर्वतो वह्निमान्' रूप वह्नि की सत्ता का साधनरूप धूम पर्वत में ही होता है महानस आादि में नहीं। यहाँ हेतु धूम और साध्य अग्नि दोनो का ही आश्रय पर्वत ही है कोई और नहीं। 'अयं चन्द्रः' प्रत्यक्ष में सन्निकर्षरूप हेतु चन्द्र में है और फलरूप ज्ञान शरीर में माना जाता है,अतः कारण और कार्य का वैयधिकरण्य स्पष्ट है।

।। ३२।।

शशिनि धीरजनीत्यखिलो जनो
वदति नाऽपि परेण स बाध्यते।
भवतु तत्र तनोस्तु निमित्तता
न हि कुलालतनौ कलशीजनिः।।

अन्वयः – 'शशिनि धीः अजनि' इति अखिलः जनः वदति। परेण स नाऽपि बाध्यते। तत्र तनोः तु निमित्तता भवतु। कुलालतनौ कलशीजनिः न हि

(भवति)।

गङ्गा – पक्षान्तरमुत्क्षिप्य तन्मतं निराकरोति– **शशिनीति**– शशिनि चन्द्रविषया धीः ज्ञानम् अजनि, विषयतासम्बन्धेन जातमिति समग्रोऽपि जनः वदति। तादृशो व्यवहारः परेण अन्येन केनचिदपि जनेन न बाध्यते, सर्वैः तथा स्वीक्रियत इत्यर्थः। तत्र चक्षुरिन्द्रियेण चन्द्रविषयकज्ञाने तनोः शरीरस्य निमित्तता निमित्तकारणता भवतु नाम। तद्दृष्ट्वा भवान् कार्यकारणयोरेकाश्रयत्वं वक्तुं न शक्नोति। यतो हि कार्योत्पत्तिः न निमित्तकारणेऽपितु समवायिकारणे भवति। तदेव समर्थयितुमाह– कुलालतनौ घटस्य निमित्तकारणभूते कुलालस्य शरीरे कलशीजनिः घटोत्पत्तिर्न भवत्यपि तु मृत्स्नायामेव समवायिकारणभूतायां तज्जनिर्भवति।

अनुवाद – मुझे 'चन्द्र विषयक ज्ञान हुआ' यह व्यवहार सब लोग करते हैं। इस व्यवहार का अपलाप कोई नहीं करता। वहाँ शरीर की निमित्त कारणता भले ही हो तथापि शरीर में ज्ञान की उत्पत्ति नहीं हो सकती। क्योंकि कार्य की उत्पत्ति निमित्त में न होकर समवायिकारण में होती है। इसीलिए घट की उत्पत्ति कुलाल के शरीर में नहीं होती।

टिप्पणी – कार्यकारण को एकाश्रय सिद्ध करने के लिए पूर्वपक्षी यह कह सकता है कि नेत्रेन्द्रिय के सन्निकर्ष से जन्य चन्द्रविषयक ज्ञान विषयतासम्बन्ध से चन्द्र में होता है। 'अतः चन्द्र में ज्ञान हुआ' यह व्यवहार बाधित नहीं है। इसप्रकार सन्निकर्षरूप हेतु तथा ज्ञानरूप फल का चन्द्ररूप आधार में होना सिद्ध ही है। इस पर अलि का तर्क है कि तब तो उस ज्ञान के प्रति शरीर की निमित्तकारणता होगी और इसप्रकार शरीर में ज्ञान उत्पन्न नहीं हो सकेगा। क्योंकि निमित्तकारण में कार्य उत्पन्न नहीं हुआ करता। इसीलिए 'नहि कुलालतनौ कलशीजनिः' कहा गया है। कुलाल घट का निमित्त कारण है, पर उसकी उत्पत्ति कुलाल के शरीर पर नहीं होती। उसकी उत्पत्ति तो समवायिकारण मिट्टी में ही होती है।

।।३३।।

चितिरतो ऽखिलवस्तुगता सदा–
ऽऽवरणमेव तदग्रहकारणम्।
तदिह यत्र बलादपसार्यते
स्फुरति तत्र चितिर्न तु सा ऽऽवृते।।

अन्वयः – अतः चितिः सदा अखिलवस्तुगता (भवति) आवरणम् एव तदग्रहकारणं (भवति)। इह तत् यत्र बलात् अपसार्यते तत्र चितिः स्फुरति, आवृते तु सा न (स्फुरति)।

गङ्गा – चैतन्यस्य स्वरूपं वक्ति– **चितिरत इति**– अतो हेतोः चितिः चैतन्यं सदा नित्या अखिलवस्तुगता निखिलवस्तुव्यापिनी भवति। 'देही नित्यमवध्योऽयं देहे सर्वस्य भारत'। तथा च–'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः' इत्यादिरूपेण गीतासूपनिषत्सु च सर्वत्र आत्मनः सर्वगतत्वं प्रतिपादितम्। आवरणम् अज्ञानमेव तदग्रहकारणं भवति। इह लोके तत् आवरणं यत्र यस्मिन् विषयेऽपसार्यते तत्र चितिः चैतन्यं स्फुरति भासते। आवृते आवरणाच्छादिते तु न सा स्फुरति। पण्डितराजेनाऽपि 'भग्नावरणा चिदेव रसः' इत्युक्त्वा चितेः भग्नावरणत्वं समर्थितम्। आवरणमविद्या।

अनुवाद – अतः आत्मा नित्य और सर्वव्यापी है। उसके अग्रहण का कारण आवरण (अविद्या) होता है। इस लोक में जिससे उस आवरण को दूर किया जाता है उसमें आत्मा स्फुरित होता है। आवृत होने पर उसका स्फुरण नहीं होता।

।। ३४।।

सकलवस्त्वनुभूतिरबाधिता
प्रतिघरागविवर्जनशीतला।
सुचिरयोगहृतावरणा सुखं
प्रकटयत्यपदुःखलवं ध्रुवम्।।

अन्वयः – प्रतिघरागविवर्जनशीतला सुचिरयोगहृतावरणा अबाधिता सकलवस्त्वनुभूतिः अपदुःखलवं सुखं ध्रुवं प्रकटयति।

गङ्गा – सकलवस्त्विति– प्रतिघरागविवर्जनशीतला प्रतिघः क्रोधश्च रागो विषयानुरागश्च तयोः विवर्जनेन अपाकरणेन शीतला शान्तियुता। 'प्रतिघौ रुट्प्रतीघातौ' इति हैमः। सुचिरयोगहृतावरणा सुचिरयोगेन यमनियमादिना हृतम् आवरणम् अज्ञानम् अविद्या वा यस्याः सा। अबाधिता। अविद्ययेति शेषः। सकलवस्त्वनुभूतिः समस्तवस्तूनां द्रव्याणामनुभूतिः, चैतन्यमिति यावत्। अपदुःखलवम् अपगतो दुःखस्य लवो लेशो यस्मात् तादृशं सुखमानन्दं ध्रुवं निश्चयेन प्रकटयति प्रकटीकरोति।

अनुवाद – क्रोध और राग के राहित्य से शीतल, चिरकाल तक किये गये

योग से जिसका आवरण दूर हो गया है, ऐसी अबाधित समस्त वस्तुओं की अनुभूति निश्चय ही दुःखलेश से रहित सुख (चित्सुख) को प्रकट करती है।

।। ३५ ।।

अपजिघृक्षमपास्तजिहासम-
प्युपनतं विधितो य उपेक्षया।
अनुभवेद्विषयं स परं सुखं
लभत इत्यविवादमुपेयताम्।।

अन्वयः – 'यः अपजिघृक्षम् अपास्तजिहासम् अपि विधितः उपनतं विषयं उपेक्षया अनुभवेत्, सः परं सुखं लभते' इति अविवादम् उपेयताम्।

गङ्गा – अपजिघृक्षमिति– यः कश्चिद् अपजिघृक्षं ग्रहीतुमिच्छा जिघृक्षा, अपगता दूरीभूता जिघृक्षा यस्मात् तादृशम् ,अपास्तजिहासम्, हातुमिच्छा जिहासा। अपास्ता निराकृता जिहासा यस्मात् तादृशम्। सर्वत्र समभावाद् यस्य ग्रहणत्यागयोः समीहा नास्तीत्यर्थः। विधितः दैवात् उपनतं प्रापितं विषयं भोग्यवस्तु उपेक्षया ताटस्थ्येन अनुभवेत्, सः परं दुःखरहितं नित्यं सुखं लभते– इति अविवादं विवादरहितं यथा स्यात्तथा उपेयताम् उपगम्यताम्।

अनुवाद – जिसके ग्रहण करने की इच्छा नहीं है तथा जिसके त्याग की इच्छा भी समाप्त हो गयी है, विधि से प्राप्त कराये गये उस विषय का उपेक्षा पूर्वक अनुभव करने वाला परम सुख को प्राप्त करता है– यह बात तुम निर्विवादरूप से मानो।

।। ३६ ।।

निजगवाक्षगतः पथि गच्छतः
सुखिसदुःखजनानवलोकयन्।
हसति यद्यदमूँश्च दिदृक्षते
ऽनुभवमात्रसुखाय तदादरः।।

अन्वयः – निजगवाक्षगतः पथि गच्छतः सुखिसदुःखजनान् अवलोकयन् यत् हसति, यत् च अमून् दिदृक्षते, तदादरः अनुभवमात्रसुखाय (भवति)।

गङ्गा – निजगवाक्षेति– निजगवाक्षगतः स्वगृहस्य वातायनं प्राप्तः। 'वातायनं गवाक्षः' इत्यमरः। पथि मार्गे गच्छतः सुखिसदुःखजनान् सुखिनो दुःखसहितांश्च

लोकान् अवलोकयन् पश्यन् स जनः यत् हसति, दुःखिनो दृष्ट्वा उपहासं करोति, यच्च अमून् सुखिजनान् दिदृक्षते द्रष्टुमिच्छति, तदादरः तस्य द्रष्टुः आदरः अनुभवमात्रसुखाय। भवतीति शेषः। तान् दृष्ट्वा स सुखमनुभवतीति भावः। सुखिनो दृष्ट्वा तथा भवितुमिच्छति। दुःखिनो दृष्ट्वा च स्वसुखे गर्वमनुभवन्नुपहसति। तेन तस्य सुखप्राप्तिः।

अनुवाद – जो कोई अपने घर के वातायन से मार्ग में जा रहे सुखी और दुःखी लोगों को देखता हुआ हँसता है और देखना चाहता है, उसका आदर उनके दर्शनजन्य अनुभवमात्र से प्राप्त होने वाले सुख के लिए होता है। वह सुखी लोगों को देखकर वैसा बनना चाहता है तथा दुःखी जनों को देखकर अपने पर गर्व करता है।

।। ३७।।

अथ यदा सुखिलोकविलोकनात्
प्रयतते स तथा भवितुं स्वयम्।
मुहुरुपायशतेषु मनस्तनू
व्यथयतीति सतामतिरोहितम्।।

अन्वयः – अथ यदा सुखिलोकविलोकनात् सः स्वयं तथा भवितुं प्रयतते (तदा) उपायशतेषु मुहुः मनस्तनू व्यथयति इति सताम् अतिरोहितम् (विद्यते)।

गङ्गा – अथेति– अथ पथि गच्छतः सुखिसदुःखजनानवलोक्य यदा स जनः सुखिलोकविलोकनात् सुखिजनानां दर्शनात् स्वयं तथा सुखी भवितुं प्रयतते तदा उपायशतेषु सुखप्राप्तिसाधनेषु बहुषु मुहुः बारम्बारं मनस्तनू मनश्च तनुः शरीरं च व्यथयति दुःखयति। मानसिकं शारीरिकं च कष्टमनुभूयाऽपि सुखाय प्रयतत इत्यर्थः। इति अयमत्र प्रतिपादितः सिद्धान्तः सतां विदुषाम् अतिरोहितं प्रत्यक्षम्। विद्यत इति शेषः।

अनुवाद – तदनन्तर जब वह सुखी जनों को देखता है तो स्वयं भी वैसा होने का प्रयत्न करता है। सुखप्राप्ति के सैकड़ो उपायों से वह अपने मन और शरीर को व्यथित करता है। यह बात विद्वानों के लिए प्रत्यक्ष है।

।। ३८।।

क्षुधित इच्छति भोक्तुमथाशितो
वसनमाप्तपटः सदनं गृही।

शशिमुखीमथ सूनुमथो धनं
नृपतितामवधिस्त्विह दुर्वचः।।

अन्वयः – क्षुधितः भोक्तुम् इच्छति। अथ अशितः वसनम्, आप्तपटः सदनं, गृही शशिमुखीम् अथ सूनुम्, अथो धनं, (पुनः) नृपतिताम् (इच्छति) इह अवधिः तु दुर्वचः (एव अस्ति)।

गङ्गा – क्षुधित इति– क्षुधितः बुभुक्षाग्रस्तः भोक्तुं भोजनम् इच्छति। अथ अशितः कृतभोजनः वसनं पटमिच्छति, आप्तपटः प्राप्तवस्त्रः सदनं भवनमिच्छति, गृही गृहवान् शशिमुखीं स्त्रियं वाञ्छति, कलत्रवान् पुत्रं, पुत्रवान् धनं, धनवान् तु नृपतितां नरेशतां वाञ्छति। एवं कामनानां कोऽपि अवधिः न भवति। कामः कामेन वृद्धिं गच्छतीत्यर्थः। अतोऽत्र अवधिः तु दुर्वचः कथनयोग्य एव नास्ति। एकं प्राप्याऽन्यत् प्रत्युत्कण्ठत इति भावः।

अनुवाद – भूखा व्यक्ति भोजन चाहता है। जिसे भोजन मिल गया वह कपड़ा चाहता है। कपड़ा पाकर घर की इच्छा करता है, घर पाकर स्त्री चाहता है, स्त्री के बाद पुत्र, पुत्र के बाद धन और धन के बाद वह राजा बनना चाहता है। इस प्रकार कामनाओं की कोई अवधि नहीं है।

।। ३९।।

तनुहितेषु हि तेष्वखिलेषु चेत्
प्रयतनीयमुपायगवेषणे।
क्षपयतः पुरुषायुषमत्र काः
सुखलवस्थितिशान्तिसुषुप्तयः।।

अन्वयः – हि तेषु अखिलेषु तनुहितेषु उपायगवेषणे प्रयतनीयं चेत्, अत्र पुरुषायुषं क्षपयतः सुखलवस्थितिशान्तिसुषुप्तयः काः?

गङ्गा – तनुहितेष्विति– हीति निश्चयार्थकमव्ययम्। तेषु पूर्ववर्णितेषु अखिलेषु समग्रेषु तनुहितेषु अल्पहितकारिषु सुखेषु उपायगवेषणे साधनान्वेषणे प्रयतनीयं चेत् प्रयत्नो विधेयश्चेत्, अत्र वैषयिकसुखप्राप्तौ पुरुषायुषं क्षपयतः समग्रमपि जीवनं गमयतः सुखलवस्थितिशान्तिसुषुप्तयः सुखलवस्य सुखलेशस्य स्थितिश्च शान्तिश्च सुषुप्तिश्च ताः। आनन्दलेशस्य स्थितिः शान्तिः सुषुप्तिः वा अस्मिन् विषये का। यो हि वैषयिकसुखलाभाय समग्रमपि जीवनं गमयति सुखलेशस्य स्थितिं शान्तिं

सुषुप्तिं चापि गमयितुं शक्नोति। तज्जीवने सुखलवस्थित्यादीनामपि महत्त्वं न भवतीत्यर्थः।

अनुवाद – उन समस्त स्वल्प हितकारी सुखों के उपाय खोजने में ही जो जीवन बिता देते हैं, उनके लिए सुख की लेश मात्र स्थिति, शान्ति या सुषुप्ति क्या है। उन्हें तो वह बड़ी सरलता से खो सकता है।

।। ४० ।।

इदमशक्यमिदं च सुसाधमि–
त्यवधृतौ किमपीह न साधनम्।
क्रमश एव कुधीर्हि दुराशया–
ऽनृतविकल्पपयोधिषु पात्यते।।

अन्वयः – इदम् अशक्यम् इदं च सुसाधम् इति अवृधृतौ इह किमपि साधनं न (अस्ति)। हि कुधीः दुराशया क्रमशः अनृतविकल्पपयोधिषु पात्यते एव।

गङ्गा – इदमिति– इदं चित्सुखमशक्यं असम्भवम्, साधयितुं योग्यं नास्ति, अथ च इदं वैषयिकं सुखं सारल्येन संसारे लभ्यत्वात् सुसाधं सुखेन साध्यम् इति एतादृश्याम् अवधृतौ निश्चये किमपि साधनं प्रमाणं नास्ति। एतादृशः कुधीः कुत्सितमतिः जनः क्रमशः क्रमेण दुराशया अनृतविकल्पपयोधिषु अनृता असत्या ये विकल्पपयोधयः समुद्रास्तेषु पात्यते एव। असत्यभूतेषु विकल्पसमुद्रेषु स कुत्सितमतिः निपात्यत इत्यर्थः। 'अनृतं कृषावसत्ये च' इति रुद्रः।

अनुवाद – यह (चित्सुख) समाधि आदि के द्वारा प्राप्तव्य होने के कारण दुर्लभ है तथा यह (वैषयिक सुख) सरलता से प्राप्त होने के कारण सुसाध्य है, इस प्रकार के निर्धारण में कोई प्रमाण नहीं है। ऐसे विचारों में फँसा हुआ दुर्बुद्धि दुराशा के द्वारा क्रमशः असत्य विकल्पों के समुद्र में गिरा दिया जाता है। उसे कुछ भी प्राप्त नहीं होता।

।। ४१ ।।

अथ बलात् क्वचिदीप्ससि विश्रमं
मनसि वाञ्छसि देहसुखेप्सया।
विरम कार्यशतादव तां यया
सुखमवाप्स्यसि नापि च खेत्स्यसे।।

अन्वयः – अथ बलात् क्वचित् विश्रमम् ईप्ससि। देहसुखेप्सया (वा)मनसि (विश्रमं)वाञ्छसि (चेत्) कार्यशतात् विरम। तां (देहसुखेप्सां) च अव। यया सुखम् अवाप्स्यसि, न अपि खेत्स्यसे।

गङ्गा – अथ बलादिति– अथेति प्रश्ने।'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमरः। बलात् हठात् क्वचित् विश्रमं विरामम् ईप्ससि, देहसुखेप्सया शारीरिकानन्देच्छया क्वचित् मनसि विश्रमं विश्रान्तिं वाञ्छसि इच्छसि चेत् कार्यशतात् देहसुखप्राप्तये क्रियमाणोपायेभ्यः विरम विरतो भव। तां स्वीयां देहसुखेप्सां च अव रक्ष। यतो हि सैव तव चार्वाकस्य सिद्धान्तस्य मूलम्। तदिच्छामात्रेण सुखीभवेत्यर्थः। यया देहसुखेच्छया त्वं सुखमवाप्स्यसि। तस्या इच्छाया मनोव्यापाररूपत्वात्तत्र श्रान्त्यभावात् न अपि खेत्स्यसे खेदं प्राप्स्यसे। त्वया देहसुखेप्सया यद्धि कार्यशतं सम्पाद्यते तदपि शरीरे खेदमेवोत्पादयति। अतः कार्यशतं विहाय तां देहसुखसमीहामेव रक्षेत्यभिप्रायः। वाराणसीसंस्करणे तु वाञ्छसि इत्यत्र 'वाञ्छति' इति पाठः। खेत्स्यसे इत्यत्र च 'खेत्स्यते' इति पाठः। अर्थसङ्गति वशादस्माभिः पाठः परिवर्तितः। तेन सर्वत्र मध्यमपुरुषप्रयोगः।

अनुवाद – यदि देहसुख की कामना से बलात् कहीं मन में भी विश्राम चाहते हो तो उस देहसुख की प्राप्ति के लिए किये जा रहे सैकड़ों कार्यों से रुको। अपने उस देह सुख की इच्छा की रक्षा करो। उसी से तुम्हें सुख भी मिलेगा और तुम श्रान्त भी नहीं हो सकोगे। उस देहसुखेप्सा के लिए किये गये प्रयासों से तो कष्ट ही सम्भव है।

।।४२।।

अथ कृतज्ञतया सुखसाधने
वपुषि भूरिसुखाय विचेष्टसे।
सपदि तां सुखितां तुदतो भृशं
तव कथं भविता न कृतघ्नता।।

अन्वयः – अथ सुखसाधने वपुषि कृतज्ञतया भूरिसुखाय विचेष्टसे (तर्हि) सपदि तां सुखितां तुदतः तव भृशं कृतघ्नता कथं न भविता?

गङ्गा – स्वपक्षसाधनाय तर्कान्तरं प्रस्तौति– **अथ कृतज्ञतयेति–** अथ सुखसाधने वपुषि आनन्दोपाये शरीरे कृतज्ञतया कार्तज्ञ्येन भूरिसुखाय

प्राप्तापेक्षयाऽधिकसुखप्राप्तये विचेष्टसे चेष्टां कुरुषे तर्हि सपदि तां सुखितां सुखिनो देहस्य भावं तुदतः पीडयतः तव चार्वाकस्य भृशं कृतघ्नता उपकारिणो द्रोहः कथं न भविता। स दोषस्त्ववश्यम्भावीत्यर्थः। भवन्मते शरीरमेव सुखस्य साधनमिति कृतज्ञतया भवान् यदि अधिकसुखप्राप्तये परिश्रम्य शरीरं पीडयति तर्हि सा न कृतज्ञताऽपितु कृतघ्नतैवेति भावः।

अनुवाद – यदि सुख के साधनरूप शरीर में कृतज्ञ होते हुए और अधिक सुख की प्राप्ति की चेष्टा करते हो (शरीर को पीड़ा पहुँचाते हो) तो तुम इस सुखिता को पीड़ित कर रहे हो। ऐसे में क्या तुम्हारी कृतघ्नता सिद्ध नहीं होती ?

।। ४३ ।।

अयि! विचारय सुन्दरमन्दिरा–
न्तरगमञ्चककुञ्चितलोचना।
निजतनुर्विपिनेषु रणेषु वा
नयविदः कथमर्हति यन्त्रणाम् ?।।

अन्वयः – अयि! सुन्दरमन्दिरान्तरगमञ्चककुञ्चितलोचना नयविदः (तव) निजतनुः विपिनेषु रणेषु वा यन्त्रणां कथम् अर्हति ? (इति) विचारय।

गङ्गा – अयीति– अयीति सम्बोधने। हे चार्वाक! इत्यर्थः। सुन्दरमन्दिरान्तर–गमञ्चककुञ्चितलोचना। सुन्दरे रम्ये मन्दिरान्तरगे भवनाभ्यन्तरगे, मञ्चके पर्यङ्के कुञ्चिते दरमीलिते लोचने नयने यस्याः सा। 'अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम्। आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि' इत्यमरः। तादृशी नयविदः नीतिज्ञस्य तव निजतनुः स्वीयं शरीरं विपिनेषु अरण्येषु। 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः। रणेषु वा यन्त्रणां पीडां कथमर्हति कथं भोक्तुं शक्नोतीति विचारय। यतो हि शरीरमेव ते सर्वस्वम्। तथात्वे तस्मिन् दुःखसहनयोग्यता नास्तीति भावः। तेन सर्वत्र सुखेनैव भाव्यम्।

अनुवाद – हे चार्वाक! सुन्दर भवन के भीतर बिछे हुए पर्यंक पर अलसाये नेत्रों वाला तुझ नीतिवेत्ता का अपना शरीर जँगल या युद्ध में दुःख कैसे सहन कर सकता है– यह विचार करो।

॥ ४४॥

यदि च भाविसुखोच्चयतृष्णयो-
पनतमप्यवधूय सुखं लघु।
व्रजसि दृष्टमुपेक्ष्य परार्थिन-
स्तव कथं न भवेत्स्वमतच्युतिः ?॥

अन्वयः - यदि च भाविसुखोच्चयतृष्णया उपनतम् अपि सुखं लघु अवधूय दृष्टम् उपेक्ष्य व्रजसि (तर्हि) परार्थिनः तव स्वमतच्युतिः कथं न भवेत् ?

गङ्गा - यदि चेति- यदि च भाविसुखोच्चयतृष्णया, कालान्तरे प्राप्स्यमानस्य सुखसमूहस्य तृष्णया लालसया उपनतं प्राप्तम् अपि सुखं लघु सपदि अवधूय तिरस्कृत्य दृष्टं प्रत्यक्षमनुभूयमानम् उपेक्ष्य दूरीकृत्य व्रजसि गच्छसि तर्हि परार्थिनः तव स्वमतच्युतिः स्वसिद्धान्तापकर्षः कथं न भवेत् ? प्रत्यक्षमात्रप्रमाणवादिना त्वयाऽनुमानसाहाय्येन परार्थलोभाद् गमने स्वसिद्धान्तापकर्षस्त्वस्त्येव। यतो हि प्रत्यक्षसिद्धं दृष्टं परित्यज्य भवान् अनुमानसिद्धमदृष्टं प्रति धावतीत्यर्थः।

अनुवाद - यदि भावी सुख के समूह की तृष्णा से तुम प्राप्त सुख का तिरस्कार करते हो तथा उस प्रत्यक्ष सुख को छोड़ कर अनुमानसिद्ध अदृष्ट की ओर दौड़ रहे हो तो क्या तुम स्वयं अपने मत से च्युत नहीं हो रहे ?

॥ ४५॥

निजकुसूलगधान्यमतीन्द्रिया-
धिकफलस्पृहया वपतो भुवि।
प्रकटयत्यधिकं तव मूढता-
मनुमितिप्रमितित्वनिराकृतिः॥

अन्वयः - अतीन्द्रियाधिकफलस्पृहया निजकुसूलगधान्यं भुवि वपतः अनुमितिप्रमितित्वनिराकृतिः तव मूढताम् अधिकं प्रकटयति।

गङ्गा - सम्प्रत्यनुमितिनिराकरणं तस्य प्रतिवदति- **निजकुसूलेति**- अतीन्द्रियाधिकफलस्पृहया, अतीन्द्रियाणाम् इन्द्रियाऽगोचराणामनुमानगम्यानाम् अधिकफलानां या स्पृहा बहुफलप्राप्तिसमीहा तया निजकुसूलगधान्यं स्वाऽन्नागारस्थं धान्यं भुवि पृथ्व्यां वपतः वपनं कुर्वतः। अनुमितिप्रमितित्वनिराकृतिः अनुमितेः प्रमात्वं निराकुर्वतोऽपि ते तत्स्वीकृतिः तव मूढतां मूर्खताम् अधिकं आधिक्येन प्रकटयति

द्योतयति। पूर्वं भवान् प्रत्यक्षमात्रस्य प्रमाणतामङ्गीकृत्य तद्भिन्नाऽनुमानादीनां प्रमात्वं निराकृतवान्। सम्प्रति च अतीन्द्रियामधिकफलप्राप्तिमनुमीय स्वगृहस्थं धान्यम् अधिकफलप्राप्तिलोभेन वपसीति तवेयं दशा तव मूढतां प्रकटयतीत्यर्थः।

अनुवाद – अतीन्द्रिय (अनुमानगम्य) अधिक फल पाने की इच्छा से तुम अपनी कोठी का धान्य भूमि में बो रहे हो, अतः तुम्हारा अनुमिति के प्रमात्व का निराकरण तुम्हारी अत्यधिक मूर्खता को प्रकट कर रहा है। अधिक फलप्राप्ति का तुम्हारा यह लोभ अनुमानगम्य नहीं तो और क्या है?

।। ४६ ।।

तदिदमुत्कटसंशयमात्रतो
यदि करोषि तदा शममाश्रय।
फलति तत्र कदाचिदपि क्रिया
शमसुखानुभवो नियतः परम्।।

अन्वयः – यदि उत्कटसंशयमात्रतः तत् इदं करोषि तदा शमम् आश्रय। तत्र कदाचिद् अपि क्रिया फलति परं शमसुखानुभवः नियतः (अस्ति)।

गङ्गा – नानुमानेन, अपितु संशयादहं निजकुसूलगधान्यं वपामीति प्रतिवादिपक्षमुपस्थापयन्नाह– **तदिदमिति**– यदि उत्कटसंशयमात्रतः प्रबलसंशया-पन्नस्त्वमनुमानमनाश्रित्य तत् पूर्वोक्तमिदं निजकुसूलगधान्यं संशयाद् वपसि तदा शमं शान्तिम् आश्रय धारय। तत्र संशये कदाचिद् अपि यदा कदा एव क्रिया फलति फलवती भवति। संशयात् कृतकार्ये फलप्राप्तिः न ध्रुवा किन्तु तत्र शमसुखानुभवः शमस्य निर्वेदस्य अनुभवः नियतः निश्चितः। यतो हि संशयापन्नः फलानिश्चयेनैव कार्यं सम्पादयति। संशये फलप्राप्तिर्भवेन्न वा शमप्राप्तिस्तु भवत्येव। 'शमथस्तु शमः शान्तिः' इत्यमरः। संशयात् क्रियमाणकार्ये कामक्रोधाद्यभावात् शमानुभवोऽ-वश्यम्भावीति तव मते शमस्य सुखरूपाभावात् स्वयमेव ते तदाश्रयप्रयासेनाऽ-स्मत्सिद्धान्ताङ्गीकार इत्यभिप्रायः।

अनुवाद – अगर तुम (अनुमान से नहीं) अपितु उत्कट संशय के कारण अपने अन्नागार के अनाज को भूमि में बो रहे हो तब तो शान्ति का आश्रय लो। संशय में की गई क्रिया कभी कभी ही फलवती होती है किन्तु उसमें शान्ति का अनुभव तो नियत ही होता है। क्योंकि संशयापन्न व्यक्ति फल के अनिश्चय से ही

कार्य सम्पादित करता है।

।। ४७।।

अथ शरीरसुखान्मनसः सुखं
त्वमधिकं वदसीदमसाम्प्रतम्।
न हि मनोऽक्षगणेन समीक्ष्यते
न पदजानुमिती प्रमिती तव।।

अन्वयः – अथ त्वं शरीरसुखात् मनसः सुखम् अधिकं वदसि, इदम् असाम्प्रतम्। अक्षगणेन मनः न हि समीक्ष्यते। पदजानुमिती तव प्रमिती न (स्तः)।

गङ्गा – अथ शरीरेति– अथ त्वं चार्वाकः स्वसिद्धान्तरक्षायै सम्प्रति शरीरसुखात् देहस्य सुखात् मनसः सुखम् अधिकं वदसि। निजकुसूलगधान्यमुप्त्वा मनःशान्तिर्लभ्यत इति निर्धारयसि चेत् इदं ते कथनम् असाम्प्रतम् अनुचितम्। अक्षगणेन इन्द्रियसमूहेन मनः न हि समीक्ष्यते, समन्ताद् दृश्यते। 'अक्षो ज्ञानात्मशकटव्यवहारेषु पाशके। रुद्राक्षेन्द्राक्षयोः सर्पे विभीतकतरावपि। चक्रे कर्षे पुमान् क्लीबं तुत्थे सौवर्चलेन्द्रिये' इति मेदिनी। मन इन्द्रियसमूहदृश्यं न भवति। अथ च पदजानुमिती पदजा, शाब्दी प्रमा च अनुमितिश्च तव प्रमिती प्रमे न स्तः। अतः शब्दप्रमाणेन अनुमानेन वाऽपि तव मते मनसः सुखस्य निर्धारणं न भवितुमर्हति। तव मते केनापि प्रमाणेन मनसः सुखस्य अग्रहात् तद्गतसुखस्याऽप्यग्रहः।

अनुवाद – अगर तुम शरीरसुख की अपेक्षा मानसिक सुख को अधिक मानते हो तो वह भी उचित नहीं होगा। क्योंकि इन्द्रियसमूहों से मन देखा नहीं जा सकता। उसका शब्दप्रमाण या अनुमान से ज्ञान नहीं हो सकता। तुम्हारे मत में ये दोनो प्रमाण हैं ही नहीं। अतः प्रत्यक्ष से अतिरिक्त प्रमाण से सिद्ध होने वाली वस्तुओं की सत्ता तुम्हारे मत में हो ही नहीं सकती।

।। ४८।।

तनुगतावयवं कमपीह चे–
द्वदसि चित्तमिदं न हि युज्यते।
बहुभिरन्वयवद्व्यतिरेकिणी
मतिसुखे तनुगावयवैर्यतः।।

अन्वयः – इह कमपि तनुगतावयवं चित्तं वदसि चेत्, इदं न हि युज्यते। यतः बहुभिः तनुगावयवैः मतिसुखे अन्वयवद्व्यतिरेकिणी (भवतः)।

गङ्गा – पूर्वपक्षिणो मनसः शरीरावयवत्वेन स्थापनां निराकर्तुमाह– **तनुगतेति**– इह अस्मिन् शरीरात्मप्रसङ्गे आवयोः संलापे चार्वाकस्त्वं मनसः प्रत्यक्षतां वक्तुं कमपि तनुगतावयवं शरीरस्य अङ्गविशेषं चित्तं मनः वदसि चेत्, इदं न हि युज्यते। तवैतत्कथनमौचित्यं न भजते। 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मन' इत्यमरः। यतः यस्मात् कारणात् बहुभिः अनेकैः तनुगावयवैः शरीरस्थाङ्गैः मतिसुखे मतिः ज्ञानं च सुखम् आनन्दश्चेति मतिसुखे। ज्ञानानन्दावित्यर्थः। अन्वयवद्व्यतिरेकिणी सत्तावदभाववती भवतः। शरीरस्य कैश्चिदङ्गैः मतिसुखयोरन्वयो भवति कैश्चिच्च व्यतिरेकः। कश्मिंश्चिदङ्गविशेषे ज्ञानं भवति कश्मिंश्चिच्च सुखमिति भावः। अतो न शरीराङ्गविशेषस्य मनस्त्वं निर्धारयितुं सुशकम्। तथात्वे सर्वेष्वप्यङ्गेषु सुखत्वापत्तेः।

अनुवाद – इस प्रसंग में यदि तुम मन की प्रत्यक्षता निर्धारित करने के लिए शरीरगत किसी अंग को मन कहो, तो यह भी ठीक नहीं। क्योंकि शरीर के बहुत से अंगों का ज्ञान और सुख से अन्वय होता है तथा बहुत अंगों में उसका व्यतिरेक होता है। अतः किसी अंग विशेष को 'मन' मानकर तुम उसको प्रत्यक्षप्रमाण से सिद्ध नहीं कर सकते।

।।४९।।

अखिलकायगतावयवेषु चेत्
सुखमतिस्थितिरेतदपूजितम्।
वद तथा सति चेतयते कथं
विकल एकतमावयवे भवान्?।।

अन्वयः – अखिलकायगतावयवेषु सुखमतिस्थितिः (अस्तीति वदसि) चेत्, एतत् अपूजितम् (अस्ति) तथा सति एकतमावयवे विकले भवान् कथं चेतयते (इति) वद।

गङ्गा – सर्वेष्वङ्गेषु ज्ञानानन्दस्थितिं खण्डयन्नाह– **अखिलेति**– उपर्युक्तां विप्रतिपत्तिं निराकर्तुं चार्वाकस्त्वं अखिलकायगतावयवेषु निखिलेऽपि शरीरे हस्तपादादयो येऽवयवाः सन्ति तेषु सर्वेष्वपि सुखमतिस्थितिः सुखज्ञानयोः सत्ताऽस्तीति प्रतिपादयसि चेत्। एकस्याऽवयवस्य मनस्त्वकल्पने तादृशविप्रतिपत्तिरिति तामपाकर्तुं

सकलशरीरगतावयवेषु सुखज्ञानयोः स्थितिं स्वीकरोषि चेदित्यर्थः। तथात्वे एकतमावयवे विकले कस्यचिदेकस्य अङ्गविशेषस्य विकलतायां सत्यां भवान् कथं चेतयते संज्ञावान् भवति। अखिलशरीरगतावयवेषु सुखमत्योः स्थितेरेकस्य वैकल्ये चेतनाभावो भविष्यतीत्यर्थः। अतो न तथा कल्पनयाऽपि भवदभीष्टा मनसः प्रत्यक्षप्रमाणसिद्धिरिति तात्पर्यम्।

अनुवाद - (उपर्युक्त आपत्ति को दूर करने के लिए) यदि तुम सम्पूर्ण शरीर के सभी अंगों में सुख और ज्ञान की स्थिति मानते हो तो भी बात नहीं बनती। ऐसे में किसी एक अवयव के विकल हो जाने पर आप चेतना कैसे प्राप्त करेंगे। अतः इससे भी मन की प्रत्यक्ष प्रमाण से सिद्धि संभव नहीं है।

।।५०।।

अथ पृथक् पृथगिच्छसि चेतनान्
तनुगतावयवान् सकलान्न तत्।
निजनिजेष्टकृते व्रजतो दिशः
क इह तान् कलहाद्विनिवर्तयेत्।।

अन्वयः - अथ सकलान् तनुगतावयवान् पृथक् पृथक् चेतनान् इच्छसि, तत् न। निजनिजेष्टकृते दिशः व्रजतः तान् इह कलहात् कः विनिवर्तयेत्?

गङ्गा - पुनस्तर्कान्तरेण तन्मतं खण्डयति- **अथ पृथगिति-** अथ पूर्वोक्तप्रकारेण परास्तोऽपि चार्वाकस्त्वं सकलान् हस्तपादादीन् तनुगतावयवान् शरीरस्थाङ्गानि पृथक् पृथक् चेतनान्, प्रत्यङ्गं स्वातन्त्र्येण चेतनां वाञ्छसि, तेन तव एकतमावयवे विकलेऽपि चेतनासिद्धिस्तु स्यात् किन्तु तथात्वे प्रत्येकमङ्गस्य स्वतन्त्रचेतनत्वात् तेषां स्वस्वविषये स्वतन्त्रप्रवृत्तेरापत्तिः। एवं निजनिजेष्टकृते, चक्षुषा दर्शनार्थं श्रवणेन श्रवणार्थं तथा च तत्तदङ्गानि तत्तत्स्वेष्टसिद्धये दिशः व्रजतः गच्छतः तानि कलहात् कः विनिवर्तयेत्। एका चेतनैव तेषां विनिवारणे नियमने वा क्षमा भवति। त्वन्मते तस्याः प्रत्यङ्गं स्वातन्त्र्यान्न तस्या अपि तद्वारणसामर्थ्यं स्यादित्यर्थः। अतो नैतेनापि तवाभीष्टसिद्धिः।

अनुवाद - अगर तुम सभी शरीरगत अवयवों को पृथक् पृथक् चेतन मानते हो, तो भी ठीक नहीं। ऐसे में अपनी अपनी इष्टसिद्धि के लिए विभिन्न दिशाओं में जा रहे इन अंगों को कलह से कौन रोक सकेगा। चेतना के एक होने से

वही इन अंगों का नियमन करती है किन्तु तुम्हारे मत में उसके प्रति अंग में स्वतन्त्र होने से वह भी इनके विनिवारण में समर्थ नहीं हो सकेगी।

।।५१।।

चिरपरीक्षणतोऽपि न मुख्यता
क्वचिदिहावयवे सुवचा तनोः।
शिरसि वक्षसि वा सुखितेऽपि को
विषहते करपादनिपीडनम्।।

अन्वयः – चिरपरीक्षणतः अपि इह अवयवे तनोः मुख्यता क्वचित् न सुवचा (अस्ति)। शिरसि वक्षसि वा सुखिते अपि करपादनिपीडनं कः विषहते?

गङ्गा – अङ्गेषु तनोर्मुख्यतां तिरस्कुर्वन्नाह– **चिरपरीक्षणत इति**– चिरपरीक्षणतः अपि चिरकालं यावत् क्रियमाणेन परीक्षणेनाऽपि इह अवयवे शरीराङ्गे तनोः मुख्यता क्वचित् न सुवचा स्वीकारयोग्या। तनौ प्रत्येकम् अवयवः मुख्यो भवति। शिरसि वक्षसि वा सुखिते अपि करपादनिपीडनं कः विषहते। शिरसि वक्षसि च सत्यपि पीडाद्यभावे करपादयोः निपीडनं पीडां कः विषहते सोढुं शक्नोति। न कोऽपीत्यर्थः। अतो शरीराङ्गे शरीरस्य मुख्यता नेति सिद्धम्। एवं शरीरसुखात् मनसः सुखस्याधिक्यकल्पनेनाऽपि न ते कोऽपि लाभ इत्यर्थः।

अनुवाद – चिरकाल तक किये गए परीक्षण से भी अङ्ग पर शरीर की मुख्यता कहीँ सिद्ध नहीं होती। शिर और वक्षःस्थल के सुखी होने पर भी हाथ और पैर की पीड़ा को कौन सहन करता है? अतः मन को शरीर का अंगविशेष मान कर उसकी प्रत्यक्षसिद्धि कर लेने पर भी कोई लाभ नहीं है क्योंकि एक अङ्ग के सुखी होने पर भी सम्पूर्ण शरीर सुखी नहीं हो सकता।

।।५२।।

तदवगच्छ शरीरमचेतनं
तदनुकूलविरुद्धसमागमात्।
तदितरः सुखदुःखयुतो भवेत्
स पुरुषोऽभिमतः स च चेतनः।।

अन्वयः – तत् तदनुकूलविरुद्धसमागमात् शरीरम् अचेतनम् अवगच्छ। तदितरः सुखदुःखयुतः भवेत्। स (एव शास्त्रकारैः) पुरुषः स (एव) च चेतनः अभिमतः।

गङ्गा – बहुविधतर्कैश्चार्वाकस्य तनुविषयकं सिद्धान्तं निराकृत्य निष्कर्षं वक्ति– **तदवगच्छेति**– तत् तस्मात् कारणात् तदनुकूलविरुद्धसमागमात् तेषामनुकूलानां विरुद्धानां च सिद्धान्तानां समागमात् सम्पर्कात् त्वया चार्वाकेण शरीरस्य चैतन्यानुकूलसिद्धान्ताः प्रतिपादिता मया च सिद्धान्तिना तद्विरुद्धाः सिद्धान्ताः प्रतिपादिता इति हेतोः शरीरम् अचेतनम् अवगच्छ विद्धि। तदितरः तस्मात् शरीराद् इतरः भिन्नः एव कश्चन सुखदुःखयुतः सुखदुःखयोर्भोक्ता भवेत्। स एव ऋषिभिः शास्त्रकारैश्च पुरुषः चेतनश्च अभिमतः। न शरीरम्। 'पुरुषावात्ममानवौ' इत्यमरः। श्रीमद्भगवद्गीतायामप्युक्तम्–

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।। (१३.२१)

अतो न शरीरमपितु आत्मा एव सुखदुःखयोर्भोक्ता। अत्र भगवदुक्तिरपि प्रमाणम्।

अनुवाद – अतः उन अनुकूल और विरुद्ध सिद्धान्तों के समागम से शरीर को अचेतन समझो। शरीर से भिन्न ही कोई सुख और दुःख का भोक्ता है। ऋषियों और शास्त्रकारों द्वारा वही 'पुरुष' या 'चेतन' कहा गया है।

।।५३।।

अपि च लब्धफलान्स्वकृतोद्यमै-
र्नयविदस्त्वमवेक्ष्य फलाप्तये।
प्रयतमानतनुस्तनुषे मुधा
ह्यपलपन्ननुमानविमाननाम्।।

अन्वयः – अपि च त्वं स्वकृतोद्यमैः लब्धफलान् नयविदः अवेक्ष्य फलाप्तये प्रयतमानतनुः (सन्) मुधा हि अपलपन् अनुमानविमाननां तनुषे।

गङ्गा – अवसरं प्राप्य चार्वाकसिद्धान्तेऽनुमानादीनामपि व्याप्तिं निरूपयति– **अपि चेति**– अपि च त्वं चार्वाकः स्वकृतोद्यमैः निजसम्पादितप्रयासैः लब्धफलान् लब्धानि प्राप्तानि फलानि कृतकार्यपरिणामा यैस्तान् नयविदः नीतिविज्ञान् अवेक्ष्य

दृष्ट्वा प्रयतमानतनुः सन् प्रयतमाना फलप्राप्तिलोभात् कार्यसम्पादनसंलग्ना तनुः शरीरं यस्य तादृशो भूत्वा मुधा व्यर्थमेव अपलपन् अपलापं कुर्वन् अनुमानविमाननां अनुमानप्रमाणस्य अवमाननं तनुषे प्रसारयसि। वस्तुतो नयविदां लब्धफलानि दृष्ट्वा ततः स्वविषयेऽपि फलप्राप्तिमनुमीय त्वमपि प्रयतमानतनुर्भवसीत्यतोऽनुमानं प्रमाणत्वेन स्वीकृत्यापि तदवमाननं करोषीत्यर्थः।

अनुवाद – तुम अपने उद्यमों से फलप्राप्त करने वाले नीतिवेत्ताओं को देखकर उससे फलप्राप्ति का अनुमान कर रहे हो। इसीलिए अपने शरीर को कार्यसम्पादन में प्रयत्नशील कर रहे हो। ऐसे में व्यर्थ ही अपलाप करते हुए अनुमान की अवमानना कर रहे हो। वह तो तुम्हारे द्वारा स्वीकृत ही है।

।।५४।।

न खलु भावि फलं तव गोचरो
न च तथाविधहेतुफलान्वयः।
अपि तु दृष्टबलेन स कल्प्यते
तदिह नानुमितिः प्रमितिः कथम्?।।

अन्वयः – भावि फलं तव गोचरः न खलु। न च तथाविधहेतुफलान्वयः (एव अस्ति)। अपि तु स दृष्टबलेन कल्प्यते। तत् इह अनुमितिः प्रमितिः कथं न (अस्ति)?

गङ्गा – पुनः पूर्वोक्तमेव दृढयति– **न खलु भावतीति–** भावि फलं क्रियमाणकार्यजनयिष्यमाणं फलमित्यर्थः। यत्समीहया सम्प्रतिकार्यं कुर्वन्नसि तत्फलं तव गोचरो न, प्रत्यक्षविषयो नास्ति। खल्विति निश्चयार्थकमव्ययम्। अथ च तथाविधहेतुफलान्वयः तथाविधयोस्त्वदभीष्टयोः हेतुफलयोः कारणकार्ययोः अन्वयः सम्बन्धोऽपि नास्ति, यज्ज्ञात्वा एतत्करणेनैतत्फलमवश्यं प्राप्स्यत इति सम्बन्धप्रत्यक्षेण भवान् प्रयतमानतनुः अस्ति। अपि तु वस्तुतस्तु स तादृशहेतुफलान्वयः दृष्टबलेन प्रत्यक्षफलसाहाय्येन कल्प्यतेऽनुमीयते। तदनुमानेनैव भवति कार्यप्रवृत्तिः। अतस्तल्लोभात् प्रयतमानस्य तेऽनुमितिः प्रमितिः कथन्नास्ति। अवश्यमेवास्तीत्यर्थः।

अनुवाद – भावी फल तो तुम्हें दिखाई पड़ नहीं रहा। हेतु और फल का उस प्रकार का कोई सम्बन्ध भी नहीं है, जिसे जानकर तुम फलप्राप्ति के लिए प्रयास कर रहे हो। उस फल का तो प्रत्यक्षबल से ही अनुमान किया जाता है। तुमने

नयविदों को स्वकृतकार्यों से फल प्राप्त करते देखा है। उसी से कार्य में तुम्हारी प्रवृत्ति हुई है। अतः अनुमिति तुम्हारे लिए प्रमा कैसे नहीं है ?

।। ५५ ।।

इदमिहैव विचार्यमहो सुखे
स्वतनुमात्रसमस्थितिके भवान्।
भुवि चिरस्थिरकीर्तिकरोद्यमान्
सपदि दुःखकरान् कुरुते कुतः ?।।

अन्वयः – स्वतनुमात्रसमस्थितिके सुखे भवान् भुवि दुःखकरान् चिरस्थिरकीर्तिकरोद्यमान् सपदि कुतः कुरुते (इति) अहो। इदम् इहैव विचार्यम्।

गङ्गा – तर्कान्तरेण चार्वाकस्याऽनुमितिप्रमितित्वं साधयति– **इदमिहैवेति**– स्वतनुमात्रसमस्थितिके सुखे निजशरीरमात्रसंव्यापिनि आनन्दे सत्यपि भवान् चार्वाकः भुवि पृथ्व्यां दुःखकरान् पीडादायकान् चिरस्थिरकीर्तिकरोद्यमान् बहुकालप्रसृतयशः–प्रदकार्याणि सपदि शीघ्रमेव कुतः कस्मात् कुरुते ? इत्यहो, आश्चर्यम्। एतेन तस्य शरीरसुखमात्रसमीहां व्यवच्छिनत्ति। ततोऽप्यचिरस्थिरकीर्तिकरोद्यमान्, शरीरसुखापेक्षया कीर्तिमधिकं वाञ्छन् येषां सम्पादनेन संसारे चिरकालस्थायि यशो लभ्यते तादृशानि सरःकूपनिर्माणादिकार्याणि सपदि शरीरविनाशभयात् शीघ्रमेव कुतः कस्माद्धेतोः कुरुते सम्पादयति। तव तु तनुसुखमात्रमेवेष्टम्। मृते शरीरे चिरस्थिरकीर्त्या न ते किमपि प्रयोजनम्। तथापि तादृशकार्यसम्पादने कथं ते प्रीतिरिति अहो आश्चर्यम्। इदं तव चिरस्थिरकीर्तिकरकार्यसम्पादनम् इहैव अनुमानप्रसङ्ग एव विचार्यम्, समीक्षणीयम्। तनुमात्रसुखं प्रथयन्नपि नयविदां चिरस्थायिकीर्तिं श्रुत्वा ते तादृशकार्येषु प्रवृत्तिरिति स्वयमेव अनुमितिस्वीकृतिस्ते सिद्ध्यति।

अनुवाद – अपने शरीरमात्र में सुख को मानने वाले तुम उस सुख के होने पर भी पृथ्वी पर कष्टप्रद कार्य कर रहे हो। इससे अपने शरीर को स्वयं कष्ट देकर तुम अपने ही सिद्धान्त को भंग कर रहे हो। शरीर को कष्ट देकर भी चिरकाल तक स्थिर रहने वाली कीर्ति देने वाले उद्यमों को शीघ्र क्यों सम्पन्न कर रहे हो– यह आश्चर्य है। तुम्हारे इस कार्य के विषय में यहीं विचार करना चाहिए। वास्तव में तुम्हारा शरीरसुखमात्र में अनुराग नहीं है। तुम उसके अतिरिक्त भी कीर्ति आदि चाहते हो। अतः अनुमान तुम्हें भी अभीष्ट है यह स्वयं सिद्ध है।

।। ५६ ।।

विपुलवित्तविनाशमनःश्रमा-
ऽनिशतनूद्यमदुःखपरम्पराः।
नयविदामनिवार्यतमा यशो
विशदमत्र चिराय चिचीषताम्।।

अन्वयः - अत्र चिराय विशदं यशः चिचीषतां नयविदां विपुलवित्त-विनाशमनःश्रमाऽनिशतनूद्यमदुःखपरम्पराः अनिवार्यतमाः (भवन्ति)।

गङ्गा - नयविदां दुःखपरम्पराणामनिवार्यत्वं प्रतिपादयन्नाह- **विपुलवित्तेति-** अत्र संसारे चिराय बहुकालाय विशदं प्रसृतं विशालं वा यशः कीर्तिं चिचीषतां चेतुं समीहमानानां नयविदां नीतिविज्ञानां विपुलवित्तविनाश-मनःश्रम-अनिशतनूद्यम-दुःखपरम्पराः, विपुलवित्तस्य पृथुलधनस्य विनाशश्च। 'विपुलः पृथुलेऽगाधे मेरुपश्चिमभूधरे' इति विश्वमेदिन्यौ। मनःश्रमश्च अनिशं सततं तनूद्यमः शरीरसामर्थ्यं च। त एव दुःखपरम्पराः कष्टशृङ्खला इति ता अनिवार्यतमाः। तासां दुःखपरम्पराणां विरहे न विशदयशःप्राप्तिः। भवानपि तादृशकार्यप्रवृत्त्या शरीरसुखमात्रं स्वीयसिद्धान्तं खण्डयतीति कुतस्ते स्वसिद्धान्तनिष्ठत्वमिति भावः।

अनुवाद - इस संसार में चिरकाल तक स्थायी रहने वाले यश को पाने के इच्छुक नीतिज्ञों के लिए विपुल धन का विनाश, मानसिक श्रम और सतत शारीरिक उद्यम रूप दुःख परम्पराएं अनिवार्य होती हैं। उन दुःख परम्पराओं के बिना स्थिरकीर्तिप्रदकार्यों की सिद्धि नहीं होती। तुम ऐसे कार्यों का सम्पादन कर स्वयं दुःखपरम्पराओं का वरण कर रहे हो, अतः तुम स्वयं अपने सिद्धान्त पर स्थिर नहीं हो। तुम्हारा सिद्धान्त तो शरीर को सुख पहुंचाना है। उसे कष्ट देना नहीं।

।। ५७ ।।

तनुलयानुविनाशिनि चेतने
न हि यशोऽनुभवः श्रमकारिणः।
किमु परस्य सुखैर्गुणकीर्तनै-
रिति भवेदफलैव यशोऽर्थिता ?।।

अन्वयः – तनुलयानुविनाशिनि चेतने श्रमकारिणः यशोऽनुभवः न हि (भवेत्) परस्य सुखैः गुणकीर्तनैः किमु इति यशोऽर्थिता अफला एव भवेत्?

गङ्गा – शरीरस्य विनाशे यशोऽर्थिताया निष्प्रयोजनतां निरूपयति– **तनुलयेति**– तनुलयानुविनाशिनि शरीरलयं विनाशमनुविनाशिनि चेतने। देह एव चैतन्यमिति मते देहविनाशसमकालमेव चेतनाया अपि विनाशादिति भावः। श्रमकारिणः यशोलिप्सया चिरस्थिरकीर्तिकरोद्यमे संलग्नस्य यशोऽनुभवः नहि। भवेदिति शेषः। अतश्च परस्य लब्धयशसः सुखैः गुणकीर्तनैः किमु, किम्प्रयोजनमित्यर्थः। इति एवं प्रकारेण तव शरीरचेतनावादिनस्तु, यशोऽर्थिता अफला निष्फला एव भवेत्। शरीरत्यागानन्तरमपि कीर्तिशरीरेण मनस्विनो जीवन्ति, 'कीर्तिर्यस्य स जीवति' इति वचनप्रामाण्यात्। तव मते तु देहमात्रेणैव प्रयोजनमिति यशःकामनया क्रियमाणकार्याणां वैफल्यमेव। अतस्त्वयाऽपि नित्यचेतनापक्षोऽङ्गीकार्य एव।

अनुवाद – शरीर के विनाश के अनन्तर चेतना का भी विनाश हो जाने के कारण चिरस्थिरकीर्ति की लालसा से श्रम करने वाले को यश का अनुभव नहीं होता। अतः दूसरे के सुख और गुणकीर्तन से क्या लाभ? इस प्रकार तो तुम्हारी कीर्तिलालसा निष्फल ही है। अतः तुम्हें भी चेतना की नित्यता स्वीकार करनी ही चाहिए।

।।५८।।

अथ शरीरलयेऽपि स चेतनः
परसुखस्वगुणस्तुतिजां मुदम्।
समधिगच्छति दीर्घसुखाय त–
त्सपदि दुःखमपि प्रसहिष्यते।।

अन्वयः – अथ स चेतनः शरीरलये अपि परसुखस्वगुणस्तुतिजां मुदं समधिगच्छति, तत्सपदि दीर्घसुखाय दुःखम् अपि प्रसहिष्यते।

गङ्गा – पुनः पक्षान्तरेण समादधाति– **अथ शरीरेति**– अथ स चेतनः तनुरूपस्तवाभिमतचेतनः शरीरलये शरीरविनाशे सत्यपि परसुखस्वगुणस्तुतिजां परेषां सुखाज्जायमानां स्वगुणस्तुतिजन्यां च मुदम् आनन्दं समधिगच्छति। 'मुत्प्रीतिः प्रमदो हर्षप्रमोदामोदसम्मदाः' इत्यमरः। तत् तस्मात् सपदि दीर्घसुखाय चिरकालावस्थायि–चिदात्मसुखायेत्यर्थः। दुःखं चिदात्मसुखलाभाय क्रियमाणयमनियमादिजन्यां पीडां

प्रसहिष्यतेऽत्यन्तं सोढुं तत्परो भविष्यतीत्यर्थः। कीर्त्यपेक्षया तादृशसुखे आनन्दाधिक्यात्।

अनुवाद – यदि तुम्हें अभिमत चेतन शरीर के विनाश के अनन्तर भी दूसरे के सुख और अपने गुणों की प्रशंसा से जन्य आनन्द को प्राप्त करता है तब तो वह चिरकाल तक स्थिर रहने वाले चिदात्मसुख के लिए दुःख भी सहन करेगा। क्योंकि चिदात्मसुख में कीर्ति की अपेक्षा कहीं अधिक आनन्द होता है।

।।५९।।

तदिदमस्तविवादमुपेयता–
मनुमितिः प्रमितिष्वधिकादृता।
अपि च देहलयेऽपि चितिस्थिति–
र्न च सुखस्य तनूपरतन्त्रता।।

अन्वयः – तत् अनुमितिः प्रमितिषु अधिकादृता (अस्ति) इदम् अस्तविवादम् उपेयताम्। अपि च देहलये अपि चितिस्थितिः (भवति) सुखस्य तनूपरतन्त्रता च न (भवति)।

गङ्गा – स्वकथ्यस्य निष्कर्षं प्रस्तौति– **तदिदमिति**– तत् तस्मात् पूर्वोक्तकारणात् अनुमितिः प्रमितिषु प्रत्यक्षादिप्रमासु अधिकादृता श्रेष्ठा आधिक्येन आदरयुक्ताऽस्ति। सर्वास्वपि प्रमासु तस्या बलवत्त्वं विद्यत इति इदं तथ्यं अस्तविवादं यथा स्यात्तथा। क्रियाविशेषणमिदम्। निर्विवादं, तर्कान् परित्यज्येत्यर्थः। उपेयतां स्वीक्रियताम्। तद्विरहे न तवाभीष्टसिद्धिरित्यर्थः। अपि च देहलये शरीरविनाशे अपि चितिस्थितिः। चितेः चैतन्यस्य आत्मनो वा स्थितिः भवति। सुखस्य चिदात्मसुखस्य तनूपरतन्त्रता शरीरपारतन्त्र्यं न भवति। तत्तु नित्यमिति सर्वमवितर्कं स्वीक्रियताम्।

अनुवाद – इसलिए अनुमिति समस्त प्रमाओं में श्रेष्ठ है, यह तुम निर्विवाद रूप से स्वीकार करो। इसी प्रकार देह के विनाश के बाद भी आत्मा की स्थिति रहती है तथा चिदात्मसुख शरीर के अधीन नहीं होता, यह भी निर्विवाद स्वीकार करो।

।।६०।।

इह रहस्यमिदं प्रणयाद् ब्रुवे,
फलतयेन्द्रियजा मतिरिष्यते।

अनुमितिस्तु समस्तजगद्धिता-
हितविवेकनिदानतयाऽऽदृता।।

अन्वयः - इह इदं रहस्यं प्रणयात् ब्रुवे (यत्) इन्द्रियजा मतिः फलतया इष्यते। अनुमितिः तु समस्तजगद्धिताहितविवेकनिदानतया आदृता (भवति)।

गङ्गा - प्रत्यक्षानुमानयोरनुमानस्य प्राबल्यं वर्णयति- **इह रहस्यमिदमिति-** इह अस्मिन् प्रसङ्गे इदं रहस्यं निगूढतत्त्वं प्रणयात् त्वयि अनुरागाद् ब्रुवे कथयामि- इन्द्रियजा चक्षुरादीन्द्रियजन्या मतिः ज्ञानं फलतया तत्तदिन्द्रियकार्यतया इष्यते अङ्गीक्रियते। चक्षुषः कार्यं दर्शनम्, श्रोत्रेन्द्रियस्य कार्यं श्रवणम्। एवं च घ्राणत्वगादीनामपि तथा। किन्तु अनुमितिः समस्तजगद्धिताहितविवेकनिदानतया समग्रस्य संसारस्य हिताहितयोः विवेकस्य निदानतया कारणतया आदृता आदरयुक्ता। भवतीति शेषः। तद्विरहे जगतो हिताहितविवेको न कर्तुं शक्यत इत्यर्थः। यथा पुण्याधिक्ये जगतो हितानुमानं पापाधिक्ये च तदहितानुमानमिति।

अनुवाद - यहाँ यह रहस्य प्रणयपूर्वक बता रहा हूँ कि इन्द्रियजन्यज्ञान उन उन इन्द्रियों के फल के रूप में गृहीत होता है किन्तु अनुमिति समस्त संसार के हित और अहित के विवेक में कारण होकर आदृत होती है। प्रत्यक्ष से समस्त संसार का हिताहितविवेक संभव नहीं हो सकता।

।। ६१ ।।

अनुपलब्धिमतः प्रबलाऽनुमा
नियमतः स्वगुणेन विबाधते।
इतरथा गृहगो विपणौ सुता-
ननुपलभ्य कुतो न हि रोदिति ?।।

अन्वयः - अतः प्रबला अनुमा स्वगुणेन नियमतः अनुपलब्धिं विबाधते। इतरथा गृहगः विपणौ सुतान् अनुपलभ्य कुतः न हि रोदिति ?

गङ्गा - चार्वाकस्य स्वर्गाद्यनुपलब्धिसिद्धान्तमनुमानेन निराकर्तुमुपक्रमते- **अनुपलब्धीति-** अतः समस्तजगद्धिताहितविवेकनिदानतयादृतत्वात् प्रबलाऽनुमा सर्वेषु प्रमाणेषु बलवती अनुमितिः अनुपलब्धिमभावं स्वगुणेन स्वस्यादृष्टस्याऽपि ज्ञानकारणतागुणेन नियमतः नियमानुसारेण विबाधते तिरस्करोति। पर्वते वह्निमदृष्ट्वा प्रमाताऽनुमितिबलेन तमनुमिनोति। अतः स्वर्गादीनां या ह्यनुपलब्धिस्त्वयोक्ता

साऽप्यनुमानेन स्वर्गानुमित्या बाधिता भवति। तदेव दृष्टान्तेन समर्थयति– इतरथा अन्यथा गृहगः गृहे स्थितो जनः विपणौ सुतान् पुत्रान् अनुपलभ्य अप्राप्य, तत्र सुताभावं दृष्ट्वा कुतो न हि रोदिति। विपणौ येषां सुतानामभावस्तेषां गृहे सत्तामनुमीय स न रोदितीत्यर्थः। एवं प्रत्यक्षप्रमाणासिद्धं वस्त्वनुमानेन सिद्ध्यत्येवेति भावः।

अनुवाद – अतः समस्त संसार के हिताहित विवेक का कारण होने के कारण बलवती अनुमिति अपने गुण से नियमतः अनुपलब्धि को बाधित करती है। (प्रत्यक्षप्रमाण से जिस स्वर्ग आदि की अनुपलब्धि होती है, अनुमान से उनकी सिद्धि हो ही जाती है)। अन्यथा गृहस्थ जन बाजार में अपने पुत्रों को न देखकर क्यों नहीं रोता? (बाजार में पुत्रों की अनुपलब्धि का बाध गृहगत पुत्रों के अनुमान से हो जाता है)।

।। ६२।।

व्यवधितो यदि तत्र न योग्यता
न खलु साऽऽत्मनि बाह्यगुणोज्झिते।
स्फुरति स स्वयमेव सदेति तु
क्रमश एव शिशो! कथयिष्यते।।

अन्वयः – यदि व्यवधितः तत्र योग्यता न (अस्ति) सा खलु बाह्यगुणोज्झिते आत्मनि न (प्रभवति)। स सदा स्वयम् एव स्फुरति। हे शिशो! इति तु क्रमशः कथयिष्यते एव।

गङ्गा – आत्मनः प्रत्यक्षतां साधयन्नाह– **व्यवधित इति–** यदि व्यवधितः व्यवधानात्। अनुमायां साध्यस्य व्यवधानयुक्तत्वादित्यर्थः। यथा पर्वते वह्निः। तत्कारणात् तत्र अनुमायां साधनयोग्यता नास्ति। सा बाह्यवस्तुलिङ्गादिदर्शनेनैव साध्ये प्रवर्तते। अतः सा अनुमा बाह्यगुणोज्झिते लिङ्गादिगुणरहिते आत्मनि न प्रवर्तते। पूर्वपक्षमिमं खण्डयन्नाह– स आत्मा सदा स्वयमेव स्फुरति प्रत्यक्षतया भासते। 'अहमस्मि' इति प्रत्यक्षमेव तत्सिद्धौ प्रमाणम्। हे शिशो! कोमलमते चार्वाक! इति सर्वं क्रमशः यथाप्रसङ्गं कथयिष्यते निरूपयिष्यते। श्रुतिरप्याह– 'यत्साक्षादपरोक्षाद् ब्रह्म' (बृ. उ. ३.४.१)। अतो नात्मनः सिद्ध्यर्थमनुमानस्यावश्यकता, तस्य प्रत्यक्षेण सिद्धेः।

अनुवाद – यदि तुम यह मानो कि अनुमिति में साध्य के व्यवधान युक्त

होने के कारण उसमें बाह्य गुण से रहित आत्मा को सिद्ध करने की योग्यता नहीं है ? तो तुम्हारा यह कथन उचित नहीं है। वस्तुतः आत्मा का तो अनुमान ही नहीं होता वह तो नित्य है और स्वयं स्फुरित होता है। 'अहं अस्मि' रूप से उसका प्रत्यक्ष अनुभव होता है अतः आत्मा की सिद्धि में सहायक न होने से अनुमान अप्रमाण नहीं हो जाता। हे बालबुद्धि चार्वाक यह सब मैं आगे क्रमशः कहूँगा।

।। ६३ ।।

तदनुभूतिसुखस्पृहयालवः
सुकृतराशिवशात्कतिचिद् बुधाः ।
अपि महेन्द्रपदं विपदास्पदं
विगणयन्ति किमत्र महाद्भुतम् ? ।।

अन्वयः – तदनुभूतिसुखस्पृहयालवः कतिचिद् बुधाः सुकृतराशिवशात् महेन्द्रपदम् अपि विपदास्पदं विगणयन्ति। अत्र किं महाद्भुतम् ?

गङ्गा – तदनुभूतीतितदनुभूतिसुखस्पृहयालवः, तस्य परमात्मनोऽनुभूतिरनुभव एव सुखम् आनन्दस्तस्य स्पृहयालवः इच्छुकाः कतिचिद् बुधाः संसारस्य असारतातत्त्वज्ञानदक्षा मनीषिणः सुकृतराशिवशात् पुण्यसमूहकारणात् महेन्द्रपदम् अपि विपदास्पदं दुःखस्थानं विगणयन्ति विचारयन्ति। अत्र अस्मिन् विषये किं महाद्भुतम् ? महदाश्चर्यकरम् ? न किमपीत्यर्थः।

अनुवाद – उस परमात्मा के अनुभव का सुख चाहने वाले कुछ विद्वान् तो अपने पुण्यराशि के कारण महेन्द्र के पद को भी विपत्तियों का स्थान मानते हैं। इसमें इतना बड़ा आश्चर्य क्या है ?

।। ६४ ।।

तदिदमर्जनरक्षणसंक्षय–
क्षणजदुःखशतैरविदूषितम् ।
अपरतन्त्रमुपास्यमपास्य कः
क्षणिकमिच्छति वैषयिकं सुखम् ।।

अन्वयः – अर्जनरक्षणसंक्षयक्षणजदुःखशतैः अविदूषितं तत् इदम् अपरतन्त्रम् उपास्यम् अपास्य कः क्षणिकं वैषयिकं सुखम् इच्छति ?

गङ्गा – तदिदमिति– अर्जनरक्षणसंक्षयक्षणजदु:खशतै:, अर्जनम् एकत्रीकरणं, रक्षणं संरक्षणं, संक्षय: विनाश:, क्षणजं निमेषमात्रस्थायि चेति दु:खशतै: अविदूषितमस्पृष्टम्। अर्जनादौ भवति नानादु:खसमन्विति:। तथा हि अर्जनार्थमितस्ततो गमनम्, रक्षणार्थं चिन्ता। संक्षयात् पुनरप्राप्तिदु:खम्, क्षणजत्वात् भोगकालानन्तरं पुनरभोगस्थितिरिति बहुभि: दु:खै: विदूषितं भवति सांसारिकं वैषयिकं सुखम्। तैरर्जनादिभिरस्पृष्टं तदिदं मयाऽलिना प्रतिपाद्यमानम् अपरतन्त्रं स्वाधीनम् उपास्यम् उपासनीयं चित्सुखमपास्य परित्यज्य संसारेऽस्मिन् क: क्षणिकं क्षणमात्रस्थायि वैषयिकं दारापुत्रादिजन्यं सुखमिच्छति? न कोऽपीत्यर्थ:। ब्रह्मानन्दस्य सुकृतराशिवशात्प्राप्तेस्तस्यापारतन्त्र्यम् अविनाशित्वाच्चोपास्यत्वं निर्दिष्टम्।

अनुवाद – वैषयिक सुख एकत्रीकरण, रक्षण, संक्षय और क्षणिकता आदि अनेक दु:खों से दूषित है। जब कि ब्रह्मानन्द इन दु:खों से अस्पृष्ट ही रहता है। ऐसे अपरतन्त्र और उपास्य मेरे द्वारा प्रतिपाद्यमान इस चित्सुख को छोड़कर भला कौन क्षणिक विषयसुख को चाहेगा?

।। ६५ ।।

न च सुखत्वबलेन विनाशिता–
ऽत्र भवता प्रतिपादयितुं क्षमा।
ध्रुवमुपाधिरिहास्ति तु जन्यता
न जनिमद्धि चिदात्मसुखं मतम्।।

अन्वय: – भवता च सुखत्वबलेन अत्र विनाशिता प्रतिपादयितुं न क्षमा। इह तु ध्रुवं जन्यता उपाधि: अस्ति। हि चिदात्मसुखं जनिमत् न मतम्।

गङ्गा – न चेति– भवता विलासिना सुखत्वबलेन, ब्रह्मसुखे वैषयिकसुखे चोभयत्र सुखत्वस्य विद्यमानत्वात्। वैषयिकं सुखं क्षणिकत्वाद् दु:खवदित्यस्मात् सुखत्वावच्छिन्नत्वात् चिदात्मसुखमपि तथेति तर्कबलेन विनाशिता अत्र ब्रह्मसुखे प्रतिपादयितुं न क्षमा, न योग्या, विनाशस्तूत्पन्नपदार्थस्य भवति। ब्रह्मसुखं तु न परमात्मभिन्नं तस्य सुखस्वरूपत्वात्। अस्मिन् सुखे जन्यता उपाधिरेव भवति। तस्यावृतत्वाद् आवरणभङ्गे जन्यत्वं भवति, चिदात्मसुखे तु तज्जन्यत्वमुपचर्यते। वस्तुतस्तु स आनन्दो नित्य एव। आवरणभङ्गोपाधिरेवाऽत्र जन्यतारूपेण प्रतिभासते। चिदात्मसुखं जनिमत् उत्पत्तिमन्न भवति नित्यत्वात्। तथात्वं तु वैषयिकसुख एव

भवति। तथा च श्रुतिरप्याह– 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' (तै. ३.६)। तदेतदेवोपजीव्य पञ्चदश्यां विद्यारण्येनाऽप्युक्तम्–

आनन्दादेव तज्जातं तिष्ठत्यानन्द एव तत्।
आनन्द एव लीनं चेत्युक्तानन्दात् कथं पृथक्।। (पञ्चदश्याम्,१३.३)

अनुवाद – सुखत्व के आधार पर तुम इस चिदात्मसुख में विनाश का प्रतिपादन नहीं कर सकते। क्योंकि ब्रह्मसुख में जन्यता तो उपाधि ही हुआ करती है। वह वास्तविक नहीं होती। चिदात्मसुख उत्पत्ति और विनाशशील नहीं होता। वह तो नित्य है।

टिप्पणी – विलासी वैषयिकसुख और ब्रह्मसुख दोनो में ही सुखता को देखकर ब्रह्मसुख को भी वैषयिक सुख की भाँति विनाशी कह सकता है। विलासी ने पूर्व में 'यदि च वैषयिके सकले सुखे (२.१०) इत्यादि पद्य में इस तथ्य को प्रस्तुत भी किया है। इस पर कवि का कथन है कि सुखत्व के उभयत्र समान होने पर भी चिदात्मसुख को विनाशशील नहीं माना जा सकता क्योंकि वह नित्य है। जन्यता तो उसकी उपाधि है। आवरणभङ्ग की जन्यता ही उसमें उपचरित होती है।

।। ६६ ।।

अनुभवो हि सुखं रतिरोषयो–
रजनकं भवतीति पुरोदितम्।
अभिदयाऽऽत्मनि चित्सुखयोर्न सा
कथमपि प्रसरिष्यति जन्यता।।

अन्वयः – अनुभवः सुखं हि रतिरोषयोः अजनकं भवति, इति पुरा उदितम्। आत्मनि चित्सुखयोः अभिदया सा जन्यता कथमपि न प्रसरिष्यति।

गङ्गा – चित्सुखयोरभेदं निरूपयति– **अनुभव इति–** अनुभवः सुखं हि अनुभूयमानं सुखं चिदात्मसुखं रतिरोषयोः रतिः प्रेमा, रोषः क्रोधश्च तयोः अजनकं जनकं न भवति इति मया अलिना पुरा पूर्वम् उदितं कथितम्। चित्सुखयोः आत्मानन्दयोः अभिदया अभेदेन, अभिन्नत्वादिति यावत्। सा जन्यता जन्यस्य भावः अस्मिन् सुखे कथमपि न प्रसरिष्यति विस्तृतिं प्राप्स्यति। जन्म तु भिन्नवस्तुनो भवति। चित्सुखात्मकत्वं तु आत्मनः स्वभाव एवेति न तत्र तयोर्जन्यताप्रसङ्ग इत्यर्थः। आत्मा सच्चिदानन्दस्वरूपोऽस्ति। कालत्रयेऽपि तिष्ठतीति सत्। अर्थात् अनृतशून्यव्यावृत्तं

बाधाभावोपलक्षितस्वरूपसत्ताकं सत्। सच्छब्देन आत्मनो नित्यत्वमुक्तं भवति। कठोपनिषदि तदिदं तथ्यं विस्तरेण प्रतिपादितम्–

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।१.२.१८

गीतायामपि तथ्यमिदमुक्तमेव (२.२०)। एवमेव चिद्रूपताप्यात्मनोऽस्य वेदान्ते बहुत्र प्रतिपादिता। स्वप्रकाशचित्स्वरूपत्वमेव चिच्छब्देनोच्यते। 'तदेव ज्योतिषां ज्योतिः (बृ. उ. ४.४.१६), तस्य भाषा सर्वमिदं विभाति। (कठ. २.२.१५) इत्यादिश्रुतिवचनेषु आत्मनः स्वप्रकाशता निरदेशि। विज्ञानमानन्दं ब्रह्म (बृ. उ. ३.९.२८), आनन्दरूपममृतं यद्विभाति (मुण्डके २.२.७) तथा आनन्दो ब्रह्मेति व्यजानात् (तैत्ति. ३.६.१) इत्यादिश्रुतिषु तस्यानन्दरूपता प्रत्यपादि। अतो न आत्मनो जन्यताप्रसङ्गः। तन्निरतिशयसुखस्वरूपतैव। न तत्र आनन्दो जन्यः। तदेतत् सप्रमाणं व्याख्यातं विद्यारण्येन। तथा च तत्र तन्निकर्षः–

तत्प्रेमात्मार्थमन्यत्र नैवान्यार्थमात्मनि।
अतस्तत्परमं तेन परमानन्दतात्मनः।। पञ्चदश्याम्, १.१९।।

अतः पूर्वपक्षिणः शङ्का स्वयमेव निरस्तेति।

अनुवाद – अनुभूयमान सुख रति और रोष का जनक नहीं होता, यह पहले ही कहा जा चुका है। आत्मा में चित् और सुख का अभेद होने से वहाँ उनकी जन्यता का प्रसार नहीं होगा। आहृत एवं अनित्य धर्म ही जन्य होते हैं। चित् और सुख तो आत्मा के स्वरूप हैं, अतः उनकी जन्यता का प्रसंग ही उपस्थित नहीं होता।

।। ६७।।

अखिलमानबलैरपसारणं
क्रियत आवरणस्य न चिज्जनिः।
त्वमत एव विदन्निह नित्यतां
जहिहि दुःखसमागमभीरुताम्।।

अन्वयः – अखिलमानबलैः आवरणस्य अपसारणं क्रियते। चिज्जनिः न (भवति)। अत एव त्वम् इह नित्यतां विदन् दुःखसमागमभीरुतां जहिहि।

गङ्गा – पुनश्चिद्रूपतां द्रढयति– **अखिलमानेति**– अखिलमानबलैः निखिलप्रमाणसाधनैः आवरणस्य अविद्याजन्याच्छादकतत्त्वस्य अपसारणं क्रियते अपाक्रियते। तद्दूरीक्रियत इत्यर्थः। चिज्जनिः स्वप्रकाशस्य उत्पत्तिर्न भवति। अत एव हे विलासिन्! त्वम् इह चिदात्मसुखे नित्यतां विदन् जानन् दुःखसमागमभीरुतां, सुखत्वसामान्येनाऽत्र वैषयिकसुखवद्दुःखोत्पत्तिभयं जहिहि परित्यज। आवरणभङ्ग एवेह उपचारतः चित्सुखमुत्पन्नमिति रूपेणोपचर्यते। तन्न वास्तविकम्। तदेतद् भृशं प्रपञ्चितं रसगङ्गाधरादौ पण्डितराजेन श्रुतिप्रामाण्यात्। उपनिषदादौ तुं सर्वमिदं प्रसिद्धमेव।

अनुवाद – अनेक प्रमाणों से आवरण का ही अपसारण किया जाता है। वास्तव में 'चित्' (आत्मा की स्वप्रकाशरूपता) जन्य नहीं है। इसलिए हे विलासी! तुम इस चित्सुख की नित्यता समझो और इसमें दुःखोत्पत्ति के भय को छोड़ दो।

।। ६८।।

अपि निसर्गत एव सुखात्मिका
करणजन्यतया प्रतिसंहिता।
विषयदोषविषैः कलुषा चितिः
सृजति दुःखमियं तु न तादृशी।।

अन्वयः – निसर्गत एव सुखात्मिका अपि करणजन्यतया विषयदोषविषैः प्रतिसंहिता कलुषा चितिः दुःखं सृजति। (वस्तुतः) इयं तु तादृशी न (अस्ति)।

गङ्गा – अपि निसर्गत इति– निसर्गत एव स्वभावादेव। 'निसर्गः सृष्टौ स्वभावे च' इति हैमः। सुखात्मिका सुखस्वरूपा अपि करणजन्यतया इन्द्रियजन्यतया। यद्यप्यात्मा नित्यस्तथापीन्द्रियाणि भवन्ति तदभिव्यक्तिकारणानि। सैवेन्द्रियाभि-व्यञ्जकतेह जन्यतया निरूपिता। करणजन्यतया विषयदोषविषैः तत्तदिन्द्रियविषयाणां दोषरूपविषैः प्रतिसंहिता सम्बद्धा। कलुषा, विषयदोषसंसर्गादनिर्मला चितिः दुःखं सृजति, रचयति। तत्तदिन्द्रियविषयरागात् कष्टं जनयतीत्यर्थः। इयं चितिः निसर्गतस्तु न तादृशी। शुद्धबुद्धस्वभावेयमानन्दात्मिकैवेत्यभिप्रायः। तदिदम् 'आनन्दो ब्रह्मेति व्यजानात्' इत्यादिश्रुतिषु प्रसिद्धमेव।

अनुवाद – यह चिति स्वभाव से सुखात्मक होती हुई भी इन्द्रियों से अभिव्यक्त होने के कारण विषयदोष रूप विष से सम्बद्ध हो जाती है और दुःख की

सृष्टि करती है। वस्तुतः यह दुःखजनक नहीं है। इसका स्वरूप आनन्दात्मक है। 'आनन्दो ब्रह्मेति व्यजानात्' इत्यादि श्रुतियाँ इसमें प्रमाण हैं।

।।६९।।

विषयजन्मनि दुःखमवारितं
समवधार्य बुधा बलवत्तरम्।
जहति तत्सुखमिष्टमनास्थये-
त्यनुमतं नयविद्भिरिदं मतम्।।

अन्वयः – बुधाः विषयजन्मनि बलवत्तरम् अवारितं दुःखं समवधार्य तत् इष्टं सुखम् अनास्थया जहति। इति नयविद्भिः इदं मतम् अनुमतं (विद्यते)।

गङ्गा – विषयजन्मनीति– बुधा विद्वांसः विषयजन्मनि कामादिभोगविषयजनौ बलवत्तरमवारितं वारणाऽयोग्यं दुःखं समवधार्य निश्चीय तत् इष्टमभीष्टं सुखम् अनास्थया अश्रद्धया जहति परित्यजन्ति। अभीष्टमपि तत्सुखं विद्वांसः परित्यजन्तीति नयविद्भिः नीतिविज्ञैः इदं मतमनुमतम्। भोगतपश्चर्ययोर्नीतौ दक्षैः विद्वद्भिस्तथा कर्तुमनुमन्यत इति भावः।

अनुवाद – विद्वान् लोग विषयों के जन्म से बलवान् और अवारणीय दुःख का निश्चय करते हैं और अपने अभीष्ट सुख का भी अनास्था से परित्याग कर देते हैं। नीतिविदों के द्वारा भी यह सिद्धान्त अनुमत है।

।।७०।।

न हि विषेण विमिश्रितमोदनं
हृदयमोदनमप्यवधीरयन्।
निपुणसंसदि कोऽपि विगीयते,
विषयजं सुखमीदृशमीक्ष्यते।।

अन्वयः – कोऽपि हृदयमोदनम् अपि विषेण विमिश्रितम् ओदनम् अवधीरयन् निपुणसंसदि न विगीयते। हि विषयजं सुखम् ईदृशम् ईक्ष्यते।

गङ्गा – न हि विषेणेति– कोऽपि जनः हृदयमोदनम् अपि हृदयानन्दकरमपि विषेण विमिश्रितं गरलेन एकीकृतम् ओदनं तण्डुलपाकम् अवधीरयन् तिरस्कुर्वन् निपुणसंसदि विद्वत्सभायां न विगीयते न निन्द्यते। हि निश्चयेन विषयजं कामादिजन्यं सुखम् ईदृशं विषमिश्रितौदनसदृशम् ईक्ष्यते दृश्यते, स्वीक्रियत इत्यर्थः। एतेन

विषयजन्यसुखपरित्यागो निर्दिष्टः।

अनुवाद – कोई भी हृदय को आनन्द देने वाले किन्तु विष से मिश्रित भात का तिरस्कार करता हुआ भी विद्वानों की सभा में निन्दित नहीं होता। विषयजन्य सुख भी इसी प्रकार देखा जाता है। वह हृदय को आनन्द देने वाले विष मिश्रित भात की तरह है, अतः उसका परित्याग कर देना चाहिए।

।। ७१ ।।

ज्वरयुतः शिशिराम्बु सुखं विद-
न्नपि भिषग्वचनाद्विनिवर्तते।
त्यजतु सौख्यकरेऽपि तथा भवान्
कुचरिते दुरुदर्कफले स्पृहाम्।।

अन्वयः – शिशिराम्बु सुखं विदन् अपि ज्वरयुतः भिषग्वचनाद्विनिवर्तते। तथा भवान् अपि सौख्यकरे दुरुदर्कफले कुचरिते स्पृहां त्यजतु।

गङ्गा – ज्वरयुत इति– शिशिराम्बु शीतलं जलं सुखम् आनन्दकरं विदन् जानन् अपि ज्वरयुतः ज्वररोगेण पीडितो जनः भिषग्वचनाद् वैद्यनिर्दिष्टपथ्यनियमात् तादृशजलसेवनाद् विनिवर्तते निवृत्तो भवति। तथा कृत्वा सुखं च प्राप्नोति। 'अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशंबरम्' इत्यमरः। 'रोगहार्यगदङ्कारो भिषग्वैद्यौ चिकित्सकौ' इत्यमरः। यथा ज्वरग्रस्तो वैद्यवचनात् शीतलजलपाने प्रवृत्तो न भवति तथैव भवान् चार्वाकोऽपि मम अलेः वचनात् सौख्यकरे क्षणिकसुखोत्पादके, दुरुदर्कफले, 'उदर्कः फलमुत्तरम्' इत्यमरः। कुत्सित्तोत्तरपरिणामे वैषयिकसुखोप-भोगरूपे कुचरिते दुराचरणे स्पृहां समीहां त्यजतु। चिदात्मसुखे आदरवान् भवत्वित्याशयः।

अनुवाद – शीतलजल के आनन्द को जानता हुआ भी ज्वर से पीड़ित व्यक्ति जैसे वैद्य के वचन से शीतल जल का पान नहीं करता। उसी प्रकार मुझ अलि के वचन से तुम भी क्षणिक सुखोत्पादक, कुत्सित उत्तर परिणाम वाले कुचरित में इच्छा का परित्याग करो। यह कुचरित दुरुदर्कफल (बाद में दुष्परिणाम कारक) है।

।। ७२।।

अपलपामि सुखं न हि साम्प्रतं
परिणतिः कटुकेति वदामि चेत्।
न हि विबाध्यत इन्द्रियजा मति-
स्तदुपजीव्यतया न जयस्तव।।

अन्वयः – परिणतिः कटुकेति वदामि चेत् साम्प्रतं सुखं न हि अपलपामि। इन्द्रियजा मतिः न हि विबाध्यते (किन्तु) तदुपजीव्यतया तव जयः न (भविता)।

गङ्गा – अपलपामीति– सुखस्य परिणतिः कटुका कटुस्वादुपूर्णा दुरुदर्कफला भवतीति वदामि उपदिशामि चेत् साम्प्रतं सुखं न हि अपलपामि ,न निन्दामि। यद्यपि इन्द्रियजा मतिः त्वदभीष्टं प्रत्यक्षज्ञानं केनाऽप्यनुमानादिप्रमाणेन न विबाध्यते। प्रधानत्वात् न किमपि प्रमाणं प्रत्यक्षज्ञानस्य प्रतिबन्धकं भवतीति सत्यं किन्तु तदुपजीव्यतया तस्याः इन्द्रियजन्यायाः प्रत्यक्षप्रमितेः उपजीव्यतया आश्रयेण तव जयो न भविता। न हि प्रत्यक्षमात्रेण व्यवहारः प्रचलतीति तच्छरणमात्रेण ते विजयो न भविष्यतीत्यर्थः।

अनुवाद – मैं सुख की परिणति को कटु बता रहा हूँ, इसका अर्थ यह नहीं कि मैं उचित सुख का अपलाप कर रहा हूँ। प्रत्यक्ष प्रमाण किसी भी प्रमाण के द्वारा बाधित नहीं होता, यह सत्य है किन्तु उसकी उपजीव्यता से तुम्हें विजयप्राप्ति नहीं हो सकती। प्रत्येक वस्तु प्रत्यक्ष प्रमाण से सिद्ध नहीं होती। स्वर्गादि की सिद्धि के लिए अनुमान का आश्रय तो लेना ही पड़ता है। अतः प्रत्यक्ष प्रधान होकर भी बलवान् प्रमाण नहीं है।

।। ७३।।

विमलचित्सुखलाभकृते तनुं
श्रममपास्य महान्तमवन्ति ये।
तदधिकानुपयोगदुरन्तता-
श्रमविदस्त इमे नयवित्तराः।।

अन्वयः – विमलचित्सुखलाभकृते तनुं श्रमम् अपास्य ये महान्तं (श्रमम्) अवन्ति ते इमे तदधिकानुपयोगदुरन्तताश्रमविदः नयवित्तराः (भवन्ति)।

गङ्गा–विमलेति–विमलचित्सुखलाभकृते विमलस्य शुद्धबुद्धस्वभाव-निर्मलस्य चित्सुखस्य लाभाय तनुं लघुं श्रमं परिश्रमम् अपास्य परित्यज्य।

चित्सुखापेक्षया वैषयिकसुखलाभाय लघुश्रमोऽपेक्षितो भवति तथापि तदनादृत्य ये महापुरुषाः महान्तं श्रमम् अवन्ति, ते तपश्चर्यादिभिः विमलसुखस्य लाभार्थं प्रयतमाना योगिनः तदधिकानुपयोगदुरन्तताश्रमविदः तस्य श्रमस्य अधिकानुपयोगदुरन्तताश्रमविद आधिक्येन अनुपयोगस्य या दुरन्तता तस्याः श्रमवेत्तारः। श्रमस्याधिकानुपयोगेन वैषयिकसुखलाभे सत्यपि न तत्सुखं चिरस्थायि। कालान्तरे च दुःखजनकमिति तादृशसुखस्य दुरन्ततायाः दुःखपरिणतेः श्रमवेत्तारो नयविदो भवन्ति। कृते महति प्रयासे यदि नित्यसुखलाभस्तर्हि महान् श्रम एव करणीयो न तु तनुः श्रम इत्यर्थः।

अनुवाद – जो निर्मल चित्सुख के लाभ के लिए लघुतम श्रम को छोड़कर महान् श्रम की रक्षा करते हैं, अर्थात् उपासना आदि के द्वारा निर्मल चित्सुख को प्राप्त करते हैं। उस महान् श्रम के अधिक अनुपयोग से अर्थात् स्वल्पश्रम के उपयोग से प्राप्त होने वाले वैषयिक सुख की दुरन्तता को जानने वाले वे ही योगीजन नयवेत्ता होते हैं।

।।७४।।

किमु न पश्यसि निर्मलमाधुरी–
सुभगशीतलवारियुतापगाः।
प्रतिदिशं सुलभाः परितृप्तये,
फलभरानमितानमितांस्तरून्?।।

अन्वयः – परितृप्तये प्रतिदिशं सुलभाः निर्मलमाधुरीसुभगशीतलवारियुतापगाः, फलभरानमितान् अमितान् तरून् (च) किमु न पश्यसि?

गङ्गा – किमु नेति– परितृप्तये सन्तोषाय प्रतिदिशं दिशं दिशं प्रति सुलभाः सम्प्राप्ताः निर्मलमाधुरीसुभगशीतलवारियुतापगाः निर्मलेन माधुर्या सुभगेन शीतलेन च वारिणा युता आपगाः, स्वच्छमधुरशीतलजलेन च परिपूर्णा नद्यः। 'स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा' इत्यमरः। फलभरानमितान् फलानां भरेण सम्यक्तया नम्रान् अमितान् विशालान् तरून् च किमु न पश्यसि दृष्टिविषयान् न करोषि?

अनुवाद – सन्तोषप्राप्ति के लिए तुम प्रत्येक दिशाओं में सुलभ, स्वच्छ माधुर्य तथा ऐश्वर्यशाली शीतल जल से परिपूर्ण नदियों को तथा फल के भार से झुके हुए विशाल वृक्षों को क्यों नहीं देखते?

।। ७५ ।।

प्रतिपुरं धनिनो निजपोषणो-
र्वरितमन्नमकिञ्चनराजये।
ददति येन विना श्रममाप्यते
स्वतनुपालनमुच्चसुखं च तत्।।

अन्वयः - धनिनः प्रतिपुरं निजपोषणोर्वरितम् अन्नम् अकिञ्चनराजये ददति। येन श्रमं विना स्वतनुपालनम् आप्यते। तच्च उच्चसुखम् (अस्ति)।

गङ्गा - प्रतिपुरमिति- धनिनः धनवन्तः पुरुषाः प्रतिपुरं प्रतिनगरं निजपोषणोर्वरितं स्वपोषणेन वपनजलप्रदानरक्षणादिना उर्वरितम् उर्वराशक्तिसम्पन्नम्, अथवा स्वपोषणाद् अवशिष्टम् अन्नम् अकिञ्चनराजये दरिद्रसमूहाय विरक्ताय वा ददति प्रयच्छन्ति। येन अनेन श्रमं परिश्रमं विना दरिद्रसमूहेन स्वतनुपालनं निजशरीरसंरक्षणम् आप्यते प्राप्यते। तच्च तेषां धनिनां कृते उच्चसुखं च परितृप्तिर्विद्यते। यद्वा दानेन तेन दरिद्रराजेः स्वतनुपालनम् आत्मानन्दश्च लभ्यते तेषां धनिनां कृते आत्मानन्दो विद्यते।

अनुवाद - धनीजन प्रत्येक नगर में अपने पोषण से उर्वरित अन्न का दान दरिद्रसमूह या विरक्त समूहके लिए करते हैं। जिससे दरिद्रसमूह अपने शरीर की रक्षा करता है। वही उन धनीजनों के लिए तथा अकिञ्चन जनों के लिए परमसुख है।

।। ७६ ।।

न हि विचार उदेत्ययमश्रुतो-
पनिषदां गुरुवागवमानिनाम्।
उपरतेष्वखिलेषु कथं भवे-
दिति न भीस्तत एव विवेकिनाम्।।

अन्वयः - अयं विचारः अश्रुतोपनिषदां गुरुवागवमानिनां न हि उदेति। अखिलेषु उपरतेषु (तत्) कथं भवेत् (इति) तत एव विवेकिनां भीः न (भवति)।

गङ्गा - नहि विचार इति- अयं निजपोषणोर्वरितान्नस्य दानविषयको विचारः अश्रुतोपनिषदाम् उपनिषत्तत्त्वश्रवणरहितानां गुरुवागवमानिनां तिरस्कृतगुरुवचनानां भवादृशां न उदेति न जायते। श्रुतोपनिषदां गुरुवचनश्रद्धावतामेव तज्जनिरित्यर्थः। उपरतेषु अखिलेषु मृतेषु सर्वेषु दानदातृषु तदुच्चसुखं कथं भवेत्। तत एव

उपनिषज्ज्ञानादेव विवेकिनां विद्यावतां ज्ञातोपनिषत्तत्त्वानां गुरुवचनश्रद्धावतां भीः भयं न भवति।

अनुवाद – दानविषयक यह विचार गुरुवचनों की अवमानना करने वाले उपनिषत्तत्त्वों को न जानने वाले लोगों में उत्पन्न नहीं होता। उन समस्त दानदाताओं के उपरत हो जाने पर वह परम सुख कैसे होगा ? उस उपनिषद् ज्ञान से ही विवेकी जनों को कोई भय नहीं होता।

।। ७७ ।।

प्रशमिहालिकभूपमतैक्यतः
स्वतनुपालनमात्रमपेक्ष्यते।
तदितरत्तु जनो निजवासना–
ऽनुगुणमिच्छति भूरिविधं फलम्।।

अन्वयः – प्रशमिहालिकभूपमतैक्यतः स्वतनुपालनमात्रम् अपेक्ष्यते। जनः तु निजवासनाऽनुगुणं भूरिविधं तदितरत् फलम् इच्छति।

गङ्गा – प्रशमिहालिकेति– प्रशमिहालिकभूपमतैक्यतः, प्रकृष्टः शमः प्रशमः। प्रशमोऽस्ति अस्य स प्रशमी। हालिकश्च भूपश्च हालिकभूपौ। प्रशमिनौ च तौ हालिकभूपौ प्रशमिहालिकभूपौ। तयोः मतैक्यतः विचारैक्यात्। वीतरागयोः कृषकनरेशयोः विचारैक्यात् स्वतनुपालनमात्रं निजशरीरपोषणमात्रमपेक्ष्यते काम्यते। न किञ्चिदपि तदन्यदिति भावः। जनः समाजस्तु निजवासनानुगुणं स्वसंस्कारानुरूपं भूरिविधं बहुप्रकारकं तदितरत् स्वतनुपालनमात्रतो भिन्नं फलं परिणतिम् इच्छति वाञ्छति।

अनुवाद – वीतरागी कृषक और राजा के मतैक्य से अपने शरीर के पालनमात्र की अपेक्षा की जाती है। जनता तो अपने वासना के अनुरूप अनेक प्रकार के तद्भिन्न फल की कामना करती है।

।। ७८ ।।

युधि नृपो विजयं मृतिमेव वा–
ऽब्धिषु लयं मणिलाभमथो वणिक्।
रतिमथापि मृतिं किल कामुको
लषति कुत्र मतैक्यमवेक्ष्यते ?।।

अन्वयः – नृपः युधि विजयं मृतिम् एव वा, अब्धिषु वणिक् मणिलाभम् अथो लयं, कामुकः रतिम् अथापि मृतिं किल लषति। कुत्र मतैक्यम् अवेक्ष्यते ?

गङ्गा – युधीति– नृपो राजा युधि संग्रामे विजयं मृतिं मृत्युं वा वाञ्छति, अब्धिषु समुद्रेषु रत्नान्वेषणाय गतो वणिक् मणिलाभं लयं वा वाञ्छति, कामुकः रतिं तदलाभे मृतिं किल लषति इच्छति। इह संसारे सर्वेषां भिन्नभिन्नविषयेषु भिन्नभिन्नानुरागो वर्तते। समीहितवस्त्वलाभे मृतिस्तु सर्वैरपेक्ष्यते। कुत्रापि मतैक्यं विचारैक्यतां न अवेक्ष्यते, दृश्यते।

अनुवाद – राजा संग्राम में विजय या मृत्यु चाहता है, समुद्रों में वणिक् रत्नलाभ या मृत्यु चाहता है, इसी प्रकार कामुक रति या मृत्यु चाहता है। मतैक्य तो कहीं नहीं दिखाई पड़ता।

।। ७९ ।।

गतविवादमतस्तनुरक्षणं
तदितरत्र कलिर्दुरपह्नवः।
तदिह सर्वमतैक्यपथाश्रयः
शमवता सुलभो न विलासिना।।

अन्वयः – अतः तनुरक्षणं गतविवादं (विद्यते)। तदितरत्र कलिः दुरपह्नवः (अस्ति)। तत् इह शमवता सर्वमतैक्यपथाश्रयः सुलभः न तु विलासिना।

गङ्गा – गतविवादमिति– अतः उपर्युक्तकारणात् तनुरक्षणं शरीरक्षा गतविवादं गतो विवादो यस्मात् तादृशं विद्यते। तनुरक्षणे कोऽपि विवादो नाऽस्ति। तत्तु करणीयमेव। तदितरत्र तनुरक्षणतो भिन्नस्थले कलिः कलहः।'कलिः स्त्री कलिकायां ना शूराजिकलहे युगे' इति मेदिनी। दुरपह्नवः दुःखेन अपह्नवयोग्यो भवति। तत् तस्मात् इह अस्मिन् विषये शमवता निर्वेदशालिना सर्वमतैक्यपथाश्रयः सर्वाभिमतमार्गावलम्बः सुलभः, न तु विलासिना। विषयभोगलिप्सुना तादृशमार्गाश्रयो न सुलभ इत्यर्थः।

अनुवाद – अतः शरीर की रक्षा में कोई विवाद नहीं है। शरीररक्षण से अतिरिक्त विषयों पर कलह होना स्वाभाविक है। इसलिए शमवान् तो सभी को अभिमत किसी एक पथ का सहारा ले सकता है किन्तु विषयवासना से अतृप्त के लिए ऐसा करना संभव नहीं।

।। ८० ।।

तनुसुखं शमिनां न च केवलं
तनुलये सति चित्सुखसंस्कृतेः।
अविरतेरनुभूतिसुखं ध्रुवं
प्रथत इत्यफलो न शमादरः।।

अन्वयः – शमिनां च केवलं तनुसुखं न (भवति) तनुलये सति चित्सुखसंस्कृतेः अविरतेः अनुभूतिसुखं ध्रुवं प्रथते इति शमादरः अफलः न (भवति)।

गङ्गा – तनुसुखमिति– शमिनां वीतरागिणां केवलं तनुसुखं शरीरगतानन्द एव न भवति। 'तनुः काये त्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे' इति मेदिनी। तनुलये शरीरस्य विनाशानन्तरं चित्सुखसंस्कृतेः चित्सुखसंस्कारस्य अविरतेः अनुगतेः सातत्याद् वा अनुभूतिसुखमात्मसुखं ध्रुवं निश्चयेन प्रथते तनुते। तत्र श्रुत्यादीनां प्रामाण्याद् ध्रुवमिति पदोपादानम्। इति इत्यस्मात् कारणात् शमादरः शमस्य निर्वेदस्य आदरः अफलः फलरहितो न। तेनैव नित्यसुखस्य प्रतीतिरिति भावः।

अनुवाद – वीतरागी जनों को केवल शरीरसुख ही नहीं प्राप्त होता। अपितु शरीर का लय होने के अनन्तर चित्सुख (चिदानन्द)के संस्कार की अविरति से उन्हें अनुभूति सुख अवश्य ही प्राप्त होता है। अतः शम का आदर करना निष्फल नहीं है।

।। ८१ ।।

विवदसे यदि देहलये कथं
चितिसुखे तनुमात्रकृते इति।
स्वपनकालभवानुभवेक्षया
विरम संस्कृतिमात्रभवो हि सः।।

अन्वयः – यदि देहलये तनुमात्रकृते चितिसुखे कथं (भवतः) इति विवदसे (तर्हि) स्वपनकालभवानुभवेक्षया विरम। स हि संस्कृतिमात्रभवः (भवति)।

गङ्गा – विवदस इति– यदि नाम चार्वाकस्त्वं देहलये देहविनाशे सति तनुमात्रकृते शरीरमात्रसम्पादिते चितिसुखे चितिश्च सुखं चेति चैतन्यानन्दौ कथं भवतः इति विवदसे, विवादं कुरुषे। पूर्वपक्षिणो मते चैतन्यं सुखं चेत्युभयमपि तनुमात्रकृतं भवति। तन्मते शरीरमेव चैतन्यं तदेव च सुखवद् भवति। अतो

देहविनाशानन्तरं न तन्मते चितिसुखयोः प्रसत्तिः। इदमेव विवादस्य कारणम्। तदेव स्वप्ननिदर्शनेन निराकरोति। स्वपनकालभवानुभवेक्षया, स्वपनमिति स्वप्धातोर्ल्युटि रूपम्। स्वप्नकाले निद्रावस्थायां भवस्य उत्पन्नस्य अनुभवस्य ईक्षया ईक्षणेन विरम, विरतो भव। स्वप्नकाले यो हि सुखदुःखयोरनुभवो जायते तत्रापि शरीरस्य हेतुता न भवति। निद्रामग्ने शरीरे स्वप्नावस्थायां सुखदुःखयोः कस्यचिद्वस्तुविशेषस्य वा प्रतीतिर्जायते, तमनुभवं भवानपि स्वीकरोति। वस्तुतो न तत्र भवति तनोः कारणता अपितु स अनुभवः संस्कृतिमात्रभवः संस्कारमात्रजन्यो भवति। स स्वप्नावस्थाशब्दवाच्यो बुद्धेर्विषयाकारः परिणामः। तथा च बृहदारण्यके प्रतिपादितम् 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ (४.३.१०)। यथा स्वप्नेऽनुभूतविषये तनोर्निमित्तता न भवति तथैव चिदानन्देऽपि। यदि त्वया स्वप्नकालजन्यानुभवः स्वीक्रियते तर्हि तनुलये चित्सुखयोः स्थितिरपि स्वीकरणीयेत्यर्थः।

अनुवाद – अगर तुम देहविनाश के अनन्तर शरीरमात्र के द्वारा सम्पादित चैतन्य और सुख के विषय में विवाद करते हो तो स्वप्नकाल के अनुभवों को देखना बन्द कर दो। क्योंकि स्वप्नमें होने वाले अनुभव में शरीर की निमित्तता नहीं होती। वह तो संस्कारमात्र से उत्पन्न होता है। स्वप्नकालिक अनुभव तुम्हें स्वीकार है, अतः देहलय के अनन्तर चित् और सुख की स्थिति भी माननी ही पड़ेगी।

।।८२।।

भवतु नाम बहिःस्थितवस्तुनो-
ऽनुभवने स्वतनोरपि हेतुता।
अनुभवे सकले न हि तावता
तनुनिमित्तकता व्यभिचारतः।।

अन्वयः – बहिःस्थितवस्तुनः अनुभवने स्वतनोः अपि हेतुता भवतु नाम। व्यभिचारतः सकले अनुभवे तावता तनुनिमित्तकता न हि (भवति)।

गङ्गा – सर्वत्र तनुनिमित्ततां वारयन्नाह– **भवतु नामेति**– बहिःस्थितवस्तुनः भूतलादौ स्थितस्य घटादिपदार्थस्य अनुभवने ज्ञाने स्वतनोः निजशरीरस्य चक्षुरादिमाध्यमेन हेतुता कारणता भवतु नाम। न तत्र मम विप्रतिपत्तिः। किन्तु व्यभिचारतः व्यभिचारदोषात् सकले अनुभवे समस्तेऽपि ज्ञाने तावता तनुनिमित्तकता न हि भवति। चिदादीनां ज्ञानं तथैव स्वप्ने दृष्टवस्तूनां ज्ञानं तनोर्निमित्ततां विनैव भवति। अतो न सर्वत्र शरीरस्य कारणताऽपेक्ष्यते।

अनुवाद – बाहर भूतल आदि में स्थित वस्तु के ज्ञान में प्रमाता के शरीर की कारणता भले ही रहे किन्तु व्यभिचार दोष के कारण समस्त अनुभव में शरीर की कारणता नहीं मानी जा सकती। जैसे स्वप्न में सुख दु:ख का अनुभव शरीर की कारणता के बिना होता है उसी प्रकार चित्सुख की अनुभूति भी शरीर की कारणता के बिना ही होती है।

।।८३।।

अनुसरन्तु पथो विविधान् जडा
निजपुराकृतकर्मनियन्त्रिता:।
क्षतिलवोऽपि न मे तदविद्यया
किमितरागसि कोऽपि निबध्यते ?।।

अन्वय: – निजपुराकृतकर्मनियन्त्रिता: जडा: विविधान् पथ: अनुसरन्तु। तदविद्यया मे क्षतिलव: अपि न। इतरागसि कोऽपि निबध्यते किम् ?

गङ्गा – अनुसरन्त्विति–निजपुराकृतकर्मनियन्त्रिता: स्वपूर्वसम्पादितकर्मबद्धा: जडा: मूर्खा: विविधान् अनेकान् पथ: मार्गान् अनुसरन्तु अनुगच्छन्तु नाम। तदविद्यया तेषां जडानामविद्यया मे मम अले: क्षतिलव: हानिलेशोऽपि न। अस्तीति शेष:। इतरागसि इतरस्य परस्य आगोऽपराध:, तस्मिन्। 'पापापराधयोराग:' इत्यमर:। कोऽपि निबध्यते किम् ? न निबध्यत इत्यर्थ:।

अनुवाद – अपने पूर्व कर्म से बँधे हुए जड़ विविध मार्गों का अनुसरण करते रहें। उनकी अविद्या से मेरी कोई हानि नहीं। दूसरे के अपराध से कोई बँधता है क्या ?

।।८४।।

न च पुराकृतकर्म न विद्यते
त्वमधुनैव पुराकृतकर्षणात्।
जनितमत्सि फलं वद का त्रपा
तव भवान्तरकर्मफलोक्तिषु ?।।

अन्वय: – पुराकृतकर्म न विद्यते (इति) न। त्वं च अधुनैव पुराकृतकर्षणात् जनितं फलम् अत्सि। भवान्तरकर्मफलोक्तिषु तव का त्रपा ? (इति) वद।

गङ्गा – पुराकृतकर्मणः सत्तां प्रमाणयति– **न चेति**– पुराकृतकर्म पूर्वसम्पादितं कर्म न विद्यते इति त्वया चार्वाकेण न वक्तव्यम्। यतो हि त्वं च अधुनैव सम्प्रत्येव मम समक्षे पुराकृतकर्षणात् पूर्वस्मिन् काले कृतकर्षणकार्यात् जनितमुत्पन्नं फलम् अत्सि भुनक्षि। तथात्वे स्वानुभूतविषये भवान्तरकर्मफलोक्तिषु जन्मान्तरकर्मफलस्य कथने तव का त्रपा लज्जा? इति वद। त्वया स्वयमेव पूर्वकृतकर्मणः फलं भुज्यत इति तत्कथने कथं लज्जामनुभवसीति वदेति भावः।

अनुवाद – तुम 'पूर्वकृत कर्म नहीं है,' यह नहीं कह सकते। क्योंकि तुम अभी (मेरे सामने) ही पूर्व में की गयी जुताई से उत्पन्न फल को खा रहे हो। जन्मान्तर के कर्म का फल स्वीकार करने में तुम्हें कैसी लज्जा है? यह बताओ।

।। ८५ ।।

अनुपलब्धिमृगी प्रपलायते
विविधभावमृगाशनतर्जिता।
इह विवादवनेऽपि च जन्यता
दृढवृकी लघु तां प्रजिघत्सति।।

अन्वयः – विविधभावमृगाशनतर्जिता अनुपलब्धिमृगी प्रपलायते। इह विवादवने जन्यता दृढवृकी अपि च तां लघु प्रजिघित्सति।

गङ्गा – चित्सुखादीनां देहान्तरेऽपि प्राप्तिं दृढयति– **अनुपलब्धिमृगीति**– विविधभावमृगाशनतर्जिता। मृगाशनो व्याघ्रभेदः। 'तेंदुआ' इति भाषायां प्रसिद्धो जन्तुविशेषः। विविधैः भावरूपैः मृगाशनैः तर्जिता भयं प्रापिता अनुपलब्धिमृगी अभावरूपिणी मृगी प्रपलायते दूरं धावति। स्वर्गादिपदार्थभावानामहमहमिकया त्वया चार्वाकेण प्रतिपादिता चित्सुखादीनां देहान्तरेऽप्राप्तिरूपा अनुपलब्धिर्न भवतीति भावः। इह आत्मशरीरयोः विवादवने विवादः सत्ताविषयकस्तर्क एव वनं तस्मिन् जन्यतारूपा दृढवृकी बलिष्ठा वृकस्त्री अपि ताम् अनुपलब्धिं लघु प्रजिघित्सति हन्तुमिच्छति। चार्वाकेण प्रतिपादिता चित्सुखादीनामनुपलब्धिस्तेषां पदार्थानां चित्सुखादीनां देहान्तरेऽपि सत्तया दूरं गच्छति। तर्कातर्किप्रसृतेऽस्मिन् विवादारण्ये पदार्थानां जन्यतारूपा शक्तिशालिनी वृकस्त्री च तां सपद्येव हन्तुमिच्छतीति भावः। रूपकमलङ्कारः।

अनुवाद – अनेक भाव पदार्थ रूपी तेंदुओं के द्वारा डराई गयी (स्वर्गादि की) अनुपलब्धिरूपी मृगी भाग रही है। इस विवादवन में जन्यता रूप दृढवृकी भी उस अनुपलब्धि रूप मृगी को शीघ्र ही मार देना चाहती है।

।। ८६ ।।

चणकमाषविलक्षणता यदि
स्वकनिदानविभेदनिबन्धना।
जगति भूपतिरङ्कविचित्रता
न गमयेज्जनकस्य भिदां कथम् ?।।

अन्वयः – जगति यदि स्वकनिदानविभेदनिबन्धना चणकमाषविलक्षणता (अस्ति) भूपतिरङ्कविचित्रता (च अस्ति तर्हि सा) जनकस्य भिदां कथं न गमयेत् ?

गङ्गा – चणकमाषेति– जगति संसारे यदि स्वकनिदानविभेदनिबन्धना स्वकस्य निदानस्य कारणस्य विभेदः पार्थक्यं निबन्धनं यस्याः सा, चणकमाषविलक्षणता चणकमाषाख्ययोः धान्यविशेषयोः वैलक्षण्यम्। धान्यरूपेण चणकमाषयोः सामान्यत्वे सत्यपि स्वकारणभेदनिबन्धना काचिद् विलक्षणता तयोरस्त्येव। यदि नाम तादृशपदार्थेषु तथात्वमस्ति। अथ च तस्मिन्नेव जगति भूपतिरङ्कविचित्रता, भूपतिश्च रङ्कश्च, तयोः नृपतिदीनयोः विचित्रता वैचित्र्यं विद्यते। मनुष्यत्वेनोभयोः सामान्यत्वेऽपि तयोः काचिद्विचित्रता राजत एव तर्हि सा विलक्षणता सा विचित्रता च जनकस्य अदृष्टकारणस्य भिदां भेदं कथं न गमयेत्, बोधयेत् ? अवश्यं बोधयेदित्यर्थः।

अनुवाद – संसार में यदि अपने कारण के भेद के कारण चने और उड़द में विलक्षणता है तथा राजा और रङ्क की विचित्रता है तो वह अपने अदृष्टकारण के भेद का बोध कैसे नहीं करायेगी ?

।। ८७ ।।

इह निसर्गमृषोक्तिसमाधिना
शिशुमृगेण न सम्भवि रक्षणम्।
उपजनान्वयि वस्तु सहेतुकं
किमु निसर्गमिमं मनुषे मृषा ?।।

अन्वयः – इह निसर्गमृषोक्तिसमाधिना शिशुमृगेण रक्षणं न सम्भवि। उपजनान्वयि वस्तु सहेतुकं (भवतीति) इमं निसर्गं किमु मृषा मनुषे ?

गङ्गा – इह निसर्गेति– इह अस्मिन् प्रसङ्गे निसर्गमृषोक्तिसमाधिना निसर्गेण स्वभावेन मृषोक्तिः मिथ्या कथनमेव समाधिः समाधानं तेन स्वभावानृतकथनसमाधानेन शिशुमृगेण शावकमृगेण रक्षणं न सम्भवि। तादृशसमाधानस्य शिशुमृगत्वं परिकल्प्य रक्षणे सर्वथा तस्यासामर्थ्यं द्योतयति। उपजनान्वयि, उपजनं जन्यता तदन्वयि वस्तु सहेतुकं भवति। जनिमत् वस्तु सकारणं भवतीति इमं निसर्गं स्वभावं किमु मृषा अनृतं मनुषे स्वीकरोषि। जन्यवस्तुनः सहेतुकता निसर्गसिद्धैवेति नाऽत्र विवादावसरः इत्यभिप्रायः।

अनुवाद – प्रस्तुत विषय में स्वभाव को मृषा मान कर किये गये समाधान रूप शिशु मृगमात्र से ही रक्षा सम्भव नहीं है। जन्यता से अन्वित वस्तु सहेतुक होती है, तुम इस स्वभाव को झूठा मानोगे क्या ?

।। ८८ ।।

त्वमनयैव दिशेह पुराकृतो–
चितनिषिद्धविधाऽनुगुणं फलम्।
नृपकृतं समवेक्ष्य तथेश्वरं
प्रणिदधद् हृदि हन्त! विमोक्ष्यसे ।।

अन्वयः – हन्त! त्वम् अनया एव दिशा इह पुराकृतोचितनिषिद्धविधानुगुणं फलं नृपकृतं समवेक्ष्य तथा ईश्वरं हृदि प्रणिदधद् विमोक्ष्यसे।

गङ्गा – त्वमनयेति– हन्तेति खेदव्यञ्जकमव्ययम्। त्वं चार्वाकः अनया एतया एव दिशा मार्गेण पुराकृतोचितनिषिद्धविधानुगुणं फलं पूर्वकृतयोः पूर्वसम्पादितयोः उचितनिषिद्धविधयोः विहितनिषेधयोः कर्मणोः अनुगुणमनुरूपं फलं नृपकृतं भूपत्युत्पादितं समवेक्ष्य मत्वा तथा तेन प्रकारेण यथा लोकनियन्ता भवति राजा तथैव पारलौकिकवस्तूनां नियन्ता परमेश्वरोऽस्तीति ईश्वरं परमात्मानं हृदि हृदये प्रणिदधद् धारयन् विमोक्ष्यसे मुक्तिं लप्स्यसे। पूर्वकृतकार्याणां फलं वस्तुतो न भवति नृपत्यधीनम्। तत्तु ईश्वराधीनमेव भवति किन्तु तव मते राजा एव ईश्वर इति तत्सर्वं राजकृतं मत्वा तथा सम्पाद्य हृदये ईश्वरं धारयन् मुक्तिं प्राप्स्यसीति भावः।

अनुवाद – हन्त! तुम इसी मार्ग से पूर्वकृत विहित और निषिद्ध कर्मों के अनुरूप फलों को राजा के द्वारा किये गये मानोगे। वस्तुतः उन फलों में राजा का अधिकार न होने से तुम ईश्वर को ही हृदय में धारण करते हुए मुक्ति प्राप्त करोगे।

।। ८९।।

रहसि दुष्कृतमाचरितं परैः
स्पशमुखादवधार्य यथा नृपः।
दिशति दण्डमियं परमेश्वरे–
ऽप्यनुमितिर्निरुपद्रवमिष्यताम्।।

अन्वयः – परैः रहसि आचरितं दुष्कृतं स्पशमुखात् अवधार्य यथा नृपः दण्डं दिशति, इयं परमेश्वरे अपि अनुमितिः (इति) निरुपद्रवम् इष्यताम्।

गङ्गा – रहसीति– परैः अन्यैः प्रजाजनैः रहसि एकान्ते आचरितं दुष्कृतं दुराचरणं स्पशमुखात् चरमुखात्। 'द्वौ चराभिमरौ स्पशौ' इत्यमरः। अवधार्य निश्चित्य यथा नृपः राजा दण्डं दिशति तथैव परमेश्वरोऽपि करोतीति इयं परमेश्वरेऽनुमितिः। राजकृतं तद्दण्डविधानादिकं च दृष्ट्वा परमेश्वरस्य अनुमानं भवतीत्यर्थः। अतस्त्वया सा अनुमितिः निरुपद्रवं निर्विवादम् इष्यतां स्वीक्रियताम्।

अनुवाद – दूसरों के द्वारा एकान्त में किये गये दुराचरण को दूत के मुख से जान कर राजा उसे दण्ड देता है। परमेश्वर की सत्ता में यही अनुमिति है, तुम इस बात को निर्विवाद होकर स्वीकार करो। जैसे राजा लोक में कर्म के अनुसार दण्ड और रक्षण प्रदान करता है, उसी प्रकार पूर्वकृत कर्मों का फल देने वाला परमेश्वर है। राजा को देखकर परमेश्वर का अनुमान किया जाता है।

।। ९०।।

अयि स कः? क्व वसत्यथ कीदृशः?
कियति वा समये स? इतीरिते।
स सकलानुभवो भुवनेऽखिले
सुखतनुश्च सदे त्यलमुत्तरम्।।

अन्वयः – अयि! स कः? क्व वसति? अथ कीदृशः? कियति वा समये स (भवति)? इति ईरिते– स सकलानुभवः, अखिले भुवने, सुखतनुः सदा च इति उत्तरम् अलम्।

गङ्गा – अयि स क इति– अयीति सम्मुखीकरणे। हे चार्वाक! स परमेश्वरः कः? क्व वसति? क्व कस्मिन् स्थाने निवसति? अथ कीदृशः स परमेश्वरः? कियति वा समये स परमेश्वरः भवति, इति ईरिते प्रश्ने यथासंख्यमुत्तरं शृणु– स सकलानुभवः, स परमेश्वरः समेषामनुभवरूपोऽस्ति, सर्वेऽपि तमनुभवन्ति। सः अखिले भुवने ब्रह्माण्डे वसति, न क्वचिदेकत्र तस्य निवासः। अथ कीदृशः इति प्रश्ने सुखतनुरित्युत्तरम्। सुखमेव तस्य तनुः। स आनन्दरूपो विद्यत इत्यर्थः। स च सदा भवति। परमेश्वरोऽविनाशिनित्यस्वरूपोऽस्तीत्यर्थः। श्रीमद्भगवद्गीतायामप्युक्तम्–

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया।। (१८.६१)
तथा च–

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।। (१५.१६)

उपनिषत्सु परमात्मन इदमेव स्वरूपं प्रतिपादितम्– नित्यं विभुं सर्वगतं सुसूक्ष्मम्। महान्तं विभुमात्मानम् (मुण्डके – १.१.६, १.२.२२), नित्यो नित्यो नित्यानां चेतनश्चेतनानाम् (श्वेताश्वतरे, ६.१२), आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। आनन्दो ब्रह्मेति व्यजानात् (तैत्तिरीयोपनिषदि, ३.६)।

भाष्ये शङ्कराचार्येणाऽप्युक्तम्– ब्रह्मण्येवानन्दशब्दो दृष्टः (ब्रह्मसूत्रशाङ्करभाष्ये – १.१.१२)। अतः स ईश्वरो नित्यः सर्वव्यापी आनन्दरूपश्चेति श्रुतिवचनसिद्धः सिद्धान्तः। यथासंख्यालङ्कारः।

अनुवाद – यदि तुम यह पूछो कि वह ईश्वर कौन है? कहाँ रहता है? कैसा है? कितने समय तक रहता है? इसका क्रमशः उत्तर है– वह ईश्वर सबका अनुभवरूप है, वह समस्त ब्रह्मांड में व्याप्त है, वह सुखतनु है और नित्य है। अनेक श्रुतिवचन ईश्वर की इस सत्ता में प्रमाण हैं।

।। ९१ ।।

नगरशासकसङ्गगता धियो
दधति यत्र हि पुंसि समष्टिताम्।

नरपतिः स मतो न हि भूपता-
ऽविदुषि पुंसि चिरं प्रतितिष्ठति।।

अन्वयः - नगरशासकसंघगता धियः हि यत्र पुंसि समष्टितां दधति स नरपतिः मतः। अविदुषि पुंसि भूपता चिरं न हि प्रतितिष्ठति।

गङ्गा - नगरशासकेति- नगरशासकसंघगताः नगरशासकानां संघे गता निष्ठा धियः बुद्धयः। 'बुद्धिर्मनीषा धिषणा धीः' इत्यमरः। तादृश्यो यत्र यस्मिन् पुंसि पुरुषे समष्टितां समग्ररूपतां दधति धारयन्ति स पुरुषः नरपतिः राजा मतः अभिमतः। नगरशासकानां समूहे विद्यमानाः पृथक् पृथगुपलब्धा धियो यस्मिन् पुरुषे समग्रतया लभ्यन्ते स एव राजा भवति। अविदुषि विद्याहीने पुंसि पुरुषे भूपता नृपतिता, राजलक्षणमिति यावत्। चिरं नहि प्रतितिष्ठति। तादृशगुणाभावात् स राजा भवितुं नार्हतीत्यर्थः। रामायणेऽपि राज्ञो विजितेन्द्रियता सर्वज्ञता च वर्णिता-

अप्रमत्तश्च यो राजा सर्वज्ञो विजितेन्द्रियः।
कृतज्ञो धर्मशीलश्च स राजा तिष्ठेत् चिरम्।। (अरण्य. ३१.१९)

अनुवाद - नगरशासकों के समूह में रहने वाली बुद्धियाँ जिस पुरुष में समग्रता धारण करती हैं, वह राजा माना जाता है। बुद्धिहीन पुरुष में नृपतिता बहुत दिन तक स्थिर नहीं रहती।

।।९२।।

तदतिसन्निहितं लयवर्जितं
सुखतयाऽवधृतं च सुषुप्तिषु।
निजकुवासनयाऽसदिति क्षयी-
त्यसुखमित्यतिमूढधियां मतम्।।

अन्वयः - तत् अतिसन्निहितं लयवर्जितं सुषुप्तिषु सुखतया च अवधृतं (विद्यते)। अतिमूढधियां निजकुवासनया असत् इति क्षयी इति असुखम् इति (च) मतम्।

गङ्गा - तदतीति- तत् 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधो मतः' इति गीतोक्तेः परमात्मा अतिसन्निहितं हृद्देशे विद्यमानत्वात् समीपे विद्यते। तेनैव सन्निहितेन जगद् व्यवहारः प्रसरति। अथ च तत् लयवर्जितं विनाशरहितं नित्यं विद्यते। सुषुप्तिषु गाढनिद्रासु तत् सुखतया आनन्दतया च अवधृतं विद्यते। सुषुप्तिषु सुखमात्रस्य प्रतीतेस्तत्र

आनन्दरूप आत्मा भासते।

तथा च माण्डूक्योपनिषदि–

लीयते हि सुषुप्ते तन्निगृहीतं न लीयते।

तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्ततः।।३.३५।।

स एव परमात्मा अतिमूढधियां भवतां निजकुवासनया स्वकुसंस्कारेण असत् इति कालत्रयेऽपि तिष्ठतीति सत्, तद्भिन्नम्। क्षयी विनाशीति असुखं दुःखरूपम्, आनन्दभिन्नमिति यावत्। मतम् अभिमतम्। वस्तुतो न स तथा। स तु सनातनो नित्यश्च।

अनुवाद – वह परमात्मा अतिसन्निहित तथा विनाशरहित सनातन है। श्रुतियों ने उसे सुषुप्तियों में सुख के रूप में निर्धारित किया है। आप जैसे जड़मति अपनी कुवासना से उसे असत् और क्षयी तथा असुखरूप मानते हैं।

।। ९३ ।।

नगरशासकदोषगुणोचित–
प्रबलदण्डपदोन्नतिशक्तिमान्।
निगदितो हि पुमान्वसुधाधिपः,
प्रमितिशक्तिसमष्टिरतश्च सः।।

अन्वयः – नगरशासकदोषगुणोचितप्रबलदण्डपदोन्नतिशक्तिमान् पुमान् हि वसुधाधिपः निगदितः। अतश्च सः प्रमितिशक्तिसमष्टिः (अस्ति)।

गङ्गा– नगरशासकेति– नगरशासकदोषगुणोचितप्रबलदण्डपदोन्नतिशक्तिमान्, नगरशासकानां दोषगुणाविति नगरशासकदोषगुणौ। तयोः दोषगुणयोः उचितप्रबलदण्डपदोन्नतिरूपा या शक्तिः सा नगरशासकदोषगुणोचित–प्रबलदण्डपदोन्नतिशक्तिः। साऽस्त्यस्मिन् स तद्वान्। नगरशासकानां दोषगुणयोरुचिते प्रबलदण्डे पदोन्नतौ च शक्तिमान् दोषोचिते प्रबलदण्डे गुणोचितायां पदोन्नतौ च शक्तिमान् शक्तिशाली पुमान् पुरुषः वसुधाधिपो राजा निगदितः कथितः। शास्त्रकारैरिति शेषः। अतश्च दोषगुणयोः शासने सामर्थ्यात् स राजा प्रमितिशक्तिसमष्टिः प्रमितिरूपायाः दण्डपदोन्नतिविवेकरूपायाः प्रमारूपायाः शक्तेः समष्टिः समुच्चयात्मकव्याप्तिरूपो विद्यते। स तेनैव प्रमारूपशक्तिविवेकेन दोषानुरूपं दण्डं गुणानुरूपां पदोन्नतिं च ददाति। अतः स समेषां गुणानां समष्टिः कथितः।

नगरशासकशब्देनेह नगरप्रमुखा विवक्षिता: । ते भवन्ति वसुधाधिपाधीना: । राजा तु सर्वसमर्थ: प्रभुरिति नगरशासकानां शासने तस्यैव सामर्थ्यम्।

अनुवाद – नगरशासकों को दोष और गुण के अनुसार प्रबल दण्ड और पदोन्नति देने में समर्थ पुरुष ही पृथ्वीपति होता है। अत: वह प्रमारूपशक्ति का समष्टिरूप है।

।। ९४।।

प्रतिनरं यदि सातिशया मति–
र्जगति शक्तिरपीत्थमवेक्ष्यते।
नियमतोऽवधिरस्त्यनयो: क्वचि–
त्तदवधे: सदनं परमेश्वर: ।।

अन्वय: – यदि जगति प्रतिनरं सातिशया मति: (विद्यते)। शक्ति: अपि इत्थम् अवेक्ष्यते। अनयो: नियमत: क्वचित् अवधि: अस्ति। तदवधे: सदनं परमेश्वर: (अस्ति)।

गङ्गा – प्रतिनरमिति– यदि जगति प्रतिनरं प्रतिमनुष्यं सातिशया मति: अतिशययुक्तं ज्ञानं विद्यते न तु समानम्। एकस्य ज्ञानापेक्षयाऽपरस्मिन्नतिशयो दृश्यत इत्यर्थ:। शक्ति: अपि इत्थम् एव प्रतिनरं सातिशया अतिशयसहिताऽवेक्ष्यते दृश्यते। ज्ञाने शक्तौ च प्रतिनरं साम्यं नास्तीति। अनयो: मतिशक्त्यो: नियमत: नियमानुसारेण क्वचित् अवधि: परिच्छेद: सीमा ध्रुवं वा अस्ति। 'परिच्छेदे बिलेऽवधि:' इत्यमर:। स तादृशोऽवधिर्यतोऽतिशयो न कुत्रापि विद्यते। तदवधे: तस्य अवधे: सदनं विश्रमस्थलं परमेश्वरो विद्यते। परमेश्वर एव सर्वज्ञ: सर्वशक्तिमान् समेषां नियन्ता चास्तीति भाव:। उपनिषत्सु तदिदं तथ्यं बहुत्र प्रसिद्धम्। शङ्कराचार्येणापि परमेश्वरस्य सर्वज्ञत्वं सर्वशक्तिमत्वं च प्रतिपादितम्– 'अस्ति तावद् ब्रह्म नित्यशुद्धबुद्धमुक्त–स्वभावसर्वज्ञसर्वशक्तिसमन्वितम् (ब्रह्मसूत्रे, १.१.१)।

अनुवाद – यदि संसार में प्रतिमनुष्य में सातिशय (एक से बढ़कर दूसरे में) मति है। इसी प्रकार शक्ति भी सातिशय ही देखी जाती है। इन बुद्धि और शक्ति की नियमत: कोई अवधि है। उस अवधि का सदन ही ईश्वर है। क्योंकि वही सर्वज्ञ और वही सर्वशक्तिमान् है।

।। ९५।।

स्वविषयस्थितलोकहिताहिता–
ऽवगमका नृपतेर्नियमा इव।
तदुदिताः श्रुतयस्तदनादरा–
दरत एव हिनस्ति स पाति च।।

अन्वयः – स्वविषयस्थितलोकहिताऽहिताऽवगमकाः नृपतेः नियमाः इव तदुदिताः श्रुतयः (सन्ति)। तदनादरादरतः एव स हिनस्ति (च) पाति च।

गङ्गा – स्वविषयेति– स्वविषयस्थितलोकहिताहिताऽवगमकाः, स्वविषये निजपक्षे स्थितस्य लोकस्य संसारस्य हितस्य अहितस्य च अवगमका बोधकाः। यस्य नियमस्य विषये लोकस्य यो हि हितोऽहितो वा निर्धारितस्तस्य बोधकाः। कर्तव्याकर्तव्यविषयं प्रतिकर्तव्याचरणेन रक्षणं दुराचरणेन च दण्डः राजनियमनिर्धारितो भवति। तादृशा नृपतेः राज्ञो नियमा इव तदुदिताः तस्मात् परमात्मनः उदिता उत्पन्नाः श्रुतयो वेदवचांसि सन्ति। यथा लोकस्य हिताहितविवेकाय राजा नियमान् करोति तथैव निखिलब्रह्माण्डस्य नियमनाय परमात्मनोत्पादिताः श्रुतयः सन्ति। तदनादरादरतः श्रुतिनिर्धारितकर्तव्यानाम् अनादरतः आदरतश्च स परमात्मा क्रमशः हिनस्ति हन्ति च पाति रक्षति च। अनादरात् हतिरादराच्च रक्षणमिति विवेकः।

अनुवाद – अपने विषय में स्थित लोक के हित और अहित के बोधक राजा के नियमों की तरह उस परमात्मा से उत्पन्न श्रुतियाँ हैं। उन्हीं के द्वारा निर्धारित कर्तव्यों के आदर एवं अनादर से ही राजा की भाँति वह परमात्मा लोक को दण्डित भी करता है और उसकी रक्षा भी करता है।

।। ९६।।

श्रुतिवचांसि परम्परयाऽऽस्थयो–
पदिशतः पठतश्च यतात्मनः।
विगतरागरुषोऽप्यवमत्य कः
श्रयति कामुकवाचि वताऽऽदरम्?।।

अन्वयः – परम्परया श्रुतिवचांसि आस्थया पठतः उपदिशतः च विगतरागरुषः अपि यतात्मनः (वचांसि) अवमत्य कः वत कामुकवाचि आदरं श्रयति?

गङ्गा – श्रुतिवचांसीति– परम्परया साक्षाद् गुरुमुखात् श्रुतिवचांसि वेदवाक्यानि पठतः आस्थया श्रद्धया च तान्येव वचांसि उपदिशतः विगतरागरुषः समदर्शित्वाद् विगतौ रागरुषौ रागक्रोधौ यस्य तादृशस्य यतात्मनः यतेः अपि वचांसि अवमत्य तिरस्कृत्य कः जनः। वत इति खेदे। तव कामकुवाचि कामुकस्य सांसारिकसुखलुब्धस्य वाचि वचने आदरं श्रयति। यतात्मनो वचनमनङ्गीकृत्य तव कामुकस्य वचने कस्य श्रद्धा भवति ? न कस्याऽपीत्यर्थः। अतोऽलं सांसारिकसुखगुणगानेनेति भावः।

अनुवाद – परम्परा से श्रुतिवचनों का पाठ करने वाले तथा श्रद्धा से उनका उपदेश करने वाले यति के वचनों की अवमानना करके भला कौन तुम्हारे वचनों का आदर करेगा ?

।। ९७।।

अपहरन्वसु रोगमवारयन्
कुभिषगप्यविलङ्घ्यवचास्तव।
विगतलोभनिवारितसंसृति–
श्रमशतेऽपि यतौ किमसूयसि ?।।

अन्वयः – वसु अपहरन् रोगम् अवारयन् कुभिषक् अपि तव अविलङ्–घ्यवचाः (अस्ति) विगतलोभनिवारितसंसृतिश्रमशते अपि यतौ किम् असूयसि ?

गङ्गा – अपहरन्वस्विति– वसु धनम् अपहरन् लुण्ठन् अपि। 'देवभेदेऽनले रश्मौ वसू रत्ने धने वसु' इत्यमरः। रोगम् रुजम् अवारयन्, धनं हृत्वाऽपि रोगविनाशेऽसमर्थः कुभिषक् दुर्वैद्यः अपि तव चार्वाकस्य अविलङ्घ्यवचाः वर्तते। त्वं तस्य वचनानि तिरस्कर्तुं न शक्नोषीत्यर्थः। किन्तु विगतलोभनिवारितसंसृतिश्रमशते, विगतो लोभः सांसारिकसुखानुरागो यस्य स विगतलोभः, निवारितं संसृतेः संसारस्य श्रमशतं कष्टबाहुल्यं येन स निवारितसंसृतिश्रमशतः। विगतलोभश्चासौ निवारितसंसृतिश्रमशतस्तस्मिन्। यतौ अपि परित्यक्तसंसारे ज्ञानिनि किम् किमर्थम् असूयसि द्वेषं वहसि। स तु सर्वथाऽभिनन्दनार्हः।

अनुवाद – तुम धन का अपहरण करके भी रोग का निवारण न करने वाले कुवैद्य के वचनों का अतिक्रमण नहीं कर सकते। फिर लोभ से रहित तथा संसार के सैकड़ों कष्टों को दूर करने वाले यति पर असूया क्यों कर रहे हो।

।। ९८।।

न हि बृहस्पतिरेत्य तवान्तिके
स्वमतमाह पदैर्न च ते प्रमा।
अनुमितिं न हृदा बहु मन्यसे
शठ! खलीकुरुषे धिषणं मृषा।।

अन्वयः - बृहस्पतिः तव अन्तिके एत्य स्वमतं न हि आह। पदैः च ते प्रमा (अपि) न। हृदा अनुमितिं न बहु मन्यसे। हे शठ! धिषणं मृषा खलीकुरुषे।

गङ्गा - नहि बृहस्पतीति- बृहस्पतिः लोकायतमतप्रवर्तक आचार्यः तव चार्वाकस्य अन्तिके समीपे एत्य आगत्य स्वमतं लोकायतमतं न हि आह उपादिशत्। पदैः शब्दैः च ते प्रमा अपि न भवति। यदि नाम बृहस्पतिः साक्षादागत्याऽपि त्वां स्वमतमुपदिष्टवान्, तेनाऽपि किम्? त्वं तु शाब्दीं प्रमामेव न स्वीकरोषि। अतो बृहस्पत्युपदिष्टवाक्यानां स्वयमेव अनाप्तत्वं प्रसज्यते। त्वम् अनुमितिमपि हृदा हृदयेन न बहुमन्यसे, न अङ्गीकरोषि अत एव तद्वचनानामनुमानमपि न कर्तुं शक्नोषि। अतः हे शठ! धूर्त! चार्वाक! धिषणं बृहस्पतिं मृषा व्यर्थं खलीकुरुषे दुर्जनीकरोषि। वस्तुतो बृहस्पतिरिदं सर्वं नैवोपादिशत्। एतत्तु तवैव मतिलीलायितम्। तत्र सुप्रसिद्धाचार्यस्य नामयोजना तमाचार्यं खलीकरोति।

अनुवाद - चार्वाक मत के प्रवर्तक बृहस्पति आचार्य ने तुम्हारे पास आकर अपने मत का कथन नहीं किया। शब्दों से तुम्हारी प्रमा भी नहीं होती। अर्थात् तुम शब्दप्रमाण को स्वीकार भी नहीं करते। तुम हृदय से अनुमिति का भी आदर नहीं करते। हे धूर्त! चार्वाक! बृहस्पति को व्यर्थ ही क्यों दुर्जन बना रहे हो।

।। ९९।।

अरुचिरत्र चिराय निवर्ततां
श्रुतिवचोनिचयोदितचित्सुखे।
अरुचिरात्मनि चेत् पत वारिधौ
तदतिरिक्तमिदं न हि चित्सुखम्।।

अन्वयः - अत्र श्रुतिवचोनिचयोदितचित्सुखे (ते) अरुचिः चिराय निवर्तताम्। आत्मनि अरुचिः चेत्, वारिधौ पत। इदं चित्सुखं तदतिरिक्तं न हि (भवति)।

गङ्गा – अरुचिरत्रेति– अत्र अस्मिन् श्रुतिवचोनिचयोदितचित्सुखे श्रुतिवचसां निचयात् समूहात् उदिते उत्पन्ने चित्सुखे। तव चार्वाकस्य अरुचि: चिराय चिरकालाय निवर्तताम्। इदं चित्सुखं कल्पितं वस्तु नास्त्यपितु श्रुतिवचसां समूहजन्यं भवति। एतादृशे ते अरुचि: दूरीभवेत्। यदि नामआत्मनि एव ते अरुचि: चेत्, आत्मैव नास्ति इति वदसि चेत् वारिधौ समुद्रे पत। मृतिं गच्छेत्यर्थ:। वैषयिकसुखवच्चित्सुखमात्रमभिलषसि चेत्, तन्न सम्भाव्यते। यतो हि चित्सुखं तदतिरिक्तम् आत्मभिन्नं न भवति। चित्सुखमेव आत्मन: स्वरूपम्। स आत्मा सच्चिदानन्दस्वरूपोऽस्ति। सुखं तस्य स्वरूपमेव। तद्भिन्नं सुखं भवितुं नार्हतीत्यर्थ:। श्रुतिरप्याह– विज्ञानमानन्दं ब्रह्म (बृहदारण्यकोपनिषदि, ३.९.२८)

अनुवाद – इस श्रुतिवचनों के समूह से उत्पन्न चित्सुख से तुम्हारी अरुचि सदा के लिए समाप्त हो। अगर तुम्हें आत्मा पर अरुचि है तो समुद्र में जाकर डूब मरो क्योंकि वह चित्सुख आत्मा से अतिरिक्त नहीं है। वह तो आत्मा का स्वरूप ही है।

।। १००।।

अयि मुहुर्विदितेन्द्रियविभ्रमो
विषयदुर्विषवेगविमूर्च्छित:।
निजमते: परिनिष्ठिततां स्तुवन्
स्ववचसैव कथं न विलज्जसे ?।।

अन्वय: – अयि! विदितेन्द्रियविभ्रम: विषयदुर्विषवेगविमूर्च्छित: मुहु: निजमते: परिनिष्ठिततां स्ववचसा एव स्तुवन् कथं न विलज्जसे।

गङ्गा – अयि मुहुरिति– अयीति सम्मुखीकरणे। विदितेन्द्रियविभ्रम: विदितो ज्ञात: इन्द्रियाणां विभ्रमो भ्रान्तिर्येन स:। 'विभ्रमो भ्रान्तिहावयो:' इति हैम:। विषयदुर्विषवेगविमूर्च्छित: विषयाणां कामादीनां दुर्विषस्य वेगेन विमूर्च्छित: गतचैतन्य:। कामादिदुर्विषप्रवाहत्यक्तचैतन्य: सन्नपीत्यर्थ:। मुहु: वारम्वारं निजमते: स्वबुद्धे: परिनिष्ठिततां परिपक्वतां स्ववचसा एव निजवाण्या एव स्तुवन् स्तुतिं कुर्वन् कथं न विलज्जसे लज्जामनुभवसि ? वस्तुतो यत्किमपि जल्पसि तत्सर्वं ते कामलोलुपतां द्योतयति तथापि त्वं स्वबुद्धे: परिपक्वतां मन्यमानोऽत्र स्वपक्षं स्थापयसि। लज्जां कथं नानुभवसि ?

अनुवाद - हे चार्वाक! तुम इन्द्रियों के विभ्रम को जानते हो, कामादि विषयों के दुर्विष के वेग से विमूर्च्छित होकर भी बार-बार अपनी बुद्धि की अपनी ही वाणी से स्तुति करते हुए तुम्हें लज्जा क्यों नहीं आती।

।। १०१।।

वयममी परमेश्वरकारिते
निगडिता भवबन्धनसद्मनि।
यदि सहेमहि दुःखमचापलाः
क्रमश एष कदाचन मोचयेत्।।

अन्वयः - अमी वयं परमेश्वरकारिते भवबन्धनसद्मनि निगडिताः (स्मः)। यदि अचापलाः (सन्तः) क्रमशः दुःखं सहेमहि एष कदाचन मोचयेत्।

गङ्गा - वयममीति- अमी वयं परमेश्वरोपासकाः चित्सुखवादिनः परमेश्वरकारिते परमेश्वरेण परमात्मना निर्मापिते भवबन्धनसद्मनि सांसारिकमोहभवने निगडिताः बद्धाः। यदि अचापलाः सन्तः चाञ्चल्यरहिताः कामादिषु चाञ्चल्यं परित्यज्य क्रमशः दुःखं सहेमहि तदा एष परमेश्वरः दयां कृत्वा कदाचन बन्धनान्मोचयेत् मुक्तिं दद्यात्। तेन चिदानन्दप्राप्तिर्भवेदेव। अस्माकं सांसारिकदुःखभोगे चिदानन्दघनलालसैव कारणम्।

अनुवाद - ये हम परमेश्वर के द्वारा बनवाये गये भवबन्धन रूप भवन में बँधे हैं। यदि अचंचल रह कर क्रमशः दुःख सहन करेंगे तो कदाचित् वह इससे मुक्त कर देगा और हमे चित्सुख की प्राप्ति हो जायेगी।

।। १०२।।

यदि तु दुर्मतिधिक्कृतशासनाः
स्वरुचितो विदधीमहि दुष्कृतम्।
अधिकमेव लभेमहि दुःखमि-
त्यनुसरन्ति बुधाः श्रुतिचोदनाः।।

अन्वयः - यदि तु दुर्मतिधिक्कृतशासनाः (वयं) स्वरुचितः दुष्कृतं विदधीमहि, अधिकम् एव दुःखं लभेमहि। इति बुधाः श्रुतिचोदनाः अनुसरन्ति।

गङ्गा - यदि त्विति- यदि तु दुर्मतिधिक्कृतशासनाः दुर्मत्या धिक्कृतं तिरस्कृतं

शासनं श्रुत्यनुशासनं यैस्ते, तादृशा वयं स्वरुचितस्त्वमिव दुष्कृतं कुकर्म विदधीमहि चेष्टेमहि, अधिकमेव प्राप्तादप्यधिकं दुःखं लभेमहि अधिगच्छेम। इति इत्यस्माद् बुधाः विद्वांसः श्रुतिचोदनाः श्रुतिप्रमाणानि अनुसरन्ति अनुपालयन्ति।

अनुवाद – अगर कुमति से हम श्रुति के शासन का तिरस्कार करेंगे और अपनी रुचि से दुष्कृत कार्य करेंगे तो अधिक ही दुःख प्राप्त होगा। इस कारण विद्वान् लोग श्रुति प्रमाण का अनुसरण करते हैं।

।। १०३।।

तदवधार्य निजाधिकृतिं धिया
सकलभूतहितं विहितं श्रुतौ।
विदधता शुभकर्म फलार्थिना
क्रमश एव पदोन्नतिराप्यते।।

अन्वयः – तत् धिया निजाधिकृतिम् अवधार्य श्रुतौ सकलभूतहितं विहितं शुभकर्म विदधता फलार्थिना क्रमशः एव पदोन्नतिः आप्यते।

गङ्गा – तदवधार्येति– तत् तस्मात् धिया बुद्ध्या निजाधिकृतिम् अवधार्य। 'बन्धकं व्यसनं चेतः पीडाधिष्ठानमाधयः' इत्यमरः। स्वबन्धनस्य कृतिं कर्म ज्ञात्वा श्रुतौ सकलभूतहितं समस्तप्राणिनां कल्याणाय विहितं प्रतिपादितं शुभकर्म उपासनाप्रभृतिकर्म विदधता कुर्वता फलर्थिना क्रमश एव पदोन्नतिः मुक्तिः आप्यते प्राप्यते। न तु सहसेत्यर्थः।

अनुवाद – इसलिए फलार्थी को अपने बन्धन के कर्म को जान कर श्रुति में समस्तभूतों के लिए विहित शुभकर्म का सम्पादन करना चाहिए। इसी से वह क्रमशः पदोन्नति (मोक्ष) प्राप्त करता है।

।। १०४।।

यदि तु नेच्छति किञ्चन चित्सुखा-
नुभवमात्रकृतार्थतया नरः।
अनृणतामधिगन्तुमथेश्वरः
क्षपयति त्वरितं भवबन्धनम्।।

अन्वयः – यदि तु नरः चित्सुखानुभवमात्रकृतार्थतया किञ्चन न इच्छति,

अथ अनृणताम् अधिगन्तुम् ईश्वरः त्वरितं भवबन्धनं क्षपयति।

गङ्गा – यदि तु नेच्छतीति– यदि तु नरः सांसारिको जनः चित्सुखानुभवमात्र–कृतार्थतया चित्सुखस्य चिदानन्दस्य अनुभवमात्रेण कृतार्थतया कृतकृत्यतया किञ्चन न इच्छति। परमेश्वरात् किमपि न वाञ्छति। चित्सुखानुभवैनैव आत्मानं कृतार्थं मनुते, अथ अनन्तरम् अनृणताम् अधिगन्तुं तस्य नरस्य आनृण्यं प्राप्तुम् ईश्वरः परमेश्वरः त्वरितं शीघ्रं भवबन्धनं सांसारिकमायामोहादिबन्धनं क्षपयति दूरीकरोति। चित्सुखेन सन्तुष्टो नरः सांसारिकमोहात् सपद्येव मुक्तो भवतीति भावः।

अनुवाद – यदि मनुष्य चित्सुख के अनुभव से अपने को कृतार्थ मान कर परमेश्वर से कुछ नहीं चाहता तो उस मनुष्य से अनृणता प्राप्त करने के लिए ईश्वर शीघ्र ही उसके भवबन्धन दूर कर उसे मुक्ति प्रदान करता है।

।। १०५ ।।

अलमिदं मननाय तवाधुना
यदि बुभुत्सितमत्र विचारिते।
तदनुयुङ्क्ष्व वदामि परत्र तत्
सकलमित्यभिधाय ययावलिः ।।

अन्वयः – 'यदि अत्र विचारिते बुभुत्सितं (तर्हि) अधुना तव मननाय इदम् अलम्। तत् अनुयुङ्क्ष्व। परत्र तत् सकलं वदामि' इति अभिधाय अलिः ययौ।

गङ्गा – अलमिदमिति– यदि त्वया विलासिना अत्र विचारिते बुभुत्सितं बोद्धुमिष्टं तर्हि अधुना तव मननाय चिन्तनाय इदं मदुक्तम्, अद्यावधि प्रतिपादितं वैषयिकपरमात्मसुखयोर्विवेकतत्त्वम् अलं पर्याप्तम्। तन्मयोपदिष्टं सर्वम् अनुयुङ्क्ष्व, योजय। अनूपसर्गकाद् युजिर्धातोर्लोटि मध्यमपुरुषैकवचने रूपम्। परत्र योजनानन्तरं तत् सकलमवशिष्टं सर्वं वदामि। इत्येवमभिधाय उक्त्वा अलिः ययौ गतः।

अनुवाद – यदि यहाँ विचार किये गये तत्त्वों को तुम जानना चाहते हो तो इस समय यह तुम्हारे मनन के लिए पर्याप्त है। मेरे द्वारा कहे गये सभी तत्त्वों की अनुयोजना करो। तदनन्तर वह सब कुछ कहूँगा, जो अभी कहने के लिए शेष है। इस प्रकार कह कर अलि चला गया।

।। १०६ ।।

इत्युक्त्वा विरते प्रयात्यलिवरे तद्वाचमालोचयन्
सन्त्यज्येन्द्रियजप्रमैकशरणं लौकायतं दुर्मतम्।
युक्त्या तेन जिजल्पिषुः श्रुतिवचस्स्वद्याप्यविश्वस्तधी-
र्बौद्धानां मतमाश्रयन्ननुययावेनं विलासी पुनः ।।

।। इत्यलिविलासिसंलापे खण्डकाव्ये द्वितीयशतकम्।।

अन्वयः - इति उक्त्वा विरते प्रयाति (च) अलिवरे तद्वाचम् आलोचयन् इन्द्रियजप्रमैकशरणं दुर्मतं लौकायतं सन्त्यज्य, युक्त्या तेन जिजल्पिषुः अद्यापि श्रुतिवचस्सु अविश्वस्तधीः विलासी बौद्धानां मतम् आश्रयन् पुनः एनम् अनुययौ।

गङ्गा - तृतीयशतकस्य भूमिकामारचयन्नाह- **इत्युक्त्वेति-** इत्युक्त्वा एतत्कथयित्वा विरते विश्रान्ते प्रयाति गच्छति च अलिवरे तद्वाचं तस्य अलिवरस्य वाचं पूर्वोक्तकथनम् आलोचयन् विचारयन्। इन्द्रियजप्रमैकशरणं प्रत्यक्षमात्रप्रमाणं दुर्मतं लौकायतं सन्त्यज्य परित्यज्य। लौकायतस्य प्रत्यक्षप्रमैकशरणतयाऽहं परास्त इति धिया तं सिद्धान्तं परित्यज्य। युक्त्या प्रमाणादिबलेन युक्तिपूर्वकं तेन अलिना जिजल्पिषुः भृशं वाचःसंग्रामं चिकीर्षुः, अद्यापि परास्तोऽपि श्रुतिवचस्सु वेदवचनेषु अविश्वस्तधीः विश्वासरहितबुद्धिः सः विलासी बौद्धानां मतमाश्रयन्। तत्र तर्कप्रमाणादीनां बलवत्तरत्वं वीक्ष्य तन्मताश्रयणं कृतवानिति भावः एनम् अलिं पुनः अनुययौ अन्वगच्छत्। शार्दूलविक्रीडितं छन्दः।

।। इति विद्यावतीसुतरमाकान्तविरचितायां म.म. गङ्गाधरशास्त्रि-
कृतालिविलासिसंलापगङ्गाटीकायां द्वितीयशतकम्।।

अनुवाद - इस प्रकार कहकर वह अलिश्रेष्ठ चुप हो गया और जाने लगा। उसके कथन पर विचार करते हुए उस विलासी ने एकमात्र प्रत्यक्ष प्रमा की शरण लेने वाले दुर्मत लौकायतमत को छोड़ दिया। युक्तिपूर्वक उस अलि से वार्ता करने का इच्छुक तथा इतने पर भी श्रुतिवचनों पर विश्वास न करने वाला वह विलासी बौद्धों के मत का सहारा लेकर फिर से इस अलि का पीछा करने लगा।

।। इति विद्यावतीसुतरमाकान्तपाण्डेयकृते हिन्द्यनुवादे द्वितीयशतकम्।।

****

तृतीयशतकम्

विषयानुक्रमणिका

आतिथ्योचितसाक्रियाक्रम[1], इहायत्नागतेऽप्यस्पृहा,
सत्यप्रव्रजितस्य[2], रम्यविषया[3], स्तेष्वादरः कामिनाम्[4]।
दम्भेनापि तदर्जनं शठधियां[5] विज्ञानवादोत्थिति[6]-
र्युक्त्या तस्य निराक्रिया[7]ऽत्र शतके सङ्क्षेपतो दर्शिताः।।

---

१. २ श्लोकमारभ्य ४ श्लोकपर्यन्तम्।
२. ५ श्लोकमारभ्य ६ श्लोकपर्यन्तम्।
३. ९ श्लोकमारभ्य १६ श्लोकपर्यन्तम्।
४. १७ श्लोकमारभ्य १८ श्लोकपर्यन्तम्।
५. १९ श्लोकमारभ्य २० श्लोकपर्यन्तम्।
६. २२ श्लोकमारभ्य ५५ श्लोकपर्यन्तम्।
७. ५६ श्लोकमारभ्य १०५ श्लोकपर्यन्तम्।

अथ तृतीयशतकम्

।।१।।

अथ ततनिजपक्षोऽसावलिः सावहेलं
क्षतवचसि विलासिन्यक्षि निक्षिप्य किञ्चित्।
अनिलचलदलाग्रैराह्वयन्तं रसालं
मृदुपदगतिगीतिः सादरं स्तुत्यमाप।।

अन्वयः – अथ ततनिजपक्षः असौ मृदुपदगतिगीतिः अलिः क्षतवचसि विलासिनि सावहेलं किञ्चित् अक्षि निक्षिप्य अनिलचलदलाग्रैः आह्वयन्तं स्तुत्यं रसालं सादरम् आप।

गङ्गा – द्वितीयशतके स्वमतस्थापनानन्तरमलेश्चेष्टितं वर्णयितुमुपक्रमते– **अथ ततेति**– अथ, अनन्तरं, द्वितीयशतके चार्वाकमतखण्डनप्रसङ्ग इत्यर्थः। ततनिजपक्षः, ततो विस्तारितः निजः पक्षः आत्मवादसिद्धान्तो येन सः। पक्षे प्रसारिततनूरुहः। तादृशोऽलिः। मृदुपदगतिगीतिः, गतिर्गमनं पुष्पेष्विततस्तत उड्डयनं, गीतिः गानं गुञ्जारवश्चेति गतिगीती, मृदुपदे मृदुले गतिगीती यस्य सः। पुष्पेष्विततस्ततो भ्रमन्नप्यलिर्गुञ्जारवं प्रसारयति, मधुरं च गायति। तेन तद्गमनं गीतिश्चोभयमपि मृदुपदम्। मृदुः पदगतिः मृदुपदा कोमलशब्दा गीतिश्च यस्य स इत्यर्थः। क्षतवचसि क्षतानि नानाशास्त्रोक्तपक्षप्रदर्शनपुरस्सरं खण्डितानि वचांसि दुस्तर्कान्वितानि वचनानि यस्य सः। तस्मिन् विलासिनि। पूर्वस्मिन् शतके चार्वाकमतमाश्रित्य देहमेव सर्वस्वं मत्वा विलासिना ये हि तर्काः प्रदर्शितास्तेषां निराकरणमलिना कृतमिति तदेवेह स्मारयति। सावहेलम्, हेलया उपेक्षया सहितं सावहेलं तद्यथा स्यात्तथा। तं विलासिनं किमप्यपरिगण्येत्यर्थः। किञ्चित् अक्षि निक्षिप्य तस्मिन् परास्ते विलासिनि दृष्टिं निपात्य। अनिलचलदलाग्रैः, अनिलेन वायुना चलानि चञ्चलानि गतिशीलानि दलाग्राणि पत्रमुखानि, तैः आह्वयन्तं निमन्त्रयन्तं स्तुत्यं परोपकारित्वात् स्तुतियोग्यं रसालमाम्रवृक्षं सादरं यथा स्यात्तथा आप। तमुपागच्छदित्यर्थः। वृक्षाणां परोपकारित्वं तु प्रसिद्धमेव। मालिनी छन्दः।

अनुवाद – तदनन्तर अपने पक्ष का विस्तार कर चुकने वाले (अथवा अपने पंखों को फैला लेने वाले) मधुरपदों से युक्त गति और गीति वाले उस 'अलि' ने खण्डितवचनों वाले उस विलासी की अवहेलना करते हुए उसे देखा और वायु से चंचल पत्तों के अग्र भाग से बुला रहे उस स्तुत्य रसाल के पास पहुँचा।

।। २।।

सविनय इव सोऽमुं मारुतानम्रमौलिः
पिकमधुरनिनादैः स्वागतेनाऽभिनन्द्य।
अभिनवमधुधाराक्लृप्तपाद्यार्घ्यकृत्यः
कुसुममृदुलतल्पं कल्पयामास सद्यः ।।

अन्वयः – मारुतानम्रमौलिः सः सविनय इव पिकमधुरनिनादैः अमुं स्वागतेन अभिनन्द्य अभिनवमधुधाराक्लृप्तपाद्यार्घ्यकृत्यः सद्यः कुसुममृदुलतल्पं कल्पयामास।

गङ्गा – रसालकृताऽलिस्वागतं वर्णयन्नाह– **सविनय इति**– मारुतेन वायुना आनम्रा सामग्र्येण नम्रीभूता मौलिः शाखाशिखा यस्य स रसालवृक्षः। 'समीरमारुतमरुज्जगत्प्राणसमीरणा' इत्यमरः। अमुम् अलिम्। सविनय इव विनयेन सहित इव। आनम्रमौलित्वात्तस्य सविनयत्वमुत्प्रेक्षते। पिकमधुरनिनादैः, पिकानां कोकिलानां मधुरैः निनादैर्यद्वा कोकिलवन्मधुरैर्निनादैः। स्वागतेन स्वागतवचोभिर–भिनन्द्य। अभिनवमधुधाराक्लृप्तपाद्यार्घ्यकृत्यः, अभिनवस्य मधुनः मकरन्दस्य धारया क्लृप्तौ सम्पादिते पाद्यार्घ्यकृत्ये येन स तादृशो रसालः। 'मधु मद्ये पुष्परसे क्षौद्रेऽपि' इत्यमरः। कुसुममृदुलतल्पं कुसुमानि पुष्पाणि एव मृदुलं सुकोमलं तल्पं, यद्वा कुसुमैः मृदुलं तल्पं शय्यां कल्पयामास रचयामास। 'तल्पं शय्याट्टदारेषु' इत्यमरः। विलासिनं विजित्य समागतं तमलिं रसालोऽभ्यनन्ददित्युत्प्रेक्षा।

अनुवाद – वायु के द्वारा नम्रीभूत शिखा वाले इस रसाल ने सविनय की तरह कोकिल के मधुर निनादों से उस भ्रमर का स्वागत किया। उसने अपनी नयी मधुधारा से उस अलि का पाद्य और अर्घ्य कल्पित करके उसके लिए फूलों से कोमल शय्या का निर्माण किया।

।। ३।।

क्षणमयमपनीयाऽऽयासमध्वानुभूतं
सुरभिमधुरमध्वाऽऽकण्ठपानेन तृप्तः।

सपदि मधुकरीभिस्तद्रसालाश्रिताभिः
सुचिरमतिथिबुद्ध्या नृत्यगीतैः सिषेवे।।

अन्वयः – अध्वानुभूतम् आयासं क्षणम् अपनीय सुरभिमधुरमध्वाऽऽकण्ठ-पानेन तृप्तः अयं तद्रसालाश्रिताभिः मधुकरीभिः सपदि अतिथिबुद्ध्या नृत्यगीतैः सुचिरं सिषेवे।

गङ्गा – मधुकरीभिस्सम्पादितं तत्सत्कारं वर्णयति– **क्षणमयमिति–** अध्वानुभूतं मार्गजन्यम् आयासं श्रान्तिं कष्टं च। दूरादयमागत इति मार्गजन्य आयासः। पथि मिलितेन विलासिना च जातेन दुस्तर्केणाऽप्यायासजनिरिति द्विविधमपि आयासं क्षणं निमेषम् अपनीय दूरीकृत्य। सुरभिमधुरमध्वाऽऽकण्ठपानेन, सुरभिमधुरमधुनः सुरभियुक्तः मधुरं च यन्मधु पुष्परसस्तस्य आकण्ठपानेन यथेच्छपानेन तृप्तः। 'सुरभिः शल्लकीमातृभित्सुरगोषु योषिति। चम्पके च वसन्ते च तथा जातीफले पुमान्। स्वर्णेन्धोत्पले क्लीबं सुगन्धिकान्तयोस्त्रिषु। विख्याते सचिवे धीरे चैत्रेऽपि च पुमानयम्' इति मेदिनी। 'मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च जीवशोके मधुद्रुमे' इति विश्वः। पीतसुरभिमधुरसोऽयमलिस्तद्रसालाश्रिताभिः तस्मिन्नाम्रवृक्षे निवसन्तीभिः मधुकरीभिर्भ्रमरीभिः सपदि शीघ्रम्। तदायासापगमानन्तरं रसपानानन्तरं च। अतिथिबुद्ध्या, 'अतिथिदेवो भव' इति श्रुतिवचनाद् अयमस्माकमतिथिरिति विचार्य। एतेन कीटादिष्वप्यतिथिसत्कारपरम्परा द्योतिता। नृत्यगीतैः नृत्यैस्ताललयाश्रितैर्गीतैश्च। सुचिरं चिरकालं यावत्। सिषेवे, सेवितोऽभूत्। सुचिरमित्यनेन मधुकरीभिस्तद्रमणादिकमपि व्यनक्ति।

अनुवाद – मार्ग में अनुभूत श्रम को क्षण भर में दूर कर के यह भ्रमर सुगन्धित और मधुर पुष्प रस के पान से तृप्त हुआ। तदनन्तर उस आम्रवृक्ष पर रहने वाली भ्रमरियों ने अतिथिभाव से नृत्य और गीत के द्वारा चिरकाल तक उसकी सेवा की।

।।४।।

मृदुमलयसमीरानीतचूतप्रसूनो-
दितविशदरजोभिश्चान्दनीं प्राप्य चर्चाम्।
अपलपितशरीरोऽप्यच्छहीरोपमार्हः
कृतिभिरनुममेऽसौ मञ्जुना गुञ्जितेन।।

अन्वयः – मृदुमलयसमीरानीतचूतप्रसूनोदितविशदरजोभिः चान्दनीं चर्चां प्राप्य अपलपितशरीरः अपि अच्छहीरोपमार्हः असौ कृतिभिः मञ्जुना गुञ्जितेन अनुममे।

गङ्गा – मृदुमलयेति– मृदुमलयसमीरानीतचूतप्रसूनोदितविशदरजोभिः, मृदुना मलयसमीरेण मलयपवनेन आनीतानि प्रापितानि यानि आम्रमञ्जरीतो निर्गतानि विशदानि रजांसि परागास्तैश्चान्दनीं चन्दनसम्बन्धिनीं चर्चां लेपनं प्राप्य, अपलपितशरीरः अपलपितं गोपितं शरीरं यस्य सः। आम्रमञ्जरीमकरन्दानुलेपात् नीलवर्णशरीरोऽसौ श्वेतवर्णोऽभवदिति भावः। तादृशोऽयम् अच्छहीरोपमार्हः, निर्मलरत्नतुलनायोग्यः। 'अच्छो भल्लूके स्फटिकेऽमलेऽच्छाऽभिमुखोऽव्ययम्' इति हैमः। कृतिभिस्तत्त्वविद्भिः मञ्जुना गुञ्जितेन हेतुना अनुममे। तत्र चूतमञ्जरीरजःसम्पर्कात् प्राप्तस्वच्छशरीरोऽयमलिः स्वमञ्जुगुञ्जनेन कथञ्चित् कृतिभिरेवाऽनुममे। सामान्यास्तु न तत्प्रत्यभिज्ञाने प्राभवन्निति ध्वनयति। प्रथमशतकेऽपि 'कुन्दलतापरागस्थगितात्मरूपः' कथितोऽयम्। कृतिभिरित्यनेन ब्रह्मतत्त्वविद्भिरिति बोधयति। तैरेवोपहितचैतन्यस्य प्राप्तजीवभावस्य बोधात्।

अनुवाद – मृदुल मलयपवन के द्वारा लाये गये आम्रमञ्जरी से निकले हुए परागकणों से इसने चन्दनचर्चा को प्राप्त किया। उन परागकणों के कारण इसके शरीर के आच्छादित हो जाने के कारण यह भ्रमर स्वच्छ हीरे के समान प्रतीत होने लगा। विद्वान् लोग भी इसके मधुर गुंजन से ही इसका अनुमान कर सके।

॥५॥

अनभिरुचितमासीत्तस्य नित्यस्वरूपा-
ऽऽवृतिकरचलवृत्तं राजसाऽऽगन्तुरूपम्।
अपि च तदनुमानं स्पष्टदृश्यस्य सर्वै-
रिति स तदवधूयाऽन्यत्र गन्तुं ववाञ्छ॥

अन्वयः – नित्यस्वरूपावृतिकरचलवृत्तं राजसाऽऽगन्तुरूपं स्पष्टदृश्यस्य (तस्य) सर्वैः अनुमानम् अपि अनभिरुचितम् आसीत् तत् सः तदवधूय अन्यत्र गन्तुं ववाञ्छ।

गङ्गा – स्वकृत्रिमरूपाद् भ्रमरस्य अरुचिं वर्णयति– **अनभिरुचीति**– नित्यस्वरूपावृतिकरचलवृत्तं, तस्य भ्रमरस्य स्वरूपस्य आच्छादकमस्थिरम-नैसर्गिकावरणम्, पक्षे आत्मस्वरूपस्य आवरणम्। संसारे उत्पन्न आत्मा स्वीयं

वास्तविकं स्वरूपं विस्मृत्य सांसारिकमायामोहादिभिरावृतो भवति। राजसाऽऽगन्तुरूपम्, परागजनितमाहृतस्वरूपम्, पक्षे रजोगुणजनितमागन्तुरूपं न तु वास्तवम्। तस्य भ्रमरस्य तद् रूपम् अनभिरुचितम् आसीत्। स्पष्टदृश्यस्य प्रत्यक्षानुभवविषयस्य तस्य भ्रमरस्य आत्मनश्च सर्वैः लोकैः अनुमानम्, गुञ्जारवादिभिर्भ्रमरस्य, शरीरादिभिश्चात्मनोऽनु-मानमनुमितिः अपि तस्य भ्रमरस्य आत्मनश्च अनभिरुचितमासीत्। तादृशानुमाने रुचिर्नासीत्। तत् तस्मात् स भ्रमर आत्मा वा तदवधूय आहृतरूपं तिरस्कृत्य अन्यत्राऽन्यस्मिन् स्थाने गन्तुं ववाञ्छ वाञ्छां चकार। भ्रमरस्वरूपवर्णनेऽस्मिन् तादृश आत्माऽपि व्यज्यते।

अनुवाद – (भ्रमरपक्ष) वास्तविक वर्ण को आवृत करने वाला यह अनैसर्गिक, पराग से जनित आहृतस्वरूप तथा स्पष्टदृष्ट होते हुए भी अपना सभी के द्वारा अनुमान करना उस भ्रमर को अच्छा नहीं लगा। इसलिए उसे छोड़ कर उसने अन्यत्र जाने की इच्छा किया।

(आत्मपक्ष) नित्यस्वरूप को आच्छादित करने वाला आवरण, रजोगुण से जनित आगन्तुकरूप तथा प्रत्यक्ष अनुभव का विषय होते हुए भी संसार दशा में सबके द्वारा अपना अनुमान किया जाना, आत्मा को रुचिकर नहीं लगा। अतः उस रूप को छोड़कर वह अन्यत्र जाने को उद्यत हुआ।

।। ६ ।।

सकलकरणरुच्यातिथ्यसत्कारसीमां
विदधदपि रसालस्तं निरोद्धुं न शेके।
सुलभतनुनिदानादृष्टजायत्नभोगैः
क्व चिदपि चिरवासो नेष्यते स्माऽनिकेतैः ।।

अन्वयः – सकलकरणरुच्या आतिथ्यसत्कारसीमां विदधत् अपि रसालः तं निरोद्धुं न शेके। सुलभतनुनिदानादृष्टजायत्नभोगैः अनिकेतैः क्वचित् अपि चिरवासः न इष्यते स्म।

गङ्गा – अलेर्वारणे सहकारस्याऽसामर्थ्यं निरूपयति– **सकलकरणेति–** सकलकरणरुच्या सर्वेन्द्रियाणां रुचिमनुसृत्य आतिथ्यसत्कारसीमां विदधदपि कुर्वन्नपि रसालवृक्षः आम्रतरुः तं भ्रमरं निरोद्धुं न शेके न समर्थो बभूव। सुलभतनुनिदानादृष्ट-जायत्नभोगैः, सुलभः सुखेन लभ्यस्तनुनिदानभूतः अदृष्टजः अयत्नभोगः येषां तैः

अनिकेतैः संन्यासिभिः क्वचित् कस्मिन्नपि स्थाने चिरवासः बहुकालाय निवासः न इष्यते स्म। इह स्मेति चिन्त्यम्, वर्तमानविवक्षायाः समुचितत्वात्।

अनुवाद – समस्त इन्द्रियों की रुचि के अनुसार आतिथ्यसत्कार की सीमा का सम्पादन करता हुआ भी वह आम्रवृक्ष उस भ्रमर को रोकने में समर्थ नहीं हो सका। जिन्हें शरीर का निदानभूत अदृष्टजन्य भोग बिना किसी प्रयास के सुलभ होता है, ऐसे संन्यासी कहीं भी चिरकाल तक निवास नहीं करना चाहते।

।।७।।

अथ नुतसहकारारब्धनानाप्रकारा–
ऽतिथिसमुचितसाराहारसत्कारभारः।
भ्रमरसहचरीभिः सम्भ्रमादभ्रमार्गे
युगपदनुगतोऽसावुत्पपाताऽलिराम्रात्।।

अन्वयः – अथ नुतसहकारारब्धनानाप्रकाराऽतिथिसमुचितसाराहार–सत्कारभारः सम्भ्रमात् अभ्रमार्गे भ्रमरसहचरीभिः युगपत् अनुगतः असौ अलिः आम्रात् उत्पपात।

गङ्गा – अथ नुतेति– अथ नुतसहकारारब्धनानाप्रकाराऽतिथिसमुचित–साराहारसत्कारभारः, अथ अनन्तरं, नुतः स्तुतः सहकारेण आम्रवृक्षेण आरब्धानां विविधानाम् अतिथिसमुचितानां सारभूतानाम् आहाररूपाणां सत्काराणां भारो येन सोऽलिः। सम्भ्रमात् त्वरायाः। 'सम्भ्रमस्त्वरा' इत्यमरः। अभ्रमार्गे आकाशमार्गे भ्रमरसहचरीभिः सहकारवृक्षाश्रिताभिः भ्रमरीभिः युगपत् सहैव अनुगतः अनुसृतः सन् असौ यतिरूपोऽलिः आम्रात् आम्रवृक्षात् उत्पपात उड्डयनं चकार। आम्रवृक्षकृतातिथ्यसत्काराणां सम्मानं विधाय अलिरयं वृक्षात्तस्मात् प्रतस्थ इति भावः।

अनुवाद – तदनन्तर उस अलि ने आम्रवृक्ष के द्वारा सम्पादित अनेक अतिथियोग्य सारभूत सत्कारों की प्रशंसा की। त्वरा से आकाशमार्ग में भ्रमरियों के द्वारा साथ ही अनुगत यह भ्रमर उस आम्रवृक्ष से उड़ गया।

।।८।।

विहरति परितस्तं चूतमुद्धूतगन्धं
स्वनविजितविपञ्चीपञ्चमे तत्र भृङ्गे।

अभिमतषडभिज्ञोपज्ञविज्ञानवादो
विपिन इह विलासी तं विचिन्वन् विवेश।।

अन्वयः – उद्भूतगन्धं तं चूतं परितः स्वनविजितविपञ्चीपञ्चमे भृङ्गे तत्र विहरति (सति) अभिमतषडभिज्ञोपज्ञविज्ञानवादः विलासी तं विचिन्वन् इह विपिने विवेश।

गङ्गा – विहरतीति– उद्भूतगन्धम्, उद्भूत उत्पन्नो गन्धः सुरभिः यस्मिन् तं चूतमाम्रवृक्षं परितः स्वनविजितविपञ्चीपञ्चमे स्वनेन गुञ्जारवेण विजितो विपञ्चीपञ्चमः येन तस्मिन् भ्रमरे। गुञ्जारवेण वीणायाः पञ्चमरागस्य विजेतरीत्यर्थः। 'निषादर्षभगान्धारषड्जमध्यमधैवताः। पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वरा' इत्यमरः। 'विपञ्ची केलिवीणयोः' इति कोशः। तादृशे ब्रह्मवित्प्रतीकभूते भ्रमरे तत्रोपवने विहरति सति। अभिमतषडभिज्ञोपज्ञविज्ञानवादः, अभिमतः स्वीकृतः षडभिज्ञोपज्ञः बुद्धेनोद्भावितो विज्ञानवादः बौद्धशास्त्रे प्रसिद्धो मतविशेषो यस्य सः। 'षडभिज्ञो दशबलोऽद्वयवादी विनायक' इत्यमरः। स्वीकृतबुद्धनिबद्धविज्ञानवादः स विलासी तम् पूर्वशतके स्वविजेतारमलिं विचिन्वन् मार्गयन् इह विपिने वने विवेश, प्रवेशं चकार।

अनुवाद – जिसमें गन्ध उत्पन्न हो गयी थी, ऐसे उस आम्रवृक्ष के चारों ओर जब अपने गुंजार से वीणा के पंचम राग को परास्त कर देने वाला वह भ्रमर विहार कर रहा था, तभी बुद्ध के द्वारा उपज्ञ विज्ञानवाद को मानने वाले उस विलासी ने भ्रमर को खोजते हुए इस वन में प्रवेश किया।

।। ९ ।।

युवतिकुलमिवासीत् कर्णिकारोचितश्री–
सुभगमुपवनं यत्सालसम्पूर्णशोभम्।
दधदपि च पलाशान् हृद्यतारुण्ययोगाद्
वहत इह नवोद्यत्कन्दलीनामभिख्याम्।।

अन्वयः – हृद्यतारुण्ययोगात् नवोद्यत्कन्दलीनाम् अभिख्यां वहतः पलाशान् दधत् अपि कर्णिकारोचितश्रीसुभगं सालसम्पूर्णशोभं च इह यत् उपवनं युवतिकुलम् इव आसीत्।

गङ्गा – युवतिकुलेति– युवतिकुलपक्षः– हृद्यतारुण्ययोगात्, हृद्यं मनोहरं यत् तारुण्यं यौवनं तस्य योगात्। नवोद्यत्कन्दलीनाम्, अभिनवे कन्दे लीनां गुप्ताम्। 'कन्दोऽस्त्री सूरणे सस्यमूले जलधरे पुमान्' इति मेदिनी। नवसस्यमूले गुप्तामिथ्यर्थः। अभिख्यां कान्तिं वहतः धारयतः पलाशान् पलवत् आशा येषां तान् चञ्चलतृष्णान्। यून इति यावत्। दधत् अपि धारयत् अपि कर्णिकारोचितश्रीसुभगम्, कर्णिकाभिः रोचितया श्रिया सौन्दर्येण सुभगं सुन्दरम्। 'कर्णिकाकर्णभूषणम्' इत्यमरः। सालसम्पूर्णशोभम्, आलस्ययुक्तमपि पूर्णशोभम्। यत् उपवनं युवतिकुलमिव असीत्। युवतिकुलं दृष्ट्वा यूनः सतृष्णाः भवन्ति। तादृशयूनो धारयत् युवतिकुलमिव तरुणीनां समूह इव शोभते स्म।

उपवनपक्षे– हृद्यतारुण्ययोगात् हृद्यतया मनोहरतया आरुण्ययोगात् रक्तत्वसंयोगात् नवोद्यत्कन्दलीनां नवोदितोद्भिद्विशेषाणाम् अभिख्यां कान्तिं सौन्दर्यं वा वहतः धारयतः पलाशान् किंशुकतरूंश्च दधत् धारयद् कर्णिकारोचितश्रीसुभगम्, कर्णिकाराणां वृक्षविशेषाणामुचितया श्रिया शोभया सुभगं मनोहरम्। सालसम्पूर्णशोभम्, सालैर्वृक्षैः सम्पूर्णा शोभा यस्य तत्। वृक्षपरिपूर्णसौन्दर्यम्। यत् उपवनं युवतिकुलम् इव युवतीनां समूह इव आसीत्। अत्र प्रयुक्तयत्पदस्य 'तदुपवनमवाप्य' इति त्रयोदशश्लोके प्रयुक्तेन तत्पदेन सम्बन्धः।

अनुवाद – युवति समूह पक्ष– जो उपवन कर्णाभूषण से शोभायमान सौन्दर्य से मनोहर, आलस्य युक्त होकर भी पूर्णशोभायुक्त, मनोहर यौवन के योग से चंचल तृष्णा से युक्त तरुणों को धारण करने वाले तथा अभिनव सस्यों में छिपी हुई कान्ति को धारण करने वाले युवतिकुल के समान था।

उपवनपक्ष– जो उपवन कर्णिकारवृक्षों की उचितश्री से सुशोभित था, उसकी शोभा साल वृक्षों से परिपूर्ण थी, मनोहर होने के कारण अरुणिमा से जो पलाश वृक्षों को धारण करता हुआ भी नई कन्दलियों की सुन्दरता को वहन कर रहा था, अतः युवतिसमूह के समान सुशोभित हो रहा था।

॥ १० ॥

मृदुमृदुपवनाप्त्या लुप्तसञ्चारखेदं
घनकुरवनिकुञ्जैः सौरभाऽलङ्घनीयम्।

धृतमधुरसरागालापमाद्यन्मिलिन्दं
शशिशुचिरुचिमल्लीलास्यरम्यं यदासीत्।।

अन्वयः – यत् (उपवनं) मृदुपवनाप्त्या लुप्तसञ्चारखेदं, घनकुरवनिकुञ्जैः सौरभालङ्घनीयं, धृतमधुरसरागालापमाद्यन्मिलिन्दं शशिशुचिरुचिमल्लीलास्यरम्यम् आसीत्।

गङ्गा – पुनस्तस्यैवोपवनस्य शोभां वर्णयति– **मृदुमृदुपवनेति**– यदुपवनं मृदुमृदुपवनाप्त्या मृद्वी मृत् मृत्तिका यस्मिंस्तस्य उपवनस्य आप्त्या प्राप्त्या। यद्वा मृदुतरस्य वायोः पवनस्य आप्त्या प्राप्त्या। लुप्तसञ्चारखेदम्, लुप्तः सञ्चारस्य सञ्चरणस्य भ्रमणस्य वा खेदः परिश्रमो येन, दूरीकृतभ्रमणश्रमम्। घनकुरवनिकुञ्जैः, घनानां कुरवकवृक्षाणां निकुञ्जैर्लतामण्डपैः। सौरभालङ्घनीयम्, सौगन्ध्येन हेतुना अलङ्घनीयम्, लङ्घनाऽयोग्यम्, यद्वा सूर्यसम्बन्धिकान्त्या लङ्घनाऽयोग्यम्। धृतमधुरसरागालापमाद्यन्मिलिन्दम्, धृताः धारिता मधुरं सरागं चालापैः गुञ्जारवैः माद्यन्तः पीतमकरन्दरसाः मिलिन्दा भ्रमरा येन तत्। अथवा धृता मधुरसरागालापैर्माद्यन्तो मिलिन्दा येन तत्। शशिशुचिरुचिमल्लीलास्यरम्यम्, शशिशुचिरुचीनां चन्द्रशुभ्रकान्तीनां मल्लीलतानां लास्येन नृत्येन रम्यम्, अथवा चन्द्रोपमितकान्तियुक्ता लीला येषां तादृशानि आस्यानि मुखानि येषां तादृशैः नरै रम्यं मनोहरम्। यदिति पदं परेण त्रयोदशपद्यस्थेन तत्पदेन सम्बध्यते।

अनुवाद – मृदुलमृत्तिका से युक्त (अथवा मन्दतर पवन से युक्त) जिस उपवन की प्राप्ति से भ्रमण का कष्ट नष्ट हो जाता था, जो सघन कुरबक के लतामण्डपों के कारण सुगन्धि (और सूर्य की किरणों) द्वारा अलंघनीय था। जिसमें मधुर और सराग आलाप से मकरन्द का पान करने वाले (अथवा रागालाप से) भ्रमर मतवाले हो रहे थे। चन्द्रमा के समान सुन्दर मल्लीलता के लास्य (चन्द्र के समान कान्ति से युक्त लीला के समान जिनकी मुखच्छवि थी ऐसे मनुष्यों) से जो रम्य था।

।।११।।

पृथुलकुचतरुण्याह्लादहेतौ वनेऽस्मिन्
लसति चरति मन्दं दक्षिणे गन्धवाहे।
जहसुरथ ववल्गुश्चालिलिङ्गुः प्रमेणुः
प्रणयमिह वहन्त्यश्चापलम्बालवल्ल्यः।।

अन्वयः – पृथुलकुचतरुण्याह्लादहेतौ लसति अस्मिन् वने दक्षिणे गन्धवाहे मन्दं चरति (सति) इह प्रणयं वहन्त्यः चापलम्बाः लवल्ल्यः जहसुः ववल्गुः आलिलिङ्गुः अथ च प्रमेणुः।

गङ्गा – पृथुलकुचेति–पृथुलकुचतरुण्याह्लादहेतौ पुष्टस्तनवतीनां तरुणीनामा–नन्दकारणे लसति सुशोभमानेऽस्मिन् वने दक्षिणे गन्धवाहे मलयसमीरे मन्दं चरति सति वाति सति। यद्वा पृथुलकुचतरुण्याह्लादहेताविति वनविशेषणम्। पृथवः लकुचतरवो यस्मिन्निति तादृशे पृथुलकुचतरुणि वन इत्यर्थः। 'लकुचो लिकुचो डहुः' इत्यमरः। इह तादृशे वने प्रणयं प्रीतिं वहन्त्यो धारयन्त्यः चापलम्बाः चाप इव लम्बा दीर्घा लवल्ल्यो लवलीलताः। अथवा चापलं चाञ्चल्यं वहन्त्यो बालवल्ल्यः बाललताः। अस्मिन् पक्षे प्रणयमिति क्रियाविशेषणम्। तादृश्यो लवल्यो बाललताः जहसुः, 'हस् धातोः' लिटि रूपम्। हासं चक्रुरित्यर्थः। ववल्गुः 'वल्ग गता' विति धातोर्लिटि रूपम्। ननृतुरित्यर्थः। आलिलिङ्गुः, स्नेहेन परस्परम् आलिङ्गनं कृतवत्योऽथ च प्रमेणुः 'मण् शब्दार्थे' इति धातोर्लिटि रूपम्। झणत्कारं कृतवत्य इत्यर्थः।

अनुवाद – वह उपवन पुष्ट स्तनों वाली युवतियों के आनन्द का हेतु था। (अथवा जिसमें बहुत से लकुच वृक्ष विद्यमान थे, ऐसे आनन्दप्रद) सुशोभित हो रहे इस वन में मलय समीर के संचार करने पर प्रणय को धारण करने वाली चाप के समान लम्बी लवली (अथवा चंचल बाल) लताओं ने हास, नृत्य, आलिंगन और झणत्कार किया।

।।१२।।

परिमलमणुमप्यास्वाद्य वासन्तिकाया
धृतचिरगुरुमाना अद्य वा सन्ति का याः ?।
वशयति हरिणाक्षीरन्यपुष्टोपदेशो
विपिन इह विहर्तुं कस्य नेष्टोऽपदेशः।।

अन्वयः – वासन्तिकायाः अणुम् अपि परिमलम् आस्वाद्य धृतचिरगुरुमानाः अद्य काः वा सन्ति याः हरिणाक्षीः अन्यपुष्टोपदेशः वशयति? इह विपिने विहर्तुं कस्य अपदेशः न इष्टः?

गङ्गा – वासन्तिकायाः प्रभावाधिक्यं वर्णयति– **परिमलेति**– वासन्तिकायाः वसन्तर्तुसम्भूतसुषमायाः अणुमपि स्वल्पमपि परिमलं सौरभम् आस्वाद्य अद्य

कालेऽस्मिन् धृतचिरगुरुमानाः धृतोऽङ्गीकृतश्चिरगुरुमानो याभिस्तादृश्यः। बहुकालव्यापिविशदमानवत्य इत्यर्थः। अद्य अधुना अस्मिन् वसन्ततौ काः वा सन्ति याः हरिणाक्षीः मृगनयनाः सुन्दर्यः अन्यपुष्टोपदेशः कोकिलोपदेशः वशयति, वशीकरोति, न का अपीत्यर्थः। कोकिलोपदेशस्तासां मानमपगमयितुं न समर्थः। वासन्तिकाया अणुमात्रपरिमलास्वादप्रभावः परभृतोपदेशशक्तिं तिरस्करोतीत्यर्थः। इह एतादृशे विपिनेऽरण्ये विहर्तुं कस्य वा तरुणस्य अपदेशो व्याजो न इष्टः ? समेषामेव तादृशव्याज इष्ट इत्यर्थः।

अनुवाद – वासन्तिका के अणुमात्र परिमल का आस्वादन करके चिरकाल तक विशद मान को धारण करने वाली आज कौन सी स्त्रियाँ हैं, जिन्हें कोयल का उपदेश वशीभूत कर पा रहा है ? इस विपिन में विहार करने का व्याज किसे अभीष्ट नहीं है।

।। १३ ।।

विकसितसितसीमाऽतीतमल्लीपरीतं
तदुपवनमवाप्य क्वाऽप्यपश्यन्नलिं तम्।
स्वकरणगतदोषात्तद्दिदृक्षानपेक्षः
क्षुभितमनसिजोऽयं व्यक्षिपद्दिक्षु चक्षुः।।

अन्वयः – विकसितसितसीमाऽतीतमल्लीपरीतं तत् उपवनम् अवाप्य स्वकरणगतदोषात् तम् अलिं क्वापि अपश्यन् तद्दिदृक्षानपेक्षः क्षुभितमनसिजः अयं (विलासी) दिक्षु चक्षुः व्यक्षिपत्।

गङ्गा – विकसितेति– विकसितसितसीमाऽतीतमल्लीपरीतम्, विकसितया सितसीमातीतया मल्ल्या मल्लिकया परीतं व्याप्तम्। विकासं प्राप्तया अतिशुभ्रया मल्लिकया व्याप्तमित्यर्थः। तत् वर्ण्यविषयत्वेनोपक्रान्तमुपवनमुद्यानमवाप्य अथ च तत्र क्वापि तं ब्रह्मवित्प्रतीकभूतमलिं स्वकरणगतदोषात् स्वेन्द्रियनिष्ठदोषात् अपश्यन् तद्दिदृक्षानपेक्षः तस्य अलेः दिदृक्षया द्रष्टुमिच्छया अनपेक्षः अपेक्षारहितः क्षुभितमनसिजः क्षुभितः सुन्दरोपवनदर्शनेन आन्दोलितो मनसिजः कामो यस्य स तादृशोऽयं विलासी दिक्षु दिशासु चक्षुः अक्षि व्यक्षिपत् विस्तारयामास।

अनुवाद – वह विलासी विकास से श्वेतिमा की सीमा का अतिक्रमण करने वाली मल्लिका से व्याप्त उस उपवन में पहुँच कर वह विलासी अपने इन्द्रियगत दोष

से उस भ्रमर को कहीं नहीं देख पाया। अत: उसकी दिदृक्षा से रहित कामपीड़ित उस विलासी ने दिशाओं में अपनी आँख को फैलाया।

।।१४।।

निशमितमितदूताऽव्यक्तसन्देशमात्र-
त्वरितविरहतान्तस्वान्तकान्ताभियाते।
मदनमदनवीनारम्भहीनाभिमाना-
ऽभिसरणपरदीनालापिमीनाक्ष्युपेते।।

अन्वयः – निशमितमितदूताव्यक्तसन्देशमात्रत्वरितविरहतान्तस्वान्तकान्ता-भियाते मदनमदनवीनारम्भहीनाभिमानाऽभिसरणपरदीनालापिमीनाक्ष्युपेते 'इह वने स विलासी विहारं कर्तुम् ऐच्छत्'।

गङ्गा – निशमितेति–निशमितमितदूताव्यक्तसन्देशमात्रत्वरितविरहतान्त-स्वान्त–कान्ताभियाते, निशमितेन श्रुतेन मितदूताव्यक्तसन्देशमात्रेण मितस्य एतन्नामकस्य दूतस्य अस्पष्टसन्देशमात्रेण त्वरितं शीघ्रं विरहेण तान्तं व्याप्तं स्वान्तमन्त:करणं यासां तादृशीभि: कान्ताभि: प्रियतमाभि: अभियाते सम्प्राप्ते। मितनामकदूतमुखाद् अस्पष्टमपि सन्देशं श्रुत्वा शीघ्रमेव व्याप्तविरहहृदया: कान्ता यत्र प्राप्तास्तादृशेऽस्मिन् वने। मितदूतस्य लक्षणं साहित्यदर्पणादौ प्रथितमेव। पुनश्च कीदृशे वने? मदनमदनवीनारम्भहीनाभि-मानाऽभिसरणपरदी–नालापिमीनाक्ष्युपेते, मदनमदेन कामाकुलतया नवीन: नव: आरम्भ: यासां ता: मदनमदनवीनारम्भा:, अत एव हीन: अभिमान: मानो यासां ता: हीनाभिमाना:, अत एव अभिसरणपरा: प्रियमभिसर्तुं स्वयमेवोद्यता: दीनाभिलापिन्यश्च पूर्वमानवशात् तिरस्कृतान् प्रियान् अनुनेतुं दीनं करुणमपलपितुं प्रार्थयितुं शीलं यासां ता:, एतादृश्यो या मीनाक्ष्यस्ताभिरुपेते युक्ते वनेऽस्मिन् विलासी विहारं कर्तुमैच्छदिति परेणान्वय:। विहारं भ्रमणं बौद्धमठं वा कर्तुमिष्टवानित्यप्यर्थ:। 'इह वने स विलासी विहारं कर्तुम् ऐच्छत्' इत्यग्रिमेण सम्बन्ध:।

अनुवाद – मित नामक दूत के अस्पष्ट सन्देशमात्र से शीघ्र ही जिनका हृदय व्याप्त हो गया था, ऐसी कान्ताएं जहाँ आ गयी थीं तथा कामदेव के मद के कारण नवीन आरम्भ वाली, अभिमान से हीन, प्रिय के अभिसरण के लिए स्वयं उद्यत, प्रियतमों को प्रसन्न करने के लिए स्वयं अनुनय कर रहीं मीननयना कान्ताएं जहाँ पहुँच गयी थीं, उस इस वन में विलासी ने विहार (भ्रमण या बौद्धमठ) करना

चाहा।

।। १५ ।।

चलितललितदोलारूढलोलालकान्ता-
कुलनयनमहेलारब्धहेलाकलापे।
जवनपवनवेगोद्‌धूतवासोजिघृक्षा-
स्खलितयुवतिवीक्षाव्यग्रकामार्तलोके ।।

अन्वयः - चलितललितदोलारूढलोलालकान्ताकुलनयनमहेलारब्धहेला-कलापे जवनपवनवेगोद्‌धूतवासोजिघृक्षास्खलितयुवतिवीक्षाव्यग्रकामार्तलोके (इह वने स विलासी विहारं कर्तुमैच्छत्)।

गङ्गा - पुनस्तद्वनस्योन्मादकतां वर्णयति- **चलितेति-** चलितललि-तदोलारूढलोलालकान्ताकुलनयनमहेलारब्धहेलाकलापे, चलितललितदोलारूढाभिः चञ्चलसुन्दरहिन्दोलगताभिः लोलालकान्ताकुलनयनाभिः चलितकेशैः आकुलनेत्राभिः महेलाभिः स्त्रीभिः। 'महस्योत्सवस्य इला भूमिः महेला' इति रामाश्रमी। आरब्धः हेलानां क्रीडानां कलापः समूहः यस्मिन् तस्मिन्। उपवनपक्षे महेलाः 'इलायची' इति भाषाया लताः। जवनपवनवेगोद्‌धूतवासोजिघृक्षास्खलितयुवतिवीक्षा-व्यग्रकामार्तलोके, जवनस्य वेगशालिनः पवनस्य वेगेन उद्‌धूतानि इतस्ततो क्षिप्तानि यानि वासांसि वस्त्राणि तेषां जिघृक्षया ग्रहणेच्छया स्खलिता या युवतयस्तासां वीक्षायां दर्शने व्यग्रः कामार्तानां कामपीडितानां लोकः समूहः यस्मिन् तादृशेऽस्मिन् वने विलासी विहारं भ्रमणं कर्तुमैच्छत्। विहारं भ्रमणं बौद्धमठं वा निर्मातुं व्यचारयत्।

अनुवाद - चंचल सुन्दर हिन्दोल में आरूढ तथा चंचल केशों के कारण व्याकुल हुए नयनों वाली, स्त्रियों के द्वारा (या इलायची की लताओं के द्वारा) जहाँ क्रीडासमूह प्रारम्भ किये गये थे, वेगशाली पवन के वेग से इधर उधर उड़ रहे वस्त्रों को सम्हालने की इच्छा से स्खलित हुई युवतियों को देखने में व्यग्र कामियों का समूह जहाँ विद्यमान था, ऐसे उस वन में विलासी ने विहार (भ्रमण या बौद्धमठ) करना चाहा।

।। १६ ।।

बहुकुसुमचिचीषाव्याजदूरीकृताली-
निचयचतुररामाऽक्रान्तसङ्केतकुञ्जे।

सुभगतरुणचेतश्चञ्चरीकारविन्दे
वन इह स विलासी कर्तुमैच्छद् विहारम्।।

अन्वयः – बहुकुसुमचिकीषाव्याजदूरीकृतालीनिचयचतुररामाक्रान्तसङ्केतकुञ्जे सुभगतरुणचेतश्चञ्चरीकारविन्दे इह वने विलासी विहारं कर्तुम् ऐच्छत्।

गङ्गा – बहुकुसुमेति– बहुकुसुमचिचीषाव्याजदूरीकृतालीनिचयचतुर-रामाक्रान्त-सङ्केतकुञ्जे, बहुकुसुमचिचीषायाः पुष्कलप्रसूनचयनसमीहाया मिषेण दूरीकृताः सखीसमूहा याभिस्तादृशचतुररामाभिः आक्रान्ताः सङ्केतकुञ्जाः यस्मिन् तादृशे वने। पुनः कीदृशे ? सुभगतरुणचेतश्चञ्चरीकारविन्दे, सुभगाः सुन्दरा ये तरुणा युवानस्तेषां चेतांसि मनांसि इव चञ्चरीका येषु तानि सुभगतरुणचेतश्चञ्चरीकाणि, एतादृशानि अरविन्दानि कमलानि यस्मिन् तस्मिन् वने विलासी विहारं क्रीडां बौद्धमठं वा कर्तुम् ऐच्छत् अवाञ्छत्।

अनुवाद – जिनके द्वारा अत्यधिक फूल तोड़ने की इच्छा के बहाने सखियों के समूह को जिन्होंने दूर कर दिया है ऐसी चतुर ललनाओं से जिसके संकेत कुंज भरे हुए थे तथा सुन्दर तरुणों के मन के समान चंचल भ्रमरों और कमलों से जो परिपूर्ण था ऐसे इस वन में विलासी ने विहार (या बौद्धमठ) करना चाहा।

।। १७।।

अनुपदमविशङ्कं निष्प्रयासं च लभ्याः
कथमिव रमणीया इन्द्रियार्था मयेति।
चपलमतिरुपायं चिन्तयन् सोऽनपायं
तदुचितमथ वेषं बौद्धभिक्षोर्बभार।।

अन्वयः – अथ चलमतिः सः 'रमणीयाः इन्द्रियार्थाः अनुपदम् अविशङ्कं निष्प्रयासं च मया कथम् इव लभ्याः' इति अनपायं उपायं चिन्तयन् तदुचितं बौद्धभिक्षोः वेषं बभार।

गङ्गा – अनुपदमिति– अथ अनन्तरं चलमतिः सः चञ्चलमतिः स विलासी इन्द्रियार्थाः इन्द्रियाणां कामादयो भोग्यपदार्थाः अनुपदं शीघ्रम् अविशङ्कं निष्प्रयासं च यथा स्यात्तथा मया विलासिना कथं लभ्याः प्राप्या इति अनपायं विघ्नरहितम् उपायं साधनं चिन्तयन् विचारयन् तदुचितम् इन्द्रियार्थप्राप्त्युचितं बौद्धभिक्षोः

बुद्धमतानुयायिसंन्यासिनो वेषं बभार धारयामास।

अनुवाद – तदनन्तर उस चंचलमति विलासी ने सोचा कि मुझे सुन्दर इन्द्रियभोग्यपदार्थ शीघ्र, निर्विशंक, और बिना किसी प्रयास के कैसे मिल सकते हैं ? इस विघ्नरहित उपाय को सोचते हुए उसने उसके योग्य बौद्धभिक्षु का वेष धारण किया।

।। १८ ।।

हृदि नियतममान्तं रागमासज्य चीरे
वशयितुमृजुबुद्धीन् मुण्डयित्वा शिरः स्वम्।
दधदजिनमजीनं कुण्डिकामण्डिहस्तो
मुकुलितनयनोऽयं ध्यानमप्यभ्यनैषीत्।।

अन्वयः – हृदि नियतम् अमान्तं रागं चीरे आसज्य अयं ऋजुबुद्धीन् वशयितुं स्वं शिरः मुण्डयित्वा अजीनम् अजिनं दधत् कुण्डिकामण्डिहस्तः मुकुलितनयनः (अयं) ध्यानम् अपि अभ्यनैषीत्।

गङ्गा – हृदि नियतमिति– हृदि हृदये नियतं निष्ठम् अमान्तम् अपरिमितं रागमनुरागं चीरे पटखण्डे आसज्य व्याप्तीकृत्य ऋजुबुद्धीन् कोमलमतीन्, लोकानिति यावत्। वशयितुं वशीकर्तुं स्वं शिरः मुण्डयित्वा अजीनं नवीनम् अजिनं चर्मकृत्तिः। 'अजिनं चर्मकृत्तिः स्त्री' इत्यमरः। दधत् धारयन्। कुण्डिकामण्डिहस्तः पात्रविशेषशोभितहस्तः मुकुलितनयनः दरमीलच्चक्षुः सन् ध्यानं ध्यानयोगमपि अभ्यनैषीत् अभिनीतवान्। अस्य ध्यानशिरोमुण्डनादिकं न वास्तविकमपितु भोगप्राप्तयेऽभिनयमात्रमिति भावः।

अनुवाद – उसने हृदय में निहित अपरिमिति राग को अपने चीर में रख लिया। इसने सीधे साधे लोगों को ठगने के लिए अपना शिर मुड़ा कर नया अजिन (मृगचर्म) भी धारण कर लिया। कुण्डिका (पात्रविशेष) से सुशोभित हाथों वाले बौद्धभिक्षु का रूप धारण करने वाले विलासी ने मुकुलित आँखों से ध्यान करने का अभिनय भी किया।

।। १९ ।।

जयति यतिरसावित्याप्तविश्रम्भभक्ते-
र्जडमनुजसमाजादर्जयन् भोजनीयम्।

स वसु दुरुपदेशैः सञ्चितं वञ्चितेभ्यो
दृढदृषदि विहारे न्यक्षिपच्छद्मभिक्षुः ।।

अन्वयः – असौ यतिः जयति इति आप्तविश्रम्भभक्तेःजडमनुजसमाजात् भोजनीयम् अर्जयन् स छद्मभिक्षुः दुरुपदेशैः वञ्चितेभ्यः सञ्चितं वसु दृढदृषदि विहारे न्यक्षिपत्।

गङ्गा – जयतीति– असौ यतिः बौद्धभिक्षुः जयति सर्वोत्कर्षशाली विद्यत इति रूपेण आप्तविश्रम्भभक्तेः प्राप्तविश्रब्धभक्तेर्योगात् जडमनुजसमाजात् जडा मूर्खास्तत्स्वरूपविवेकेऽसमर्थास्तेषां समाजात् भोजनीयं स्वादुभोज्यपदार्थम् अर्जयन् एकत्रीकुर्वन् सः छद्मभिक्षुः दुरुपदेशैः कुत्सितोपदेशैः वञ्चितेभ्यः मनुष्येभ्यः सञ्चितं राशीकृतं वसु धनं दृढदृषदि अचलप्रस्तरे विहारे बौद्धमठे न्यक्षिपत् अरक्षत्।

अनुवाद – 'यह बौद्धयति सर्वोत्कर्षशाली है', इस प्रकार उसमें दृढ़ भक्ति रखने वाले मूर्ख लोगों के समाज से उसने भोजन अर्जित किया। उस छद्मभिक्षु ने अपने दुरुपदेशों से वंचित हुए लोगों का धन ठग कर उसे दृढ़शिलाओं वाले बौद्धमठों में छिपा दिया।

।। २० ।।

अधिगतबहुभिक्षाचीररक्षामिषात्ता
रचितवितथदीक्षाः साधु भुञ्जन् भुजिष्याः ।
व्रतमिदमिति सर्वान्नीनतां स प्रशंसन्
चिरमरमत नारीसङ्घसङ्घट्टहृष्टः ।।

अन्वयः – अधिगतबहुभिक्षाचीररक्षामिषात्ता रचितवितथदीक्षाः भुजिष्याः साधु भुञ्जन् 'इदं व्रतम्' इति सर्वान्नीनतां प्रशंसन् सः नारीसङ्घसङ्घट्टहृष्टः (सन्) चिरम् अरमत।

गङ्गा – अधिगतेति– अधिगतबहुभिक्षाचीररक्षामिषात्ता, अधिगतानि यानि बहुभिक्षाचीराणि भोज्यपदार्थाः वस्त्राणि च तेषां रक्षामिषात् संरक्षणव्याजेन आत्ताः प्राप्ताः भुजिष्याः दास्यः। ताः साधु सम्यक् प्रकारेण भुञ्जन् 'इदं व्रतम्' इत्येवं प्रकारेण सर्वान्नीनतां सर्वान्नभोजित्वं प्रशंसन् सः छद्मभिक्षुः कपटयतिः नारीसङ्घसङ्घट्टहृष्टः स्त्रीसमूहैः मिलनेन हृष्टः सन् चिरं चिरकालं यावत् अरमत रमणमकरोत्।

अनुवाद – प्राप्त हुई अत्यधिक भिक्षा और चीरों की रक्षा के व्याज से प्राप्त दासियों का उसने भलीभाँति भोग किया। 'यह व्रत है' यह कहते हुए उसने सर्वान्नभोजिता की प्रशंसा की तथा नारीसमूहों के मिलन से प्रसन्न होकर उसने चिरकाल तक रमण किया।

।। २१ ।।

स्मरपरवशमेनं विस्मृतस्वोपदेशं
कपटयतिमकस्माद् वीक्ष्य विस्मेरचेताः।
अलिरथ पथि तथ्ये स्थापयिष्यन् दयालुः
'स्मरसि रसिक! कच्चिन्मद्वचांसी' त्यपृच्छत्।।

अन्वयः – अकस्मात् पथि स्मरवशम् एनं विस्मृतस्वोपदेशं कपटयतिं वीक्ष्य विस्मेरचेताः दयालुः अलिः तथ्ये स्थापयिष्यन् 'हे रसिक! कच्चित् मद्वचांसि स्मरसि' इति अपृच्छत्।

गङ्गा – स्मरपरवशमिति– अकस्मात् सहसा पथि मार्गे कपटयतिं स्मरपरवशं कामपीडितम् एनं वर्णनोपकान्तं विस्मृतस्वोपदेशं विस्मृतः स्वोपदेशः उपासनामार्गः येन तं, छद्मभिक्षुं तं विलासिनं वीक्ष्य विस्मेरचेताः आश्चर्यचित्तो दयालुः अलिः तं विलासिनं तथ्ये वास्तविके स्वोपदिष्टमार्गे स्थापयन् 'हे रसिक! विलासिन् कच्चित् मद्वचांसि पूर्वप्रसङ्गे कथितानि आत्मस्वरूपप्रतिपादकवचनानि स्मरसि' इत्यपृच्छत्, प्रश्नमकरोत्।

अनुवाद – अकस्मात् मार्ग में कामपीड़ित, जिसने अपने उपासना मार्ग को भुला दिया था, ऐसे उस कपट संन्यासी को देखकर अलि चकित हो गया। उस दयालु ने उसे वास्तविक तथ्य में स्थापित करते हुए पूछा– हे रसिक! क्या तुम्हें मेरे वचन याद हैं?

।। २२ ।।

चकितमविचिकित्सं प्रत्यभिज्ञाय सोऽलिं
हृदि समुदितलज्जोऽप्याश्रयन् धृष्टभावम्।
स्वमतमतनुयुक्त्याभासविन्यासस्सारं
बुधविहतविचारं सत्वरं प्रत्युवाच।।

अन्वयः – सः चकितम् अविचिकित्सं (च) अलिं प्रत्यभिज्ञाय समुदितलज्जः अपि धृष्टभावम् आश्रयन् सत्वरं बुधविहतविचारम् अतनुयुक्त्याभासविन्याससारं स्वमतं प्रत्युवाच।

गङ्गा – चकितमिति– सः छद्मयतिरूपो विलासी चकितं तत्स्वरूपदर्शनेन आश्चर्यान्वितम् अविचिकित्सं निःसन्दिग्धं च अलिं प्रत्यभिज्ञाय परिचित्य समुदितलज्जः लज्जामनुभवन्नपि धृष्टभावमाश्रयन् सत्वरं शीघ्रं बुधविहतविचारं बुधैः विहता विचारा यस्मिन् तादृशम् अतनुयुक्त्याभासविन्याससारं अितनूनाम् अत्यधिकानां युक्त्याभासानां विन्यास एव सारो यस्मिन् ।तत् स्वमतं स्वसिद्धान्तं प्रत्युवाच प्रतिकथयाञ्चकार।

अनुवाद – उस विलासी ने चकित किन्तु सन्देहरहित उस भ्रमर को पहचान लिया। उसे देखकर लज्जित भी हो गया किन्तु धृष्टभाव का आश्रय लेकर शीघ्र ही वह विद्वानों के द्वारा विनष्ट किये गये विचारों से युक्त विशदयुक्तियों के अनेक आभासों का विन्यास ही जिसमें सार था ऐसे अपने मत का कथन करने लगा।

।।२३।।

भ्रमरहितमिदं नो वेद्मि सर्वं त्वदुक्तं
भवतु दुरुपपादः कायचैतन्यवादः।
विमतिरपि ममेष्टा नानुमाने प्रमाणे
श्रुतिचितिसुखजीवेशांस्तु नित्यान् न मन्ये।।

अन्वयः – इदं सर्वं त्वदुक्तं भ्रमरहितं नो वेद्मि। कायचैतन्यवादः दुरुपपादः भवतु। अनुमाने प्रमाणे मम विमतिः अपि न इष्टा (किन्तु) श्रुतिचितिसुखजीवेशान् नित्यान् न मन्ये।

गङ्गा – भ्रमरहितमिति– इदं सर्वं त्वदुक्तं भ्रमरहितं भ्रान्तिशून्यं नो वेद्मि न जाने। अथवा भ्रमर! इति सम्बोधनपदम्। हे भ्रमर! त्वदुक्तमिदं सर्वं हितमनुकूलं नो वेद्मीति योजना। कायचैतन्यवादः, पूर्वं चार्वाकेणोत्थापितः देहात्मवादः नूनं दुरुपपादः दुःखेनोपपादनयोग्यो भवतु। तत्र न मे बौद्धस्य कापि विप्रतिपत्तिः। त्वदुक्तेऽनुमाने प्रमाणेऽपि मम विमतिः अपि न इष्टा। अहमप्यनुमानं स्वीकरोम्येवेत्यर्थः। किन्तु श्रुतिचितिसुखजीवेशान् श्रुतिः वेदश्च चितिसुखमात्मसुखं च जीव आत्मा च ईशः

परमेश्वरश्च तान् वेदात्मसुखजीवात्मपरमेश्वरान् नित्यान् न मन्ये। मम मते केषामपि तत्त्वानां नित्यत्वं न घटत इत्यर्थः। वस्तुतस्तु बौद्धमते सर्वमिदं जगद् विज्ञानरूपमसदेव। अतो नैतन्नित्यम्। तथोक्तं शान्तिरक्षितेनतेषामल्पापराधस्तु विज्ञाननित्यतयोक्तितः।

अनुवाद – तुम्हारे द्वारा कहा गया सब कुछ भ्रमरहित नहीं है (अथवा हे भ्रमर! तुम्हारे द्वारा कहा गया सब कुछ अनुकूल नही है) शरीरमात्र में चेतना भले ही संभव न हो, मुझे कोई आपत्ति नहीं है। अनुमान प्रमाण में भी मेरी कोई विमति नहीं है, परन्तु मैं वेद, चितिसुख, जीव और परमेश्वर को नित्य नहीं मानता।

।। २४।।

न खलु विषयसत्तासिद्धिरन्यत्र वित्ते–
रनुमिनु ननु तस्माद् वेद्यवित्त्योरभेदम्।
तव मम च मते किं द्रव्यसंवित्त्यभिन्नाऽ–
नुभवविषयकुम्भे द्रव्यभेदः प्रसिद्धः।।

अन्वयः – वित्तेः अन्यत्र विषयसत्तासिद्धिः न खलु। ननु तस्मात् वेद्यवित्त्योः अभेदम् अनुमिनु। तव मम च मते द्रव्यसंवित्त्यभिन्नानुभवविषयकुम्भे किं द्रव्यभेदः प्रसिद्धः?

गङ्गा – स्वमतं स्थापयन्नाह विज्ञानवादी विलासी– **न खल्विति**– वित्तेः विज्ञप्तेः ज्ञानाद्वा अन्यत्र विषयसत्तासिद्धिः विषयस्य घटादिपदार्थस्य सत्तासिद्धिः अस्तित्वं न खलु। भवतीति शेषः। विज्ञानवादिबौद्धमते पदार्थानां विज्ञप्तावेव सिद्धिः न तु तस्य बाह्यसत्ता भवति। तन्मते सर्वमिदं वित्तिमात्रम्। सदर्थावभासस्तैर्विज्ञप्तिरूपेणैव स्वीक्रियते। तथा च सिद्धान्तितं दिङ्नागेन– 'यदन्तर्ज्ञेयरूपं बहिर्वत्तदवभासते'। ननु तस्मात् वेद्यवित्त्योः अभेदम् अनुमिनु। बौद्धनये नीलतद्धियोः सहोपलम्भनियमादभेदः। अनयोः वेद्यवित्त्योः अभेदज्ञानमनुमानेन भवति। वस्तुतस्तु विज्ञानवादे बाह्यवस्तु विज्ञप्तिमात्रं किन्तु अद्वैतनये ज्ञानज्ञेययोः न तथात्वमिति विशेषः। अत एव वक्ति तव अद्वैतानुयायिनोऽलेर्मम बौद्धमतानुयायिनो विलासिनश्च मते द्रव्यसंवित्त्यभिन्नानुभवविषयकुम्भे द्रव्यभेदः प्रसिद्धः किम्? द्रव्यसंवित्तेः घटादिज्ञानात् अभिन्नस्य अनुभवस्य विषयभूतो यः कुम्भस्तस्मिन् द्रव्यभेदः ज्ञानालिखितघटरूपद्रव्यभेदः प्रसिद्धः किम्? नेत्यर्थः।

अनुवाद – ज्ञान के अतिरिक्त अन्यत्र कहीं भी विषय की सिद्धि नहीं होती। इसलिए ज्ञेय और ज्ञान में अभेद होता है। तुम्हारे (वेदान्ती) और मेरे (बौद्ध के) मत में द्रव्य के ज्ञान से अभिन्न अनुभव के विषयभूत घट में द्रव्य (घट आदि) का भेद प्रसिद्ध है क्या?

टिप्पणी – विज्ञानवादी बौद्धों के मत में वस्तु की बाह्यसत्ता नहीं होती। विज्ञप्ति या ज्ञानमात्र में ही उन्हें वस्तु की सत्ता स्वीकार्य है अद्वैत वेदान्त में भी ज्ञान और ज्ञेय घट आदि में परमार्थ दशा में अभेद ही है क्योंकि घटादि ज्ञानरूप ब्रह्म के ही विवर्त हैं। विलासी यहाँ इसी तथ्य का कथन करना चाहता है।

।। २५ ।।

मितिरुभयविधाऽसावक्षजा वाऽनुमा वा
सममुदयविनाशौ विन्दतीत्यस्थिरा सा।
कथमिव तदभिन्ने वस्तुनि स्यात् स्थिरत्वं ?
क्षणिकमिह वदामस्तेन सर्वं पदार्थम्।।

अन्वयः – असौ अक्षजा वा अनुमा वा उभयविधा मितिः समम् उदयविनाशौ विन्दति इति सा अस्थिरा। तद्भिन्ने वस्तुनि कथम् इव स्थिरत्वं स्यात्। तेन इह सर्वं पदार्थं क्षणिकं वदामः।

गङ्गा – मितिरुभयेति– असौ अक्षजा इन्द्रियजन्या वा। प्रत्यक्षमिति यावत्। प्रत्यक्षमितिर्भवतु अनुमा अनुमितिर्वा। समं समानमेव उदयविनाशौ उत्पत्तिविनाशौ विन्दति, इति सा अस्थिरा। यथा क्षणिकत्वात् प्रत्यक्षप्रमाऽस्थिरा तथैवाऽनुमाऽपीत्यर्थः। अत एव उभयोरप्यस्थिरत्वम्। तर्हि तदभिन्ने वस्तुनि ज्ञानाभिन्ने विज्ञप्तिमात्ररूपे वस्तुनि कथमिव स्थिरत्वं स्यात्। तेन इह बौद्धनयेऽस्मिन् विज्ञानवादे सर्वं पदार्थं क्षणिकं वदामः। 'यत्सत्तत् क्षणिकं यथा जलधरपटलः सन्तश्च भावा अमी' इत्यादिन्यायात् सर्वमस्थिरमिति भावः।

अनुवाद – चाहे प्रत्यक्ष हो या अनुमान, दोनो ही प्रकार की प्रमा एक समान उत्पन्न और विनष्ट होती है। इस प्रकार प्रत्यक्ष और अनुमान दोनो ही अस्थिर हैं। तब प्रत्यक्ष या अनुमान जैसे क्षणिक ज्ञान में भासित होने वाली वस्तु स्थिर कैसे हो सकती है। इसलिए हम प्रत्येक पदार्थ को क्षणिक कहते हैं।

टिप्पणी – विज्ञानवादी बौद्ध विज्ञप्ति या ज्ञान में ही वस्तु की सत्ता मानते हैं। ज्ञान चाहे प्रत्यक्ष हो या अनुमान, सभी अस्थिर होते हैं। अतः उस ज्ञान से अभिन्न घट आदि वस्तु कैसे स्थिर हो सकती है ?

।। २६ ।।

जलधरपटले चेद् दृष्टनष्टस्वरूपे
व्यभिचरति न सत्तैकक्षणोत्पादनाशौ।
गमयति गतबाधं सा समस्ते प्रपञ्चे
क्षणिकमिदमितीदृक् बौद्धसिद्धान्तघोषः ।।

अन्वयः – चेत् दृष्टनष्टस्वरूपे जलधरपटले सत्ता न व्यभिचरति (तदा) सा समस्ते प्रपञ्चे एकक्षणोत्पादनाशौ गतबाधं गमयति। ईदृक् इदं क्षणिकम् इति बौद्धसिद्धान्तघोषः।

गङ्गा – सत्तावादिनो मतं निराकर्तुमुपक्रमते– **जलधरपटल इति**– यदि चेत् दृष्टनष्टस्वरूपे दृष्टमात्रमेव यस्य स्वरूपं विनष्टं भवति न तु स्थीयते तादृशे जलधरपटले मेघसमूहे सत्ता पदार्थास्तित्वं न व्यभिचरति, अस्तित्वस्य अभावो न भवति तस्य सत्ता भवतीत्यर्थः। तदा सा सत्ता समस्ते प्रपञ्चे सांसारिकद्रव्यभेदे एकक्षणोत्पादनाशौ एकस्मिन्नेव क्षण उत्पत्तिविनाशौ गतबाधं निर्बाधं गमयति बोधयति। यथा जलधरपटल एकक्षणोत्पत्तिविनाशवान् विद्यते तथैव सर्वेऽप्यनुभूयमाना भावा इत्यर्थः। न जलधरपटलमात्रस्य क्षणिकत्वमपितु सर्वेषां भावानामित्यर्थः। ईदृक् एकक्षणोत्पत्तिविनाशवत् इदमस्मद्विज्ञानवादिनां क्षणिकमिति बौद्धसिद्धान्तघोषः डिण्डिमनादोऽस्ति। तर्कपुरस्सरं भावानां क्षणिकत्वसाधनोक्तिसंवलितत्वा–दितीदृशोऽस्माकं समुद्घोषः। तदेतत्सर्वं विस्तरेण प्रपञ्चितं सर्वदर्शनसङ्ग्रहे बौद्धदर्शनप्रकरणे– 'यत्सत्तत्क्षणिकं यथा जलधरः, सन्तश्च भावा अमी'। विस्तरस्तु विज्ञानवादिग्रन्थेषु द्रष्टव्यः।

अनुवाद – यदि कहें कि देखते ही नष्ट हो जाने वाले जलधर पटल में सत्ता का व्यभिचार नहीं होता, उसका अस्तित्व होता ही है तो मेघपटल की भाँति यह सत्ता समस्त प्रपंचों में उसी क्षण उत्पत्ति और विनाशरूप क्षणिकता का निर्बाध रूप से बोध कराती है। ऐसा यह क्षणिकवाद बौद्धसिद्धान्त का घोष है।

टिप्पणी – विज्ञानवादी बौद्धों के अनुसार समस्त सत्तावान् क्षणिक हैं। जिस प्रकार सत्तावान् जलधरपटल क्षणिक है उसी प्रकार अन्य सांसारिक सत्तावान् पदार्थ भी क्षणिक हैं। सत्तावादी जलधरपटल की सत्ता स्वीकार करते हैं किन्तु क्षणवादी बौद्ध दृष्टनष्टस्वरूप उसी मेघपटल के दृष्टान्त से क्षणिकता की सिद्धि करते हैं। सत् जलधरपटल की क्षणिकता संसार के समस्त पदार्थों की क्षणिकता का दृष्टान्त है।

।। २७।।

विपणिविततरूप्यं भूषणादिक्रियायां
प्रभवति न हि तद्वच्छुक्तिरूप्यं समर्थम्।
अनुमतमत आद्ये सत्त्वमन्तेऽप्यसत्त्वं
तदिह भवति सत्ताऽर्थक्रियाकारितैव।।

अन्वयः – विपणिविततरूप्यं भूषणादिक्रियायां प्रभवति। तद्वत् शुक्तिरूप्यं नहि समर्थम्। अतः आद्ये सत्त्वम् अन्ते अपि असत्त्वम् अनुमतम्। तत् इह अर्थक्रियाकारिता एव सत्ता भवति।

गङ्गा – सत्तास्वरूपं निर्वक्ति– **विपणीति**– विपणिविततरूप्यं, विपणौ विततं प्रसृतं रूप्यं रजतं भूषणादिक्रियायां प्रभवति, समर्थो भवति। विपणिस्थरजतेन आभूषणादि निर्माणं भवतीत्यर्थः। तद्वत् विपणिविततरजतवत् शुक्तिरूप्यं शुक्तौ प्रतीयमानं रजतं भूषणादिक्रियायां न प्रभवति। विपणौ रजतस्य वास्तविकी सत्ता शुक्तौ च भवति रजतस्य प्रातिभासिकी सत्ता। अतः आद्ये सत्त्वं वस्तुनोऽस्तित्वमन्तेऽपि असत्त्वमनुमतम्, पदार्थाभावोऽनुमत इत्यर्थः। अपिश्चार्थकः तत् तस्मात् इह अर्थक्रियाकारिता या प्रयोजनभूता भूषणाद्यर्थक्रियाकारिता सैव सत्ता। कार्योत्पादन–शक्तिमत्त्वमेव सत्त्वमित्यर्थः। तेन समेषां पदार्थानां क्षणिकत्वमव्याहतम्। विपणिस्थरजतं भूषणादिक्रियायां प्रभवतीति भूषणरूपार्थक्रियाकारित्वात् तत्क्षणिकम्। तद्विनाशेनैव भूषणस्योत्पत्तेः। तथा चोक्तं सर्वदर्शनसङ्ग्रहे सत्ताशक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा न सा। यत्सत् तत्क्षणिकं यथा जलधरः। अर्थक्रियाकारितैव सत्तेति प्रमाणसिद्धमेव।

अनुवाद – बाजार में प्राप्त चाँदी आभूषण आदि की क्रिया में समर्थ है किन्तु शुक्ति में प्रतीत होने वाली रजत से आभूषण का निर्माण नहीं हो सकता। अतः

बाजार में प्राप्त रजत की सत्ता सिद्ध है किन्तु शुक्ति में रजत की विपणिस्थ शुक्ति के समान सत्ता नहीं मानी जाती। इस प्रकार प्रयोजन को उत्पन्न करने का सामर्थ्य ही सत्ता है।

टिप्पणी – बौद्धों के मत में समस्त पदार्थ क्षणिक हैं, अत: उनके सम्प्रदाय में सत्ता का लक्षण 'अर्थक्रियाकारिता' माना गया है। 'प्रयोजनभूता या क्रिया तत्कारित्वमेव सत्त्वम्' यह अर्थक्रियाकारित्वरूप 'सत्' का लक्षण है। उनका मानना है कि सत्ता वह है जो किसी कार्य को उत्पन्न करे। शुक्ति में प्रतीत होने वाली चाँदी शशविषाण की तरह कोई कार्य उत्पन्न नहीं कर सकती, अत: वह असत् है। किन्तु वास्तविक रजत आभूषण आदि क्रिया में समर्थ होने से सत् है।

बौद्धों ने सत्ता का यह लक्षण क्षणिकता की सिद्धि के लिए किया है।चाँदी में अर्थक्रियाकारिता है इसलिए वह आभूषण के रूप में परिणत हो जाएगा। इस तर्क के सहारे बौद्ध अपने क्षणिकवाद को पुष्ट करते हैं। उदाहरण के रूप में बीज का दृष्टान्त लेते हैं। मान लें कि बीज क्षणिक नहीं है, स्थायी है तो इसकी सत्ता होने के कारण क्षण–क्षण में यह नए नए कार्य उत्पन्न करता रहेगा। यदि बीज सभी क्षणों में समान ही रहे, अपरिवर्तित हो, तो सदा वह उसी प्रकार का कार्य उत्पन्न करेगा किन्तु वस्तुस्थिति इसके विपरीत है। घर में रखा बीज वह नहीं जो खेत में डाला गया है। दोनों के कार्य भिन्न भिन्न हैं। यदि यह तर्क किया जाय कि वस्तुत: बीज वही कार्य उत्पन्न नहीं करता किन्तु उसमें क्षमता है जो उचित कारणों(जैसे– पृथ्वी, जल आदि) के संसर्ग से अभिव्यक्त हो जाती है। अत: बीज सदा वही है। यह तर्क असहाय है, क्योंकि ऐसी दशा में यह स्वीकार करते ही हैं कि पहले क्षण का बीज अंकुरण का कारण नहीं प्रत्युत विभिन्न कारणों के संसर्ग से परिष्कृत बीज ही उसका कारण है। अत: बीज तो परिवर्तित हो गया। इसी प्रकार कोई भी वस्तु दो क्षण नहीं ठहरती। सभी वस्तुएँ क्षणिक हैं। इसकी सिद्धि के लिए सत्ता का एक विशिष्ट लक्षण (अर्थक्रियाकारित्व) करना पड़ता है।

।। २८ ।।

यदि गुणिगुणकर्मैकाश्रितां वक्षि सत्तां
प्रसभमभिनिवेशाद् गौतमौलूक्यवाक्षु।
अयि वद समवाये सा विशेषेऽस्ति नो वा ?
मतविहतिरिहाद्येऽन्त्ये तयोः स्यादसत्त्वम्।।

अन्वयः – यदि गौतमौलूक्यवाक्षु प्रसभम् अभिनिवेशात् गुणिगुणकर्मैकाश्रितां सत्तां वक्षि। अयि! (तदा) सा समवाये विशेषे वा अस्ति नो वा (इति) वद। इह आद्ये मतविहतिः, अन्त्ये (च) तयोः असत्त्वं स्यात्।

गङ्गा – यदि गुणीति– यदि गौतमौलूक्यवाक्षु न्यायवैशेषिकसूत्रकृतोर्वचनेषु प्रसभम् बलात् अभिनिवेशात् आग्रहात् गुणिगुणकर्मैकाश्रितां गुणिनि द्रव्ये गुणे रूपादौ कर्मणि उत्क्षेपणादौ त्रिष्वेव सत्तां वदसि। न्यायवैशेषिकयोः द्रव्यगुणकर्मस्वेव त्रिषु सत्ताङ्गीक्रियते सा च परा जातिः। तथा च तेषां सिद्धान्तः द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते (मुक्तावल्याम्, १.८)। द्रव्यगुणकर्मसु वर्तमाना या सत्ता सा परा जातिरुच्यत इत्यर्थः। अयि! अले! तदा सा सत्ता समवाये विशेषे वा अस्ति नो वा इति वद, कथय। इह आद्ये समवाये सत्तास्वीकारे ते मतविहतिः, सिद्धान्तभङ्गः। अन्त्ये विशेषे च सत्तायाः स्वीकारात् तयोः समवायविशेषयोः असत्त्वमभावः स्यादिति दोषः। नैयायिका वैशेषिकाश्च समवाये समवायत्वरूपां सत्तां विशेषे च विशेषत्वरूपां सत्तां न स्वीकुर्वन्ति। समवायस्य एकत्वान्न तत्र सत्ता। विशेषस्तु नित्यद्रव्यवृत्तिः। अयं नित्येषु द्रव्येषु पृथ्वीजलतेजःपवनानां परमाणुषु आकाशकालदिगात्ममनःसु च भवति। अयमेव परमाणूनां परस्परभेदकः। अतो नाऽत्र सामान्यमिति न्यायवैशेषिक-सिद्धान्तः। तदेव वक्तिसमवाये सत्तास्वीकारे मतविरोधः, विशेषे च सत्ताङ्गीकारे उभयोः समवायविशेषयोः असत्त्वं स्यात्। सामान्याभावादेव विशेषस्य स्वतो व्यावृत्तत्वरूपं वैशिष्ट्यम्।

विशेषेषु सामान्यस्य स्वीकारे विशेषस्वरूपस्यैव हानिरिति न्यायवैशेषिकनयः। विशेषे सत्तायाः स्वीकाराद् विशेषस्वरूपहानौ तत्र समवायोऽपि न भवेदिति तयोरसत्त्वम्। यदि विशेषे सत्ता स्वीक्रियते तर्हि तत्र सत्ता समवायसम्बन्धेन स्थास्यति। तेन विशेषस्वरूपस्य नाशः। सत्तासमवायाभावादेव तस्य विशेषत्वम्। सत्तायां सत्यां विशेषस्वरूपनाशे समवायस्य स्वयमेव नाशोऽयुतसिद्धत्वात्।

अनुवाद – यदि तुम गौतम और कणाद के वचनों में दृढ़ता पूर्वक विश्वास करते हो और द्रव्य, गुण तथा कर्म में ही सत्ता (जाति) स्वीकार करते हो, तब यह बताओ कि वह सत्ता समवाय और विशेष पदार्थों में है या नहीं। अगर समवाय में सत्ता स्वीकार करते हो तो तुम्हारा सिद्धान्तभंग होगा क्योंकि समवाय एक और नित्य है। एक वस्तु में सत्ता तुम्हें स्वीकार नहीं। यदि विशेष में सत्ता स्वीकार करते हो तो समवाय और विशेष दोनो ही विनष्ट हो जायेगे।

टिप्पणी – न्याय और वैशेषिक में सत्ता (सामान्य) केवल द्रव्य, गुण और कर्म में मानी गयी है। यह सत्ता नित्य और अनेकसमवेत होती है। द्रव्य आदि में अनेक समवेतत्व सिद्ध होता है। द्रव्य अदि में यह सत्ता समवाय सम्बन्ध से रहती है किन्तु समवाय में समवायत्व रूप सामान्य नहीं रहता। इसका कारण यह है कि एक तो समवाय एक है, अत: उसमें अनेकसमवेतत्व सिद्ध नहीं होगा। दूसरा समवायत्व अपने सम्बन्धी में रहेगा किस सम्बन्ध से। सामान्य तो अन्य पदार्थों में समवाय सम्बन्ध से ही रहता है। अत: नैयायिक आकाशत्व, समवायत्व, भूतत्व और मूर्तत्व आदि को सामान्य न मान कर उपाधि मानते हैं।

विशेष सामान्य रहित होने के कारण ही 'विशेष' कहलाता है। यह नित्यद्रव्य परमाणु का धर्म है। परमाणु में सामान्य धर्म होता नहीं। इसी तथ्य को ऊपर कहा गया है कि अगर समवाय में समवायत्व रूप सामान्य मान लिया गया तो आपके सिद्धान्त की हानि होगी और विशेष में सामान्य मान लेने से समवाय और विशेष दोनो नहीं रहेगे। विशेष में सत्ता मानने से वहाँ समवाय की व्याप्ति स्वयं हो जायेगी क्योंकि सामान्य समवाय सम्बन्ध से ही रहेगा। इससे विशेष नष्ट हो जायेगा और विशेष के नष्ट होते ही समवाय स्वयं नष्ट हो जायेगा क्योंकि वह अयुतसिद्ध होता है। अत: इन्हें जातिबाधक कहा गया है–

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थिति:।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रह:।।

व्यक्ति का अभेद, तुल्यता, संकर, अनवस्था, रूपहानि और असम्बन्ध जातिबाधक कहे गए हैं। इस प्रकार विज्ञानवादी बौद्ध के सिद्धान्त का आश्रय लेकर सत्ताविषयक उक्त प्रश्न विलासी ने उठाया है।

।।२९।।

यदि वदसि विशेषेष्वाश्रयैक्येन सत्तां
प्रसरति घटनिष्ठे तर्ह्यभावेऽपि सा ते।
अलमिह समवायाभाव एतां न रोद्धुं
कथमिव समवाये सत्त्वमेवं सति स्यात्?।।

अन्वय: – यदि विशेषेषु आश्रयैक्येन सत्तां वदसि तर्हि सा ते घटनिष्ठे अभावे अपि प्रसरति। समवायाभाव: एतां रोद्धुं न अलम्। एवं सति समवाये सत्त्वं

कथमिव स्यात् ?।

गङ्गा – प्रकारान्तरेण पुनः नैयायिकाभिमतसत्तां निराकरोति– **यदि वदसीति**– यदि नाम त्वमलिः स्वसिद्धान्तरक्षार्थं विशेषे तु आश्रयैक्येन सामानाधिकरण्येन सत्तां वदसि तर्हि सा सत्ता ते तवाभिमते घटनिष्ठेऽभावेऽपि प्रसरति। यौ पदार्थौ एकस्मिन्नेव अधिकरणे तिष्ठतस्तयोः सामानाधिकरण्यं भवति। प्रकृते विशेषस्य अधिकरणम् आत्मा वर्तते तत्रैव सत्ताऽपि समवायसम्बन्धेन तिष्ठति। एवम् आत्मरूपस्य एकस्यैव अधिकरणस्य सत्त्वेन विशेषस्य सत्तायाश्च सामानाधिकरण्यसम्बन्धः। एवं सत्ता सामान्याधिकरण्यसम्बन्धेन विशेषे तिष्ठतीति विशेषे सत्तायाः सिद्धिः। एवमेव यदा सामानाधिकरण्येन विशेषेषु सत्ता स्वीक्रियते तदा घटाभावेऽपि सत्ता स्वीकरणीया। यतो हि घटः अभावस्य सत्तायाश्च एकमेव अधिकरणमस्ति। घटे सत्तासमवायेन अभावश्च स्वरूपेण विद्यते। एवं घटाभावे सत्तासामान्याधिकरण्यं वर्तते। किन्तु नैयायिकैः अभावे समानाधिकरण्येन सत्ता न स्वीक्रियते। अतो विशेषेष्वपि सामानाधिकरण्येन सत्ता न भवितुमर्हतीति विलासिनोऽभिप्रायः। पूर्वश्लोके विशेषेषु समवायेन सत्ता निराकृताऽत्र तु सामानाधिकरण्येनेति विशेषः। घटे यद्धि सत्तासामानाधिकरण्यं तदेव तदभावेऽपि विद्यत एव। अतो घटाभावस्थले घटाभावो वक्तुं न शक्येत, एवमेव घटसत्तास्थले तत्सत्तापि न स्यात्। विशेषस्य नित्यद्रव्यवृत्तित्वात् तत्र नैषा विप्रतिपत्तिः किन्तु घटादिस्थले सैषा स्यादेवेति। तव समवायाभावः एतां सत्तां रोद्धुं न अलम्। यतो हि अभाववत् समवाय इह घटाभावे समवायाभावः समवायसम्बन्धस्य अभावः, यतो हि अभावः घटे स्वरूपसम्बन्धेन भवति। तेन घटेऽभावस्य समवायाभावः सिद्धः। यत्र समवायसम्बन्धो भवति तत्रैव सत्ता भवति। तस्माद् घटाभावे समवायाभावः एतां सत्तां रोद्धुं निवारयितुमलमिति न वक्तुं शक्यते। एवं सति समवायाभावस्य सत्तानिरोधकत्वे सति घटे समवायस्यापि सत्त्वं विद्यमानत्वं कथमिव स्यात्। यतो हि घटेऽभाववत् समवायोऽपि स्वरूपसम्बन्धेनैव तिष्ठति। एवं यदि स्वरूपसम्बन्धेन घटे वर्तमाने समवाये सत्त्वं मन्यते तदा स्वरूपसम्बन्धेन घटे वर्तमानेऽभावेऽपि सत्ता मन्यताम्। एवं स्वीकृते तव सिद्धान्तभङ्गः।

अनुवाद – अगर तुम विशेषों में सत्ता के सामानाधिकरण्य से सत्ता सिद्ध करते हो और यह मान लेते हो कि विशेष में सत्ता भले न हो किन्तु विशेष द्रव्यों में विशेष की सत्ता तो है ही, अतः विशेष और सत्ता का सामानाधिकरण्य उन परमाणु

आदि विशेषों में बन ही जाता है। इस पर आपत्ति यह है कि घटाभाव स्थल में भी वैसा सामानाधिकरण्य प्राप्त होने लगेगा। अर्थात् घट में अभाव और सत्ता दोनो का सामानाधिकरण्य हो जाने से घटाभाव नहीं हो सकेगा। यदि कहो कि अभाव और सत्ता दोनो अलग अलग सम्बन्धों से वहाँ रहेगे तो घटाभावस्थल में अभाव के स्वरूप सम्बन्ध से रहने के कारण सत्ता उसका वारण कर देगी क्योंकि वह घट में समवाय सम्बन्ध से रहती है और अभाव स्वरूप सम्बन्ध से। वस्तुत: यहाँ तुम्हारा समवायाभाव उसे रोकने में समर्थ नहीं हो पायेगा क्योंकि समवाय स्वयं भी घट में स्वरूप सम्बन्ध से ही रहता है। अत: स्वरूपसम्बन्ध से युक्त घटनिष्ठ समवाय सम्बन्ध की सत्ता ही वहाँ नहीं बन सकेगी।

।। ३०।।

अथ तव समवायोऽसन् विशेषश्च कार्ये
प्रभवति गुणकर्मद्रव्यसत्ता किमर्था ?।
सदसदपि च कार्यं चेद् विधत्ते त्रिसत्त्वे
वद विनिगमकं किं ? वैपरीत्यं कुतो न।।

अन्वय: – अथ तव समवाय: विशेष: च असन् कार्ये प्रभवति (तर्हि) गुणकर्मद्रव्यसत्ता किमर्था (अस्ति)। सदसदपि कार्यं विधत्ते चेत् त्रिसत्त्वे किं विनिगमकं (इति) वद ? (अथ च तत्र) वैपरीत्यं कुत: न (अस्ति) ?

गङ्गा – अथ तवेति– अथेति प्रश्नान्तरे। तव अले: समवाय: विशेष: च असन् सत्ता रहितो भूत्वा कार्ये प्रभवति, कार्यसम्पादनसमर्थो भवति तर्हि गुणकर्मद्रव्यसत्ता किमर्था अस्ति ? गुणादिषु त्रिषु सत्ता किम्प्रयोजनेत्यर्थ:। तान्यपि त्रीणि सत्तारहितानि एव कार्यं सम्पादयन्तु नाम। यदि नाम सदसदपि, समवाय: विशेषश्च असत्। गुणादित्रयं च सत् कार्यं सम्पादयति इति वदसि तर्हि अत्र किं विनिगमकम् ? एकतरपक्षपातिनी का ते युक्ति: ? तत्रापि वैपरीत्यं कुतो नास्ति। गुणादित्रयमेव असद् भूत्वा समवाय: विशेषश्च सन् भूत्वा कार्यमुत्पादयन्त्विति कथं न भवति ? अर्थात् गुणादित्रये सत्ताराहित्यं समवाये विशेषे च सत्ता कथं न भवतीति प्रश्न: ? विनिगमकाभावान्न तवायं तर्क: स्वीकारयोग्य इति भाव:।

अनुवाद – अगर तुम्हारे समवाय और विशेष सत्तारहित होकर ही काम करते हैं तो फिर गुण, कर्म और द्रव्य में सत्ता क्यों मानते हो। यदि यह कहो कि

समवाय और विशेष सत्तारहित होकर कार्य करते हैं तथा गुण आदि तीनों सत्तावान् हो कर कार्य करते हैं तो इसमें विनिगमक क्या है ? इनमें वैपरीत्य क्यों नहीं है। अर्थात् गुण, कर्म और द्रव्य में सत्ता का अभाव क्यों न माना जाय। इसी प्रकार समवाय तथा विशेष में सत्ता क्यों न मान ली जाय ?

।। ३१ ।।

यदिह चिरमतीतं वस्तु तन्न क्रियेता-
ऽघटितसकलहेतु स्यान्न भाव्यद्य सद्यः।
फलजनिपटु वैलक्षण्यमेकक्षणे यत्
क्षणिकविषयसत्ताऽर्थक्रियाकारिता सा।।

अन्वयः – यत् इह चिरम् अतीतं वस्तु तत् न क्रियते। अघटितसकलहेतु अद्य सद्यः न भावि स्यात्। एक क्षणे यत् फलजनिपटु वैलक्षण्यम् (अस्ति) सा क्षणिकविषयसत्ता अर्थक्रियाकारिता (भवति)।

गङ्गा – यदिहेति– यद्वस्तु इह चिरमतीतं चिरकालादतीतं विनष्टं विद्यते तन्न क्रियेत। अतीतवस्तुनः कर्तुमशक्यत्वात्। अघटितसकलहेतु यस्य वस्तुनः सकला हेतवोऽघटिताः अप्राप्ताः सन्ति तदपि अस्मिन् क्षणे सद्यो न भावि। यतो हि सामग्र्यभावे कार्योत्पत्तिर्न भवति। यत् एकक्षणे, वस्तुनः क्षणिकत्वात् यस्मिन् क्षणविशेषे फलजनिपटु फलोत्पादननिपुणं वैलक्षण्यं विलक्षणता भवति। सा एव क्षणिकविषयसत्ता अर्थक्रियाकारिता प्रयोजनभूता या क्रिया तस्याः कारित्वं भवति। विज्ञानवादिभिः अर्थक्रियाकारिता एव सत्ता स्वीकृता। सा अर्थक्रियाकारिता पदार्थानां क्षणिकत्वेनैव सम्भवति। पराभिमतेषु नित्यपदार्थेषु ईश्वरादिषु न अर्थक्रियाकारिता विद्यते। तथात्वे वर्तमानकार्योत्पादनकाले भूतभाविपदार्थानामुत्पत्तिप्रसङ्गात्। तदेतत्सर्वं पदार्थानां क्षणिकत्वसिद्धय उक्तम्।

अनुवाद – जो वस्तु चिरकाल से अतीत (भूत) है उसकी उत्पत्ति हो नहीं सकती। जिसके समस्त हेतु घटित ही नहीं हुए वह भावी वस्तु भी कैसे उत्पन्न हो सकती है। एक क्षण में ही फल को उत्पन्न करने की विलक्षणता रूप क्षणिकविषयसत्ता ही अर्थक्रियाकारिता कहलाती है। अर्थात् उसी सत्ता में कार्य को उत्पन्न करने का सामर्थ्य होता है।

।। ३२।।

क्षणमिममपहायाऽन्यत्र हेतुत्वमिच्छन्
पतति महति जाले नास्ति यस्माद् विमोक्षः।
परसहकृतिशून्यं किञ्चिदेकं न शक्तं
सहकृतिरपि कार्याऽपेक्षते हेतुमन्यम्।।

अन्वयः – इमं क्षणम् अपहाय अन्यत्र हेतुत्वम् इच्छन् महति जाले पतति। यस्माद् विमोक्षः नास्ति। परसहकृतिशून्यं किञ्चिदेकं शक्तं न (भवति)। कार्या सहकृतिः अपि अन्यं हेतुम् अपेक्षते।

गङ्गा – क्षणमिममिति– इमं फलजनिपटुं मम विलासिनोऽभिमतं क्षणं क्षणवादं सिद्धान्तम् अपहाय परित्यज्य अन्यत्र क्षणातिरिक्ते अक्षणिकवस्तुनि हेतुत्वं कारणत्वमिच्छन् वाञ्छन् महति विशाले जाले अपसिद्धान्तरूपे पाशे पतति। यस्मात् पाशात् विमोक्षः मुक्तिर्नास्ति। 'जालं गवाक्ष आनाये क्षारके जृम्भवृन्दयोः' इति मेदिनी। परसहकृतिशून्यं भिन्नपदार्थसहकाररहितं किञ्चिदेकं स्वकार्ये शक्तं समर्थं न भवति। तथा च न्यायः 'न ह्येकं किञ्चित् पर्याप्तं स्वकार्ये'। कार्या सहकृतिः अपि अन्यं हेतुमपेक्षते। क्षणस्यैव सर्वत्र हेतुत्वं निर्धारयन् नैयायिकाद्यभिमतकारणत्वे दोषमुत्पादयति। अन्यस्य कस्यचित् पदार्थस्य सहकारं विना न हि कोऽपि पदार्थो भवति कार्यजनने क्षमः। तत्र कार्या या सहकारिकारणरूपा सहकृतिः साऽपि स्वस्य कृतेऽन्यं हेतुमपेक्षते। सहकृतिः स्वेतरसहकृतिं सापि पुनः तद्भिन्नां सहकृतिमपेक्षते। तेनाऽनवस्थाप्रसङ्गः। अतो न नित्यपदार्थेऽपितु क्षणिक एव कार्योत्पादनशक्तिः। तदेतत्सर्वं सर्वदर्शनसङ्ग्रहे बौद्धदर्शनप्रसङ्गे चर्चितमेव। तथा हि–

नन्वक्षणिकस्य अर्थक्रियाकारित्वं किं न स्यादिति चेत्– तदयुक्तम्। विकल्पासहत्वात्। तथा हि– वर्तमानार्थक्रियाकरणकालेऽतीतानागतयोः किम् अर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति नो वा। आद्ये तयोरनिराकरणप्रसङ्गः, समर्थस्य क्षेपायोगात्। यद्यदा यत्करणसमर्थं तत्तदा तत्करोत्येव यथा सामग्री स्वकार्यं समर्थश्चायं भाव इति प्रसङ्गानुमानाच्च।

द्वितीये कदापि न कुर्यात्। सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य। यद्यदा यन्न करोति तत्तदा तत्राऽसमर्थं यथा हि शिलाशकलमङ्कुरे। न चैष वर्तमानार्थक्रियाकरणकाले वृत्तवर्तिष्यमाणे अर्थक्रिये करोतीति तद्विपर्ययाच्च।

ननु क्रमवत्सहकारिलाभात् स्थायिनोऽतीतानागतयोः क्रमेण करणमुपपद्यत इति चेत्– तत्रेदं भवान्पृष्टो व्याचष्टाम्। सहकारिणः किं भावस्योपकुर्वन्ति न वा? न चेन्नापेक्षणीयास्ते। अकिञ्चित्कुर्वतां तेषां तादर्थ्यायोगात्। अथ भावस्तैः सहकारिभिः सहैव कार्यं करोति इति स्वभाव इति चेत्– अङ्ग! तर्हि सहकारिणो न जह्यात्। प्रत्युत पलायमानापि गले पाशेन बद्ध्वा कृत्यं कुर्यात्। स्वभावस्यानपायात्।

उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते न वा। भेदपक्ष आगन्तुकस्येव तस्य कारणत्वं स्यात्। न भावस्याक्षणिकस्य। आगन्तुकातिशयान्वय-व्यतिरेकानुविधायित्वात्कार्यस्य तदुक्तम्–

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्फलः।। इति।

किं च, सहकारिजन्योऽतिशयः किमतिशयान्तरमारभते न वा? उभयथाऽपि प्रागुक्तदूषणपाषाणवर्षणप्रसङ्गः। अतिशयान्तरारम्भपक्षे बहुमुखानवस्थादौःस्थ्यमपि स्यात्। अतिशये जनयितव्ये सहकार्यन्तरापेक्षायां तत्परम्परापात इत्येकानवस्थाऽऽस्थेया।

तथा सहकारिभिः सलिलपवनादिभिः पदार्थसार्थैराधीयमाने बीजस्यातिशये बीजमुत्पादकमभ्युपेयम्। अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत्।

बीजं चातिशयमादधानं, सहकारिसापेक्षमेवाधत्ते। अन्यथा सर्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत् तस्मादतिशयार्थमपेक्ष्यमाणैः सहकारिभिः अतिशयान्तरमाधेयं बीजे। तस्मिन्नप्युपकारे पूर्वन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता।

अथोपकारः कार्यार्थमपेक्ष्यमाणोऽपि बीजादिनिरपेक्षं कार्यं जनयति तत्सापेक्षं वा। प्रथमे बीजादेरहेतुत्वमापतेत्। द्वितीयेऽपेक्ष्यमाणेन बीजादिनोपकारेऽतिशय आधेयः। एवं तत्र तत्रापीति बीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयानवस्था स्थिरा भवेत्।

एवमपेक्ष्यमाणेनोपकारेण बीजादौ धर्मिण्युपकारान्तरमाधेयम्– इत्युपकाराधेयबीजाश्रयातिशयपरम्परापात इति तृतीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्येत, तर्हि प्राचीनो भावोऽनतिशयात्मा निवृत्तोऽन्यश्चातिशयात्मा कुर्वद्रूपादिपदवेदनीयो जायत इति फलितं ममापि मनोरथद्रुमेण। तस्मात्क्रमेण अक्षणिकस्य अर्थक्रिया दुर्घटा।

अनुवाद – मुझ विलासी को कारण के रूप में क्षण ही अभिमत है। इस क्षण को छोड़कर अक्षणिक वस्तुओं की कारणता मानने से तू अलि (अपसिद्धान्तरूप) महान् जाल में पड़ेगा और उससे तेरा छूटना कठिन हो जायेगा। बिना दूसरे पदार्थ की सहकारिता के कोई भी पदार्थ फल उत्पन्न करने में समर्थ नहीं होता। वह सहकृति (सहकारी कारण) भी अपनी सहकृति के लिए किसी दूसरे कारण की अपेक्षा करती है। इस प्रकार सहकारिकारणों की इस परम्परा से अनवस्था उत्पन्न हो जाती है।

टिप्पणी – सहकारी कारणों की अपेक्षा से बौद्धों ने नैयायिकों के कार्यकारण सिद्धान्त में अनेक दोष दिखाये हैं। बौद्धों के अनुसार क्षणिकपदार्थ ही अर्थक्रियाकारी है। वही सत् है। जलादि सहकारीकारणों के द्वारा अतिशय के उत्पन्न होने पर भी यदि बीज आदि यथावत् स्थित रहते हैं तब तो इन सहकारियों का होना व्यर्थ है। यदि इस अतिशय से बीज दूसरी अवस्था (अंकुररूप) में पहुँच जाता है तब तो यह स्वयं सिद्ध है कि बीज की पूर्वावस्था क्षणिक थी। अत: हमारा क्षणिकवाद ही फलित होता है। अक्षणिक को तो सहकारिकारणों की सहायता पाकर भी तद्रूप ही रहना चाहिए। तभी अक्षणिकता की सिद्धि हो सकती है। किन्तु ऐसा नहीं होता। अत: क्षणिकता ही सब का कारण है। सहकारिकारणों की अपेक्षा से अनवस्थादोष स्पष्ट है।

।। ३३ ।।

इति महदनवस्थादौस्थ्यमुद्धर्तुकामै-
रतिशय इति कुर्वद्रूपतेति क्षणोऽयम्।
फलजननसमर्थः कल्प्यते बौद्धवृद्धै-
रुपगत इह नास्ति प्राच्यदोषावतारः।।

अन्वयः – इति महदनवस्थादौस्थ्यम् उद्धर्तुकामैः बौद्धवृद्धैः अतिशय इति कुर्वद्रूपता इति अयं फलजननसमर्थः क्षणः कल्प्यते। इह उपगते प्राच्यदोषावतारः नास्ति।

गङ्गा – इति महदेति– इति पूर्वोक्तं परसहकृतिशून्यस्य फलाजननाऽसामर्थ्यस्य सहकृत्यपेक्षारूपं यत् महदनवस्थादौस्थ्यं महत्या अनवस्थया जायमाना दुःस्थितिः, सहकारिणा सहकार्यपेक्षारूपाऽनवस्था ताम् उद्धर्तुकामैः बौद्धवृद्धैः

बौद्धविद्याविचक्षणैः अतिशय इति नाम्ना कुर्वद्रूपता इति नाम्ना वा अयं फलजननसमर्थः क्षणः कल्प्यते। अत्र क्षणमात्रस्य कारणताकल्पनान्नेयमनवस्थेति भावः। इह मम विलासिनो बौद्धप्रस्थाने क्षणस्य कारणताया उपगते स्वीकृतौ प्राच्यदोषावतारः पूर्वोक्तानवस्थादोषप्रसङ्गो नास्ति। अतिशयशब्देन बौद्धैः फलजननसमर्थः कश्चिद्विशेषोऽभिधीयते। तथैव कुर्वद्रूपतेति पदेन यत्किञ्चित्कार्यजनकतावच्छेदकतया सिद्धो जातिविशेष उच्यते। कुर्वत्फलोन्मुखं रूपं यस्य तस्य भावः। अतिशयश्चात्रोपकार इति ध्येयम्।

अनुवाद – इस प्रकार महान् अनवस्था की इस दु:स्थिति को दूर करने के लिये बौद्ध वृद्धों ने अतिशय तथा कुर्वद्रूपता नाम से फल के जनन में समर्थ इस क्षण की कल्पना की है। इसे मान लेने पर सहकारियों से होने वाली अनवस्था का प्रसङ्ग नहीं आता।

टिप्पणी – नैयायिक फलोत्पत्ति में तीन कारण मानते हैं– समवायि, असमवायि तथा निमित्त। बौद्धों के मत में सब कुछ क्षणिक होने से वह क्षण ही सब का कारण है। बौद्धों ने इस क्षण को 'अतिशय' या 'कुर्वद्रूपता' कहा है। यहाँ अतिशय शब्द से फलजनन में क्षण का उपकार कहा गया है। कुर्वद्रूपता कार्यजनकता का अवच्छेदक कोई विशेष है। इसी के कारण बीज से अंकुर की उत्पत्ति होती है।

।। ३४।।

अपि च भवदभीष्टा सर्वगा किं नु सत्ता
स्वविषयसकलस्था वेति चाऽऽलोच्यमाने।
प्रथममतमयुक्तं सर्वसत्त्वप्रसङ्गा-
च्चरममतनिरासः कार्य आत्माश्रयेण।।

अन्वयः – अपि च भवदभीष्टा सत्ता किं नु सर्वगा स्वविषयसकलस्था वा इति आलोच्यमाने च सर्वसत्त्वप्रसङ्गात् प्रथममतम् अयुक्तम्। आत्माश्रयेण चरममतनिरासः कार्यः।

गङ्गा – सम्प्रति नैयायिकवैशेषिकाभिमतसत्तां निराकरोति– **अपि चेति**– अपि चेति प्रश्नान्तरे।। भवदभीष्टा सत्ता सामान्यं जातिर्वा किन्नु सर्वगा सर्वपदार्थव्यापिनी अस्ति स्वविषयसकलस्था स्वविषयेषु सर्वेषु द्रव्यगुणकर्मादिषु स्थिता वा विद्यते? इति आलोच्यमाने समीक्ष्यमाणे च सर्वसत्त्वप्रसङ्गात्, सर्वगा सत्तेति पक्षे सर्वेषु

समवायविशेषादिष्वपि तत्सत्त्वप्रसङ्गात् प्रथमं सर्वगेति मतम् अयुक्तम् अनुचितम्। आत्माश्रयेण च चरममतनिरासः कार्यः, आत्माश्रयेण स्वस्य स्वापेक्षापादकः प्रसङ्गः आत्माश्रयः। यथा कार्यत्वावच्छिन्नकार्यतानिरूपितकारणत्वं साधारणकारणत्वमित्यादौ। अत्र एकं कार्यत्वमवच्छेदकम्। अपरं त्ववच्छेद्यम्। तथा चावच्छेदकज्ञानं विना अवच्छेद्यज्ञानं न भवति। अवच्छेद्यज्ञानं विनाऽपि अवच्छेदकज्ञानं च न भवति, परस्परसापेक्षत्वादित्यात्माश्रयः। अत्र स्वविषयसकलस्थत्वपक्षे द्रव्यगुणकर्मरूपाणां विषयाणां सिद्धिः सत्तासम्बन्धेन भवति। तथैव द्रव्यगुणकर्मरूपविषयाणां सिद्ध्यैव सत्तायाः सम्बन्धः इत्येवमत्र परस्परसापेक्षत्वरूप आत्माश्रयः। न हि सत्तासम्बन्धं विना स्वविषयत्वसिद्धिः। एवमत्र आत्माश्रयो दोषः। स चायं पक्षः सर्वदर्शनसङ्ग्रहे बौद्धदर्शनप्रसङ्गे चर्चितः। तदित्थम्–

किं च सामान्यं सर्वगतं स्वाश्रयगतं वा? प्रथमे सर्ववस्तुसङ्करप्रसङ्गः। अपसिद्धान्तापत्तिश्च। यतः प्रोक्तं प्रशस्तपादेन – स्वविषयसर्वगतमिति।

किं च विद्यमाने घटे वर्तमानं सामान्यमन्यत्र जायमानेन सम्बध्यमानं तस्मादागच्छत्सम्बध्यते अनागच्छद् वा? आद्ये द्रव्यत्वापत्तिः। द्वितीये सम्बन्धानुपपत्तिः। अतो न तवाभिमतसत्तायाः सिद्धिरिति भावः।

अनुवाद – और भी, तुम्हें अभीष्ट जो सत्ता है वह सर्वव्यापिनी है या अपने विषयभूत द्रव्य, गुण और कर्ममात्र में रहती है। इस विषय की आलोचना करने पर प्रथम मत (सत्ता की सर्वव्यापकता) तो स्वयं निरस्त हो जाता है क्योंकि तुम्हारे मत में स्वयं वह सत्ता सर्वव्यापक नहीं है। तुम स्वयं ही समवाय और विशेष में सत्ता नहीं मानते। दूसरे विकल्प के अनुसार यदि उसे द्रव्य, गुण और कर्म में व्यापक मानें तो आत्माश्रय दोष उत्पन्न हो जाता है। सत्ता का सम्बन्ध होने पर द्रव्य, गुण और कर्मरूप विषय की सिद्धि होती है तथा द्रव्य, गुण और कर्मरूप विषय की सिद्धि होने पर उनसे सत्ता का सम्बन्ध होता है। इस प्रकार इस पक्ष में परस्परसापेक्षता रूप आत्माश्रय दोष है।

।। ३५ ।।

प्रलयसमय एषा नास्ति चेत्तर्ह्यनित्या
ध्रुवतनुरवकाशं सा तदाऽऽप्नोतु कुत्र?।

निरधिकरणसत्तामाश्रितत्वस्वभावा-
मभिदधदुपहासं लप्स्यसे सत्सभासु।।

अन्वयः - एषा (सत्ता) प्रलयसमये नास्ति चेत् तर्हि अनित्या? ध्रुवतनुः सा तदा अवकाशं कुत्र प्राप्नोतु? आश्रितत्वस्वभावां निरधिकरणसत्ताम् अभिदधत् सत्सभासु उपहासं लप्स्यसे।

गङ्गा - प्रलयेति - एषा त्वया नित्येत्यभिमता सत्ता प्रलयकाले समेषां पदार्थानां ध्वंससमये नास्ति चेत्, यदि न विद्यते तर्हि अनित्या? तस्याः सत्ताया नित्यत्वात् तस्मिन् कालेऽपि सत्त्वं स्यादन्यथाऽनित्यत्वप्रसङ्गः। तेन तस्या नित्यत्वबाध इत्यर्थः। ध्रुवतनुः नित्यशरीरा सा तदा प्रलयकाले अवकाशं स्वाश्रयस्थानं कुत्र प्राप्नोतु। द्रव्यादिकं व्याप्य सत्ता तिष्ठतीति प्रलयकाले तेषां विनाशे सा कुत्र तिष्ठेदित्यर्थः। चतुर्णां महाभूतानां संहारविधिः प्रलयः। तस्मिन् काले सत्ताश्रयविनाशान्न तत्सत्त्वप्रसङ्ग इति बौद्धानामभिप्रायः। आश्रितत्वस्वभावां व्यापकत्वस्वरूपाम्। सत्ता द्रव्यादिकमाश्रित्यैव तिष्ठति। तादृशीं तां निरधिकरणसत्तामभिदधत् प्रलयकाले द्रव्यादिविनाशेऽधिकरणरहिताम् अभिदधत् स्वीकुर्वन् त्वं न्यायवैशेषिकसिद्धान्तानुयायी अलिः सत्सभासु विद्वत्सङ्गोष्ठीषु उपहासं हास्यास्पदस्थानं लप्स्यसे प्राप्स्यसि। सत्ता सर्वदा आश्रयाधीना भवति। द्रव्याद्याश्रयेष्वेव तस्य सिद्धिर्भवति। प्रलयकाले तस्या आश्रयविनाशात् तां निरालम्बनां वदन् त्वम् उपहासपात्रं भविष्यसीत्यर्थः।

अनुवाद - यदि कहो कि प्रलय काल में सत्ता नहीं रहती, तब तो इसे नित्य कहना ही व्यर्थ है। अगर यह नित्य है तो इसे तीनो कालों में रहना चाहिए। यदि कहो कि यह नित्य है तो प्रलय काल में इसको आश्रय कहाँ से मिलेगा क्योंकि प्रलय काल में तो द्रव्य आदि सत्ता के आश्रय नष्ट हो जाते हैं। सत्ता तो किसी न किसी का आश्रय लेकर ही रहती है। आश्रितत्व उसका स्वभाव है। ऐसे में प्रलयकाल में उस निरधिकरण सत्ता का बखान करते हुए तुम विद्वानों की सभा में उपहास के पात्र बनोगे।

।। ३६ ।।

अनुगतमतिरन्यापोहमात्रोपपन्ना
गमयति न हि सत्तामुक्तदोषैर्निकृत्ताम्।

सकलविषयधर्मेऽपोहमात्रे च शून्ये
भवति भवति सर्वं शून्यमित्येष पक्षः ।।

अन्वयः – अन्यापोहमात्रोपपन्ना अनुगतमतिः उक्तदोषैः निकृत्तां सत्तां न हि गमयति। सकलविषयधर्मे शून्ये च अपोहमात्रे भवति (सति) सर्वं शून्यं भवति इति एष पक्षः (अस्ति)।

गङ्गा – अनुगतमतिरिति– अन्यापोहमात्रोपपन्ना अतद्व्यावृत्तिमात्रलभ्या, न तु सत्तया। अत्र मात्रपदेन सत्ताया व्यवच्छेदः। अनुगतमतिः समानाकारप्रतीतिः उक्तदोषैः उपर्युक्तात्माश्रयादिदोषैः निकृत्तां निराकृतां, खण्डितामित्यर्थः। सत्तां जातिं न हि गमयति, न बोधयति। सकलविषयधर्मे सकलस्य द्रव्यादिविषयस्य यः धर्मः शून्यः अभावरूपः तद्रूपे अपोहमात्रे अतद्व्यावृत्तिमात्रे भवति सति सर्वं शून्यम् अभावरूपं भवति, इत्येवाऽस्मदीयः पक्षः।

न्यायवैशेषिकैः अनुवृत्तिप्रत्ययहेतुः समानाकारप्रतीतेर्वा हेतुः सामान्यं सत्तेत्युच्यते। तच्च सामान्यं द्रव्यगुणकर्मवृत्ति भवति। किन्तु बौद्धानां नये सेयमनुगतप्रतीतिर्न सामान्येनाऽपितु अपोहेन अतद्व्यावृत्त्या तद्भिन्नभिन्नत्वेन वा जायते। घटभिन्ना यावन्तोऽपि पटादयः पदार्थाः सन्ति ते तद्भिन्नाः सन्तीति अतद्भिन्नत्वरूपया अतद्व्यावृत्त्या अनेकघटव्यक्तिषु समानाकारप्रतीतिर्जायते। एवम् अभावरूपा या अघटव्यावृत्तिः सा घटव्यक्तिरूपैव। पृथिवीत्व–जलत्वादीन्यपि अतद्व्यावृत्तिरूपाणि पृथ्व्यादिव्यक्तिभिन्नानि न सन्ति। एतेन अपोहरूपः शून्योऽभाव एव समेषां विषयाणां धर्मः सिद्ध्यति। घटे घटभिन्नपदार्थव्यावृत्तिः शून्यरूपैवेति सर्वं शून्यमिति अस्माकं बौद्धानां पक्ष इत्यर्थः।

अनुवाद – अन्यापोह (अतद्व्यावृत्ति) मात्र से उपपन्न होने वाली अनुगत (समानाकार) प्रतीति ऊपर कहे गये आत्माश्रयादि दोषों से खण्डित सत्ता का बोध नहीं कराती। अपोहमात्ररूप शून्य के ही समस्त विषयों का धर्म हो जाने से सब कुछ शून्य (अभावरूप) ही हो जाता है, यह हमारा सिद्धान्त है।

टिप्पणी – नैयायिक अनेक व्यक्तियों की समानाकारप्रतीति में सत्ता, सामान्य या जाति को कारण मानते हैं। उन्हें अभिमत यह सत्ता (नित्यत्वे सति अनेकसमवेतत्वम्) नित्य तथा अनेक घटव्यक्तियों में समवेत होती है। इसका अभिधान त्व या तल् प्रत्ययों से होता है। जैसे घटत्व। घटत्व सत्ता अनेक घटव्यक्तियों में समवेत होती है। उसी के कारण अनेक घट व्यक्तियों में 'घटोऽयम्, घटोऽयम्'

इस प्रकार की अनुगत प्रतीति होती है।

क्षणभंगवादी बौद्धों के मत में ऐसे किसी सामान्य या सत्ता की व्यवस्था नहीं बनती। सत्ता के स्थान पर अनुगत प्रतीति के कारण के रूप में उन्हें 'अपोह' अभिमत है। 'अपोह' उनका पारिभाषिक शब्द है। उसका अर्थ 'अतद्व्यावृत्ति' या 'तद्भिन्नभिन्नत्व' है। घट व्यक्तियों में 'अघटव्यावृत्ति या घटभिन्न समस्त जगत् की व्यावृत्ति होने से उसमें तद्भिन्नभिन्नत्व, तत्– घट से भिन्न जो पट आदि सम्पूर्ण जगत् उससे भिन्नता उस घट में रहती है। इस प्रकार घटव्यक्तियों में अनुगत प्रतीति हो जाती है। बौद्ध उसके लिए सत्ता जैसे नित्यपदार्थ की संकल्पना नहीं करते।

ऊपर अनेक पद्यों में सत्ता के दोष दिखाये गये हैं। विज्ञानवादी बौद्धों का मानना है कि अन्यापोह से अनुगत प्रतीति हो जाने के कारण उसके लिए आत्माश्रय आदि दोषों से दूषित सत्ता का मानना आवश्यक नहीं है। अतद्व्यावृत्ति से घटव्यक्ति में समस्त जगत् का अभावरूप शून्य प्राप्त हो जाता है। यह अपोहमात्र रूप शून्य ही समस्त विषयों का धर्म है। सत्ता किसी विषय का धर्म नहीं हो सकती। जब शून्य सभी पदार्थों का धर्म है तब सभी पदार्थ शून्य (अभाव) रूप ही सिद्ध हो जाते हैं। अतः नित्यसत्ता का कोई प्रसंग नहीं है। इस शून्य से ही अनुगत प्रतीति हो जाती है।

।। ३७।।

अनुभवपथयाताशेषवित्तेः क्षयित्वे
गमयति तदभिन्ने वेद्यजातेऽस्थिरत्वम्।
सदपि सुखमभिज्ञैर्दुःखमेवेति भाव्यं
सुखमपि हि विनश्यद् दुःखमेव प्रसूते।।

अन्वयः – अनुभवपथयाताशेषवित्तेः क्षयित्वे तदभिन्ने वेद्यजाते अस्थिरत्वं गमयति। अभिज्ञैः सत् अपि सुखं दुःखम् एव इति भाव्यम्। विनश्यत् सुखम् अपि दुःखम् एव प्रसूते।

गङ्गा – अनुभवेति– अनुभवपथयाताशेषवित्तेः, अनुभव एव ज्ञानमेव मार्गः तस्मिन् अनुभवमार्गे समायातायाः अशेषायाः सर्वस्याः वित्तेः बुद्धेः क्षयित्वे विनाशशालित्वे सति। अनुभूतस्य सर्वस्यापि ज्ञानस्य विनाशशालित्वे इत्यर्थः। तदभिन्ने वित्त्यभिन्ने वेद्यजाते ज्ञेयजाते घटादौ अस्थिरत्वं क्षणिकत्वं गमयति बोधयति। स्वक्षणिकस्वभावाद् वित्तिः स्वाभिन्नज्ञेयवस्तुनोऽपि क्षणिकत्वं बोधयतीत्यर्थः।

विज्ञानवादे ज्ञेयज्ञानयोरभिन्नत्वात् ज्ञानवत् ज्ञेयस्यापि क्षणिकत्वम्। तैः सहोपलम्भत्वात् नीलतद्धियोरभेद एवाङ्गीक्रियते। अभिज्ञैः परमार्थतत्त्वज्ञैः सत् विद्यमानमपि सुखं दुःखमेवेति भाव्यं भावनीयम्। यतो हि सदपि विद्यमानमपि विनश्यत् सुखं दुःखमेव प्रसूते जनयतीत्यर्थः। सदपि सुखं सुखवित्तिवत् क्षणिकमस्तीति परमार्थज्ञैः तादृशं सुखं दुःखमेव स्वीकरणीयम्। विनश्यत् सुखं दुःखमेव जनयतीति सुखमपि दुःखरूपमेवेति भावः।

अनुवाद – अनुभवपथ में आयी हुई समस्त वित्ति (ज्ञान) क्षणिक है। अतः वह अपने से अभिन्न वेद्य (घट आदि) में भी क्षणिकता का बोध करा देती है। वस्तु की सत्ता ज्ञान में ही होती है। नील और नील ज्ञान में अभेद होता है। क्षणिक नीलज्ञान में भासित होने वाले नील का बोध वह नीलज्ञान करा देता है। इस प्रकार परमार्थतत्त्व को जानने वाले को विद्यमान सुख को भी दुःख ही मानना चाहिए। विनष्ट होने वाला सुख दुःख को ही उत्पन्न करता है। जिस प्रकार ज्ञान की क्षणिकता से वस्तु की क्षणिकता निर्धारित हो जाती है उसी प्रकार सुख की विद्यमानता से दुःख का निर्धारण हो जाता है।

।। ३८।।

सुखतदितरधारावाह्यनित्यक्षणौघे-
क्षणजनितविरक्त्या दुर्लभा मे न मुक्तिः।
तव तु किमपि नित्यं जानतस्तत्र रागे
प्रसरति बत दूरं याति निर्वाणवार्ता!।।

अन्वयः – सुखतदितरधारावाह्यनित्यक्षणौघेक्षणजनितविरक्त्या मे मुक्तिः न दुर्लभा। किमपि नित्यं जानतः तव तत्र रागे प्रसरति (सति) निर्वाणवार्ता दूरं याति (इति) बत।

गङ्गा – सुखतदीति- सुखतदितरधारावाह्यनित्यक्षणौघेक्षणजनितविरक्त्या सुखं तद्भिन्नं दुःखं सततज्ञानवाहकं यदनित्यक्षणानां क्षणिकक्षणिकानाम् ओघः सातत्यं धारा वा, तस्य ईक्षणादनुभवाज्जनिता या विरक्तिः वैराग्यं, तया विरक्त्या मे विज्ञानवादिबौद्धरूपस्य विलासिनो मुक्तिः सांसारिकमोहाद् विमुक्तिः न दुर्लभा, न कठिना, तत्प्राप्तिस्तु भविष्यत्येवेत्यर्थः। अहं सर्वेषु पदार्थेषु क्षणिकत्वमनित्यत्वं च पश्यामीति न कुत्रापि मम रागः। अतो रागरहितत्वान्मे मुक्तिप्राप्तिः ध्रुवा एव। किमपि,

संसारे विद्यमानं न सर्वं किन्तु आत्मप्रभृति किमप्येकं द्विकं वा तत्त्वं नित्यं जानतः तव अलेः तत्र नित्यपदार्थे रागे अनुरागे प्रसरति सति तव निर्वाणवार्ता मोक्षकथा दूरं याति, दूरं गच्छति। नित्यपदार्थे रागात् ततो विरक्त्यभावस्तेन च मोक्षप्राप्त्यभाव इत्यर्थः। बत इति खेदजनकमव्ययम्।

अनुवाद – सुख और उससे भिन्न धारावाही अनित्य क्षणों के ओघ के अनुभव से मुझमें विरक्ति उत्पन्न हो गयी है। संसार में चाहे सुख हो या उससे भिन्न कोई अन्य वस्तु, मेरी दृष्टि में वह सब अनित्य है। अतः इस अनित्यता से सांसारिक वस्तुओं पर मेरी कोई आसक्ति नहीं रही। उन क्षणों से उत्पन्न विरक्ति से मुझ विलासी के लिए मुक्ति दुर्लभ नहीं है। तुझ अलि को तो कोई न कोई नित्य तत्त्व अभीष्ट है और उस नित्यतत्त्व से राग होना भी स्वाभाविक ही है। अतः उस राग के कारण तुम्हारी निर्वाणकथा तो दूर जा रही है। इसलिए तुम्हारी नित्यता खेदजनक है।

।।३९।।

क्वचिदपि किल पक्षे दुःखतोक्तौ सपक्ष-
प्रकृतयुगगतैकस्थायिजातेरभावात्।
क्षणगणगतवैलक्षण्यसिद्ध्योपमाने-
ऽनुपनमति सतां स्वं लक्षणं भावनीयम्।।

अन्वयः –क्वचित् अपि पक्षे दुःखतोक्तौ किल सपक्षप्रकृतयुगगतैक-स्थायिजातेः अभावात् क्षणगणगतवैलक्षण्यसिद्ध्या उपमाने अनुपनमति (सति) सतां स्वं लक्षणं भावनीयं (भवति)।

गङ्गा–सत्तां निराकृत्य स्वाभिमतस्वलक्षणं स्थापयितुमुपक्रमन्नाह– **क्वचिदपीति**– संसारस्य दुःखात्मकत्वं दृष्ट्वा स्वप्रस्थाने च क्षणिकत्वसङ्ग्रहात् सादृश्याभावात् 'सर्वं दुःखं दुःखम्' इति भावयन्तो बोद्धाः स्वलक्षणं विचारयन्ति। तद्वक्ति–

क्वचिदपि कस्मिंश्चिदपि पक्षे सिसाधयिषितसाध्यधर्मिणि पर्वते धूमेन वह्निसाधने पर्वतः पक्षः। तादृशे पक्षे दुःखतोक्तौ, दुःखताया उक्तौ। अस्मिन् दुःखमस्तीति कथन इत्यर्थः। सपक्षप्रकृतयुगगतैकस्थायिजातेः। निश्चितसाध्यवान् सपक्षः। यथा पर्वते धूमेन वह्निसाधने महानसः सपक्षः। सपक्षपक्षयुगलनिष्ठस्थिरसत्तायाः।

प्रकृतशब्देनाऽत्र पक्ष एव उच्यते। एकस्मिन् पक्षे विद्यमानो यो धूमो यथा सपक्षे विद्यमानाद् धूमाद् भिन्नो भवति। नैयायिकमते उभयत्र धूमत्वसामान्यात्तत्र जातिगतं साम्यं किन्तु बौद्धमते जातेरभावान्न तत्र साम्यं कल्प्यते। तथैव पक्षे विद्यमानं यद् दु:खं तस्य सपक्षगतदु:खेन उभयत्र एकस्या: स्थायिजाते: अभावात् साम्यं न भवति। अत इदं दु:खं केन दु:खेन साम्यं भजत इति प्रश्नस्यावसरो नाऽत्रायाति। 'सर्वं दु:खं दु:खम्' इत्येव भावनीयं भवति। क्षणगणवैलक्षण्यसिद्ध्या, क्षणसमूहनिष्ठविलक्षणता-सिद्ध्या। प्रतिक्षणं स्वभिन्नक्षणाद् विलक्षणं भवतीति उपमाने सादृश्ये अनुपनमति सति अनुपपद्यमाने सति। सतां सज्जनानां स्वं लक्षणं पदार्थानां भावनीयं विचारणीयम्। 'सर्वं दु:खं दु:खम् सर्वं स्वं लक्षणं स्वं लक्षणम्' इति च चिन्तनीयमित्यर्थ:।

बौद्धानां मते सर्वं क्षणिकमिति न तन्मते किमपि वस्तु केनचिदपि सदृशं भवति। अतो न वस्तुनो: द्वयो: सादृश्यं न वा भवति कस्यचिदपि साधारणं लक्षणम्। तन्मते सर्वमसाधारणम्। तेन तत्र 'एतेन सदृशमपरम्' इति व्यवहारो न प्रसरति। अतस्तन्मते सर्वमपि वस्तु स्वलक्षणं भवतीति सर्वै: स्वलक्षणं स्वलक्षणं भावनीयमिति तेषां सिद्धान्त:। किमपि दु:खं केनापि साम्यं न भजते। सर्वमपि स्वलक्षणम्। अमुमेव सिद्धान्तं संक्षिप्याऽत्रोक्तं पक्षसपक्षगतदु:खतयोरसाधारण्यम्। तथा चोक्तं सर्वदर्शनसङ्ग्रहे- 'स्वलक्षणानां क्षणानां क्षणिकतया सालक्षण्याभावादेतेन सदृशमपरमिति वक्तुमशक्यत्वात्। तत: स्वलक्षणं स्वलक्षणमिति भावनीयम्। समेषां पदार्थानां स्वं लक्षणं स्वं लक्षणमिति विचारणीयमित्यर्थ:।

अनुवाद – किसी पक्ष में दु:ख का कथन कर देने से पक्ष और सपक्षगत दु:ख में किसी एक स्थायी जाति का अभाव होने के कारण उनमें सादृश्य निरूपित नहीं किया जा सकता। क्षणों के समूहों में विलक्षणता तो सिद्ध है ही। अत: एक क्षण दूसरे के समान नहीं हो सकता। प्रत्येक क्षण का अपना लक्षण है। इस प्रकार सादृश्य के उपपन्न न हो पाने के कारण सज्जनों को स्वलक्षण की भावना करनी चाहिए।

टिप्पणी – आस्तिक और नास्तिक सभी दर्शनप्रस्थानों में संसार की दु:खमयता सर्वसम्मत है। इसी से लोग दु:खनिवृत्ति में प्रवृत्त होते हैं। अत: बौद्ध 'सर्वं दु:खं दु:खम्' की भावना करते हैं। इस पर यह प्रश्न हो सकता है कि संसार की यह दु:खमयता किसी के समान तो होगी। अत: कोई उदाहरण दिया जाना चाहिए कि सांसारिक दु:ख किसके समान है। इस विप्रतिपत्ति के निराकरण के

लिए बौद्ध विद्वान् स्वलक्षण की कल्पना करने हैं। उनके मत में समस्त वस्तुएं क्षणिक हैं। प्रत्येक क्षण दूसरे क्षण से विलक्षण है, अत: कोई किसी के समान नहीं। किसी भी असाधारण लक्षण के अभाव में यह नहीं कहा जा सकता कि कौन किसके समान है। सबका अपना अपना लक्षण है। अत: सबमें 'स्वं लक्षणं स्वं लक्षणम्' की भावना करनी चाहिए।

ऊपर पक्ष और सपक्ष के दृष्टान्त से इसी तथ्य को स्पष्ट किया गया है। एक पक्ष में कि जिस दु:खता का कथन किया गया कि अमुक दु:खता इस पक्ष में है तो सपक्ष में उसका सादृश्य नहीं दिखाया जा सकता। नैयायिक 'पर्वतो वह्निमान् धूमात् यथा महानसम्' कह कर पर्वतरूप पक्षगत धूम का सादृश्य महानस रूप सपक्ष गत धूम से दिखा देते हैं क्योंकि उनके यहाँ सत्ता है। बौद्धों के यहाँ सब कुछ क्षणिक है, अत: दृष्टान्त देकर इस दु:खता को समझाया नहीं जा सकता। उनके यहाँ सबका अपना अपना लक्षण है। अत: उनके यहाँ 'स्वलक्षण स्वलक्षण' की भावना की जाती है। उनकी प्रथम भावना 'सर्वं दु:खं दु:खम्' तथा दूसरी 'स्वलक्षणं स्वलक्षणम्' है। वस्तुओं के स्वलक्षण होने के कारण उनके यहाँ सादृश्य का अभाव प्रसिद्ध है। इस तथ्य को बौद्ध विद्वान् अंगुलियों के दृष्टान्त से स्पष्ट करते हैं–

एतासु पञ्चस्ववभासिनीषु
प्रत्यक्षबोधे स्फुटमङ्गुलीषु।
साधारणं रूपमवेक्षते य:
शृङ्गं शिरस्यात्मन ईक्षते स:।। (सर्वदर्शनसंग्रह, पृ. ५३)

स्वलक्षण की उनकी यह संकल्पना विभिन्न ग्रन्थों में चर्चित है।

।।४०।।

क्षणिकमथ च शून्यं दु:खमेवं चतुर्धा
विसदृशमिति च स्वं लक्षणं भावनीयम्।
गलितविषयरूपोपप्लवत्वाद् विशुद्धो–
द्भवति तदनु मुक्ति: शून्यविज्ञानधारा।।

अन्वय: – एवं क्षणिकं शून्यं दु:खम् अथ च विसदृशं स्वं लक्षणं इति चतुर्धा भावनीयम्। तदनु गलितविषयरूपोपप्लवात् विशुद्धा शून्यविज्ञानधारा मुक्ति: उद्भवति।

गङ्गा – क्षणिकमिति – एवं क्षणगतवैलक्षण्यसिद्ध्या क्षणिकं 'सर्वं क्षणिकं क्षणिकम्' शून्यं 'सर्वं शून्यं शून्यम्' दु:खं 'सर्वं दु:खं दु:खम्' अथ च विसदृशं सर्वं सादृश्यरहितं स्वं लक्षणम्, असाधारणं वस्तु स्वरूपमिति चतुर्धा भावनीयं चिन्तनीयं विचारणीयं वेति। बौद्धानां 'बुद्धिभेदा चतुर्विधा भावना– 'सर्वं क्षणिकं क्षणिकं, सर्वं शून्यं शून्यं, सर्वं दु:खं दु:खं, सर्वं स्वलक्षणं स्वलक्षणं' चेत्यर्थ:। तदनु चतुर्धा भावनानन्तरं गलितविषयरूपोपप्लवात् गलित: समाप्त: उपप्लवो विपत्तिस्तस्मात् विशुद्धा विषयज्ञानरहिता शून्यविज्ञानधारा, शून्या विषयज्ञानाभावरूपा, निर्विषयेति यावत्। विज्ञानस्य धारा सातत्यं मुक्ति: निर्वाणपदवाच्य: पुरुषार्थ उद्भवति जायते। इयं चतुर्विधा भावनैव मुक्तेर्मूलमित्यर्थ:।

यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चतुर्विधा तत्र भावना। सर्वं क्षणिकं क्षणिकमित्यादिरूपेण सैव चतुर्विधा भावनाऽत्र निर्दिष्टा। दु:खस्य विषये भगवता बुद्धेनाप्युपदिष्टम्–

'इदं खो पन भिक्खवे, दु:खं अरिय सच्च।
जातिपि दुक्खा, जरापि दुक्खा, मरणम्पि दुक्खं,
सोकपरिदेव–दोमनस्सुपायासापि दुक्खा, अरिप–
येहि सम्पयोगो पियेहि विप्पयोगो दुक्खो,
यम्पिच्छं न लभति तम्पि दुक्खं, संख्यित्तेन
पञ्चूपादानक्खन्धापि दुक्खा'।

हे भिक्षुगण! इदं दु:खं प्रथममार्यसत्यम्। जन्म अपि दु:खम्, वृद्धावस्थापि दु:खम्, मरणमपि दु:खम्, शोक: परिदेवना औदासीन्यं परिश्रमश्चापि दु:खम्, अप्रियवस्तुना समागमोऽपि दु:खम्। एवं रूपं वेदना, संज्ञा, संस्कार: विज्ञानं सर्वं चापि दु:खम्। अत: सर्वं दु:खं दु:खमिति भावनीयम्।

अनुवाद – इस प्रकार क्षणगतविलक्षणता की सिद्धि हो जाने से चार प्रकार से स्वलक्षण की भावना होती है– क्षणिक, शून्य, दु:ख और सादृश्यरहित असाधारण। सब कुछ क्षणिक है, क्षणिक है, सब शून्य है, शून्य है, सब दु:ख है, दु:ख है और सब कुछ विसदृश अर्थात् परस्पर असाधारण है, इन चार रूपों में स्वलक्षण की भावना होती है। तदनन्तर विषयरूप उपप्लव से रहित विशुद्ध शून्यविज्ञानधारा, विषयज्ञान से रहित विज्ञान का सातत्य निर्वाण उत्पन्न होता है।

।। ४१ ।।

इति भगवति बुद्धे शासति स्वोपदेशं
निजमतिविविधत्वात्तस्य शिष्याश्चतुर्धा।
जगृहुरणुतदुक्तेराशयं तेन भिन्ना
अपि न हि विवदन्ते प्रोक्तसिद्धान्तसारे।।

अन्वयः – इति भगवति बुद्धे स्वोपदेशं शासति (सति) निजमतिविविधत्वात् तस्य शिष्याः अणुतदुक्तेः आशयं चतुर्धा जगृहुः। हि तेन भिन्ना अपि प्रोक्तसिद्धान्तसारे न विवदन्ते।

गङ्गा – इति भगवतीति– इत्येवं भगवति बुद्धे स्वोपदेशं शासति निर्दिशति सति निजमतिविविधत्वात् स्वबुद्धेः वैविध्यात् अणुतदुक्तेः सूक्ष्मायास्तस्य भगवतो बुद्धस्य उक्तेः आशयम् अभिप्रायं चतुर्धा चतुष्प्रकारेण जगृहुः गृहीतवन्तः। तेन आशयग्रहणभेदेन भिन्ना अपि ते शिष्याः प्रोक्तसिद्धान्तसारे भगवतो बुद्धस्य निर्दिष्टे सिद्धान्तरहस्ये नहि विवदन्ते, विवादं न कुर्वन्ति। आशयग्रहणे भिन्ना अपि ते तस्य सिद्धान्ते विवादं न कुर्वन्ति। सर्वम् ऐक्यमत्येन स्वीकुर्वन्तीत्यर्थः। बौद्धा उपर्युक्ताभिश्चतुर्विधभावनाभिः परमपुरुषार्थं निर्वाणं कथयन्ति। ते च माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकसंज्ञाभिः प्रसिद्धाः। ते यथाक्रमं सर्वशून्यत्व-बाह्यार्थशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्ववादानास्तिष्ठन्ति। बुद्धोपदेशाशय-ग्रहणभेदादेव एतेषां चातुर्विध्यं न तु परमार्थतः। तदुक्तं सर्वदर्शनसङ्ग्रहे- यथा गतोऽस्तमर्कः इत्युक्ते जारचौरानूचानादयः स्वेष्टानुसारेण अभिसरणपरस्वहरण-सदाचरणादिसमयं बुध्यन्ते। सर्वं क्षणिकं क्षणिकं, दुःखं दुःखं, स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम्। चतुर्धा सन्तोऽपि बुद्धशिष्याः। परमार्थे विवादं न कुर्वन्तीत्यर्थः।

अनुवाद – इस प्रकार भगवान् बुद्ध के द्वारा अपने उपदेश का शासन (कथन) करने पर अपनी बुद्धि के वैविध्य से उनके शिष्यों ने उनकी सूक्ष्म उक्तियों का आशय चार प्रकार से ग्रहण किया। उस उपदेश के ग्रहणभेद से भिन्न होकर भी उनके चारो प्रकार के शिष्य उनके द्वारा कहे गये सिद्धान्तों के निष्कर्ष पर कोई विवाद नहीं करते।

टिप्पणी – परमपुरुषार्थ या निर्वाण के विषय में बौद्धों की चार प्रकार की भावनाएं या दृष्टिकोण हैं। ये बौद्ध माध्यमिक, योगाचार, सौत्रान्तिक और वैभाषिक

नाम से प्रसिद्ध हैं। इनमें माध्यमिकों के मत में सब कुछ शून्य है, योगाचार बाह्यपदार्थों को शून्य मानते हैं, सौत्रान्तिक बाह्यपदार्थों को अनुमानगम्य मानते हैं तथा वैभाषिक बाह्यपदार्थों को प्रत्यक्ष से ज्ञेय मानते हैं। इन सबके उपदेष्टा यद्यपि भगवान् बुद्ध हैं तथापि इन्होंने अपनी अपनी बुद्धि से उनके उपदेशों को कुछ अन्तर के साथ समझा। अतः उनके शिष्यों के उपर्युक्त चार भेद प्रसिद्ध हैं। जिस प्रकार (गतोऽस्तमर्कः) (सूर्य डूब गया) कहने पर जार, चोर, वेदपाठी आदि अपनी अपनी इच्छा के अनुसार अभिसरण, परधन का हरण, और सदाचरण आदि का समय समझ लेते हैं उसी प्रकार बुद्धिभेद से इन शिष्यों ने भी बुद्ध के उपदेशों को समझा। बौद्धों की चार भावनाएं हैं-

१. सब कुछ क्षणिक है, क्षणिक है, २. सब कुछ दुःख है, दुःख है, ३. सभी का लक्षण अपने आप में है तथा ४. सब कुछ शून्य है, शून्य है।

ऊपर श्लोक में इसी तथ्य का प्रतिपादन हुआ है।

।। ४२।।

सति किल मितिकुड्ये मेयमालिन्ययोगः
कथमपि च कदाचिद् दुर्निवारः स नेष्टः।
निपुणमतिभिरस्मात्कारणान्मोक्षमाणै-
र्ध्रुवमभिलषणीया शून्यसाम्राज्यसिद्धिः।।

अन्वयः - मितिकुड्ये सति मेयमालिन्ययोगः कथम् अपि कदाचित् च दुर्निवारः किल। स नेष्टः। अस्मात् कारणात् निपुणमतिभिः मोक्षमार्गैः शून्यसाम्राज्यसिद्धिः ध्रुवम् अभिलषणीया (भवति)।

गङ्गा - बौद्धेषु माध्यमिकसिद्धान्तं व्याकुर्वन्नाह- **सति किलेति**- मितिकुड्ये मितिः ज्ञानमेव कुड्यं भित्तिः तस्मिन् सति मेयमालिन्ययोगः मेयस्य ज्ञेयस्य मालिन्ययोगः। विषयवत्ता एव अत्र मालिन्यम्। ज्ञानभित्तौ ज्ञेयविषयसम्पर्कात् मालिन्ययोगः कथमपि कदाचिदपि दुर्निवारः, निवारणयोग्यो न भवतीत्यर्थः। घटज्ञाने घटविषयरूपं मालिन्यं भवत्येव। तन्निवारयितुं न शक्यम्। अस्मात् कारणात् निपुणमतिभिः चतुरबुद्धिभिः मोक्षमाणैः मुमुक्षुभिः शून्यसाम्राज्यसिद्धिः ध्रुवम् अभिलषणीया। एतेन शून्यस्य प्रयोजनमुक्तम्।

शून्यं शून्यमिति भावनीयमिति हि माध्यमिकानां सिद्धान्तः। एतेषां मते सर्वं शून्यं भवति। यदि नाम ज्ञानं स्वीक्रियेत तर्हि तत्र सविषयता स्यादेव। सा चेयं सविषयता दुर्निवारा भवतीति मुमुक्षुभिः शून्यमेव भावनीयम्। सर्वं शून्यं शून्यमिति चिन्तनीयमिति। तेन समेषां निषेधो भवतीत्यर्थः।

अनुवाद – ज्ञानभित्ति होने पर उसमें ज्ञेयपदार्थरूप मालिन्य होगा ही। वह मालिन्य कभी भी कैसे भी दुर्निवार होता है। उसे हटाया नहीं जा सकता। इसलिए बुद्धिमान् मुमुक्षुओं को शून्य साम्राज्य की सिद्धि की अभिलाषा अवश्य करनी चाहिए। सब कुछ शून्य है, शून्य है, इस भावना से सबका निषेध हो जाता है।

टिप्पणी – माध्यमिक जगत् में शून्य की भावना रखते हैं। उनका कथन है कि कोई भी ज्ञान सविषयक होने से मलिन होता है। अतः शून्यवादी माध्यमिक ज्ञान का निषेध करते हैं।

।।४३।।

गगनकुसुमकल्पा वित्तिराकारशून्या
यदि भवति सुषुप्तौ शून्यरूपैव साऽपि।
मुनिमतपरतत्त्वं शून्यतामेव तस्मात्
प्रकटयति पुमर्थं माध्यमिक्युक्तिशैली।।

अन्वयः – गगनकुसुमकल्पा आकारशून्या वित्तिः यदि सुषुप्तौ भवति, सा अपि शून्यरूपा एव। तस्मात् माध्यमिक्युक्तिशैली शून्यताम् एव मुनिमतपरतत्त्वं पुमर्थं प्रकटयति।

गङ्गा – गगनकुसुमेति– गगनकुसुमकल्पा आकाशपुष्पतुल्या आकारशून्या निराकारा वित्तिः ज्ञानं यदि सुषुप्तौ सुषुप्त्यवस्थायां भवति, सा सुषुप्तिकाले जायमाना निराकारा वित्तिः शून्यरूपा एव निर्विषया एव भवति। निराकारज्ञानस्य कदाऽप्यदर्शनात् तस्य गगनकुसुमत्वमुम्भितम्। तस्मात् माध्यमिक्युक्तिशैली माध्यमिकानां शून्यवादिनाम् उक्तेः कथनस्य शैली परम्परा शून्यतां सदसदुभयात्मकानुभयात्मकविलक्षणां प्रतीतिं मुनिमतपरतत्त्वं बुद्धाभिमतचरमतत्त्वं पुमर्थं निर्वाणं प्रकटयति निरूपयति।

वस्तुतो भवति ज्ञानं सदा सविषयम्। निराकारज्ञानं च कदापि भवतीति तस्य गगनकुसुमकल्पत्वमुक्तम्। तादृशं निराकारं वस्तुज्ञानशून्यं ज्ञानं यदि सुषुप्तावपि भवति

तर्हि तत्रापि तस्य शून्यरूपता एव भवति न तु विषयाकारता। शून्यरूपं ज्ञानं सदसद्विलक्षणमनिर्वचनीयं किमपि विद्यते। माध्यमिकानां शून्यमिदमद्वैतवेदान्तस्य अद्वैततत्त्वमिव विद्यते।

अनुवाद – आकाशपुष्प के समान कहीं न प्राप्त होने वाली आकार शून्य वित्ति (ज्ञान) यदि सुषुप्ति में होगी तो भी शून्यरूप ही होगी। इसलिए माध्यमिकों की कथनशैली इस शून्यरूपता को ही भगवान् बुद्ध को अभिमत निर्वाणरूप परमतत्त्व के रूप में प्रकट करती है।

टिप्पणी – निराकार निर्विषय ज्ञान का होना अति कठिन है। अत: उसे यहाँ गगनकुसुमकल्प कहा गया है। सुषुप्ति में भी यह वित्ति शून्यरूप ही होती है। माध्यमिकों के अनुसार यह शून्य ही बुद्धवचनों का परमतत्त्व है। जिसमें सबका निषेध हो जाता है। उनका यह शून्य सत्, असत्, उभयात्मक और अनुभयात्मक कोटियों से सर्वथा भिन्न है। अर्थात् यह शून्य न तो सत् है, न असत्, न सदसत् और न ही सदसत् से भिन्न। यह शून्य वेदान्तियों के अद्वैततत्त्व की तरह अनिर्वचनीय है। माध्यमिकों के अनुसार यही बुद्धाभिमत निर्वाण है।

।। ४४।।

प्रसजति जगदान्ध्यं सर्वशून्यत्ववादे
भवतु तदिह तत्त्वं स्वप्रकाशा सती चित्।
स्फुरति विविधरुपा सा स्वयं विभ्रमादौ
व्यवहृतिरनयाऽऽस्तां बाह्यवस्त्वस्तु शून्यम्।।

अन्वय: – सर्वशून्यत्ववादे जगदान्ध्यं प्रसजति। तत् इह स्वप्रकाशा सती चित् तत्त्वं भवतु। विभ्रमादौ विविधरूपा सा स्वयं स्फुरति। अनया व्यवहृति: आस्ताम्। बाह्य वस्तु शून्यम् अस्तु।

गङ्गा – योगाचारमतं विवृण्वन्नाह– **प्रसजतीति**– सर्वशून्यत्ववादे माध्यमिकाभिमते निरालम्बनात्मके सर्वं शून्यं शून्यमिति भावनापक्षे जगदान्ध्यं प्रसजति आपतति। अतो बाह्यार्थशून्यत्ववादिनो योगाचारमतोपासकास्तन्न स्वीकुर्वन्ति। तेषां मते बाह्यार्थस्य शून्यत्वं किन्तु आन्तरस्य शून्यभिन्नत्वम्। यया बुद्ध्या जगदिदं शून्यं प्रतीयते सा बुद्धि: शून्यरूपा नाऽस्ति। अन्यथा समस्ते संसारे आन्ध्यं प्रसक्तो

भवति। अतः स्वयं वेदनं स्वज्ञानं वा स्वीकरणीयम्। तेनैव बाह्यार्थस्य शून्यतायाः ज्ञानं भवेत्।

तत् तस्मात् इह शून्यत्ववादे स्वप्रकाशा स्वप्रकाशरूपा सती चित् स्वप्रकाशा बुद्धिः मनः विज्ञानं वा तत्त्वं भवतु। तद्ध्यादीनां सत्यताऽङ्गीकार्येति भावः। विभ्रमादौ विविधरूपा भिन्नभिन्नस्वरूपा सा बुद्धिः स्फुरति प्रकाशते। अनया बुद्ध्या व्यवहृतिः व्यवहारः आस्तां, भवतु। शून्यं स्वीकृत्याऽपि बुद्धिः स्वीकार्येत्यर्थः। बाह्यवस्तु घटादि शून्यं भवतु। न तेन नो विप्रतिपत्तिः। बाह्यवस्तूनां शून्यताज्ञानाय बुद्धेरस्तित्वमङ्गीकार्यमेव। सर्वशून्यत्ववादे कः खलु ज्ञाता भवेत्। अतः संसारस्य अन्धत्वापत्तिरिति तात्पर्यम्।

अनुवाद – संसार में सब कुछ शून्य मान लेने से संसार की अन्धता प्रसक्त होती है। इसलिए इस शून्यत्ववाद में स्वप्रकाश बुद्धि को स्वीकार करना चाहिए। विभ्रम आदि स्थलों में वह बुद्धि विविध रूपों में प्रकाशित होती है। इस बुद्धि से व्यवहार किया जाना चाहिए। अर्थात् इस बुद्धि से ही बाह्यवस्तुओं की शून्यता का ज्ञान मानना चाहिए। बाह्य वस्तु शून्य रहे, वह हमें भी स्वीकार्य है।

टिप्पणी – ऊपर दो पद्यों में माध्यमिकों का सिद्धान्त प्रस्तुत किया गया था। अब दो श्लोकों में योगाचार या विज्ञानवादी का मत प्रस्तुत कर रहे हैं। विज्ञानवादी माध्यमिकों की तरह सर्वशून्यत्ववाद स्वीकार नहीं करते। उनका कहना है कि सर्वशून्यत्ववाद मानने से समस्त संसार अंधा हो जायेगा। इसलिए बाह्यपदार्थों की शून्यता तो माननी चाहिए किन्तु चित्तादि आन्तरपदार्थों को सत्य मानना ही पड़ेगा। अन्यथा उस शून्य का ज्ञान कैसे होगा। संसार की शून्यता जिस बुद्धि, मन, चित्त या विज्ञान से प्रतीत होती है, उन आन्तर पदार्थों को सत्य मानना आवश्यक है। अन्यथा शून्य का ज्ञाता कौन रहेगा? बाह्यार्थ की शून्यता इन्हें भी स्वीकार है। आगे योगाचार की दृष्टि से विमुक्ति का प्रतिपादन करते हैं।

।। ४५ ।।

अहमिति च सुषुप्तावालयज्ञानधारा
सृजति खलु विचित्रा जागरस्वप्नवित्तीः।
इह नियतमनादिर्वासना हेतुरस्याः
क्षय उदयति योगाचारदृष्ट्या विमुक्तिः।।

अन्वयः – सुषुप्तौ आलयज्ञानधारा च 'अहम्' इति विचित्राः जागरस्वप्नवित्तीः सृजति। इह अनादिः वासना नियतं हेतुः। योगाचारदृष्ट्या अस्याः क्षये विमुक्तिः उदयति।

गङ्गा – अहमितीति– सुषुप्तौ सुषुप्त्यवस्थायाम् आलयज्ञानधारा बुद्धिज्ञानधारा 'अहम्' इति 'अहम् अस्मि' इति इत्याकारिका: विचित्राः विभिन्नाः जागरस्वप्नवित्तीः जाग्रतावस्थाया निद्रावस्थायाश्च वित्तीः ज्ञानानि सृजति जनयति। इह अस्यां सर्जनायाम् अनादिः वासना संस्कारः नियतं हेतुः कारणम्। योगाचारदृष्ट्या विज्ञानवादिनां नये अस्याः वासनायाः क्षये विनाशे विमुक्तिः मोक्षः निर्वाणं वा उदयति उदयं प्राप्नोति। यावद् वासनाः सन्ति न तावद्विमुक्तिः। वासनानाश एव तस्या लाभ इत्यभिप्रायः। विज्ञानवादिनोऽस्य ज्ञानस्य सिद्धये आलयविज्ञानं स्वीकुर्वन्ति। इदं च आलयविज्ञानम् 'अहमास्पदं' भवति। तथा चोक्तम्–

'तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम्'। इदम् आलयविज्ञानं चैतन्यरूपं भवतीतीदम् 'अहम्' इति ज्ञानं सुषुप्तौ सृजति।

अनुवाद – सुषुप्ति में बुद्धि की ज्ञानधारा (आलय विज्ञान) उत्पन्न होती है। वही आलय विज्ञान जागृत अवस्था एवं स्वप्नावस्था से सम्बद्ध 'मैं हूँ' इस प्रकार की वित्तियों को जन्म देता है। इस सर्जना मे अनादि वासना ही नियत कारण है। योगाचार की दृष्टि में इस वासना के विनाश से ही मुक्ति का उदय होता है।

टिप्पणी – विज्ञानवादी बौद्ध अवस्थाभेद से विज्ञान के दो भेद करते हैं। उनमें से आलयविज्ञान धर्मों के बीजों का स्थान है। समस्त धर्म बीजरूप में आलयविज्ञान में अवस्थित रहते हैं। यही बाहर निकल कर जगत् के व्यवहार का निर्वाह करते हैं।

।। ४६ ।।

न हि विषयमपास्य ज्ञानवैचित्र्यसिद्धि–
र्न च भवति विचित्रा वासनर्तेऽनुभूतिम्।
अनुभवगतनानाकारनित्यानुमेयं
वदति सदपि बाह्यं वस्तु सौत्रान्तिकस्तु।।

अन्वयः – विषयम् अपास्य ज्ञानवैचित्र्यसिद्धिः न हि (भवति)। अनुभूतिम् ऋते विचित्रा वासना च न भवति। सौत्रान्तिकः तु सत् अपि बाह्यं वस्तु

अनुभवगतनानाकारनित्यानुमेयं वदति।

गङ्गा – सौत्रान्तिकमतं व्याचष्टे– **नहि विषयमिति**– विषयं बाह्यवस्तु अपास्य परित्यज्य ज्ञानवैचित्र्यसिद्धिः ज्ञाने भेदसिद्धिः न भवति। विचित्रा विविधानुभवजन्या वासना संस्कारः अनुभूतिमृतेऽनुभवविरहे न भवति, न जायते। विविधविषयाः संस्कारा अनुभवजन्या भवन्तीत्यर्थः। सौत्रान्तिकस्तु सदपि विद्यमानमपि बाह्यं वस्तु अनुभवगतनानाकारनित्यानुमेयम्, अनुभूतिनिष्ठविविधाकारप्रकारैर्नित्यानुमेयं वदति निर्धारयति। योगाचारमते बाह्यं वस्तु शून्यं विद्यते किन्तु सौत्रान्तिकमते तन्न तथा। तन्मते बाह्यवस्तुनः सत्ता विद्यते। तच्चानुमेयं भवति। तदेतत्सर्वं प्रपञ्चितं सर्वदर्शनसङ्ग्रहे–

'ननु ज्ञानाद् भिन्नकालस्यार्थस्य ग्राह्यत्वमनुपपन्नमिति चेत्, तदनुपपन्नम्। इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्याऽनुमेयतोपपत्तेः। अत एव पर्यनुयोगपरिहारौ समग्राहिषाताम्–

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः।
हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षमम्।।

तथा च यथा पुष्ट्या भोजनमनुमीयते, यथा च भाषया देशः, यथा वा सम्भ्रमेण स्नेहः, तथा ज्ञानाकारेण ज्ञेयमनुमेयम्। तदुक्तम्–

अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम्।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता।।

सौत्रान्तिकमते बाह्यवस्त्वनुमानस्येयमेव प्रक्रिया। तदेतत्सर्वमाकरग्रन्थेषु बहुत्र प्रपञ्चितमिति तत्रैव द्रष्टव्यम्।

अनुवाद – विषय का परित्याग कर देने से ज्ञान में भेद की सिद्धि नहीं होती। अनुभव के बिना विचित्र वासना नहीं हो सकती। सौत्रान्तिक विद्यमान बाह्यवस्तु को अनुभवगत नाना आकारों से नित्य अनुमेय मानते हैं।

टिप्पणी – योगाचारों के मत में बाह्य अर्थ शून्य है किन्तु सौत्रान्तिक इस सिद्धान्त को स्वीकार नहीं करते। उनके मत में बाह्य वस्तु है किन्तु वह अनुमेय है। उसका प्रत्यक्ष नहीं होता। सभी पदार्थों के क्षणिक होने से ज्ञान भी क्षणिक ही है। प्रथमक्षण में विषय का इन्द्रिय से सन्निकर्ष होता है, इससे ज्ञान की उत्पत्ति होती है। उस ज्ञान में प्रथमक्षण में अनुभूत वह विषय अपने आकार का समर्पण कर देता है।

द्वितीयक्षण में उसी समर्पित विषय का अनुमान होता है। आशय यह है कि घटादि विषय क्षणिक हैं। अत: एक क्षण में नष्ट होकर वह अपने अर्थक्रियाकारित्व के बल से दूसरे क्षण में अपने आकार के सदृश दूसरे घट को उत्पन्न करता है। पूर्वक्षण में अनुभूत वह घट ही इन्द्रिय के साथ मिल कर द्वितीय क्षण में अपने सदृश घट ज्ञान को भी उत्पन्न करता है। इसी घटज्ञान से पूर्वक्षणानुभूत घट का अनुमान होता है। इसी तथ्य को कवि ने 'अनुभव, वासना और अनुभवगतनानाकार' शब्दों से कहा है। सौत्रान्तिकों के इस सिद्धान्त को एक छन्द में बाँधने हेतु कवि ने इसे अति संक्षेप में कहा है, अत: उसका कठिन हो जाना स्वाभाविक ही है।

।। ४७।।

कथमनुमितिरास्तां क्वाऽप्यमत्वाऽपरोक्षं ?
प्रथममुभयसम्बन्धेक्षणैकोद्भवा सा।
विषयमनुभवामीत्यत्र सर्वैकमत्यात्
क्षणिकसदपरोक्षं वस्तु वैभाषिकाणाम्।।

अन्वयः - क्वाऽपि अपरोक्षम् अमत्वा अनुमितिः कथम् आस्ताम्। सा प्रथमम् उभयसम्बन्धे क्षणैकोद्भवा (भवति)। 'विषयम् अनुभवामि' इत्यत्र सर्वैकमत्यात् वैभाषिकाणां क्षणिकसत् वस्तु अपरोक्षं (भवति)।

गङ्गा - वैभाषिकमतं ब्रूते- **कथमिति**- क्वाऽपि अपरोक्षममत्वा कुत्रचिदपि प्रत्यक्षम् अस्वीकृत्य अनुमितिः अनुमानं कथमास्ताम्, न कथमपीत्यर्थः। न प्रत्यक्षवस्तुनोऽपित्वप्रत्यक्षस्यैव भवत्यनुमानम्। यथा पर्वतीयवह्नेः। सा अनुमितिः प्रथममुभयसम्बन्धेक्षणैकोद्भवा भवति। अनुमितिः महानसादौ साहचर्यप्रत्यक्षेणैव भवति। महानसादौ प्रथमं वह्निधूमयोः सम्बन्धज्ञानमनन्तरं च परोक्षवह्नेरनुमानमित्यर्थः। सौत्रान्तिकमते समेषां वस्तूनामनुमानगम्यत्वात् प्रत्यक्षाभावे तेषां साहचार्यज्ञानमेव न स्यादिति तथात्वे कथमनुमानसम्भव इत्यर्थः। 'यत्र यत्र धूमस्तत्र तत्र वह्निः' इत्यत्र महानसादौ प्रत्यक्षतया गृहीता व्याप्तिरेव कारणं भवति। सौत्रान्तिकमते प्रत्यक्षाभावे व्याप्तिज्ञानमेव न स्यात्। अतो वैभाषिकाः 'विषयम् अनुभवामि' इत्यत्र समेषामैकमत्यात् सर्वं क्षणिकं सत् क्षणं यावद् विद्यमानं वस्तु अपरोक्षं प्रत्यक्षं भवतीति स्वीकुर्वन्ति। एतेन सौत्रान्तिकानां वस्त्वनुमानवादो निराकृतो भवति। तदेतदुक्तं सर्वदर्शनसङ्ग्रहे-

'विज्ञेयानुमेयत्ववादे प्रात्यक्षिकस्य कस्यचिदप्यर्थस्याभावेन, व्याप्तिसंवेदनस्थानाभावेन अनुमानप्रवृत्त्यनुपपत्तिः सकललोकानुभवविरोधश्च। ततश्चार्थो द्विविधः–ग्राह्योऽध्वसेयश्च। तत्र ग्रहणं निर्विकल्पकरूपं प्रमाणम्। कल्पनापोढत्वात्। अध्यवसायः सविकल्पकरूपोऽप्रमाणम्। कल्पनाज्ञानत्वात्।'

एतेन वैभाषिकैः सौत्रान्तिकाभिमतः सर्ववस्त्वनुमानवादो निराकृतः।

अनुवाद – किसी भी वस्तु को प्रत्यक्ष न मान कर अनुमिति कैसे हो सकती है। वह अनुमिति तो पहले दोनो (वह्नि और धूम) के सम्बन्ध को (महानस आदि में) प्रत्यक्ष देखने से होती है। 'मैं विषय का अनुभव कर रहा हूँ' इस ज्ञान में सभी एक मत हैं। इसलिए वैभाषिक क्षणिक भी वस्तु को प्रत्यक्ष मानते हैं।

टिप्पणी – वैभाषिक सौत्रान्तिकों के 'सर्ववस्तु अनुमेयवाद' का खण्डन करते हैं। वैभाषिकों का मानना है कि अनुमिति साहचर्य ज्ञान के बिना नहीं हो सकती। कोई भी महानस आदि में पहले धूम और अग्नि के सम्बन्ध को प्रत्यक्ष देखता है और व्याप्ति ज्ञान प्राप्त करता है तभी उसे धूम को देखकर वह्नि का ज्ञान होता है। अगर सब कुछ अनुमेय ही मान लिया जायेगा, कुछ भी प्रत्यक्ष नहीं रहेगा तो व्याप्तिज्ञान के अभाव में वह अनुमान होगा कैसे ? अतः 'अहं विषयमनुभवामि' जैसे ज्ञान के बल पर वैभाषिक क्षणिक वस्तु की भी प्रत्यक्षसत्ता मानते हैं। उनका यह प्रत्यक्ष निर्विकल्पक है।

।। ४८ ।।

इति गृहकलहेऽपि स्थैर्ययोधावरोधे
धृतपरिकरबन्धा यौगपद्येन बौद्धाः।
अभिदधति मुधेयं भीरुताऽऽश्रित्य नित्यं
भवततिभवदुःखाद्भावनैवाऽस्त्रमत्र।।

अन्वयः – इति गृहकलहे अपि स्थैर्ययोधावरोधे यौगपद्येन धृतपरिकरबन्धाः बौद्धाः– 'भवततिभवदुःखात् नित्यम् आश्रित्य इयं भीरुता मुधा। अत्र भावना एव अस्त्रम्' (इति) अभिदधति।

गङ्गा – इति गृहकलह इति– इति उपर्युक्तप्रकारेण गृहकलहे अपि चतुर्ष्वपि बौद्धसम्प्रदायेषु परस्परं मतेभेदे सत्यपि स्थैर्ययोधावरोधे नित्यात्मनो विरोधे यौगपद्येन सहैव सर्वेऽपि बौद्धाः धृतपरिकरबन्धाः सन्तः– भवततिभवदुःखात् भवानां जन्मनां

तति: समूह: तस्माद् भवं यद् दु:खं तस्मात्। पुन: पुन: जन्मनां समूहाज्जायमानदु:खभयात् नित्यम् आत्मानमाश्रित्य इयं परलोकविषयिणी भीरुता मुधा व्यर्थैव। वस्तुत: परलोकभयान्नित्यात्माङ्गीकारो व्यर्थ एव। अत्र भावना 'सर्वं क्षणिकं क्षणिकं, सर्वं शून्यं शून्यं, सर्वं स्वं लक्षणं स्वं लक्षणं, सर्वं दु:खं दु:खम्' इति भावना चतुष्टयमेव अस्त्रम्। इति अभिदधति कथयन्ति। अनेन भावनाचतुष्टयेन तादृशभीरुताया विनाश: स्वयमेव भवतीति नात्मनोऽङ्गीकार आवश्यक इत्यर्थ:।

अनुवाद – इस प्रकार परस्पर मतभेद होने पर भी नित्य आत्मा के विरोध में सभी बौद्ध सम्प्रदाय एक जुट हैं और यह कहते हैं कि 'जन्मों के समूह से उत्पन्न दु:ख से नित्य आत्मा का आश्रय लेकर यह भीरुता व्यर्थ है। इस भीरुता का अस्त्र तो 'सर्वं क्षणिकं क्षणिकम्' इत्यादि भावना चतुष्टय है। इस भावना से ही इस भीरुता का विनाश हो जाता है, अत: नित्य आत्मा को स्वीकार करने की कोई आवश्यकता नहीं है।

।।४९।।

उपनमति निसर्गादेव दु:खं सुखं वा
भ्रमति समयचक्रे दु:खता त्वत्र चिन्त्या।
भवति च तदुपेक्षा तेन न द्वेषरागा–
वभिनवसुखदु:खे रागरोषास्पदे हि।।

अन्वय: – समयचक्रे भ्रमति (सति) सुखं दु:खं वा निसर्गात् एव उपनमति। अत्र दु:खता तु चिन्त्या। तेन तदुपेक्षा च भवति। हि अभिनवसुखदु:खे द्वेषरागौ रागरोषास्पदे न (भवत:)।

गङ्गा – उपनमतीति– समयचक्रे कालचक्रे भ्रमति भ्रमणं कुर्वति सति सुखं दु:खं वा निसर्गात् स्वभावात् एव उपनमति प्राप्नोति, न तयो: पूर्वकर्मफलत्वम्। कालचक्रस्य भ्रमणेन कदाचित् सुखं कदाचिद् दु:खं वा स्वभवादेव प्राप्तं भवति। न सर्वदा सुखं न वा सर्वदा दु:खमेवेति भाव:। एतयो: सुखदु:खयो: दु:खता तु चिन्ता विचार्या। सा दु:खता एवाऽत्र विचारविषय इत्यर्थ:। सुखता सर्वेषामभीष्टत्वान्न विचारपथमधिरोहति। तेन हेतुना, कालचक्रस्य भ्रमणेनेत्यर्थ:। तदुपेक्षा तयो: सुखदु:खयो: उपेक्षा क्षणिकत्वात् तिरस्कारश्च भवति। हि, निश्चयेन अभिनवसुखदु:खे कालचक्रस्य भ्रमणात् प्राप्ते नवीने सुखदु:खे द्वेषरागौ दु:खेन द्वेष:

सुखेन रागश्च रागरोषास्पदे अनुरागक्रोधयोः स्थाने न भवतः। समेषां अनुरागक्रोधयोः स्थाने न भवतः। अस्मन्मते समेषां क्षणिकत्वात् सुखदुःखयोः रागरोषास्पदता न भवति। प्राप्तं सुखं दुःखं च सर्वं क्षणिकमिति सुखेऽनुरागो दुःखे वा रोषो न जायत इत्यर्थः।

अनुवाद – काल चक्र के भ्रमण से सुख और दुःख स्वभाव से ही प्राप्त होते हैं। वे पूर्वकर्म के फल नहीं हैं। इस कालचक्र के भ्रमण से प्राप्त होने वाली दुःखता ही यहाँ विचारणीय है। इसी से सुख और दुःख की उपेक्षा होती है। निश्चय ही सुख और दुःख के क्षणिक होने से प्राप्त होने वाले नये सुख और दुःख रूप राग और द्वेष, प्रेम और क्रोध के स्थान नहीं होते। क्षणिक होने से न तो सुख के प्रति हमारा अनुराग होता और न ही दुःख से द्वेष ही होता।

।।५०।।

सुखमिदमिति बुद्धौ तत्र रागोऽनिवार्यो
नवनिपतितदुःखं द्विष्यते नाऽनुवृत्तम्।
गणयति जनुषाऽन्धो नाऽपि वन्ध्या स्वदुःखं
रिपुगदहृतचक्षुर्नष्टपुत्रा समानम्।।

अन्वयः – तत्र इदं सुखम् इति बुद्धौ रागः अनिवार्यः (भवति)। अनुवृत्तं नवनिपतितदुःखं न द्विष्यते। जनुषा अन्धः रिपुगदहृतचक्षुः (च) बन्ध्या नष्टपुत्रा (च) स्वदुःखं समानं न गणयति।

गङ्गा – पूर्वोक्तमेव स्पष्टयन्नाह– **सुखमिति–** तत्र आत्मनो नित्यत्वपक्षे इदमनुभूयमानं मोक्षादि सुखम् इति बुद्धौ ज्ञाने तत्र सुखविषये रागोऽनुरागोऽनिवार्यो भवति। सुखविषयस्य नित्यत्वात्तत्र रागस्यानिवार्यता न कथञ्चिद् वारयितुं शक्यत इत्यर्थः। अस्मत्क्षणिकत्वपक्षे अनुवृत्तं क्षणिकत्वात् पुनः पुनरागतं नवनिपतितदुःखं प्राप्तमभिनवं दुःखं न द्विष्यते। यथा पूर्वक्षणानुभूतं दुःखं विनष्टं तथैवेदमपि विनश्यतीति धिया तत्र द्वेषो न उत्पद्यते। जनुषा जन्मना अन्धः नेत्रहीनः रिपुगदहृतचक्षुः शत्रुरोगापहृतनेत्रः च, वन्ध्या पुत्रोत्पादनशक्तिहीना स्त्री नष्टपुत्रा नष्टो जनिं प्राप्य मृतः पुत्रो यस्याः सा स्त्री स्वदुःखं समानं स्वलक्षणत्वात् सदृशं न गणयति। अपितु दुःखस्य क्षणिकत्वात् सर्वेऽपि भिन्नं भिन्नं दुःखमनुभवन्तीति दुःखस्य क्षणिकत्वसिद्धिः। यद्वा 'रिपुगदहृतचक्षुर्नष्टपुत्रासमानम्' इत्येकं पदम्। रिपुगदहृतचक्षुश्च नष्टपुत्रा च

ताभ्यां समानमिति विग्रहः। जनुषाऽन्धः रिपुगदेन शत्रुरूपरोगेण हृतं चक्षुर्यस्य तेन रोगापहृतदृष्टिना समानं तुल्यं वन्ध्या च नष्टपुत्रया समानं स्वदुःखं न गणयति। अपि तु सर्वेषां दुःखं भिन्नं भिन्नं भवतीति भावः।

अनुवाद – आत्मा के नित्यत्व पक्ष में 'यह सुख है' इस ज्ञान में राग अनिवार्य है। सुखप्रद वस्तु के प्रति राग होना स्वाभाविक है। हम क्षणिकवादियों के मत में दुःख पुनः पुनः अनुवृत्त होता है। बार बार आया हुआ नवीन दुःख द्वेष का जनक नहीं होता। जन्म से अन्धा व्यक्ति तथा शत्रुरोग से नष्ट किये गये नेत्रों वाला व्यक्ति स्वलक्षणता के कारण समान दुःख का अनुभव नहीं करते। इसी प्रकार वन्ध्या तथा मृतपुत्रा स्त्रियाँ भी अपने दुःख को समान नहीं मानतीं। अथवा जन्मान्ध और वन्ध्या क्रमशः शत्रुरोग से नष्ट किये गये नेत्रों वाले व्यक्ति के समान तथा नष्टपुत्रा स्त्री के समान दुःख का अनुभव नहीं करते। सभी पृथक् पृथक् दुःख का अनुभव करते हैं। इस प्रकार दुःख की क्षणिकता सिद्ध है।

।।५१।।

इति कथितपथेनाऽनित्यतातत्त्वसिद्धौ
स्वकृतसुकृतपापोत्पादिते सौख्यदुःखे।
अनुभवति शरीरी नित्य इत्याग्रहं त्वं
त्यज भज सुखदुःखे तुल्यमेते ह्यलङ्घ्ये।।

अन्वयः – इति कथितपथेन अनित्यतातत्त्वसिद्धौ, त्वं 'नित्यः शरीरी स्वकृतसुकृतपापोत्पादिते सौख्यदुःखे अनुभवति' इति आग्रहं त्यज। हि एते अलङ्घ्ये सुखदुःखे (हि) तुल्यं भज।

गङ्गा – इतीति– इति एवम्प्रकारेण कथितपथेन निर्दिष्टमार्गेण, मया प्रतिपादितेन सिद्धान्तेनेत्यर्थः। अनित्यतातत्त्वसिद्धौ क्षणिकताख्यतत्त्वस्य सिद्धौ सत्यां त्वम् अलिः 'नित्यः त्रिकालाबाधितसत्ताकः शरीरी आत्मा स्वकृतसुकृतपापोत्पादिते निजकृताभ्यां पुण्यपापाभ्यां जनिं प्रापिते सौख्यदुःखे अनुभवति' इति आग्रहं। नित्यात्मा निजकृतपापपुण्योत्पादिते दुःखं सुखं च अनुभवतीति पक्षो भवता अलिनाऽपि त्याज्य एव। वस्तुतो न तादृशः कश्चन नित्यः न वाऽस्ति तादृशं किञ्चित् सुखं दुःखं वेति। सर्वं स्वलक्षणमेव। हि निश्चयेन एते अलङ्घ्ये सुखदुःखे तुल्यं भज सेवस्व। सुखं दुःखं चेत्युभयमपि क्षणिकमिति स्वीकुर्वित्यर्थः।

अनुवाद – इस प्रकार मेरे द्वारा कहे गये मार्ग से अनित्यता (क्षणिकता) की सिद्धि हो जाती है। अतः हे भ्रमर! तुम भी 'नित्य आत्मा अपने द्वारा किये गये पाप और पुण्य द्वारा उत्पादित सुख और दुःख का अनुभव करता है' इस आग्रह को छोड़ो। अलंघ्य सुख और दुःख को समान समझो। इनमें से कोई भी नित्य नहीं है। दोनों ही क्षणिक हैं।

।।५२।।

वयमपि कृतकृत्या भावनामात्रतुल्यी–
कृतसकलपदार्थाः सर्वदोपेक्षमाणाः।
क्षणवशसुखदुःखे भुञ्ज्महे पूजयामो–
ऽर्जितसुखजनकार्थैर्द्वादशाऽपीन्द्रियाणि।।

अन्वयः – सर्वदा उपेक्षमाणाः भावनामात्रतुल्यीकृतसकलपदार्थाः कृतकृत्याः वयम् अपि क्षणवशसुखदुःखे भुञ्ज्महे। अर्जितसुखजनकार्थैः द्वादश अपि इन्द्रियाणि पूजयामः।

गङ्गा– वयमपीति– सर्वदा सदैव उपेक्षमाणाः क्षणिकत्वात् उपेक्षाबुद्ध्या पदार्थान् पश्यन्तः भावनामात्रतुल्यीकृतसकलपदार्थाः भावनामात्रेण सर्वं शून्यं शून्यं, सर्वं क्षणिकं क्षणिकं, सर्वं स्वलक्षणं स्वलक्षणं, सर्वं दुःखं दुखमिति भावनाचतुष्टयेन तुल्यीकृताः समत्वं नीताः सकलाः पदार्थाः यैस्ते कृतकृत्याः पदार्थानामनित्यत्वात् तेषु रागद्वेषरहिता वयं बौद्धा अपि क्षणवशसुखदुःखे क्षणिकं सुखं दुःखं च भुञ्ज्महे अनुभवामः। आसक्तिरहिता वयं सुखदुःखेऽनुभवामः। न तु त्वमिव नित्यतापाशबद्धा इत्यर्थः। अर्जितसुखजनकार्थैः अर्जिताः भिक्षादिभिः प्राप्ताः ये सुखजनका अर्थाः परार्थास्तैः द्वादशापीन्द्रियाणि बुद्धिमनःसहितानि ज्ञानकर्मेन्द्रियाणि पूजयामोऽर्चामः। सर्वं संसारे क्षणिकमिति कृत्वा लोकात् प्राप्ता ये सुखजनकपदार्थास्तैरिन्द्रियतृप्तिं कुर्मः। न तु त्वमिव इन्द्रियनिग्रहेऽस्माकं रतिरित्यर्थः।

अनुवाद – क्षणिक होने के कारण पदार्थों में सदैव हमारी उपेक्षा बुद्धि ही रहती है। हम 'सर्वं शून्यं शून्यम्' इत्यादि चारों भावनाओं से समस्त पदार्थों को समान (क्षणिक) ही मानते हैं और उस क्षणिक सुख दुःख का भोग करते हैं। उसी से कृतकृत्य होकर हम भिक्षा आदि से प्राप्त सुखजनक पदार्थों से बारहों इन्द्रियों (पाँच ज्ञानेन्द्रिय, पाँच कर्मेन्द्रिय तथा बुद्धि और मन) को तृप्त करते हैं। तुझ अलि के समान इन्द्रियनिग्रह में हमारी रुचि नहीं है।

।।५३।।

फलमपि च परोक्षैर्दैवतैः पूजितैः किं
फलति सुखमनल्पं स्वेन्द्रियाणां सपर्या।
चितिरपि तदधीना तेन चैतन्यमेषां
बहुभिरत उपायैस्तर्पणीयान्यमूनि।।

अन्वयः – पूजितैः परोक्षैः दैवतैः च फलम् अपि किम्? स्वेन्द्रियाणां सपर्या अनल्पं सुखं फलति। चितिः अपि तदधीना (भवति)। तेन एषां चैतन्यम्। अतः बहुभिः उपायैः अमूनि तर्पणीयानि।

गङ्गा – फलमपीति– पूजितैः हविष्यादिभिः यज्ञे तर्पितैः परोक्षैरप्रत्यक्षैः दैवतैः इन्द्रादिभिर्देवैः फलमपि किम्? किं प्रयोजनम्? न किमपीत्यर्थः। स्वेन्द्रियाणां मनोबुद्ध्यादिज्ञानकर्मेन्द्रियाणां सपर्या पूजा अनल्पं बहु सुखं फलति यच्छति। देवपूजया किमपि फलं न लभ्यते किन्तु इन्द्रियपूजया महानानन्दो लभ्यत इत्यर्थः। चितिः आत्मा, चैतन्यमिति यावत्। तदधीना इन्द्रियाधीना भवति। तेन हेतुना एषामिन्द्रियाणां चैतन्यम्। इन्द्रियाण्यपि चेतनानि भवन्तीति। अतो बहुभिः उपायैः भोगपदार्थप्रदानैः अमूनीन्द्रियाणि तर्पणीयानि पूजनीयानि। न तु देवता इत्यर्थः।

अनुवाद – पूजे गये परोक्ष देवताओं से कोई फल नहीं मिलता। अपने इन्द्रियों की पूजा अत्यधिक सुख देती है। आत्मा भी इन्द्रियों के अधीन है, अतः इन्द्रिय भी चैतन्य हैं। इसलिए अनेक उपायों से इन इन्द्रियों की पूजा करनी चाहिए। देवताओं की पूजा का कोई औचित्य नहीं है।

।।५४।।

अलमखिलरहस्यख्यापनेनाऽन्तरायो
भवति हि सुखभोगे तेन तद् याहि दूरम्।
अभिलषसि सुखं चेत्सेवमानः सदाऽस्मान्
वस मठ इह सौख्यं भोक्ष्यसे मोक्ष्यसे च।।

अन्वयः – अखिलरहस्यख्यापनेन अलम्। तेन सुखभोगे हि अन्तरायो भवति। तत् दूरं याहि। अस्मान् सेवमानः सुखम् अभिलषसि चेत्, सदा मठे वस। इह सौख्यं भोक्ष्यसे मोक्ष्यसे च।

गङ्गा – अलमिति– अखिलरहस्यख्यापनेन समग्रशास्त्रतत्त्वप्रतिपादनेन अलं पर्याप्तम्। अत्रोक्तसारमात्रेण तव सिद्धान्तस्य बोधात् न शास्त्रविस्तरोऽपेक्ष्यत इति भावः। तेन तादृशोपनिषदादितत्त्वख्यापनेन सुखभोगे इन्द्रियसपर्यायाम् अन्तरायो विघ्नः भवति। तत्रेन्द्रियसुखस्य निन्दितत्वात्। 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः। तत् तस्मात् तादृशोपनिषत्तत्त्वख्यापनात् दूरं याहि गच्छ। अस्मान् क्षणिकोपासकान् इन्द्रियसपर्यासंलग्नान् सेवमानः भजमानः त्वमलिः सुखम् अभिलषसि वाञ्छसि चेत्, सदा अस्माभिः साकं मठे वस। इह मठे सौख्यं सुखं भोक्ष्यसे इन्द्रियसुखं प्राप्स्यसे मोक्ष्यसे च मुक्तिश्च लप्स्यसे।

अनुवाद – उपनिषद् आदि के रहस्यों की व्याख्या बन्द करो। तुम्हारी इस व्याख्या से सुख भोग में विघ्न होता है। क्योंकि इन उपनिषदों में इन्द्रिय सुख निन्दित है। इसलिए इस व्याख्या से दूर हटो। हमारे साथ यदि सुख का भोग करना चाहते हो तो सदैव मठ में रहो। यहाँ सुख का भोग भी प्राप्त करोगे और तुम्हें मुक्ति भी मिल जायेगी।

।।५५।।

इति वदति विलासिन्यस्य शिष्या भुजिष्या
जहृषुरथ विशिष्याऽघोषयन् भृङ्गभङ्गम्।
अलिरपि धृतधैर्यः स्थैर्यसिद्ध्याऽस्य वार्यो
भ्रम इति सुविचार्याचार्यकार्येऽयतिष्ट।।

अन्वयः – इति विलासिनि वदति (सति) अस्य शिष्याः भुजिष्याः जहृषुः। अथ विशिष्य भृङ्गभङ्गम् अघोषयन्। धृतधैर्यः अलिः अपि 'स्थैर्यसिद्ध्या अस्य भ्रमः वार्यः' इति सुविचार्य आचार्यकार्ये अयतिष्ट।

गङ्गा – इति वदतीति– इति पूर्वोक्तप्रकारेण विलासिनि धृतबौद्धरूपेण पूर्वपक्षिणि वदति कथयति सति तस्य बौद्धरूपस्य विलासिनः शिष्या भुजिष्याः भोगसाधनभूताः चीरभिक्षादिरक्षामिषेण प्राप्ताः दास्यः। जहृषुः प्रसन्ना बभूवुः। अथ च विशिष्य सविशेषं भृङ्गभङ्गं भृङ्गस्य सिद्धान्तपक्षिणः परमहंसस्य अलेः भङ्गं पराजयम्। 'भङ्गस्तरङ्गे भेदे च रुग्विशेषे पराजये' इति हैमः। अघोषयन् निरधारयन्। धृतधैर्यः विलासिवचःकशाघातेनाऽपि स्वसिद्धान्ते स्थिरः अलिः अपि स्थैर्यसिद्ध्या नित्यतास्थापनेन अस्य विलासिनो भ्रमो वार्यः दूरीकरणीयः इति सुविचार्य आचार्यकार्ये भ्रान्तिनिवारणे अयतिष्ट यत्नमकरोत्। तस्य क्षणिकत्वखण्डने प्रवृत्तोऽभूदित्यर्थः।

अनुवाद – विलासी के द्वारा ऐसा कहे जाने पर इस विलासी की दासी शिष्याएं प्रसन्न हो गयीं। उन्होंने विशेष रूप से अलि के पराजय की घोषणा कर दिया। धैर्य धारण करते हुए अलि ने भी 'नित्यता की सिद्धि से इस विलासी का भ्रम दूर करना चाहिए' ऐसा विचार करके आचार्य की तरह उसकी भ्रान्ति के निवारण में लग गया।

।।५६।।

विरम जड विलज्ज व्याहतोक्तिप्रपञ्चात्
पतसि कुमतमार्गे पातयस्येवमन्यान्।
स्फुटतरमनुभूयाऽत्रानुपन्यस्य बाधं
कथमपलपसि त्वं मानमेयव्यवस्थाम्?।।

अन्वयः – हे जड! विलज्ज! व्याहतोक्तिप्रपञ्चात् विरम। कुमतमार्गे पतसि। एवम् अन्यान् पातयसि। स्फुटतरम् अनुभूय अत्र बाधम् अनुपन्यस्य त्वं मानमेयव्यवस्थां कथम् अपलपसि।

गङ्गा – विरमेति– हे जड़! विलज्ज! लज्जारहित! मूर्ख विलासिन्! व्याहतोक्तिप्रपञ्चात् निष्फलोक्तीनां विस्तरात् विरम, विरामं स्वीकुरु। मौनं भजेत्यर्थः। कुमतमार्गे कुत्सितबुद्धीनां सिद्धान्ते पतसि। एवमेतादृशसिद्धान्तेन अन्यान् च पातयसि। स्फुटतरं स्पष्टतरम् अनुभूय विचार्य अत्र स्वकथने बाधं प्रतिबन्धकम् अनुपन्यस्य अनिर्दिश्य त्वं मानमेयव्यवस्थां प्रमाणप्रमेयसिद्धान्तं कथमपलपसि निन्दसि मानमेयव्यवस्थाया अपलापाय बाधनिर्देशोऽपेक्ष्यत इत्यर्थः।

अनुवाद – हे मूर्ख! रुको। अपनी निष्फलयुक्तियों के विस्तार से लज्जा करो। तुम खुद कुमतमार्ग में पड़ रहे हो तथा दूसरों को भी उसी में गिरा रहे हो। स्पष्ट अनुभव करके भी तुम यहाँ प्रतिबन्धक का निर्देश नहीं कर रहे। फिर प्रमाण और प्रमेय व्यवस्था का अपलाप कैसे कर रहे हो? प्रमाण और प्रमेय विषयक सिद्धान्तों का अपलाप करने के लिए पहले उनका बाध दिखाना आवश्यक होता है।

।।५७।।

कथमिव न विभेषि प्रस्फुटाध्यक्षबाधा-
दनुमितिरपि न स्याच्छून्यतैकान्तवादे।
अनिपुण! भण शून्यं शून्यवच्छून्यवत्त्वा-
दिति किमनुमितिः स्याद्धेतुसाध्याश्रयैक्ये?।।

अन्वयः - प्रस्फुटाध्यक्षबाधात् कथम् इव न बिभेषि। शून्यतैकान्तवादे अनुमितिः अपि न स्यात्। हे अनिपुण! 'शून्यं शून्यवत् शून्यवत्वात्' इति अनुमितिः हेतुसाध्याश्रयैक्ये स्यात् किम्? (इति) भण।

गङ्गा - अनिपुणेति- प्रस्फुटाध्यक्षबाधात् सविकल्पकप्रत्यक्षप्रमाणस्य अस्वीकृतेः कथमिव न बिभेषि, भयमनुभवसि। शून्यवादे सर्वं शून्यमेव स्वीकृतं तन्मते न किमपि वस्तु प्रत्यक्षम्। अतः शून्यतैकान्तवादे प्रत्यक्षाभावे अनुमितिः अपि न स्यात्। महानसादौ प्रत्यक्षप्रमाणेन साहचर्यसम्बन्धं ज्ञात्वा प्रमाताऽनुमितौ प्रभवति। हे अनिपुण! मूर्खविलासिन्! 'शून्यं शून्यवत् शून्यवत्त्वात्' इति अनुमितिः हेतुसाध्याश्रयैक्ये स्यात् किम्? इति भण कथय। 'पर्वतो वह्निमान् धूमवत्त्वात्' इत्यत्र पर्वतः पक्षः वह्निः साध्यः धूमवत्त्वं च हेतुः। तव मते पुनः शून्यमेव पक्षः तदेव साध्यं हेतुश्च। अतः हेतुसाध्याश्रयैक्ये हेतोः साध्यस्य आश्रयस्य पक्षस्य च ऐक्ये अनुमितिः कथं स्यादिति वदेति प्रश्नः। पर्वते वह्न्यनुमितौ भवन्ति पक्षादयो सर्वेऽपि भिन्नाः किन्तु शून्यवादिनस्तव मते सर्वमेव शून्यमिति कथं तत्रानुमितिव्यवस्था स्यादिति भावः।

अनुवाद - तुम सविकल्पक प्रत्यक्ष की अस्वीकृति से क्यों नहीं डरते। शून्यवाद में प्रत्यक्ष के अस्वीकृत होने से अनुमिति भी कैसे होगी? हे अनिपुण विलासिन्! 'शून्यं शून्यवत् शून्यवत्त्वात्' (शून्य शून्य है क्योंकि उसमें शून्यवत्त्व है) यह अनुमिति कैसे होगी, यह बताओ। यहाँ तो हेतु, साध्य और आश्रय एक हैं।

टिप्पणी - शून्यवादी के मत में कुछ भी प्रत्यक्ष नहीं है। वह सब कुछ शून्य ही मानता है। प्रत्यक्ष के अभाव में अनुमिति हो नहीं सकती। प्रमाता प्रथमतः महानस में अग्नि और धूम के साहचर्य का प्रत्यक्ष करता है तभी पर्वत में धूम देखकर वह अग्नि का अनुमान करता है। शून्यवाद में जब कुछ भी प्रत्यक्ष नहीं है तो प्रत्यक्ष के आश्रय से प्रसृत होने वाला अनुमान कैसे होगा।

दूसरा पर्वत में वह्नि के अनुमान स्थल में पक्ष, हेतु और साध्य तीनों ही अलग अलग होते हैं। 'पर्वतो वह्निमान् धूमात्' में इन तीनों का ऐक्य नहीं है। किन्तु शून्यवाद में पक्ष, साध्य और हेतु तीनों के शून्यरूप होने से अनुमिति कैसे हो सकेगी। 'शून्य शून्य है क्योंकि उस में शून्यवत्त्व है' इस ज्ञान में पक्ष, साध्य और हेतु तीनों ही एक हैं। ऐसे में अनुमान की व्यवस्था असम्भव है। यही अलि का अभिप्राय है। 'वह्निः वह्निमान् वह्निमत्त्वात्' जैसा अनुमान तो कभी होता नहीं।

।। ५८ ।।

न समसमयसत्ता वेद्यवित्त्योर्यतोऽर्थो-
ऽर्पयति मितिषु रूपं स्वं ततः पूर्वभावी।
जनकफलगपौर्वापर्यमर्यादयैवा-
ऽऽश्रयति जगति सर्वो हेतुतां कार्यतां च।।

अन्वयः – वेद्यवित्त्योः समसमयसत्ता न (भवति)। यतः ततः पूर्वभावी अर्थः मितिषु स्वं रूपम् अर्पयति। जनकफलगपौर्वापर्यमर्यादया एव जगति सर्वः हेतुतां कार्यतां च आश्रयति।

गङ्गा – न समेति– वेद्यवित्त्योः ज्ञेयज्ञानयोः समसमयसत्ता तुल्यकालस्थितिः न भवति। तत्कृते इन्द्रियार्थसन्निकर्षोऽपेक्ष्यते। भवन्मते सर्वं क्षणिकमिति कृत्वा तत्र वेद्यवित्त्योः व्यवस्था न भवितुमर्हति। वेद्यः घटादिपदार्थः वित्तिश्च तज्ज्ञानं तस्मिन्नेव क्षणे न भवितुमर्हति। यतः यस्मात् ततः वित्तेः पूर्वभावी अर्थः घटादिपदार्थः मितिषु ज्ञानेषु प्रत्यक्षादिषु स्वं रूपमर्पयति। पूर्वोपस्थितघटादिपदार्थः ज्ञाने स्वं रूपमर्पयति। अनन्तरं स एव ज्ञाने भासते। अतो न वस्तुनः क्षणिकत्वनियमेन तादृशी व्यवस्था भवितुमर्हति। तथात्वे तस्मिन्नेव क्षणे वस्तुनो विनाशात् तज्ज्ञानाभावादित्यर्थः। जनकफलगपौर्वापर्यमर्यादया, जनकः कारणं फलं कार्यं चेति जनकफले। जनकफले गच्छतीति जनकफलगा। द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकमभिसम्बन्धनियमात् गम्धातोरुभयत्रान्वयः। कारणगता कार्यगता च या पौर्वापर्यमर्यादा पूर्वोत्तरभाविसीमा तया एव जगति सर्वः हेतुतां कारणतां कार्यतां फलतां च आश्रयति। आश्रयत्वेन अङ्गीकरोतीत्यर्थः। कारणनिष्ठं यत् पूर्वत्वं कार्यनिष्ठं च यत् परत्वं तेनैव कारणत्व-कार्यत्वयोः निर्णयो जायते। अत एव कार्यनियतपूर्ववर्तित्वं कारणत्वं कारणनियतपश्चाद्भावित्वं च कार्यत्वमिति हेतु फलयोर्लक्षणं फलति। त्वन्मते नैतादृशी वेद्यवित्त्योः व्यवस्था भवितुमर्हतीत्यर्थः।

अनुवाद – ज्ञेय और ज्ञान की तुल्यकास्थिति नहीं हो सकती। अर्थात् ज्ञेय घट आदि पदार्थ और उनका ज्ञान दोनो एक ही क्षण में नहीं हो सकते। क्योंकि पूर्वभावी पदार्थ ही प्रत्यक्ष, अनुमान आदि ज्ञानों में अपने स्वरूप को अर्पित करता है। कारण और कार्यनिष्ठ पौर्वापर्य की मर्यादा से ही संसार में सब हेतुता और कार्यता का आश्रयण करते हैं। अत: ज्ञान से पूर्व वस्तु की सत्ता अपेक्षित है, तभी इन्द्रियार्थसन्निकर्ष आदि से प्रत्यक्ष आदि ज्ञान उत्पन्न होंगे। किन्तु तुम्हारे क्षणिकत्ववाद में वैसी व्यवस्था बन नहीं सकती।

।।५९।।

गमयति मितिकादाचित्कता हेतुमन्यं
क्वचिदपि मनुषे त्वं न क्षणद्वन्द्वयोगम्।
स्वयमुदयति चित्रा ज्ञप्तिरित्यप्यसारं
किमिति सति तथात्वे वासनामभ्युपैषि ?।।

अन्वय: – मितिकादाचित्कता अन्यं हेतुं गमयति। त्वं क्वचिदपि क्षणद्वन्द्वयोगं न मनुषे। चित्रा ज्ञप्ति: स्वयम् उदयति इति अपि असारम्। तथात्वे सति वासनां किमिति अभ्युपैषि ?।

गङ्गा – गमयतीति– मितिकादाचित्कता मिते: ज्ञानस्य कादाचित्कता आकस्मिकता अन्यं ज्ञेयं विषयं वा हेतुं गमयति। मिति: सततं न भवति कदाचिदेव जायते। अत इयं हेतुजन्येति ज्ञायते। त्वं च बौद्धरूपो विलासी क्वचिदपि क्षणद्वन्द्वयोगं द्वयो: क्षणयो: संयोगं क्षणद्वयसम्बन्धं वा न मनुषे न स्वीकरोषि। चित्रा विचित्रा: उत्पत्तिक्षणावच्छेदेनैव ज्ञानान्तरोत्पादशालिनी विषयगतनानाकारवती ज्ञप्ति: ज्ञानं स्वयं कारणं विनैव उदयति इत्यपि असारं साररहितं वच:। तथा सति सर्वदैव मितिप्रसङ्ग: स्यादित्यर्थ:। यदि नाम भवान् मितीनां स्वयमेव जनिं स्वीकरोति तथात्वे वासनां वस्तुन: पूर्वसंस्कारं किमित्यभ्युपैषि किमिति स्वीकरोषि वासनासिद्धान्तोऽयं व्याख्यात: सर्वदर्शनसङ्ग्रहे–

'वासना नाम एकसन्तानवर्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्ति:। तस्याश्च स्वकार्योत्पादं प्रति आभिमुख्यं परिपाक:। तस्य च प्रत्यय: कारणं स्वसन्तानवर्तिपूर्वक्षण: कक्षीक्रियते सन्तानान्तरनिबन्धनत्वानङ्गीकारात्'।

विज्ञानवादिनो बौद्धा आलयविज्ञानमाश्रित्य पूर्वपूर्ववस्तुज्ञानं स्वीकुर्वन्ति।

लङ्कावतारसूत्रे तदिदमालयविज्ञानं व्याख्यातम्–

तरङ्गो उदधेर्यद्वत्पवनप्रत्ययेरिताः।
नृत्यमानाः प्रवर्तन्ते व्युच्छेदश्च न वर्तते।।
आलयौघस्तथा नित्यं विषयपवनेरितः।
चित्रैस्तरङ्गविज्ञानैः नृत्यमानः प्रवर्तते।।

यथा समुद्रे पवनेरितास्तरङ्गा उत्पद्यन्ते तथैव समुद्ररूपे आलयविज्ञाने बाह्यविषयप्रेरिताश्चित्रा विज्ञानतरङ्गा उत्पद्यन्त इति भावः। आलयौघोऽयं धर्मबीजानामाश्रयत्वाद् वासनारूपो भवतीति बौद्धैरस्याश्रयेण ज्ञानसन्तानं प्रमाणयन्ति।

अनुवाद – ज्ञान की आकस्मिकता अन्य (ज्ञेय या विषय) हेतु का बोध कराती है। आशय यह है कि ज्ञान सर्वदा नहीं होता, वह आकस्मिक होता है। इससे यह सिद्ध है कि उसका कोई हेतु है। तुझ बौद्धरूप विलासी को दो क्षणों का सम्बन्ध अभिमत नहीं है। अतः ज्ञेय और ज्ञान में कार्यकारण भाव बन नहीं सकता। यदि कहो कि उत्पत्तिक्षण में ही दूसरे ज्ञान को उत्पन्न करने वाली विषयगत नाना आकारों से युक्त विचित्र ज्ञप्ति स्वयं उदित होती है तो यह भी निष्कर्षहीन ही है। ऐसा होने पर तुम वासना को क्यों स्वीकार करते हो?

टिप्पणी – विज्ञानवादी बौद्ध बाह्यार्थ को शून्य मानते हैं। उनके अनुसार सन्तानपरम्परा में विद्यमान आलयविज्ञान ही अपने से सम्बद्ध प्रवृत्तिविज्ञानों को उत्पन्न करता है। पूर्वक्षण की वासना ही उत्तरक्षण की वासना के परिपाक का कारण होती है। प्रकृत में कवि का आरोप है कि बाह्यवस्तु की सत्ता न मान कर तुम क्षणगत वासना क्यों स्वीकार करते हो। क्षणद्वय के संयोग के अभाव में ज्ञेय विषय और ज्ञान में कार्यकारण सम्बन्ध न बन पाने के कारण ही तुम्हें वासना स्वीकार करनी पड़ती है।

।।६०।।

भवति किमपि न व्यापारशून्येन कार्यं
न कलशजनिरिष्टाऽव्यापृतारण्यदण्डात्।
क्षणविलयिनि हेतौ व्यापृतिः क्वाऽस्तु? तस्मात्
क्षणयुगपरिरम्भो वस्तुनो निर्विवादः।।

अन्वयः – व्यापारशून्येन किमपि कार्यं न भवति। अव्यापृतारण्यदण्डात् कलशजनिः न इष्टा। क्षणविलयिनि हेतौ व्यापृतिः क्व अस्तु। तस्मात् वस्तुनः क्षणयुगपरिरम्भः निर्विवादः अस्ति।

गङ्गा – भवतीति– व्यापारशून्येन व्यापाररहितेन कारणेन कार्यं न भवति, कार्यं नोत्पद्यते। अव्यापृतारण्यदण्डात् कलशजनौ अव्यापृतो व्यापाररहितो योऽरण्यदण्डः वने स्थितो दण्डः तत्र कारणतायां सत्यामपि व्यापाररहितत्वात् कलशजनिः न इष्टा घटोत्पत्तिर्नभवति। कारणत्वे सति व्यापारवत्त्वेनैव कार्यमुत्पद्यत इत्यर्थः। अरण्यदण्डे सत्यपि कारणत्वे भ्रम्यादिव्यापारशून्यतया कलशो न उत्पद्यत इति भावः। भवतो बौद्धरूपस्य विलासिनः क्षणविलयिनि हेतौ क्षणेनैव विलीयमाने क्षणविनाशिनि हेतौ व्यापृतिः क्वाऽस्तु ? न क्वापीत्यर्थः। यतो हि व्यापारार्थं वस्तुनः क्षणयुगपरिरम्भः क्षणद्वयसम्बन्धः निर्विवादः, अवश्यमेवाऽपेक्ष्यते। क्षणमात्रविनाशिनि व्यापारवत्ता न उत्पद्यते।

अनुवाद – व्यापाररहित कारण से किसी कार्य की उत्पत्ति नहीं हो सकती। भ्रमि आदि व्यापार से रहित अरण्यदण्ड में कारणता होने पर भी कलश की उत्पत्ति नहीं होती। क्षणमात्र में नष्ट होने वाले कारण में व्यापार कैसे हो सकता है। इसलिए वस्तु का क्षणद्वयसम्बन्ध निर्विवाद है।

।। ६१ ।।

कथमिव भवदिष्टं निःस्वरूपञ्च शून्यं
प्रभवति चिति चित्राकारभारार्पणाय ?।
तदपि तव न नित्यं तेन वाच्योऽस्य हेतु–
र्नियतमुपगतेऽस्मिन् दुर्निवाराऽनवस्था ।।

अन्वयः – भवदिष्टं निःस्वरूपं च शून्यं चिति चित्राकारभारार्पणाय कथम् इव प्रभवति ? तव तत् नित्यम् अपि न (अस्ति)। तेन अस्य नियतं हेतुः वाच्यः। अस्मिन् उपगते अनवस्था दुर्निवारा (अस्ति)।

गङ्गा – कथमिवेति– भवदिष्टं बौद्धरूपविलासिनोऽभिमतं निःस्वरूपं शून्यस्वभावत्वात् स्वरूपरहितं शून्यं चिति चैतन्ये चित्ते वा चित्राकारभारार्पणाय वित्तीनामनेकाकारताया भारस्य समर्पणाय कथमिव प्रभवति। न कथमपीत्यर्थः। शून्यस्य चाक्षुषत्वाभावान्न तस्य तादृशभारार्पणे सामर्थ्यम्। चाक्षुषस्यैव प्रतिबिम्बं

भवति न निःस्वरूपस्येत्यर्थः। तव तत् शून्यं नित्यमपि नास्ति क्षणिकस्वभावत्वात्। शून्यमपि क्षणिकं तत् चित्राकारभारार्पणे कथं प्रभवेदिति तात्पर्यम्। तेन हेतुना अस्य चित्राकारभारार्पणस्य नियतं हेतुः वाच्यः निर्धारणीयः। अस्मिन् नियतहेतावुपगते अनवस्था हेतोः पुनर्हेतुनिर्धारणरूपा दुर्व्यवस्था दुर्निवारा स्यात्। एकस्य हेतोः निर्धारणे पुनर्निर्धारितहेतोरपि हेतुनिर्धारणरूपाऽनवस्था तत्र आपतेदिति भावः।

अनुवाद – आपको इष्ट शून्य निःस्वरूप है, अतः वह चित्त में अनेक आकार प्रकार वाली वस्तुओं के भार को कैसे समर्पित कर सकेगा। तुम्हारा वह शून्य नित्य भी नहीं है। शून्य होकर भी वह क्षणिक है। निःस्वरूप क्षणिक उस शून्य का तो कथमपि कोई प्रतिबिम्ब हो नहीं सकता। अतः तुम्हें विचित्र वित्तियों का कोई नियत हेतु निर्धारित करना पड़ेगा। इस एक हेतु के निर्धारण से तुम्हारे सिद्धान्त में दुर्निवार्य अनवस्था का प्रसंग आ जायेगा क्योंकि इस हेतु के लिए भी हेत्वन्तर की आवश्यकता होगी। इसी प्रकार आगे के हेतु भी अपने हेतु की अपेक्षा करेंगे।

।।६२।।

अथ तव यदि शून्यं नित्यमेकं स्वकार्यं
जनयति वत सर्वं स्यात्सदैवाऽविशेषात्।
अपरमपि च तेनाऽपेक्ष्यते चेत्तदेव
प्रभवतु न तु शून्यं किञ्च सिद्धान्तहानिः।।

अन्वयः – अथ यदि तव एकं शून्यं नित्यं स्वकार्यं जनयति। वत सर्वम् अविशेषात् सदा एव स्यात्। तेन अपरम् अपि अपेक्ष्यते चेत्, तदेव प्रभवतु, न तु शून्यम्। किञ्च (तेन) सिद्धान्तहानिः (अपि स्यात्)।

गङ्गा – अथ तवेति– अथेति पक्षान्तरे। यदि नाम तव विलासिनः एकं हेत्वन्तरानपेक्षं सत् शून्यमेव नित्यं सर्वदा स्वकार्यं जनयति। समेषां कारणं शून्यमेव स्वीकरोषि चेत्, बत इति खेदे। तदा अविशेषात् विशेषरहितत्वात् सर्वं कार्यं सदा एव स्यात्, सर्वदैव सर्वकार्योत्पत्तिप्रसङ्गः स्यात्। कारणभेदादेव कार्यभेदोऽवधार्यते। घटपटादौ मृदादिकारणभेदादेव भेदप्रतीतिर्भवति। तव मते शून्यमात्रस्य कारणतया सर्वस्मिन् कार्ये भेदराहित्यं स्यात्। अथ च सर्वदैव तदुत्पत्तिप्रसङ्ग आपद्येत। तेन शून्येन अपरमपि अपेक्ष्यते, हेत्वन्तरमपेक्ष्यते चेत्, तदेव तद्धेत्वन्तरमेव कार्ये प्रभवतु,

न तु शून्यम्। तस्याऽभावरूपत्वात्। किञ्च तेन अपरहेतुना सिद्धान्तहानिः अपि, त्वया सर्वं शून्यमेव स्वीकृतमिति तद्व्यतिरिक्तं शून्यभिन्नं किं स्यादिति हेत्वन्तरापेक्षया ते सिद्धान्तहानिः। अपरस्मिन्नपेक्ष्यमाणेऽनभिमतस्य शून्यत्वाभावस्य प्रसक्तिः स्यादितिभावः।

अनुवाद – यदि तुझ विलासी का यह शून्य नित्य अकेले ही अपने कार्य को उत्पन्न करता है तब तो कोई विशेष (भेद) न होने के कारण सब कुछ सदा ही उत्पन्न होता रहेगा। कारण भेद से कार्य भेद माना जाता है। यहाँ तो एक शून्य ही सब का कारण है, अतः सभी वस्तुएं हमेशा उत्पन्न होनी चाहिए। उनकी उत्पत्ति में विराम नहीं होना चाहिए। यदि यह शून्य किसी दूसरे हेतु की अपेक्षा करता है, तब तो वह दूसरा हेतु ही कार्योत्पत्ति में समर्थ होगा, शून्य नहीं। सब कुछ शून्य मान लेने के बाद दूसरे हेतु की कल्पना करने से तुम्हारे सिद्धान्त की हानि होगी। जब सब कुछ शून्य है तो यह दूसरा हेतु कहाँ से आयेगा?

।। ६३ ।।

अयि! विषयसमूहालम्बनैकस्ववित्त्या
सह यदि विषयाणां मूढ! वाञ्छस्यभेदम्।
घटपटसुखदुःखाऽभावभावैक्यमद्धा
प्रसजति तदभिन्नाभिन्नतद्भेदबाधात्।।

अन्वयः – अयि! मूढ! विषयसमूहालम्बनैकस्ववित्त्या सह यदि विषयाणाम् अभेदं वाञ्छसि, अद्धा तदभिन्नाभिन्नतद्भेदबाधात् घटपटसुखदुःखाऽभावैक्यं प्रसजति।

गङ्गा – अयीति– अयि! मूढ! विलासिन्! विषयसमूहालम्बनैकस्ववित्त्या विषयाणां ज्ञेयपदार्थानां समूहालम्बनरूपा सहोपलम्भरूपा या वित्तिः ज्ञानं तया विज्ञप्त्या। बौद्धाः ज्ञेयज्ञानयोरभेदं प्रतिपादयन्तीति तन्मते नीलतद्धियोः समूहालम्बनत्वमेव फलति। तादृश्या विज्ञप्त्या सह यदि विषयाणां पदार्थानाम् अभेदं वाञ्छसि इच्छसि। पदार्थानां क्षणिकत्वात् तेषां बाह्यसत्तां निराकृत्य वित्तावभेदं निरूपयसि चेत्, अद्धा निश्चयेन तदभिन्नाभिन्नतद्भेदबाधात् तस्या वित्तेः अभिन्नो यःघटस्तेन तदभिन्नस्य पटस्यापि तद्भेदबाधात्, घटपटयोः सत्यपि भेदे वित्तिरूपत्वादभेद इति तेषां भेदस्य अपोहस्य बाधात् समेषां पदार्थानामैक्यं स्यात्। घटपटसुखदुःखाऽभाव–भावैक्यं, घटश्च पटश्च सुखं च दुःखं च अभावश्च भावश्चेति

समेषामैक्यमभिन्नता प्रसजति प्रसक्ता भवति। अयमत्राभिप्रायः– बौद्धमते वित्तिः समूहालम्बनरूपा भवति। तादृश्या वित्त्या तत्र विषयाणामभेदः कल्प्यते। वित्तेः समूहालम्बनतया घटपटादयः सर्वेऽपि पदार्थास्तत्र सहैव भासेरन्। तेन तेषां समेषामपि बाह्यसत्ताभाववतां बुद्धिमात्ररूपाणामेकत्वप्रसङ्गः। तदभिन्नाभिन्नत्वेन तद्भिन्नभिन्नत्वरूपापोहस्वरूप–पदार्थभेदस्य तत्र बाधादित्यर्थः। ज्ञेयज्ञानयोरेकत्वात्तत्र पदार्थानामैक्यात् तद्भिन्नभिन्नत्वरूपापोहस्यापि वैयर्थ्यम्। एतेन बौद्धाभिमतचित्राद्वैतप्रसङ्गोऽपि निराकृत इति ध्येयम्।

अनुवाद – हे मूर्ख विलासिन्! विषयों की समूहालम्बनरूप वित्ति से तुम यदि विषयों का अभेद निरूपित करते हो तब तो निश्चय ही विषय (घट) उस वित्ति से अभिन्न होगा और उसी वित्ति में एक साथ भासित होने वाले घट, पट, सुख, दुःख, अभाव और भाव का भेद (अपोह) बाधित हो जाने से उनमें एकता (अभेद) का प्रसंग आ जाएगा। वहाँ तद्भिन्नभिन्नत्वरूप अपोह भेद करने में समर्थ नहीं होगा क्योंकि वित्ति और विषय एक रूप ही होंगे।

टिप्पणी – बौद्ध नैयायिक, मुख्यतः विज्ञानवादी पदार्थ की बाह्यसत्ता स्वीकार नहीं करते। उनके मत में समस्त पदार्थ वित्ति में ही भासित होते हैं। उनके अनुसार वित्ति और पदार्थ अभिन्न हैं। इस व्यवस्था से उनकी वित्ति समूहालम्बनात्मक मानी जाती है। इसका खण्डन करते हुए कवि का कथन है कि यदि वित्ति को समूहालम्बन माना गया और ज्ञेय तथा ज्ञान (घट और घटबुद्धि) को अभिन्न मान लिया गया तो उसी बुद्धि में भासित होने वाले घट, पट, सुख, दुःख, भाव और अभाव जैसे भिन्न पदार्थ एक हो जाएंगे। क्योंकि वेद्य और वित्ति में ऐक्य स्वीकृत होने के कारण उनका भेद स्वयं बाधित हो जायेगा। अतः तद्भिन्नभिन्नत्व रूप तुम्हारा अपोह इस भेद को सिद्ध नहीं कर सकेगा और वहाँ 'तदभिन्नाभिन्नता' की उत्पत्ति आ जाएगी। तत् = वित्ति से अभिन्न जो घट, उस घट से अभिन्न होने के कारण पट आदि सभी एक रूप हो जाएंगे। अतः पदार्थों को वित्तिरूप मानना उचित नहीं।

।। ६४।।

क्षमत इदमपोहो निःस्वरूपो न भेत्तुं
यदि तमपि न भावः कोऽपि भिन्द्यात्परस्मात्।

उपगत इह सोऽस्तु व्यक्तिवित्त्योर्विभेत्ता
परिहर बकबन्धायाससाम्यादपोहम्।।

अन्वयः – यदि तम् अपि परस्मात् कोऽपि भावः न भिन्द्यात् (तर्हि) निःस्वरूपः अपोहः इदं भेत्तुं न क्षमते। इह उपगतः सः व्यक्तिवित्त्योर्विभेत्ता अस्तु। (अतः) बकबन्धायाससाम्यात् अपोहं परिहर।

गङ्गा – क्षमत इति– यदि तम् अपोहमपि परस्मात् कोऽपि भावः न भिन्द्यात् तर्हि निःस्वरूपः स्वरूपरहितोऽभावात्मकः अपोहः अतद्व्यावृत्तिः। इदं पदार्थानामुपर्युक्तमैक्यं भेत्तुं न क्षमते न पारयति। अतोऽपोहोऽपि भावाधीन एवेत्यर्थः। इह अपोहभेदकत्वेन उपगतः स्वीकृतः सः भावः सत्ता व्यक्तिवित्त्योर्विभेत्ता विषयज्ञानयोर्भेदकोऽस्तु, भवतु। बौद्धमतेऽपोहो वस्तुभेदकः। अनेनैव तत्र गवादिषु अतद्व्यावृत्तिरुच्यते। अत्र अतद्व्यावृत्तये कल्पितो योऽश्वादिः सोऽपि भावरूप एव भवति। अतोऽत्र अतद्व्यावृत्तये कल्पितोऽश्वादिभाव एव व्यक्तिवित्त्योर्भेत्ता भवत्वितितात्पर्यम्। अतः बकबन्धायाससाम्यात्, बकपक्षिजिघृक्षोः स्वदर्शनभिया पलायमाने तत्र तद्दर्शनप्रतिबन्धाय तन्मूर्ध्नि नवनीतनिवेशप्रयाससादृश्यात् अपोहं परिहर त्यज। यदि नाम अपोहोऽपि भावाधीनतयैव पदार्थान् अपोहति तर्हि भावात् पलाय्य पुनर्भावस्यैव स्वीकृतिः। अतोऽयमपोहस्त्याज्य एवेति भावः।

अनुवाद – यदि बाद में अपोह में भी कोई भाव भेद उत्पन्न नहीं करता तो स्वरूप रहित यह अपोह इस पदार्थों की एकता का भेद करने में समर्थ नहीं हो सकता। ऐसे में अपोह के भेदक के रूप में स्वीकृत वह भाव ही ज्ञेय और ज्ञान का भेत्ता क्यों न मान लिया जाय। बगुले को पकड़ने के लिए पहले अपने दिख जाने के भय से भागना और फिर आकर उसके शिर पर नवनीत का लेपन करना, इसमें आयासमात्र ही विशेष है। तुम्हारा भाव का परित्याग भी उसी प्रकार का आयास है। पदार्थों में भेद करने के लिए भाव को छोड़कर अपोह को मानते हो और अपोह की सिद्धि के लिए पुनः उसी भाव की शरण में जाते हो। इसलिए बकबन्धन के आयास के सदृश होने के कारण इस अपोह को छोड़ ही देना चाहिए।

टिप्पणी – विषयों के समूहालम्बन में अनेक विषयों की एक ही वित्ति होती है अर्थात् पदार्थों के वित्तिरूप होने के कारण विषयों में अभेद सिद्ध है। यह सिद्धान्त विशेषरूप से विज्ञानवादियों का है। वित्ति और विषय का अभेद होने पर स्वरूपहीन अपोह भी उन पदार्थों में भेद उत्पन्न नहीं कर सकता। अपोह तद्भिन्नभिन्नत्व

रूप होता है। घट से भिन्न जो पट, उससे भिन्नता घट में होती है। घट में प्राप्त होने वाला पट का अपोहन भावात्मक ही होता है, अभावात्मक नहीं। अभाव रूप होने पर वह पदार्थ अपोहन नहीं कर सकता। अगर यह कहो कि वित्ति में भासित होने वाली घट-पट-सुख-दु:ख-भाव और अभाव की एकता का अपोहन हो जाएगा तो यह सम्भव नहीं। क्योंकि उसके लिए भाव की आवश्यकता होती है। यह भाव ही 'गो' का 'अगो' से अपोहन करता है। हाँ, यदि इस अपोहन के लिए आप इन्हें भावरूप मानते है तो फिर उस भाव (सत्ता, जात्यादि) को ही व्यक्ति और वेत्ता को भेदक मान लेना चाहिए। एक बार भाव को छोड़कर (गो में गोत्व का परित्याग कर) पुन: अपोहन के लिए भाव का आश्रय लेना तो वैसा ही हो गया जैसे बगुले को पकड़ने के लिए पहले कोई बगुला मुझे देख न ले, यह सोच कर भागे और फिर उसके दर्शन को प्रतिबन्धित करने के लिए उसके शिर पर नवनीत लगाने का आयास करे। जब बाद में सत्ता स्वीकार करनी ही है तो अपोह को छोड़कर सत्ता ही मान लेनी चाहिए।

।। ६५ ।।

अधिकरणमपास्याऽस्य प्रतिद्वन्द्विनं वा-
ऽनुभवति किमभावं लौकिकस्तार्किको वा ?।
अधिकरणमभावश्चेदलङ्घ्याऽनवस्था
झटिति दिगियमूह्या तत्प्रतिद्वन्द्विनोऽपि।।

अन्वय: - लौकिक: तार्किक: वा अधिकरणम् अस्य प्रतिद्वन्द्विनं वा अपास्य अभावम् अनुभवति किम्? अधिकरणम् अभाव: चेत्, अनवस्था अलङ्घ्या। तत्प्रतिद्वन्द्विन: अपि झटिति इयं दिक् ऊह्या (भवेत्)।

गङ्गा - अधिकरणमिति- कोऽपि लौकिक: लोकव्यवहारनिपुण: सज्जनो भवतु तार्किक: कठिनतर्कपथपान्थ: दार्शनिको वा भवतु अधिकरणम् आधारम्। यथा 'घटाभाववद्भूतलम्' इत्यत्र भूतलं घटाभावस्य आधार:। तादृशं घटाभाववद्भूतलरूपमभावाऽऽधारम्। अथवाऽस्य अभावस्य प्रतिद्वन्द्विनं प्रतियोगिन-मित्यर्थ:। यथा 'भूतले घटो नास्ति' इत्यत्र घट: अभावस्य प्रतियोगी। लौकिकस्तार्किको वा भवतु स: अभावाधिकरणे तत्प्रतियोगिनि वा अभावमनुभवति जानाति। तदपास्य परित्यज्य अभावानुभवो न कुत्रापि जायत इत्यर्थ:।

एवमभावोऽधिकरणभिन्नः प्रतियोगिभिन्नश्च तत्र भासमानः पदार्थः। यदि नाम भूतलमेव अभावत्वेन गणयसि तर्हि अनवस्था अलङ्घ्या स्यात्, समेषामप्याधाराणामभाव-रूपत्वकल्पनयाऽनवस्था तत्र आपतेदित्यर्थः। तत्प्रतिद्वन्द्विनः प्रतियोगिनो घटस्याऽपि इयं दिक् ऊह्या कल्पनीया। प्रतियोगिनोऽभावरूपत्वकल्पनात् प्रतियोगिप्रति-योग्यादीनामपि तथात्वकल्पनादनवस्था स्यादिति भावः। एतेन आधारप्रति-योगिनोरभावरूपत्वं निराकृतम्। अतो गवापोहे अश्वादीनां भावत्वेनैव प्रवृत्तिर्नाभावत्वेनेत्यर्थः।

अनुवाद – कोई लौकिक हो या तार्किक, उसे अधिकरण या प्रतियोगी को छोड़कर कहीं अन्यत्र अभाव का अनुभव होता है क्या? अभाव का अनुभव इन दो में ही होता है। यदि अधिकरण को अभाव मान लिया जाय तो महान् अनवस्था होगी। इसी प्रकार प्रतियोगी को भी अभाव मानने में अनवस्था का विचार करना चाहिए।

टिप्पणी – अभाव का ज्ञान या तो आधार में होता है अथवा प्रतियोगी में, जैसे 'भूतल में घट नहीं है' यहाँ भूतल अभाव का आधार है और घट उसका प्रतियोगी है। घट का अभाव भूतल रूप आधार और घट रूप प्रतियोगी में ही अनुभूत होता है, अन्यत्र नहीं। यदि कहें कि अधिकरण ही अभाव है तब तो अनेक अधिकरणों की कल्पना का प्रसंग आएगा और अनवस्था होगी। अतः यह सिद्ध है कि अभाव अधिकरण और प्रतियोगी से भिन्न है। वह अभाव उनके माध्यम से भासित होता है। इस प्रकार गो आदि के अपोहन में अश्व आदि की भावरूप में ही प्रवृत्ति होती है, अभावरूप में नहीं, यह स्वयं सिद्ध है।

।। ६६ ।।

अधिकरणविरोधिज्ञप्तिनैयत्यशून्य-
प्रमितिविषयभावाङ्गीकृतौ नैष दोषः।
न हि गतिरपरा तेऽपास्य भावं स्वतन्त्रं
स्थितिमतिकृतिषु त्वं सूक्ष्मदृष्ट्या ऽवधेहि।।

अन्वयः – अधिकरणविरोधिज्ञप्तिनैयत्यशून्यप्रमितिविषयभावाङ्गीकृतौ एष दोषः न (भवति)। स्वतन्त्रं भावम् अपास्य ते अपरा गतिः न हि (विद्यते)। त्वं स्थितिमतिकृतिषु सूक्ष्मदृष्ट्या अवधेहि।

गङ्गा – अधिकरणविरोधीति– अधिकरणविरोधिज्ञप्तिनैयत्यशून्यप्रमितिविषय–भावाङ्गीकृतौ अधिकरणविरोधिनोः आधारप्रतियोगिनोः ज्ञप्तिनैयत्येन ज्ञानसातत्येन शून्या रहिता या प्रमितिस्तस्या विषयस्य भावाङ्गीकृतौ सत्तास्वीकृतौ एष अनवस्था दोषः न। भवतीति शेषः।'घटः अस्ति' इत्यादिस्थलेषु यद्यप्यधिकरणप्रतियोगिज्ञानं न भवति तथापि घटज्ञानं तु भवत्येव। अभावज्ञानाभावेऽपि घटज्ञानं जायत एवेत्यर्थः। अतो यत्र अभावज्ञानं नास्ति तत्रापि प्रमितिविषयस्य सत्ताङ्गीकारे पूर्वोक्तोऽनवस्थादोषो न प्रसजति। स्वतन्त्रं भावं सत्ताम् अपास्य परित्यज्य ते अपरा गतिः न हि विद्यते। तादृशाऽनवस्थापरिहाराय त्वया स्वतन्त्रो भावोऽङ्गीकरणीयः। त्वं शून्यवादी बौद्धः स्थितिमतिकृतिषु स्थितिः सत्ता च मतिः ज्ञानं च कृतिः यत्नं चेत्येतेषु सूक्ष्मदृष्ट्या निशितमत्या अवधेहि अवधानं देहि।'घटः अस्ति' इत्यत्र स्थितौ अभावज्ञानाभावेऽपि घटसत्ता ज्ञायते। मतावपि पदार्थसत्ता भवत्येव। एवमेव मृदाद्युपादानकारणे आनयनादियत्ने चापि घटसत्ता भवत्येवेति त्वया सर्वथा भावोऽङ्गीकरणीय एवेति कवेराशयः।

अनुवाद – जहाँ अधिकरण और प्रतियोगी का ज्ञान नहीं होता, इन दोनो ज्ञानों के सातत्य से रहित प्रमिति होती है, उस प्रमिति के विषय के भाव (सत्ता) को स्वीकार कर लेने पर उपर्युक्त अनवस्थादोष प्रसक्त नहीं होता। 'घट है' इत्यादि ज्ञान में अधिकरण या प्रतियोगी का ज्ञान नहीं हो रहा तथापि प्रमिति का विषय 'घट' तो है ही। इस घट की सत्ता स्वीकार कर लेने पर अभावविषयक पूर्वोक्त अनवस्था प्रसक्त नहीं होती। अतः स्वतन्त्र भाव मानने के अतिरिक्त तुम्हारी और कोई गति नहीं है। सत्ता, ज्ञान और यत्न में अवधानता पूर्वक सूक्ष्मदृष्टि से देखो। 'घट है' इस सत्ता में 'घटं जानामि' इस ज्ञान में तथा मिट्टी आदि उपादान कारणों एवं घटानयन आदि यत्नों में घटरूप विषय की सत्ता स्पष्ट है। अतः अभाव को छोड़कर तुम्हें भी स्वतन्त्र भाव मानना ही चाहिए।

।। ६७।।

घट इह भुवि नास्तीत्येव बुद्धिः प्रसिद्धा
सकलमतविरुद्धा नास्तितामात्रबुद्धिः।
सृजति फलमभावः केवलो नेत्यवोचं
मतविमतिषु शेषे भाव एवैष भारः।।

अन्वयः – 'इह भुवि घटः नास्ति' इति एव बुद्धिः प्रसिद्धा (अस्ति)।

नास्तितामात्रबुद्धिः सकलमतविरुद्धा (विद्यते)। 'केवलः अभावः फलं न सृजति' इति अवोचम्। (त्वं) मतविमतिषु शेषे। एष भाव एव (तव) भारः (विद्यते)।

गङ्गा – घट इहेति– इह भुवि घटः नास्ति, इह अत्र भुवि भूतले घटः नास्ति घटाभावो विद्यते इति भूतलानुयोगिकघटप्रतियोगिकबुद्धिरेव प्रसिद्धाऽस्ति। अभावस्थल एतादृशं ज्ञानमेव समेषां जायत इत्यर्थः। भवदभिमता नास्तितामात्रबुद्धिः अनुयागिप्रतियोगिविषयिका सती अभावविषयिका बुद्धिस्तु सकलमतविरुद्धा समेषामनुभववतां मतविरोधिनी विद्यते। न कोऽपि तथाऽनुभवतीत्यर्थः। केवलः अभावः शून्यं फलं कार्यं न सृजति नोत्पादयतीति तु पूर्वं 'कथमिव भवदिष्टं निःस्वरूपं च शून्यम्' इत्यादिप्रसङ्ग उक्तमेव। त्वं विलासी तु मतविमतिषु मतानां विमतिषु शेषे स्वपिषि। एष पदार्थानां भावः सत्ता एव तव भारो विद्यते। इमं पदार्थाभावं स्वीकृत्य त्वया सुमहान् भारोऽङ्गीकृतः। स्वीकृते तस्मिन्न कोऽपि भारः न वा विमतिरित्यर्थः।

अनुवाद – 'भूतल में घट नहीं है' यह भूतलानुयोगिक घटप्रतियोगिक अभाव बुद्धि ही प्रसिद्ध है। सब को अभावस्थल में ऐसा ही ज्ञान होता है। अनुयोगी तथा प्रतियोगी विषयों से रहित अभाव विषयक बुद्धि किसी को नहीं होती। यह ज्ञान सभी मतों से विरुद्ध है। अकेला अभाव (शून्य) कार्य को उत्पन्न नहीं करता यह हमने पहले ('कथमिव भवदिष्टम्' इत्यादि के प्रसंग में) कह ही दिया है। तुम तो मतों की विमतियों में सो रहे हो। यह भाव ही तुम्हारे लिए भार है। इसे स्वीकार कर लेने से तुम पर कोई भार नहीं रहेगा।

।। ६८ ।।

स्फुरति जगदवश्यं नाऽत्र सर्वस्य बाधः
सकलमपि न सत्यं तत्त्वमत्राऽस्तु किं नु?।
इति महति विमर्शे बाधसत्यत्वशङ्का
निरधिकरणबाधाऽदर्शनेनाऽपनेया।।

अन्वयः – जगत् अवश्यं स्फुरति। अत्र सर्वस्य बाधः न (भवति)। सकलं सत्यम् अपि न (विद्यते)। अत्र किं नु तत्त्वम् अस्तु? इति महति विमर्शे निरधिकरणबाधाऽदर्शनेन बाधसत्यत्वशङ्का अपनेया।

गङ्गा – स्फुरतीति– जगत् इदं पुरो दृश्यमानं नामरूपात्मकं जगदित्यर्थः। अवश्यं स्फुरति प्रतीतिविषयतां भजते। अत्र सर्वस्य बाधोऽभावो न विद्यते। तथा

चोक्तं श्रीमद्भगवद्गीतायाम्–

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।।२.१६।।

अतस्त्वया सर्वं शून्यमिति यत्स्वीकृतं तदनुचितमेव। इदं सकलं जगत् सत्यमपि न विद्यते। यदि नाम सर्वं शून्यमिति स्वीक्रियते तर्हि सर्वस्याभावरूपताऽपतति। सकलं सत्यं स्वीक्रियते चेत् परमार्थहानिः। वस्तुतो व्यवहारदशायां जागतिकपदार्थेषु पञ्चतत्त्वानि भासन्ते–

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्।। वाक्यसुधा, २०।।

एतेषु अस्तिता प्रकाशमयता आनन्दरूपता चेति त्रयो धर्मा ब्रह्मणि भवन्ति। अत एतेषां सत्यता किन्तु नामरूपयोरसत्यत्वं तयोर्जगद्रूपत्वात्। अतोऽत्र जगति किन्नु तत्त्वमस्तु इति महति विमर्शे क्रियमाणे निरधिकरणबाधाऽदर्शनेन अधिकरणरहितस्य अभावस्याऽदर्शनेन बाधसत्यत्वशङ्का अभावसत्यत्वविषयिणी शङ्का अपनेया दूरीकरणीया। अधिकरणरहितो बाधो न दृश्यते। बाधस्य कृतेऽधिकरणमावश्यकम्। यथा ज्ञाने सति सर्पत्वबाधो रज्जुरूपाधिकरण एव भवति। भ्रमकाले रज्जौ प्रतीयमानं सर्पत्वं बाधविषयः बाधकाले च रज्जुत्वं सत्यम्। अतो बाधस्य निरधिकरणताऽभावात् बाधसत्यत्वविषयिणी शङ्का दूरीभवतीत्यर्थः। तदेव शाङ्करभाष्ये (छान्दोग्योपनिषदि ६.१.२) उक्तम्– सदात्मनैव सत्यं विकारजातं स्वतस्तु अनृतमेव। सतोऽन्यत्वेऽनृतत्वम्।

अनुवाद – यह नाम– रूपात्मक जगत् अवश्य ही स्फुरित होता है। इसमें सब का बाध नहीं होता और सब कुछ सत्य भी नहीं है। इस जगत् में क्या सत्य है? इस महान् विमर्श में निरधिकरण बाध दिखाई नहीं देता। बाध की इसी साधिकरणता से बाधत्व और सत्यत्व की शङ्का दूर करनी चाहिए। कौन सा पदार्थ सत् है और कौन सा असत् इसका निर्णय बाध के साधिकरणदर्शन से ही होता है।

टिप्पणी – बौद्धों के अनुसार समग्र जगत् शून्यात्मक होने के कारण अभावरूप है। इसका खण्डन करते हुए कवि ने कहा है कि यह जगत् अवश्य ही स्फुरित होता है। व्यवहारदशा में इसकी प्रतीति तो होती ही है। इस व्यवहार दशा में जागतिक पदार्थों में पाँच धर्म भासित होते हैं– अस्तिता, प्रकाशमयता, आनन्दरूपता, संज्ञात्मकता और रूपात्मकता। इनमें से प्रथम तीन धर्म तो ब्रह्म में घटित होते हैं, अतः उनकी सत्यता स्वीकृत है किन्तु नामरूपात्मकता जगत् में विद्यमान है। इन्हें

एकान्ततः सत्य नहीं कहा जा सकता। यह केवल व्यवहार काल में ही सत्य है। इससे यह सिद्ध होता है कि व्यवहार काल में जगत् न तो समग्ररूप से सत्य है और न ही असत्। इनमें कुछ तत्त्व सत्य हैं और कुछ अभावरूप हैं। इनमें से सत्य क्या है, यह विचार करने पर यह सिद्ध होता है कि अभाव अधिकरणरहित नहीं होता, वह साधिकरण होता है। जैसे रज्जु में सर्प का भ्रम हो जाने पर उस सर्पत्वप्रकारक ज्ञान का बाध भी रज्जु में ही होता है। इस प्रकार रज्जु बाध का अधिकरण होती है। बाध की इसी साधिकरणता से बाध और सत्य की शंका को दूर करना चाहिए।

।। ६९।।

तदधिकरणबाधेऽप्याऽऽग्रहादुच्यमाने
तदधिकरणपृच्छास्रोतसा प्रेर्यमाणः।
पतति भृशमलङ्घ्ये कोऽनवस्थासमुद्रे
ऽधिकरणमिति सत्यं सङ्गिरन्ते श्रुतिज्ञाः।।

अन्वयः - आग्रहात् तदधिकरणबाधे अपि उच्यमाने (सति) तदधिकरणपृच्छास्रोतसा प्रेर्यमाणः (सन्) कः भृशम् अलङ्घ्ये अनवस्था समुद्रे पतति? (अत एव) श्रुतिज्ञाः अधिकरणं सत्यम् इति सङ्गिरन्ते।

गङ्गा - तदधिकरणेति- आग्रहात् हठात् तदधिकरणबाधे तस्य बाधाधिकरणस्य बाधे अभावे अपि उच्यमाने प्रतिपाद्यमाने। कोऽपि हठात् बाधाधिकरणस्य बाधमपि वक्तुं शक्नोतीति भावः। तदधिकरणपृच्छास्रोतसा तस्य बाधाधिकरणस्य पृच्छास्रोतसा प्रष्टुमिच्छायाः स्रोतस्तेन प्रेर्यमाणः सन् कः बुद्धिमान् भृशम् अलङ्घ्ये अनवस्था समुद्रे अनवस्थानामानन्त्ये पतति? न कोऽपीत्यर्थः। यस्मिन्नधिकरणे बाधो दृष्टस्तस्याऽधिकरणस्य अभावमपि कोऽपि प्रतिपादयेत्। पुनः बाधाधिकरणभूताऽधिकरणाधिकरणजिज्ञासया को वा विद्वान् अनवस्थासमुद्रे पतेत्। न कोऽपीति भावः। तस्मात् श्रुतिज्ञाः अधिकरणं सकलजगदाधारं सत्यं ब्रह्म सङ्गिरन्ते कथयन्ति। तद् ब्रह्म एव समेषामधिकरणं, तदेव सत्यम्। न ततः परं काऽप्यधिकरणविषयिणी जिज्ञासा समुदेति। 'ब्रह्म सत्यं जगन्मिथ्या' इत्यादिश्रुतिवचनान्यत्र प्रमाणम्। 'सत्यस्य सत्यम्' (बृहदा. २.१.२०), 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (तैत्तिरीय. २.१.६) इत्यादिश्रुतिषु तदेव प्रतिपादितम्। यद्विषया बुद्धिर्न व्यभिचरति तदेव सत्यम्। अतो न ततः परमधिकरणान्तस्य जिज्ञासाऽवसरः।

अनुवाद – कोई हठ कर के उस बाध के अधिकरण का अधिकरण भी पूछ सकता है। उसके बाद उसके अधिकरण की पृच्छा भी उसमें हो सकती है। इस प्रकार ऐसा कौन है जो अधिकरणों की पृच्छा से प्रेरित होकर अनवस्था समुद्र में गिरता है। अत एव श्रुतिज्ञजन अधिकरण को ही 'सत्य' कहते है। वह सत्य ही ब्रह्म है। 'ब्रह्म सत्यं जगन्मिथ्या' जैसी अनेक श्रुतियाँ इसमें प्रमाण हैं। इस ब्रह्मरूप अधिकरण से परे अन्य कोई अधिकरण हो ही नहीं सकता।

।। ७० ।।

तदधिकरणमेकं सर्वसत्तानिदानं
स्फुरति विविधरूपैः स्वस्वहेतुप्रसङ्गे।
सकलविषयबाधाऽऽधारतानित्यसिद्धं
श्रुतिशिखरविचारैश्चिन्त्यते मोक्षमाणैः।।

अन्वयः – तत् सर्वसत्तानिदानम् एकम् अधिकरणं स्वस्वहेतुप्रसङ्गे विविधरूपैः स्फुरति। मोक्षमाणैः श्रुतिशिखरविचारैः सकलविषयबाधाऽऽधारता-नित्यसिद्धं चिन्त्यते।

गङ्गा – तदधिकरणमिति– तत् सर्वसत्तानिदानं सर्वासां सत्तानां भावानां निदानं कारणमेकमधिकरणं यद् 'ब्रह्म' इत्युच्यते तदेव स्वस्वहेतुप्रसङ्गे कारणप्राप्तौ विविधरूपैः स्फुरति विवर्तते। तथा चोक्तं छान्दोग्ये– यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (६.१.४)। कारणभूतया मृदा घटदीपादयो नाना पदार्था उत्पद्यन्ते। तत्र नामरूपादिभेदे सत्यपि अधिकरणरूपं मृदेव सत्यम्। सा एव अभिन्न-निमित्तोपादानकारणं समेषां कार्यजातानाम्। यथा मृत्तिकायां कार्योत्पादनकारणता विद्यते तथैव विकाररहिते ब्रह्मण्यपि। इदमेव सांसारिकप्रपञ्चानामेकमधिष्ठानम्। तदेव तत्तद्धेतुप्रसङ्गे तत्तद्रूपेणावभासते। भ्रमाधिष्ठानभूतशुक्त्याद्यज्ञानाद् रजताद्यध्यारोप इव प्रपञ्चकल्पना-धिष्ठानभूतब्रह्मात्मवस्त्वज्ञानात् शुक्तौ रजतप्रतीतिवत् तस्मिन् ब्रह्मरूपाधिष्ठाने नानाविषयाः प्रतीयन्ते। तत्सर्वं न सत्। तदेतद् व्याख्यातमध्यासविवेचनप्रसङ्गे विवेकचूडामणौ (१.४०) शङ्कराचार्येण–

अतस्मिंस्तद्बुद्धिः प्रभवति विमूढस्य तमसा।
विवेकाभावाद् वै स्फुरति भुजगे रज्जुधिषणा।।

वस्तुत: आरोपितस्य अधिष्ठानाद् भिन्नता न भवति। तस्मादेतद् ब्रह्ममात्रं हि विश्वमिति हि वेदान्तसिद्धान्त:। एवं सर्वसत्ताधिकरणं ब्रह्मैव स्वस्वहेतुप्रसङ्गे हेत्वनुसारिविविधरूपै: स्फुरतीति सिद्धम्। तदेव सर्वसत्तानिदानमेकमधिकरणम्। अतश्च मोक्षमाणै: मुमुक्षुभि: श्रुतिशिखरविचारै: श्रुतीनां शिखरभूतैरत्युन्नतविचारै: श्रवणमनननिदिध्यासनै:। सकलविषयबाधाऽऽधारतानित्यसिद्धं सकलविषयाणां जगत्प्रपञ्चानां बाधस्य आधारतयाऽधिकरणतया नित्यसिद्धं ब्रह्म चिन्त्यत उपास्यते। सकलविषाणां बाधस्य आधार: परमेश्वर एव विद्यते। तस्मादेव सर्वं जायते तस्मिंश्च लीयते– यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति–– तद् ब्रह्म (तैत्तिरीयोपनिषदि, ३.१)। तद् ब्रह्म वाचा मनसा चक्षुषा वा न प्राप्तुं शक्यमपितु सर्वबाधानन्तरं तदाधारत्वेनैव ज्ञातं भवति। सर्वे वेदा: तस्यैव पदमामनन्ति। सर्वैर्वेदै: स एव ज्ञेय:। अध्यारोपापवादाभ्यां तदेव निष्प्रपञ्चं ब्रह्म प्रपञ्च्यते–

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते।
शिष्याणां बोधसिद्ध्यर्थं तत्त्वज्ञै: कल्पित: क्रम:।।
अतश्च मोक्षमाणैर्नित्यसिद्धं तदेव चिन्त्यत इत्यर्थ:।

अनुवाद – वह (ब्रह्म) समस्तसत्ताओं का निदान है। सबका एक अधिकरण है। वही अपने अपने हेतुओं को पाकर अनेक रूपों में स्फुरित होता है। मुमुक्षुजन श्रुतियों के उन्नतविचारों से सकलविषयों के बाध के आधार रूप में नित्यसिद्ध उसी ब्रह्म का चिन्तन करते हैं।

टिप्पणी – अभाववादी बौद्ध का खण्डन करते हुए यह सिद्ध किया गया है कि ब्रह्म ही सभी भावों का निदान है। अर्थात् उसी से समस्त कार्यों की उत्पत्ति होती है। 'येन जातानि जीवन्ति' (तैत्तिरीयोपनिषद्, ३.१) इत्यादि श्रुतियों में इसी तथ्य का प्रतिपादन किया गया है। वही सबका एक अधिकरण है अन्य कोई अधिकरण नहीं हो सकता। जैसे मिट्टी होने पर भी मिट्टी ही सत् है क्योंकि घट आदि का आकार मिट्टी ही है। उसमें मिट्टी को छोड़कर और कुछ भी उपलब्ध नहीं होता। अत: वह मिट्टी ही इन सबका अधिकरण है। उसी प्रकार परमेश्वर भी समस्त प्रपंचों का अधिकरण है। अपने हेतु के प्रसंग में वही विविधरूपों में स्फुरित होता है। 'एकोऽहं बहु स्याम्' इत्यादि श्रुतियाँ इसमें प्रमाण हैं। अत एव मुमुक्षु वेदान्ती समस्त जागतिक प्रपंचों के बाध के आधाररूप में नित्यसिद्ध उस परमेश्वर का ही भजन करते हैं।

।। ७१ ।।

भवदभिमतशून्यं चेत्परेणाऽनिरूप्यं
सदथ भवति नित्यं ब्रह्म तन्नाम्नि भेदः।
न तु बहु मनुषे त्वं नित्यतां क्वापि तस्माद्
भ्रमसि बहुविकल्पेषूच्यसे नास्तिकश्च।।

अन्वयः – भवदभिमतशून्यं परेण अनिरूप्यं चेत् सत् अथ नित्यं ब्रह्म भवति। तन्नाम्नि भेदः। त्वं नित्यतां क्वापि तु बहु न मनुषे। तस्मात् बहुविकल्पेषु भ्रमसि नास्तिकः च उच्यसे।

गङ्गा – भवदभिमतेति– भवदभिमतशून्यं भवद्भिर्बौद्धैरभिमतं स्वीकृतं यच्छून्यं विद्यते तत् परेण अनिरूप्यम् अन्येन केनापि प्रमाणेन अबोध्यं चेत्, सत् कालत्रयेऽपि तिष्ठति, अथ नित्यं ब्रह्म भवति। यत्तत्त्वमस्माभिः ब्रह्मपदेनोच्यते तदेव भवता शून्यपदेनेत्येव विशेषः। वस्तुतः शून्यं ब्रह्माऽविशेषमेव। यथा ब्रह्म परेणाऽनिरूप्यं सन्नित्यं च विद्यते तथैव शून्यमिति भावः। तन्नाम्नि भेदः संज्ञामात्रभेद एव। किन्तु त्वन्मते समेषां पदार्थानां क्षणिकत्वात् त्वं क्वापि नित्यतां बहु न मनुषे। तस्मादेव कारणात् बहुविकल्पेषु नानापक्षेषु भ्रमसि, अस्मादृशैश्च नास्तिकः वेदनिन्दक उच्यसे। नास्ति परलोके दृष्टिर्यस्य स नास्तिकः। शास्त्रेषु चार्वाकः माध्यमिकयोगाचार–सौत्रान्तिकवैभाषिकरूपाश्चत्वारो बौद्धा आर्हताश्च षड्विधो नास्तिकः कथितः। तत्र देहात्मवादी चार्वाकः, सर्वशून्यवादी माध्यमिकः, आन्तरार्थवादी योगाचारः, बाह्यार्थानुमेयवादी सौत्रान्तिकः, आन्तरबाह्यार्थोभयवादी वैभाषिकः, पुद्गलवादी जैनश्च। नास्तिको न भवेः, अत एव त्वया शून्यस्य नित्यताङ्गीकार्येति भावः।

अनुवाद – यदि आपको अभिमत शून्य दूसरे किसी प्रमाण से ज्ञेय नहीं है तो वह सत् और नित्य ब्रह्म है। शून्य और ब्रह्म में संज्ञामात्र का भेद है। किन्तु तुम नित्यता को स्वीकार नहीं करते। इसीलिए अनेक विकल्पों में घूमते हो और नास्तिक कहे जाते हो।

।। ७२ ।।

भवदभिमतशून्ये भावता नेष्यते चेत्
स्फुरति विषयवित्त्योः सा वदेयं कुतस्त्या ?।

अनुसरति हि कार्ये कोऽप्युपादानधर्मो
न कथमपरथोपादानकार्यत्वहानिः ?।।

अन्वयः – भवदभिमतशून्ये भावता न इष्यते चेत् विषयवित्त्योः सा इयं कुतस्त्या स्फुरति (इति) वद ? हि कोऽपि उपादानधर्मः कार्यम् अनुसरति। अपरथा उपादानकार्यत्वहानिः कथं न (भवति) ?

गङ्गा – भवदभिमतेति– भवदभिमतं बौद्धरूपविलासिस्वीकृतं यत् शून्यं तस्मिन् भावता सत्ता न इष्यते चेत् विषयवित्त्योः घटादिविषये वित्तौ च सेयं कुतस्त्या सत्ता स्फुरतीति वद। बौद्धानां मते घटादिविषयस्य बाह्यसता नास्ति किन्तु ज्ञाने तस्य सत्ता तु भासत एव। एवमेव वित्तेः सत्ताऽपि घटादिज्ञानक्षणे भासत एव। सेयं विषयवित्त्योः भासमाना सत्ता कुतस्त्या इति वद ? हि निश्चयेन कोऽपि उपादानधर्मः समवायिकारणधर्मः कार्यमनुसरति। कार्ये समवायिकारणधर्मा आगच्छन्ति। यथा मृदो धर्मः घटे। अपरथा अन्यथा तदस्वीकार इत्यर्थः। उपादानकार्यत्वहानिः कथं न भवति। भवता शून्ये सत्ता नाङ्गीक्रियते। शून्यमेव समेषां पदार्थानामुपादानकारणम्। तस्यैव सत्ता विषये वित्तौ च भासत इत्यर्थः ।अतः शून्यस्य अभावरूपता विरुद्धा।

अनुवाद – आपको अभिमत शून्य में यदि सत्ता अभीष्ट नहीं है तो विषय और वित्ति में वह कहाँ की सत्ता स्फुरित होती है ? कोई भी उपादानकारण का धर्म कार्य का अनुसरण करता है। अन्यथा उपादानकार्य की हानि क्यों नहीं होती ? शून्य सब का उपादान कारण है। उसी की सत्ता विषय और वित्ति में प्रतिभासित होती है।

।। ७३ ।।

अपि च विमृश शून्ये भावताया निवृत्तौ
प्रसजति नियतं तद्व्याप्यनैल्याद्यभावः।
अनुपतति न कार्ये शून्यता हेतुधर्मे–
ऽसति तव भवतूपादेयता केन कार्ये ?।।

अन्वयः – अपि च, शून्ये भावतायाः निवृत्तौ नियतं तद्व्याप्यनैल्याद्यभावः प्रसजति (इति) विमृश। कार्ये शून्यता न अनुपतति। हेतुधर्मे असति तव कार्ये केन उपादेयता भवतु ?

गङ्गा – अपि चेति– न केवलमुपादानकार्यत्वहानिरपितु शून्ये भावतायाः सत्तायाः निवृत्तौ अस्वीकृतौ नियतं प्रसक्तं तद्व्याप्यनैल्याद्यभावः शून्यव्याप्यं यन्नीलादि

तदभाव: प्रसजति प्रसक्तो भवति। शून्यं व्यापकमधिकदेशवृत्ति तद्व्याप्यो नीलघटादिविषयस्तस्याभावापत्ति:। उपादाने सत्ताया अभावे तत्कार्येऽपि तदभावो भवतीति विमृश, विचारय। कार्ये शून्यता न अनुपतति अपितु तस्य सत्तैव भवतीति प्रमाणसिद्धम्। हेतुधर्मे असति कारणधर्मे अविद्यमाने तव कार्ये घटादौ केन हेतुना उपादेयता उपादानकारणता भवतु। न केनाऽपीत्यर्थ:। अत: शून्ये सत्ता स्वीकरणीया एवेति भाव:।

अनुवाद – शून्य में सत्ता को स्वीकार न करने से केवल उपादान कार्य की हानि ही नहीं होगी अपितु उस शून्य के व्याप्य जो नीलादि पदार्थ हैं, उनका भी अभाव प्रसक्त होगा, यह विचार करो। कार्य में शून्यता अनुपतित नहीं होती अपितु उसकी सत्ता ही दृष्टिगत होती है। कारण धर्म न मानने पर तुम्हारे घट आदि कार्यों में उपादान कारणता किसकी होगी? कारण के धर्महीन होने पर कार्य की धर्महीनता स्वत: सिद्ध है।

।। ७४।।

त्रिविधसमयबाधागोचरं सर्वबाधा-
श्रयमनुभवसिद्धं साक्षिणं प्रद्विषन् क:।
जयति बुधविवादे? तज्जयं कोऽभिनन्दे-
द्रटतु स तु यथेच्छं शून्यतां युक्तिशून्याम्।।

अन्वय: – त्रिविधसमयबाधागोचरम् अनुभवसिद्धं सर्वबाधाश्रयं साक्षिणं प्रद्विषन् बुधविवादे क: जयति? क: तज्जयम् अभिनन्देत्? स तु युक्तिशून्यां शून्यतां यथेच्छं रटतु।

गङ्गा – त्रिविधसमयेति– त्रिविधसमयबाधागोचरं कालत्रयेऽपि विद्यमानम्, अनुभवसिद्धं, सर्वबाधाश्रयं सर्वेषां प्रतिबन्धकानामाश्रयमाधारं न तु क्षणिकतापराहतम्। सर्वे प्रतिबन्धका: परमेश्वर एव विरमन्तीत्यर्थ:। साक्षिणम् आत्मानं प्रद्विषन् बुधविवादे विदुषां तर्के क: जयति जयं लभते। न कोऽपीत्यर्थ:। क: खलु तज्जयं तस्य जयमभिनन्देत् प्रशंसेत्। न कोऽपि। स बौद्धस्तु युक्तिशून्यां मार्गरहितां शून्यतामभावतां यथेच्छं यथा स्यात्तथा रटतु। ब्रह्म सत् विद्यते। तत्तु कालत्रयेऽपि तिष्ठति। न कस्मिन्नपि काले तस्य बाधो दृश्यते। तदुपचयापचयहीनं सत्। तेनैव सर्वमिदं व्याप्तम्। तत्स्वरूपमुक्तं श्रीमद्भगवद्गीतायाम्–

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्।।१२.३१।।
इदं ब्रह्मैव सर्वाश्रयः। तत्परित्यज्य कश्चिज्जयं न प्राप्नोति।

अनुवाद – तीनों कालों में जिसका बाध दृष्टिगत नहीं होता, जो सत् है, अनुभवसिद्ध है, किसी अन्य प्रमाण से जाना नहीं जा सकता, जो सभी प्रतिबन्धकों का आश्रय है उस आत्मा (ब्रह्म) का द्वेष करता हुआ कोई भी विद्वानों के विवाद में जय नहीं पा सकता। कोई मनीषी उसके जय का अभिनन्दन भी नहीं कर सकता। वह बौद्ध अपनी युक्तिशून्य शून्यता को यथेच्छ रटे। उससे कोई हानि नहीं है।

।।७५।।

इति निगदितयुक्त्या हेतुता भाव एव
स्थिर उपगमनीया व्यापृतेः सम्भवेन।
न तु जननविनाशव्याधिनित्याभिभूत-
क्षणगणचलवृत्तिष्वेष भारोऽर्पणीयः।।

अन्वयः – इति निगदितयुक्त्या स्थिरे भावे एव व्यापृतेः सम्भवेन हेतुता उपगमनीया। एष भारः तु जननविनाशव्याधिनित्याभिभूतक्षणगणचलवृत्तिषु न अर्पणीयः।

गङ्गा – इति निगदितेति– इत्येवं प्रकारेण निगदितयुक्त्या प्रतिपादितरीत्या स्थिरे कूटस्थे भावे ब्रह्मणि एव व्यापृतेः व्यापारस्य सम्भवेन हेतुता उपगमनीया स्वीकरणीया। तत् कूटस्थं ब्रह्मैव समेषां कारणम्। तथा श्रुतिः– 'तदैक्षत बहुस्यां प्रजायेय' (छान्दोग्योपनिषदि, ६-२.३), अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते (गीतायाम्, १०.८), बीजं मां सर्वभूतानाम् (गीतायाम्, ७.१०)। वृहदारण्यकभाष्यवार्तिकेऽप्युक्तम्–

सर्वज्ञः सर्वशक्तिश्च सर्वात्मा सर्वगो ध्रुवः।
जगज्जनिस्थितिध्वंसहेतुरेष सदेश्वरः।।१.४.३७६।।

'जन्माद्यस्य यतः' इत्युक्त्वा ब्रह्मसूत्रकारेण भगवता व्यासेनाऽपि अज्ञानोपहितचैतन्यस्य कारणता निरदेशि। मुण्डकोऽप्याह–

यथोर्णनाभिः सृजते गृह्णते च
यथा पृथ्व्यामोषधयः पतन्ति

यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम्।।१.१.७।।

अतः स्थिरसत्ताकस्य ब्रह्मण एव जगत्कर्तृत्वम्। एष भारः जगत्कर्तृत्वभारः जननविनाशव्याधिनित्याभिभूतक्षणगणचलवृत्तिषु उत्पादविनाशरूपव्याधिना नित्याभिभूतेषु सततमुपक्षीणेषु क्षणगणचलवृत्तिषु क्षणसमूहचञ्चलस्वभावेषु बौद्धाभिमतक्षणिकविज्ञानेषु न अर्पणीयः न देयः। क्षणिकतापराहतत्वात् तत्र न व्यापारजनिः न वा कारणताजनिः। व्यापारवत एव कारणत्वस्वीकृतेः स्थिरे ब्रह्मण्येव स भारोऽर्पणीय इति तात्पर्यम्।

अनुवाद – इस प्रकार ऊपर कही गयी उक्तियों से नित्य सत्ता में ही व्यापार सम्भव है। अतः सर्वत्र उसी की कारणता माननी चाहिए। ब्रह्म ही सत् है, अतः उसे ही जगत् का कारण मानना चाहिए। अनेक श्रुतिवचन इसमें प्रमाण हैं। जगत् कर्तृत्व का यह भार उत्पत्ति और विनाश की व्याधि से नित्य पराहत क्षणसमूहों की चंचलवृत्तियों में अर्पित नहीं करना चाहिए। क्षणिक होने के कारण इस बौद्धाभिमत क्षण में न तो स्थिरता है और न ही व्यापारवत्ता। अतः इनमें हेतुता सम्भव ही नहीं है।

।। ७६ ।।

मणिकघटशरावोदञ्चनाद्यैर्विचित्रै–
र्मृदिव विविधरूपैर्भासतामेष भावः।
निजनिजसहकारिप्राप्तसाहाय्यसज्जः
किमिह वद विचित्रं ? सर्वदा दृष्टमेतत्।।

अन्वयः – विचित्रैः मणिकघटशरावोदञ्चनाद्यैः विविधरूपैः निजनिजसहकारिप्राप्तसाहाय्यसज्जः एष भावः मृदिव भासताम्। एतत् सर्वदा दष्टम्। इह किं विचित्रम् (इति) वद।

गङ्गा – विचित्रैरिति– विचित्रैः नानाप्रकारकैः मणिकघटशरावोदञ्चनाद्यैः मणिको मृन्निर्मितपात्रविशेषः मणिकश्च घटश्च शरावश्च तेषामुदञ्चनाद्यैः उत्पादनप्रभृतिभिः। आदिना आकारग्रहणादिकस्य सङ्ग्रहः। विविधरूपैः अनेकैर्लम्बगोलाद्याकृतिभिः निजनिजसहकारिप्राप्तसज्जः स्वस्वसहकारिकारणैः चक्राम्बुसूत्रैः प्राप्ता सज्जास्वरूपसमृद्धिर्येन सः, एष भावः सत्ता।

समेषामभिन्ननिमित्तोपादानकारणभूतं ब्रह्मेत्यर्थः। मृदिव भासताम्, मृत्तिकेव प्रतीतिविषयतां भजताम्। एतत् भावरूपया मृदा घटाद्युत्पत्तिप्रभृति सर्वदा दृष्टम्। इह भावस्य स्वीकारे किं विचित्रम् आश्चर्यमिति वद कथय। न किमपीत्यर्थः।

यथा मृदि मणिकघटशरावादिविविधनामरूपाकृतय उत्पद्यन्ते। तत्र सत्यपि नामरूपादिभेदे मृत्तिका स्वरूपेणैव स्थीयते तथैव विश्वरूपतयाऽवभासमानमपि ब्रह्म परमसत्यरूपेण भासते। तदेवेह प्राप्तप्रसङ्गो व्यवृणोद् ग्रन्थकारः। शङ्कराचार्येणापि तदिदं तथ्यं निर्दिष्टम्–

केनापि मृद्भिन्नतया स्वरूपं
घटस्य सन्दर्शयितुं न शक्यते।
अतो घटः कल्पित एव मोहान्
मृदेव सत्यं परमार्थभूतम्।। विवेकचूडामणौ।।२२९।।

अतो ब्रह्मणो मृदिव भासने न कापि विप्रतिपत्तिः। तत्कार्यस्य सर्वदा दृष्टानुभूतत्वादित्यर्थः।

अनुवाद – नाना आकार प्रकार के मणिक, घट, शराव आदि के उत्पादन और आकार ग्रहण से अपने अपने सहकारिकारणों से सहायता प्राप्त करके सज्जित मिट्टी की तरह यह भाव भासित हो। मिट्टी अनेक आकार प्रकार में घटित होती है। उन सबके नाम, रूप भी भिन्न भिन्न होते हैं पर मिट्टी अपने ही स्वरूप में अवस्थित रहती है। इसी प्रकार यह ब्रह्मरूप सत्ता विश्व के भिन्न भिन्न रूपों में अवभासित हो कर अपने परम और यथार्थरूप में विद्यमान रहता है। इसमें कोई आश्चर्य नहीं है। क्योंकि मिट्टी के कार्य तो दृष्ट और अनुभूत हैं।

।। ७७।।

कलशजनिषु मृत्स्ना दण्डचक्राम्बुसूत्रा–
द्युपकरणसमष्टिं दीर्घकालानुवृत्त्या।
लभत इति समक्षं वीक्ष्य कोऽपक्षपाती
क्षणिकचिति विवक्षेज्जाग्रदाकारभारम्?।।

अन्वयः – मृत्स्ना कलशजनिषु दीर्घकालानुवृत्त्या दण्डचक्राम्बुसूत्राद्युपकरणसमष्टिं लभते इति वीक्ष्य कः अपक्षपाती क्षणिकचिति जाग्रदाकारभारं विवक्षेत्?

गङ्गा – कलशजनिष्विति– मृत्स्ना मृत्तिका। 'प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका' इत्यमरः। कलशजनिषु घटोत्पत्तिषु। मृत्पिण्डस्य चक्रे समर्पणं भ्रमणं तथा चान्यघटोत्पत्तिक्रियाप्रदर्शनार्थं बहुवचनम्। दीर्घकालानुवृत्त्या दण्डचक्राम्बुसूत्राद्युप–करणसमष्टिं जलादिसान्निध्यप्राप्त्या, न तु क्षणेनेत्यर्थः। दण्डादिकारणसमष्टिं लभत इति वीक्ष्य कः अपक्षपाती पक्षपातरहितो जनः क्षणिकचिति क्षणिकविज्ञाने जाग्रदाकारभारम् उत्पद्यमानानाम् आकृतीनां भारं विवक्षेत् वक्तुमुत्सहेत। भवादृक्षः क्षणिकतापक्षपाती एव तथा कर्तुं शक्नुयात्। त्वद्भिन्नो न कश्चिदन्य इत्यर्थः। प्रतिक्षणं नवेषु वस्तुषु न कार्योत्पत्तिस्तस्यैकस्यामेव क्रियायामन्वयाभावादिति भावः।

अनुवाद – कलश की उत्पत्ति में मृत्तिका दीर्घकाल की अनुवृत्ति से दण्ड, चक्र, जल और सूत्र आदि उपकरणों की समष्टि को प्राप्त करती है। यह कार्य एक क्षण में नहीं हो सकता, अपि तु अनेक क्षणसाध्य होता है। प्रतिक्षण परिवर्तित होने वाली वस्तु तो किसी एक ही क्रिया से अन्वित हो सकती है। उससे कार्योत्पत्ति की तो कल्पना ही व्यर्थ है। इस प्रकार मृत्तिका का दीर्घकाल में दण्डचक्र आदि का लाभ देखकर पक्षपात रहित कौन ऐसा व्यक्ति है जो क्षणिक विज्ञान पर उत्पद्यमान आकृतियों का भार बताना चाहेगा। तुझ जैसा क्षणिकता का पक्षपाती ही ऐसा कर सकता है।

।। ७८ ।।

निगदित उपमाने चेतनत्वात्कुलाले
घटयति बहुदेशानेकदेशे मृदादीन्।
शिखरिजलधिहेतून् कोऽन्य एकत्र कुर्या–
दघटितघटनायां यः पटीयान्स ईशः।।

अन्वयः – बहुदेशान् मृदादीन् चेतनत्वात् एकदेशे घटयति कुलाले उपमाने निगदिते (सति) कः अन्यः शिखरिजलधिहेतून् एकत्र कुर्यात्? यः अघटितघटनायां पटीयान् सः ईशः।

गङ्गा – निगदित इति– बहुदेशान् मृदादीन् बहवो भिन्नभिन्ना देशा उत्पत्तिस्थित्यादिस्थानानि येषां तान् मृदादीन् मृत्तिकाप्रभृतीन्। आदिना दण्डचक्रजलसूत्रादीनां ग्रहणम्। तान् सर्वानपि घटादिहेतून् मणिकघटशरावादिनिर्माणाय चेतनत्वात्, चेतनयुक्तत्वात् एकस्मिन् देशे घटयति योजयति कुलाले कुम्भकारे उपमाने

निगदिते सति। कुलालः घटादिनिर्माणे समर्थः। अतः स विविधदेशेषु अरण्यादिषु विकीर्णान् मृत्तिकादण्डादीन् एकदेशे समानीय घटादि निर्माति। स चायं कुलाल उपमानम्। ईश्वरश्चोपमेयम्। यथा घटादीन् निर्माति कुलालस्तथैव जगदिदं परमेश्वरः। कः अन्यः ईश्वरव्यतिरिक्तः शिखरिजलधिहेतून्, शिखरी पर्वतश्च जलधिः समुद्रश्च तयोर्हेतून्। शिखरिजलधी जगत उपलक्षणे। तन्निर्माणे न कुम्भकारसदृशः कोऽपि सामान्यो मनुष्यः प्रभवति किन्तु घटादिसकर्तृकपदार्थदर्शनेन यथा कुम्भकारस्यानुमानं तथैव शिखरिप्रभृतिकार्यं दृष्ट्वा ईश्वरस्यानुमानम्। तद्भिन्नः कस्तादृशहेतून् एकत्र कुर्यात्? न कोऽपीत्यर्थः। एवं यः अघटितघटनायां अघटितानामनेकत्र विकीर्णानां शिखरिजलधिहेतूनां घटनायां संयोजने पटीयान् समर्थो दक्षश्च स ईशः, ईश्वरः। एतेन न्यायशास्त्राभिमतेश्वरसिद्धिः प्रदर्शिता। कुसुमाञ्जलिकारेण ईश्वरसिद्धये नवधा अनुमानं प्रदर्शितम्–

कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः।।५.१।।

मुक्तावल्यां 'संसारमहीरहस्य बीजाय' इत्यस्य व्याख्याने ईश्वरः साधितः। तथा हि– यथा घटादि कार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि। यथा घटादिकं कार्यत्वाद् भवति कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि कार्यत्वाद् भवति कर्तृजन्यम्। क्षित्यङ्कुरादिकं, सकर्तृकं, कार्यत्वात्, घटवदित्यनुमानेन ईश्वरः सिद्ध्यतीति। विशेषस्तु आकरग्रन्थे द्रष्टव्यः। 'तरुशैलौ शिखरिणौ' इत्यमरः। मूले 'कुलालः' इति पाठः। अर्थलाभायाऽत्र सप्तम्यन्तपाठोऽस्माभिः कल्पितः।

अनुवाद – अनेक देशों में विकीर्ण मिट्टी, दण्ड, जल और सूत्र आदि घट हेतुओं को चेतन होने के कारण कुलाल एक देश में घटित करता है और घट आदि का निर्माण करता है। यह कुलाल ईश्वर का उपमान कहा गया है। ईश्वर के अतिरिक्त और कौन है जो पर्वतों (या वृक्षों) तथा समुद्र आदि के नानादेशों में विकीर्ण हेतुओं को एकत्र करे। अघटित तत्त्वों की घटना में जो चतुर है, वही ईश्वर है। पर्वत, वृक्ष, समुद्र आदि समग्र जगत् घट के समान कार्य हैं। जो कार्य होता है वह सकर्तृक होता है। जैसे घटरूप कार्य का कर्ता कुलाल। सामान्य कुलाल पर्वत आदि की सृष्टि तो कर नहीं सकता। अतः जो इनकी रचना में निपुण होता है, वही ईश्वर है। न्याय शास्त्र में अनुमान प्रमाण से ईश्वर की सिद्धि की गयी है।

।। ७९ ।।

अनुभवति पुरस्ताद्वस्तु क्लृप्तोपकारं
स्मरति तदनु संस्कारोद्भवात्तं चिकीर्षन्।
प्रयतत उपलभ्याऽऽप्नोति शर्मानुपूर्व्या-
दियति महति काले चेतनस्थास्नुरेकः ।।

अन्वयः – पुरस्ताद् वस्तु अनुभवति। तदनु संस्कारोद्भवात्तं क्लृप्तोपकारं स्मरति। चिकीर्षन् प्रयतते। उपलभ्य शर्म आप्नोति। इयति महति काले आनुपूर्व्यात् एकः चेतनः स्थास्नुः।

गङ्गा – अनुभवतीति- चेतनः पुरस्तात् वस्तु अनुभवति, तद्विषयकं ज्ञानं प्राप्नोति। तदनु, तदनन्तरं संस्कारोद्भवात्तं संस्कारजन्यत्वात् प्राप्तं तस्य वस्तुनः क्लृप्तोपकारं स्मरति, क्लृप्तं समग्रं कारणत्वेन ज्ञानत्वेन चोपकारं स्मरति। चिकीर्षन् कर्तुमिच्छन् प्रयतते कृतिमान् भवति। उपलभ्य निर्मितं तद्वस्तु प्राप्य शर्म सुखमनुभवति। इयति महति काले अनुभवात् सुखप्राप्तिं यावद् आनुपूर्व्यात् क्रमस्य सत्त्वात्। अनुभवः, स्मरणं, चिकीर्षा, कृतिः, सुखमिति सर्वमेकस्मिन्नेव चेतने क्रमशः जायते। अत एक एव चेतनः स्थास्नुः स्थानशीलः। 'स्थास्नुः स्थिरतरः स्थेयान्' इत्यमरः। चेतनस्य क्षणिकत्वात् एकस्मिन् चेतनेऽनुभवेऽपरस्मिन् संस्कारोऽन्यस्मिंश्च कृतिरिति व्यवस्था न स्यात्। तथा चोक्तम्-

ज्ञानजन्या भवेदिच्छा इच्छाजन्या भवेत्कृतिः।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत्क्रिया।।

चेतनभेदेऽनुभवसिद्धस्य कार्यकारणयोरेकाधिकरण्यस्य अनुपपत्तिर्दुर्निवारा। अतो न क्षणिकत्वमङ्गीकार्यमित्यर्थः।

अनुवाद – कोई भी पहले वस्तु का अनुभव करता है, उसका ज्ञान प्राप्त करता है। उसके बाद संस्कारों के उद्भव से प्राप्त उस वस्तु के उपकार का स्मरण करता है, तदनन्तर उसमें चिकीर्षा (वस्तु के निर्माण की इच्छा) उत्पन्न होती है। तदनन्तर वह यत्नवान् होता है फिर उसे प्राप्त करता है और प्राप्ति से सुख का अनुभव करता है। इतने लम्बे समय में क्रम होने के कारण यह सब एक ही चेतन में होता है। ऐसा नहीं है कि अनुभव कोई और चेतन करे और बाद के कार्य उससे भिन्न चेतनों द्वारा किए जाएँ। जो अनुभव करेगा, उसी में इच्छा उत्पन्न होगी, वही कृतिमान् होगा। अर्थात् सबका आधार वही एक चेतन होगा। अतः वही चेतन ही

इतने समय तक स्थिर रहता है। चेतन की क्षणिकता मानने से इन कार्यों की उपपत्ति नहीं होगी तथा अनुभवसिद्ध कार्यकारण के एकाधिकरण का नियम भी भंग होगा। अत: क्षणिकता स्वीकार योग्य नहीं है।

।।८०।।

सनियममनुभूतिस्मृत्यपेक्षाकृतीष्ट-
क्रममधिकरणैक्ये वीक्ष्य को मुक्तलज्जः।
क्षणिकमथ च शून्यं मूढ! विज्ञानमिच्छेत्
फलजनिषु नियोक्तुं ? त्वं समीक्षस्व तावत्।।

अन्वयः – हे मूढ! अनुभूतिस्मृत्यपेक्षाकृतीष्टक्रमं सनियमम् अधिकरणैक्ये वीक्ष्य कः मुक्तलज्जः क्षणिकम् अथ च शून्यं विज्ञानं फलजनिषु नियोक्तुम् इच्छेत्? (इति) त्वं तावत् समीक्षस्व।

गङ्गा – क्षणिकमथेति– हे मूढ! बौद्धरूपधारिन् विलासिन्! अनुभूतिस्मृत्यपेक्षाकृतीष्टक्रमम् अनुभूतिरनुभवश्च स्मृतिश्च अपेक्षा वस्तुन इच्छा च कृतिः यत्नश्च इष्टं चेति तेषां क्रममनुक्रमं सनियमं नियमानुसारेण यथोक्तक्रमेण अधिकरणैक्ये एकस्मिन्नधिकरणे वीक्ष्य दृष्ट्वा कः खलु मुक्तलज्जः क्षणिकम् अथ च शून्यं ते विज्ञानं फलजनिषु कार्योत्पत्तिषु नियोक्तुं निर्धारयितुम् इच्छेत्। न कोऽपीति भावः। अनुभूतिप्रभृतिषु कश्चन क्रमो भवति। प्रथममनुभवः, तज्जन्यसंस्कारेण स्मरणं ततः अपेक्षा ततो यत्नः ततः इष्टः इत्यनुक्रमेणैव अनुभूत्यादीनां व्यवस्थितिः। तव विज्ञानस्य क्षणिकत्वादथ च शून्यत्वात् नैषा क्रमोपपत्तिव्यवस्था एकस्मिन्नधिकरणे स्यादिति व्यवस्थाभङ्गात् को निर्लज्जः कार्योत्पत्तिषु ते विज्ञानमभिनन्देत् इति तावत् समीक्षस्व विचारय। त्वदतिरिक्तो न कश्चित्तादृश इति भावः। कार्योत्पत्तौ सोऽयं क्रमो न मया अलिना निर्धारितोऽपितु शास्त्रज्ञैः। तथा हि–

ज्ञानजन्या भवेदिच्छा इच्छाजन्या भवेत्कृतिः।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत्क्रिया।।

एतत्सर्वं क्रमेणैकस्मिन्नेव अधिकरणे स्यात्। तवाऽभिमतक्षणिकशून्यवादे न तथा भवितुमर्हतीति न तत्र कार्योत्पत्तिप्रसङ्गः। अन्यस्मिन्नन्यस्मिन्नधिकरणे नेयं व्यवस्था भवेदिति तात्पर्यम्।

अनुवाद – हे मूर्ख! अनुभव, स्मरण, अपेक्षा, कृति और इष्ट (चेष्टा) के क्रम को यथोक्तक्रम से एक अधिकरण पर देखकर ऐसा कौन निर्लज्ज है जो तुम्हारे क्षणिक और शून्य विज्ञान को फलोत्पत्ति में योजित करना चाहेगा। तुम इस विषय में विचार करो।

टिप्पणी – प्रस्तुत पद्य में बौद्धों के क्षणिक और शून्यवाद की आलोचना की गयी है। उनके अनुसार सभी पदार्थ क्षणिक या अभावरूप हैं। इस पर कवि का कहना है कि कार्यजनन में क्षण कारण नहीं हो सकता। कोई भी व्यक्ति पहले किसी वस्तु का अनुभव करता है, फिर उसका स्मरण करता है, तदनन्तर उसकी अपेक्षा होती है, उससे कृति और कृति से चेष्टा तथा चेष्टा से क्रिया उत्पन्न होती है। इन सबको एक ही अधिकरण में होना चाहिए। क्षणिकता या शून्यता को स्वीकार करने से यह व्यवस्था नहीं बनती। जिस वस्तु का अनुभव जिस व्यक्ति द्वारा जिस क्षण में किया जायेगा दूसरे क्षण में न तो वह वस्तु रहेगी, न वह अनुभव और न ही वह व्यक्ति। अतः इन अनुभव आदि का क्रम भी वहाँ नहीं बन पायेगा। जिससे कार्योत्पत्ति बाधित होगी। इसलिए क्षणिक और शून्य विज्ञान को छोड़ ही देना चाहिए। इस क्रमविशेष के लिए एक ही स्थिर चेतन अपेक्षित है। पूर्व पद्य में भी यह बात कही गयी है।

।।८१।।

क्षणमुदयति यावद्बौद्धविज्ञानचन्द्रः
कवलयति हि तावद्राहुवत्तं क्षणोऽग्र्यः।
जनयतु विषयं तं संयुनक्तु व्यनक्तु
स्वयमपि च विभात्वित्यस्थिरेऽस्मिन् न शक्यम्।।

अन्वयः – यावद् बौद्धविज्ञानचन्द्रः क्षणम् उदयति तावत् हि अग्र्यः क्षणः राहुवत् तं कवलयति। विषयं जनयतु, तं संयुनक्तु, व्यनक्तु स्वयम् अपि च विभातु इति अस्मिन् अस्थिरे (विज्ञाने) न शक्यम्।

गङ्गा – क्षणमुदयेति– यावत् यावति काले बौद्धविज्ञानचन्द्रः बौद्धानां क्षणिको विज्ञानरूपश्चन्द्रः क्षणं निमेषम् उदयति उदयं प्राप्नोति। अनुभवविषयतां गच्छतीत्यर्थः। तावत् तावति काले सपद्येव अग्र्यः द्वितीयस्तदनन्तरभावी क्षणः राहुवत् तं कवलयति। प्रथमक्षणस्य तद्गतविषयस्य च सत्तां विनाशयतीत्यर्थः। अयं क्षणः विषयं जनयतु,

तं विषयमन्येन संयुनक्तु स्वयमपि च विभातु प्रकाशतां गच्छतु इति अस्मिन् अस्थिरे विज्ञाने न शक्यम्। सर्वं क्षणिकमिति कृत्वाऽत्र क्षणद्वययोगाभावात् किमपि न भवेदित्यर्थः।

अनुवाद – जैसे ही बौद्धों का विज्ञानरूपी चन्द्र क्षण भर के लिए उदित होता है वैसे ही दूसरा क्षण राहु की तरह उसे कवलित कर लेता है। द्वितीय क्षण में प्रथमक्षण में अनुभूत विषय की सत्ता नहीं रह जाती। ऐसे में यह क्षण अस्थिर होने के कारण न तो विषय को उत्पन्न कर सकता, न उसे संयुक्त कर सकता और न ही स्वयं प्रकाशित हो सकता। इन सबके लिए क्षणद्वयसम्बन्ध अपेक्षित है, जो बौद्धों को अभिमत नहीं है।

।।८२।।

करगतमपहाय प्रत्यभिज्ञोपपन्नं
लघुतरमपबाधं चोचितं चेतनैक्यम्।
प्रकटयसि मृषोक्तं निर्वहेदित्यगत्या
गुरुमनुभवबाह्यां वासनां कल्पयंस्त्वम्।।

अन्वयः – लघुतरम् अपबाधम् उचितं च करगतं प्रत्यभिज्ञोपपन्नं चेतनैक्यम् अपहाय अगत्या गुरुम् अनुभवबाह्यां वासनां कल्पयन् त्वं मृषोक्तं प्रकटयसि। (तत् मृषोक्तम्) इति निर्वहेत्?

गङ्गा – करगतमिति– लघुतरं विविधविज्ञानस्वीकृत्यपेक्षया लाघवयुक्तं, यस्य स्वीकारे गौरवं नास्तीत्यर्थः। अपबाधं समेषामनुभवविषयत्वाद् बाधरहितम् उचितं च करगतं हस्तगतमिव स्पष्टं प्रत्यभिज्ञोपपन्नं प्रत्यभिज्ञया संस्कारेन्द्रियसह-कृतज्ञानेन उपपन्नं सिद्धं सर्वत्र एकस्यैव चेतनस्य सत्त्वात् तदेवेदमिति रूपेण सिद्धं चेतनैक्यम् चेतनस्य आत्मन एकताम् अपहाय परित्यज्य। अद्वैतनये चेतनस्यैक्यम्। क्षणवादिनस्तु तथा न सहन्ते। तेषां मते सर्वं क्षणिकमिति चेतनस्यापि क्षणिकत्वम्। तादृशं चेतनैक्यं परित्यज्य अगत्या जगद्व्यवहारनिर्वाहे गतिविहीनतया गुरुं गौरवयुक्ताम् अनुभवबाह्याम् अनुभूतिविषयबाह्यां विचित्रामेकसन्तानवर्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिविज्ञानजननशक्तिरूपां वासनां कल्पयन् त्वं मृषोक्तं प्रकटयसि। तत्ते मृषोक्तं चेतनैक्यं निर्वहेत्? न निर्वहेदिति भावः। एतेन बौद्धानामालयविज्ञानसिद्धान्तो निराकृतः। बौद्धाश्चेतनाया ऐक्यं न स्वीकुर्वन्ति। आलयविज्ञानप्रवृत्तिविज्ञानभेदात्

ते चित्तस्य द्वैविध्यं स्वीकुर्वन्ति। आलयविज्ञाने धर्मा बीजत्वेनावस्थिता भवन्ति। त एव विज्ञानतया जगद्व्यवहारे हेतुत्वं भजन्ते। इदमालयविज्ञानमहमास्पदं विज्ञानम्। यथा समुद्रे वायुप्रेरिता नाना तरङ्गा उत्पत्तिं लभन्ते तथैवालयविज्ञाने बाह्यविषयाणां विचित्रा विज्ञानतरङ्गा जनिं लभन्ते। न कदापि भवत्येतेषां विनाशः। आलयविज्ञानं समुद्रवद् गभीरं विद्यते। तत्र विषयरूपपवनप्रेरितास्तरङ्गा उत्तिष्ठन्ति। लङ्कावतारसूत्रे सोऽयं विषयो व्याख्यातः-

तरङ्गा उदधेर्यद्वत्पवनप्रत्ययेरिताः।
नृत्यमानाः प्रवर्तन्ते व्युच्छेदश्च न वर्तते।।
आलयौघस्तथा नित्यं विषयपवनेरितः।
चित्रैस्तरङ्गविज्ञानैः नृत्यमानः प्रवर्तते।।९९-१००।।

एतान्यालयविज्ञानान्येव प्रवृत्तिविज्ञानोत्पादनपराणि वासनाशब्देनोच्यन्ते। सा चेयं वासना अनुभवबाह्या गौरवग्रस्ता चेति तदपेक्षया चेतनैक्यस्वीकार एव लाघवमिति कवेराशयः।

अनुवाद – लाघवयुक्त, बाधरहित, उचित, हस्तामलकवत् स्पष्ट, प्रत्यभिज्ञा से सिद्ध चेतना की एकता को छोड़कर अगतिकगति से अनुभव से बाहर की वस्तु वासना की कल्पना करके तुम अपनी मृषा उक्ति को प्रकट कर रहे हो। यह मृषोक्ति तुम्हारा निर्वाह करेगी क्या?

टिप्पणी – विज्ञानवादी बौद्ध चेतना की एकता को स्वीकार नहीं करते। उनके यहाँ चेतना भी अन्य विषयों की भाँति क्षणिक है। ऐसे में सांसारिक व्यवहार की प्रसक्ति के लिए बौद्ध आलयविज्ञान को स्वीकार करते हैं। उनका यह आलयविज्ञान समुद्र के समान विशाल और गंभीर है। इसमें विषय रूप पवनों से क्षुब्ध होकर विज्ञानरूप तरंगें उठती हैं। इन तरंगों का कभी विनाश नहीं होता। संतानपरम्परा रूप में विद्यमान रहने वाला यह आलयविज्ञान जिस शक्ति से प्रवृत्ति विज्ञान को जन्म देता है उसे वासना कहते हैं। यह वासना बाह्य विषयों से ओतप्रोत रहती है।

कवि का कथन है कि चेतना की एकता अनुभव सिद्ध होने के कारण तथा अनेक विज्ञानों की स्वीकृति की अपेक्षा लाघवयुक्त है। यह एक होने से प्रत्यभिज्ञा से सिद्ध है। समस्त वस्तुओं में 'तदेवेदम्' रूप से इसकी प्रतीति होती है। फिर हाथ में आयी हुई उस चेतना की एकता को छोड़कर तुम अनुभव के बाहर की चीज

वासना को व्यर्थ ही स्वीकार कर रहे हो। यह चेतना की एकता की अपेक्षा गौरव ग्रस्त है।

॥ ८३ ॥

क्वचन विषयबाधं वीक्ष्य रूप्यभ्रमादा-
वनुभवितरि बाधं यो वदेदात्मचोरः।
असदपि किल तस्योत्प्रेक्षमाणस्य सोऽयं
विबुधजनविगीतो भिक्षुपादप्रसारः॥

अन्वयः – सः आत्मचोरः क्वचन रूप्यभ्रमादौ विषयबाधं वीक्ष्य अनुभवितरि बाधं वदेत् तस्य किल असत् अपि उत्प्रेक्षमाणस्य सोऽयं विबुधजनविगीतः भिक्षुपादप्रसारः (वर्तते)।

गङ्गा – क्वचन विषयेति– यः आत्मचोरः आत्मनश्चोरः, आत्मसत्तापहारक इत्यर्थः। क्वचन रूप्यभ्रमादौ शुक्तौ रजतभ्रमादिस्थले विषयबाधं विषयस्य ज्ञेयस्य रजतस्य बाधं वीक्ष्य दृष्ट्वा अनुभवितरि चेतनविषये बाधं वदेत्। तस्य किल असत् अपि उत्प्रेक्षमाणस्य विषयबाधं चेतनबाधत्वेन निरूप्यमाणस्य सोऽयं बाधनिरूपणप्रयासः विबुधजनविगीतः विद्वद्भिर्निन्दितः भिक्षुपादप्रसारः विद्यते। यथा भिक्षुकस्य पादप्रसारोऽधिकप्राप्तिलालसा विद्वद्भिः न प्रशस्यते तथैव आत्मसत्तानिराकर्तुः सोऽयं प्रयासः नाभिनन्द्यत इत्यर्थः। आत्मविषयकज्ञानाभावे ते तथा प्रवृत्तिर्नोचितेति भावः। भिक्षुपादप्रसारन्यायः शास्त्रे प्रसिद्धः। यथा कश्चिद्भिक्षुर्यथेष्टभोजनाच्छादनवासगृहादिलाभार्थं कस्यचिद्धनिनो गृहे प्रविश्य युगपत्सर्वाभीष्टालाभं मन्यमानः प्रथमं धनिगृहे मे पादप्रसारणमस्तु पश्चादनेन परिचयमुत्पाद्य सर्वमभीष्टं सम्पादयिष्यामीति धिया स्वल्पामपि भिक्षां बहुमन्यमानः पश्चात्क्रमेण स्वाभीष्टं सम्पादयत्येवं यत्र विवक्षा तत्रास्य न्यायस्य प्रवृत्तिः। बौद्धस्य तव चैतन्यविषयेऽपलापः न स्वीकारयोग्य इत्यर्थः।

अनुवाद – जो आत्मचोर (आत्मा की सत्ता को चुराने वाला) कहीं शुक्ति में रजतभ्रम आदि होने पर विषय शुक्ति के बाध को देखकर उसे चेतना का बाध कहे उस असत् उत्प्रेक्षा करने वाले (विषयबाध को चेतनबाध निरूपित करने वाले) का यह प्रयास निश्चय ही भीख मांगने वाले के पैर पसारने के समान हैं। ऐसा प्रयास विद्वानों के द्वारा निन्दनीय है। जब तुम चेतन के बारे में जानते ही नहीं तो उसके

बाध की बात करने का तुम्हें अधिकार ही नहीं है।

।।८४।।

न भवति घटसत्ता मृद्विनाशे कदाचित्
प्रकृतिजनकसत्ताऽपेक्षिणी कार्यसत्ता।
प्रकृतिविकृतिविज्ञानैककालत्वविद्विण्
नियममिममकस्माद्बाधते तन्न युक्तम्।।

अन्वयः – मृद्विनाशे (सति) कदाचित् अपि घटसत्ता न भवति। कार्यसत्ता प्रकृतिजनकसत्तापेक्षिणी भवति। प्रकृतिविकृतिविज्ञानैककालत्वविद्विट् इमं नियमम् अकस्मात् बाधते। तत् न युक्तम्।

गङ्गा – न भवतीति– मृद्विनाशे मृदः समवायिकारणस्य विनाशे सति कदाचिदपि घटसत्ता न भवति। मृदुपादाननिर्मितघटाकृतिप्रभृति तदुपादानकारणविनाशात् विनश्यतीत्यर्थः। अत एव कार्यसत्ता कार्यस्य घटादेः सत्ता प्रकृतिजनकसत्तापेक्षिणी भवति प्रकृतिकारणरूपा या मृत् तस्याः सत्ताया अपेक्षिणी भवति। यावत् प्रकृतिजनककारणसत्ता तावत् कार्यसत्ता। उपादानकारणविनाशे तद्विनाश इत्यर्थः। प्रकृतिविकृतिविज्ञानैककालत्वविद्विट्, प्रकृतिश्च विकृतिश्च तयोर्विज्ञानस्य एककालत्वं यः विद्वेष्टि स क्षणवादी बौद्धः, प्रकृतौ मृत्स्नायां या विकृतिः विनाशरूपो विकार उत्पद्यते तयोर्विज्ञानस्य एककालत्वविद्वेषकः इमं नियमं कारणविनाशे कार्यविनाशनियमं कार्यसत्तायाः प्रकृतिजनकसत्तापेक्षित्वनियमं च अकस्मात् सहसैव क्षणस्वीकृतेर्बाधते। तन्न युक्तम्। बौद्धनये क्षणिकतास्वीकृतेः प्रकृतिविकृतिविज्ञानमेकस्मिन्नेव काले न जायते। प्रतिक्षणं तद्भवतीत्यर्थः। प्रतिक्षणं विनश्यद् वस्तु नाशं प्राप्नोतीति तेषां मतेऽनेककालत्वं घटविनाशे।

अनुवाद – मिट्टी का विनाश हो जाने पर कभी भी घट की सत्ता नहीं रहती। कार्य की सत्ता प्रकृतिजनकसत्ता की अपेक्षा रखती है। जब तक उपादानकारण की सत्ता रहेगी तब तक कार्य की भी सत्ता रहेगी, जब उपादानकारण नष्ट हो जायेगा तब कार्य भी नष्ट हो जायेगा। इनमें एककालत्व है। किन्तु प्रकृति और विकृति के विज्ञान की एक कालता के विद्वेषक बौद्ध इस नियम को अकस्मात् बाधित कर देते हैं। यह ठीक नहीं। बौद्धों के अनुसार कोई भी वस्तु प्रतिक्षण विनष्ट होती हुई विनाश को प्राप्त होता है। विनाश की यह प्रक्रिया उनके यहाँ एककाल में घटित न

होकर अनेक काल (क्षणों) में घटित होती है। इससे प्रकृति और विकृति के विज्ञान का एककालत्वनियम बाधित होता है।

।।८५।।

श्रयति मृदुदकाप्त्या पिण्डतां कुम्भकार–
प्रथमचरमकृत्योः स्यात् कपालं घटश्च।
वहति च दृढदण्डाघाततो मृत्स्वरूपं
न पुनरिह सुदर्शोऽभावलेशोऽपि कश्चित्।।

अन्वयः – मृत् उदकाप्त्या पिण्डतां श्रयति। कुम्भकारप्रथमचरमकृत्योः कपालं घटः च स्यात्। मृत् च दृढदण्डाघाततः स्वरूपं वहति। इह पुनः कश्चित् अपि अभावलेशः सुदर्शः न (अस्ति)।

गङ्गा – श्रयतीति– मृत् मृत्स्ना उदकाप्त्या जलसंस्कारेण पिण्डतां पिण्डरूपतां श्रयति आश्रयति। जलसंयोगेन मृत्तिका पिण्डरूपेण परिणमत इत्यर्थः। कुम्भकारप्रथमचरमकृत्योः कुभकारस्य प्रथमचरमकृत्योः प्रथमकृतौ चरमकृतौ च क्रमशः कपालं घटः च स्यात्। एकस्मिन्नेव क्षणे घटो न उत्पद्यते। पिण्डरूपा मृत् च दृढदण्डाघाततः कठोरदण्डस्य आघातात् भृशताडनात् घटरूपं विहाय स्वरूपं वहति धारयति। इह अस्मिन् घटसर्गे तन्नाशे च अनेकक्षणानां व्यवधानेऽपि कश्चित् अपि अभावलेशः अभावस्य लेशोऽपि सुदर्शः दृष्टिविषयः न अस्ति। सर्वस्य क्षणिकत्वे कश्चिदभावोऽत्र स्यात्। स न भवतीति ते क्षणिकत्वं मृषोक्तमेवेत्यर्थः।

अनुवाद – मिट्टी जल के संसर्ग से पिण्डता का आश्रयण करती है। कुम्भकार की प्रथम कृति कपाल और चरम कृति घट होता है। एक ही क्षण में घट उत्पन्न नहीं हो जाता। दृढ़ दण्ड के आघात से मिट्टी घटरूप को छोड़ कर स्वरूप धारण करती है। इस सारी प्रक्रिया में कोई भी अभावलेश दृष्टिगत नहीं होता। सबके क्षणिक होने पर यहाँ कोई अभाव तो दिखता? अतः तुम्हारा क्षणिकत्व मृषा है।

।।८६।।

दृषदि चतुरशिल्पोत्कीर्णसिंहादिरूपं
सदपि तदधिकाश्मोत्सारणाद्भाति यद्वत्।

सदपि सकलरूपं ब्रह्मणि स्वप्रकाशा-
वृतिकरपररूपोत्सारणाद्भाति तद्वत्।।

अन्वयः - यद्वत् दृषदि सत् अपि चतुरशिल्पोत्कीर्णसिंहादिरूपं तदधिकाश्मोत्सारणाद् भाति तद्वत् सत् अपि सकलरूपं स्वप्रकाशावृतिकरपर-रूपोत्सारणाद् ब्रह्मणि भाति।

गङ्गा - दृषदीति- यद्वत् यथा दृषदि शिलायां सत् अपि विद्यमानम् अपि चतुरशिल्पोत्कीर्णसिंहादिरूपं चतुरशिल्पकारेण उत्कीर्णं टङ्कितं सिंहादिरूपं सिंहाश्वादीनां स्वरूपं तदधिकाश्मोत्सारणाद् तस्याः दृषदः अधिकस्य सिंहाद्याकृत्याच्छादकस्य उत्सारणात् बहिर्निष्कासनात् भाति। शिलायां सिंहादिरूपं सत् भवति। तत्र आच्छादकस्य प्रस्तराधिकस्य कारणात् दृष्टिपथं नाऽवतरति। शिल्पिभिः अधिकाश्मोत्सारणात् तत्प्रकटीभवति। तद्वत् तथा सत् अपि विद्यमानमपि सकलरूपं स्वप्रकाशावृतिकरपररूपोत्सारणात्, स्वप्रकाशस्य आत्मचैतन्यस्य आवृतिकरम् आच्छादकं यत् पररूपमज्ञानं तस्य उत्सारणाद् ब्रह्मणि भाति प्रकाशते। अतो न कोऽपि पदार्थ उत्पद्यते, तदभिव्यज्यत इत्यर्थः।

अनुवाद - जैसे शिला में विद्यमान भी चतुरशिल्पकर के द्वारा उत्कीर्ण सिंह आदि का रूप उस शिला के अधिक प्रस्तरखण्डों के उत्सारण से सुशोभित (अभिव्यक्त) होता है। उसी प्रकार ब्रह्म में सकलरूप विद्यमान रहते हैं। स्वप्रकाशरूप आत्मचैतन्य को आवृत करने वाले अज्ञान के उत्सारण से वे ब्रह्म में प्रकाशित होते हैं।

।।८७।।

पतति जलधितोये नाविकस्य प्रमादात्
किमु वदसि विनाशं वाऽऽवृतिं वा घटादौ।
पुनरपि न विनष्टो दृश्यते दृश्यतेऽसौ
व्यवधिरत उपेयः साऽस्तु सर्वत्र रीतिः।।

अन्वयः - नाविकस्य प्रमादात् जलधितोये पतति (सति) घटादौ विनाशम् आवृतिं वा वदसि? विनष्टः पुनः अपि न दृश्यते। असौ (घटः) दृश्यते। अतः व्यवधिः उपेयः। सा रीतिः सर्वत्र अस्तु।

गङ्गा – पततीति– नाविकस्य प्रमादात् अनवधानात् जलधितोये समुद्रजले पतति सति घटादौ, आदिना तुम्बिकादीनां सङ्ग्रहः। विनाशम् आवृतिम् आवरणं वा वदसि ? नाविकस्य प्रमादात् समुद्रजले पतितः घटः कदाचिज्जले निमज्जति कदाचिच्च उपरि आयाति। तत्र क्षणिकतोपासकस्त्वं घटस्य नाशं स्वीकरोषि जलेन तस्य आवरणं वा ? यदि नाम विनाशं स्वीकरोषि तर्हि विनष्टः पुनः अपि न दृश्यते। अयं तु पुनः उपरि दृश्यतेऽपि। अतो घटविनाशस्तत्र न स्वीकारयोग्यः। अतः व्यवधिः व्यवधानम् आवरणमिति यावत्। अज्ञानरूपमिदमावरणं सच्चिदानन्दस्वरूपमावृणोति। यस्मिन् क्षणे निमग्नं तस्मिन् क्षणे जलावरणात् तददर्शनम् यदा पुनरुपरि दृष्टस्तदाऽऽवरणभङ्गः। उपेयः अभ्युपगन्तव्यः। सा व्यवधानरीतिः सर्वत्र जागतिकप्रपञ्चेषूत्पत्तिविनाशेष्वपि अस्तु, भवतु। आवरणदशायां विनाशो दर्शनदशायां चोत्पत्तिरिति प्रतिक्षणमुत्पत्तिविनाशौ न स्वीकारयोग्यावित्यर्थः।

अनुवाद – नाविक के प्रमाद से समुद्र के जल में गिरे हुए घट को तुम विनष्ट समझते हो या उसे जल से आवृत मानते हो ? विनष्ट घट फिर से दृष्टिगत नहीं हो सकता किन्तु यह घड़ा दिखाई देता है। अतः इसमें जल का व्यवधान (आवरण) मानना चाहिए। जब वह डूबा है तब जल के व्यवधान से उसका दृष्टिगत न होना स्वाभाविक है और जब वह ऊपर आ गया उस समय जलरूप आवरण के हट जाने से उसका दर्शन भी स्वाभाविक है। यही नियम समस्त जागतिक प्रपंचों में भी समझना चाहिए। आवरणदशा में उस घट का विनाश तथा दर्शन होने पर उत्पत्ति मानना उचित नहीं।

॥ ८८॥

अथ यदि सति कुम्भे दृश्यमानेऽपि तत्त–
द्व्यवहितबहुरूपोद्भावनैकाग्रहेण।
निगदसि तदभावं तान्यनन्तानि तस्माद्
घट इति लघु वाच्ये स्यादभावोक्तिभारः॥

अन्वयः – अथ यदि कुम्भे दृश्यमाने सति अपि तत्तद्व्यवहितबहुरूपो–द्भावनैकाग्रहेण तानि अनन्तानि (इति) तदभावं निगदसि। तस्मात् घट इति लघुवाच्ये अभावोक्तिभारः स्यात्।

गङ्गा – अथ यदीति– अथेत्यनेन पक्षान्तरमुद्भावयति। यदि क्षणिकतोपास–कस्त्वं बौद्धः दृश्यमाने दृष्टिविषयतां भजमाने सत्यपि घटे तस्मिन् तत्तद्–

व्यवहितबहुरूपोद्भावनैकाग्रहेण तेषां तेषां व्यवहितानाम् आवृतानां बहुरूपाणामुत्पत्तीनामेकाग्रहेण हठेन, स घटः प्रतिक्षणं निमज्जन् पुनरुपरि दृश्यते। अतः क्षणवादमाश्रित्य त्वं प्रतिव्यवधानमभिनवरूपं स्वीकृत्य तत्र बहुरूपाणामुत्पत्त्येकाग्रहेण तानि बहुरूपोद्भावनानि अनन्तानि इति कृत्वा निमग्नताक्षणे तदभावं तस्य घटस्य अभावं निगदसि। तस्मात् घट इति लघुवाच्ये तस्मिन् अभावोक्तिभारः प्रतिक्षणं विनाशकल्पनया अभावोक्तिभारः स्यात्। अतो न बहुरूपोत्पत्तिस्तत्र स्वीकरणीयेत्यर्थः।

अनुवाद – और यदि तुम दृश्यमान होने पर भी उन उन व्यवधानों से (प्रतिक्षण डूबने को विनाश मान कर) बहुत से रूपों के उद्भावन का आग्रह करते हो तथा उन उद्भावनों के अनन्त होने से पूर्व पूर्व क्षणों में डूबे हुए घट का अभाव कहते हो और उत्तर उत्तर क्षणों में दृष्टिगत हो रहे उस घट की उत्पत्ति मानते हो। तब तो घट इस लघुपद से वाच्य उस घट पर अभावोक्ति का भार ही हो जाएगा। अतः क्षणिकता के आश्रय से इस अभाव को मानना उचित नहीं।

।। ८९ ।।

इति निगदितरीत्या भावसङ्घातसाध्ये
सुवच उचितभावप्रोद्भवे सर्वदैव।
अधिकरणविरोधिज्ञप्त्यधीनप्रणाशौ
क्वचिदपि मम नेष्टौ प्रागभावप्रकाशौ।।

अन्वयः – इति निगदितरीत्या भावसङ्घातसाध्ये सर्वदा सुवचे भावप्रोद्भवे अधिकरणविरोधिज्ञप्त्यधीनप्रकाशौ प्रागभावप्रणाशौ मम क्वचित् अपि इष्टौ न स्तः।

गङ्गा – इति निगदितेति– इति एवम्प्रकारेण पूर्वं निगदितरीत्या कथितया शैल्या भावसङ्घातसाध्ये भावानां साध्ये सर्वदा एव सुवचे स्वीकारयोग्ये उचितभावप्रोद्भवे उचितानां दण्डचक्रचीवरादितत्तद्भावसङ्घातसाध्यानां भावानां घटादीनां प्रोद्भवे आविर्भावे तिरोभावे च। प्रोद्भवशब्दोऽत्र तिरोभावस्याऽप्युपलक्षणम्। अधिकरण–विरोधिज्ञप्त्यधीनप्रकाशौ, अधिकरणम् आधारश्च विरोधी प्रतियोगी च तयोरधिकरणप्रतियोगिनोः ज्ञानाधीनः प्रकाशः ज्ञानं ययोस्तौ प्रागभावप्रणाशौ प्रागभावप्रध्वंसाभावौ मम अलेरद्वैतपथानुयायिनः क्वचिदपि न इष्टौ न सम्मतौ। अभावस्य ज्ञानम् अधिकरणप्रतियोगिनोर्ज्ञानाधीना भवति। 'भूतले घटो नास्ति' इत्यत्र

भूतलमधिकरणं घटश्चाभावप्रतियोगी। अभावज्ञानम् अनयोर्घटभूतल–योर्ज्ञानाधीना। तज्ज्ञानं विना नाभावज्ञानमुदेति। अलिमते कार्यस्योत्पत्तिर्न भवति। तेन तु कार्यस्याविर्भाव एव स्वीक्रियते। आविर्भावो नाम प्रकाशः। मृदादिकारणे विद्यमान एव घटो दण्डादिकारणसङ्घातेन पुनः प्रकाशते। अतोऽत्र 'उत्पत्तेः प्राक् कारणे कार्यस्याभावरूपः प्रागभावो न नाऽभिमतः। मुद्‌गरादिप्रहारे सति कार्यं कारणमालायां तिरोभवतीति तन्मते उत्पन्नस्य कारणेऽभावरूपस्य प्रध्वंसाभावस्यापि प्रसङ्गो नापतति। तदेतत्सर्वं स्वाभिमतभावाविर्भावप्रसङ्गः 'श्रयति मृदुदकाप्त्या' इत्यादिपद्ये निरदिशदलिः। क्षणवादिमते तु प्रागभावप्रध्वंसाभावप्रसङ्गः स्यात्तेन तस्य अधिकरणप्रतियोगिज्ञानपरतन्त्रताऽपि भवेत्। मम तु न तथेति भावः।

अनुवाद – इस प्रकार मेरे मत में ऊपर कहे गये क्रम से दण्डचक्रचीवर आदि भावों के संघात से घट आदि पदार्थों का आविर्भाव और तिरोभाव सर्वथा सुवच है। मैं पदार्थों का आविर्भाव और तिरोभाव स्वीकार करता हूँ। यह आविर्भाव तिरोभाव संघात से साध्य होता है। अतः अधिकरण और प्रतियोगी के ज्ञान के अधीन जिनका ज्ञान होता है, ऐसे प्रागभाव और प्रध्वंसाभाव मुझे अभीष्ट नहीं है। तुझ क्षणिकवादी के मत में प्रत्येक क्षण पदार्थों की उत्पत्ति और विनाश का क्रम चलता रहता है, अतः तुझे प्रागभाव और प्रध्वंसाभाव इष्ट हैं।

टिप्पणी – वेदान्त मत में कार्य का आविर्भाव कारणसमूह से माना गया है। उनके अनुसार उचित कारण सामग्री से घटादि पदार्थों का आविर्भाव होता है। उस सामग्री के तिरोहित हो जाने से पदार्थ भी तिरोहित हो जाता है। अतः इनके मत में किसी पदार्थ का प्रागभाव या उसका प्रध्वंसाभाव प्रसक्त नहीं होता। क्षणवादी बौद्ध के मत में पदार्थों की क्षणिकता स्वीकृत होने से भावों का संघात संभव नहीं है। इनके मत में उत्पत्स्यमान पदार्थ का प्रागभाव तथा विनष्ट पदार्थ का प्रध्वंसाभाव प्रसक्त होता है। अलि ने ऊपर 'श्रयति मृदुदकाप्त्या' इत्यादि पद्य में अपनी पदार्थाविर्भावप्रक्रिया का कथन किया है। कारणसमूह में विद्यमान कार्य उचितभावों से आविर्भूत होता है। उसी प्रकार कारणसामग्री के बिखर जाने पर वह उसी में तिरोभूत हो जाता है। अतः अलि को किसी भी कार्य का प्रागभाव या प्रध्वंसाभाव अभीष्ट नहीं है।

।। ९०।।

सुकृतदुरितकर्ता सौख्यदुःखोपभोक्ते-
त्यनुमत उपपत्त्या चेतनस्थैर्यवादः।
क्षणिकमतकुमार्गे कर्तृभोक्त्रोर्विभेदे
प्रसजति कृतहानिश्चाकृताभ्यागमश्च।।

अन्वयः – सुकृतदुरितकर्ता सौख्यदुःखोपभोक्ता (भवति) इति उपपत्त्या चेतनस्थैर्यवादः अनुमतः। क्षणिकमतकुमार्गे कर्तृभोक्त्रोः विभेदे कृतहानिः च अकृताभ्यागमः च प्रसजति।

गङ्गा – सुकृतेति– सुकृतदुरितकर्ता पुण्यपापयोः कर्ता सौख्यदुःखोपभोक्ता पुण्यकर्ता सुखस्य पापकर्ता च दुःखस्य उपभोक्ता भवतीति उपपत्त्या कर्मानुसारिभोगव्यवस्थया चेतनस्थैर्यवादः आत्मनो नित्यत्वसिद्धान्तः अनुमतः स्वीकृतोऽस्ति। जगतः जन्म एव प्राणिनां भोगार्थं भवति। कर्मभोगार्थमेव परमात्मनः सङ्कल्पः। तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्म-सहकृतोऽपरिमितानिरूपितशक्तिविशिष्टमायासहितः सन्नामरूपात्मकनिखिलप्रपञ्चं प्रथमं बुद्धावाकलय्येदं करिष्यामीति सङ्कल्पयति तदैक्षत बहुस्यां प्रजायेय (तै.उ. २.६) इति श्रुतेः। यः चेतनः यादृशं कर्म कुरुते स तादृशं फलमाप्नोतीति व्यवस्था चेतनैक्येनैव सम्भवति। क्षणिकमतकुमार्गे यत्र प्रतिक्षणं चेतनो विनश्यति जनिं च लभते तत्र कर्तृभोक्त्रोः विभेदे कर्तुः भोक्तुश्च भेदे सति प्रथमक्षणोत्पन्नचेतनेन कृतकर्मणो भोक्ता द्वितीयक्षणोत्पन्नचेतनः स्यादिति तत्र कर्तृभोक्तृविभेदो वर्तते। तेन कृतहानिः कृतस्य सम्पादितकर्मणः फलाप्राप्तिरूपा हानिः स्यात्। यतो हि प्रथमक्षणोत्पन्नचेतनः कर्म सम्पाद्य विनष्टः। वासनया तत्फलभोक्ता द्वितीयक्षणोत्पन्नचेतनो भवति। एवं द्वितीयक्षणोत्पन्नचेतनस्य च अकृताभ्यागमः अकृतकार्यफलप्राप्तिः प्रसजति। अतो नायं सिद्धान्तः स्वीकारयोग्य इति भावः।

अनुवाद – पुण्य और पाप का कर्ता सुख और दुःख का भोग करता है, इस व्यवस्था से चेतन के स्थिरता का सिद्धान्त स्वीकृत है। जो चेतन जैसा कर्म करेगा वैसा फल पायेगा। पुण्य का कर्ता सुख और पाप का कर्ता दुःख का भोक्ता होता है। किन्तु बौद्धाभिमत कुमार्ग में कर्ता और भोक्ता के भिन्न भिन्न होने से वहाँ किये गये कर्म की हानि और विना कर्म के फलप्राप्ति प्रसक्त होती है। वहाँ चेतन के

क्षणिक होने से प्रथम क्षण में उत्पन्न चेतन के कर्म का फल वासना से द्वितीयक्षणोत्पन्न चेतन को प्राप्त होता है। यह व्यवस्था उचित नहीं।

।। ९१ ।।

इह पुनरपि सूक्ष्मं चिन्त्यमाने समष्टिः
स्थिरतरचितिभावे पर्यवस्यत्यवश्यम्।
असति किमु कुलाले दण्डचक्रादि कुम्भं
घटयति ? तदुपेया चेतने सा स्वतन्त्रे ।।

अन्वयः – इह पुनः अपि सूक्ष्मं चिन्त्यमाने समष्टिः अवश्यं स्थिरतरचितिभावे पर्यवस्यति। दण्डचक्रादि कुलाले असति कुम्भं घटयति किमु ? तत् स्वतन्त्रे चेतने सा उपेया।

गङ्गा – इह पुनरपीति– इह अस्मिन् विषये पुनरपि सूक्ष्मं चिन्त्यमाने विचार्यमाणे समष्टिः संघीभूतः समस्तोऽपि पदार्थः अवश्यं स्थिरतरचितिभावे नित्यचेतनपदार्थसत्तायां पर्यवस्यति पर्यवसानमेति। दण्डचक्रादि घटोत्पत्तिकारणं कुलाले असति कुलालरूपे स्थिरतरचेतनेऽसति कुम्भं घटयति किमु, घटं निर्माति किमु ? नेत्यर्थः। तस्मात् अचेतनप्रवृत्तौ चेतनप्रयोज्यत्वस्यैव दर्शनात् स्वतन्त्रे चेतने सा समष्टिः अभ्युपेया, अभ्युपगन्तव्या। दण्डचक्रादिसमष्टिः कुलाल एव पर्यवस्यतीत्यर्थः।

अनुवाद – इस विषय में पुनः सूक्ष्म विचार करने पर यह सिद्ध होता है कि समष्टि (संघीभूत समस्त पदार्थ) स्थिरतर चेतनभाव में ही पर्यवसित होता है। दण्ड और चक्र आदि कुम्भकार के न होने पर कुम्भ का निर्माण नहीं कर सकते। अतः अचेतन की प्रवृत्ति में चेतन का प्रयोज्यत्व होने से स्वतन्त्र चेतन में ही समष्टि स्वीकार करनी चाहिए।

।। ९२ ।।

श्रितपरिमितदेशश्चेतनो भिन्नदेश–
स्थितबहुविधरूपोद्भावने न क्षमेत।
इति विपुलधरित्रीस्वर्गपातालसिद्धौ
ध्रुवमुपगमनीयो व्यापको भाव एषः ।।

अन्वयः – श्रितपरिमितदेशः चेतनः भिन्नदेशस्थितबहुविधरूपोद्भावने न क्षमेत इति विपुलधरित्रीस्वर्गपातालसिद्धौ ध्रुवम् एषः व्यापकः भावः उपगमनीयः।

गङ्गा – श्रितपरिमितेतिश्रितपरिमितदेशः श्रित आश्रितः परिमितः न्यूनो देशः येन सः। स्वल्पदेशवृत्तिरित्यर्थः। स तादृशः चेतनः भिन्नदेशस्थितबहुविधरूपोद्भावने भिन्नदेशेषु पृथक् पृथक् प्रदेशेषु लोकेषु वा स्थितानां बहुविधरूपाणामुद्भावने अनेकाकारप्रकाररूपोत्पादने न क्षमेत न समर्थो भवेत्। तच्च न चन्द्रादीनां ज्ञापने प्रभवेदित्यर्थः। इति हेतोः विपुलधरित्रीस्वर्गपातालसिद्धौ विपुला विशाला धरित्री, पृथ्वी च स्वर्गश्च पातालश्च तेषां सिद्धौ सत्यां ध्रुवं निश्चयेन एषः चेतनाख्यः व्यापकः विभुः भावः उपगमनीयः स्वीकरणीयः। न तदृते भिन्नदेशस्थित-बहुविधरूपोद्भावनप्रसङ्गः। तस्यैव चेतनस्य भासा सर्वमिदं विभातीति श्रुतयोऽप्यामनन्ति।

अनुवाद – सीमित देश का आश्रय करके रहने वाला चेतन भिन्न भिन्न देशों में स्थित अनेक प्रकार के रूपों को उत्पन्न करने में समर्थ नहीं हो सकता। वह आकाश आदि में स्थित चन्द्र आदि का ज्ञान कराने में समर्थ नहीं होगा। इसलिए विशाल धरती, स्वर्ग और पाताल के सिद्ध होने पर निश्चय ही इस व्यापक सत्ता (चेतन) को स्वीकार करना चाहिए। न्यूनदेशवृत्ति क्षणिक चेतन इन सबका ज्ञान नहीं करा सकता।

।। ९३।।

ध्रुवतनुरथ चैकः सर्वभावानुगामी
भवति परमसत्तानामकश्चेतनोऽयम्।
पुनरयमनुगम्यव्यक्तिवैचित्र्ययोगा-
द्वहति जडघटत्वेशत्वजीवत्वसंज्ञाः।।

अन्वयः – अयं परमसत्तानामकः चेतनः ध्रुवतनुः एकः अथ च सर्वभावानुगामी भवति। अयं पुनः अनुगम्यव्यक्तिवैचित्र्ययोगात् जडघटत्वेशत्व-जीवत्वसंज्ञाः वहति।

गङ्गा – ध्रुवतनुरिति-अयमस्मदभिमतः परमसत्तानामकश्चेतनः त्रिकालेऽप्य-बाध्यत्वं परमत्वम्। ब्रह्मेत्यर्थः। तदेवाऽद्वैतनये परमसत्तारूपेण स्वीकृतः। अस्य न कदाप्यभावो भवति-नाभावो विद्यते सतः (गी. २.४) 'तत्रैव शङ्कराचार्येणोक्तम्-यद्विषया बुद्धिर्नव्यभिचरति तत् सत्। आसीदेकमेवाद्वितीयमित्युक्त्वा छान्दोग्येऽपि' (६.२.१) तदिदं तथ्यं समर्थितम्। परमसत्तानामकश्चेतनोऽयं ध्रुवतनुः नित्यशरीरः

सदित्यर्थः। एकः एक एव विद्यते। अयमेव सर्वभावानुगामी भवति। सर्वान् भावान् अयमेव परमसत्तानामकश्चेतनो व्याप्नोति। तैत्तिरीयोपनिषद् वक्ति– सत्यं ज्ञानमनन्तं ब्रह्म। स चेतनः देशकालवस्त्वादिपरिच्छेद्यो नास्ति। पञ्चदश्यां (३.३५) उक्तम्–

न व्यापित्वाद् देशतोऽन्तो नित्यत्वान्नापि कालतः।
न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा।।

'नित्यं विभुं सर्वगतं सुसूक्ष्मम्' इति मुण्डके (१.१.६)

सर्वगतमित्यनेन तस्य सर्वभावानुगामित्वं समर्थितम्। अयं चेतनः पुनः अनुगम्यव्यक्तिवैचित्र्ययोगात्, अनुगम्या, अनुगमनयोग्या या व्यक्तिः जडघटत्वेशत्वजीवत्वत्वादिरूपेण अभिव्यक्तिः तस्या अभिव्यक्तेर्वैचित्र्ययोगात् भेदसंयोगात् जडघटत्वेशत्वजीवत्वसंज्ञाः जडघटत्वसंज्ञां धारयन् अचेतनघटादिकार्येषु स्फुरतीति तां संज्ञां धारयति। मूलाविद्ययोपहितः सन्नीशत्वसंज्ञां धारयति सर्गविधानं च करोति। तूलाविद्ययोपहितो भूत्वा जीवत्वसंज्ञां धारयन् पूर्वकृतकर्मभोगमनुभवतीति। जडत्वेशत्वजीवत्वत्रितयेन त्रिविधेष्वपि सर्गेषु तद्व्याप्तिः समर्थिता। अनुगमनयोग्या सा घटपटादिपदार्थरूपेण अभिव्यक्तिः प्रकाश इति यावत्। तस्या एव वैचित्र्येण चेतनेऽस्मिन् भेदो दृश्यते। वस्तुत भेदोऽयमुपाधिरूपश्चेतनस्त्वेक एव। तथा च श्रुतिः– तत्सृष्ट्वा तदेवानुप्रविशत् (तैत्तिरी. २.६) एको देवः सर्वभूतेषु गूढः (श्वेताश्व. ६–११) एक एवात्मा भूते भूते व्यवस्थितः, ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति (गी. १८.६१) इत्यादिवचनैस्तस्य परमतत्त्वस्य सर्वव्यापकता सिद्ध्यति। विविधेषु पदार्थेषु स एव भासते। समष्टिरूपाज्ञानादयं परमसत्ताख्यश्चेतन एव ईश्वर इति व्यपदिश्यते– 'इयं समष्टितत्कृतोपाधितया विशुद्धसत्त्वप्रधाना' एतदुपहितं चैतन्यं जगत्कारणमीश्वर इति च व्यपदिश्यते। श्रीमद्भागवतादावुपनिषत्स्वन्यत्र च वेदान्तग्रन्थेषु विषयोऽयं विस्तरेण प्रतिपादितः। अत्र निष्कर्षतया योगवासिष्ठे प्रतिपादितम्– 'तस्मै सर्वं ततः सर्वं स सर्वं सर्वतश्च सः' (६.४८.२३) इदं चराचरजगत् तस्य परमेश्वरस्य विद्यते, तस्मादेव उत्पन्नः, स एव सर्वस्वम्, स एव जगति उपरि बहिरन्तश्च प्रविष्टोऽस्ति। जीवस्तस्य चेतनस्य कार्योपाधिः, ईश्वरः कारणोपाधिः। तथा चोक्तम् अनुभूतिप्रकाशे–

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते।।

एतादृशचेतनस्वीकारादेव जगद्व्यवहारप्रसक्तिः। तत्क्षणिकत्वे तु सर्वत्र व्यवहारानुपपत्तिरेवेति कवेराशयः।

अनुवाद – यह परमसत्ता नामक चेतन नित्य है, एक है और सर्वव्यापक है। यह अभिव्यक्ति की विचित्रता (भेद) के योग से जड़ घटत्व, ईशत्व और जीवत्व की संज्ञाएं धारण करता है।

टिप्पणी – उपनिषदों में ब्रह्म को परमतत्त्व कहा गया है। वह नित्य, एक और शाश्वत है। इस संसार में वही नानारूपों में अभिव्यक्त होता है, प्रकाशित होता है।

श्रीमद्भगवद्गीता में श्रीकृष्ण स्वयं कहते हैं–

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।।

गीता में ही 'नाभावो विद्यते सतः' कह कर उस ब्रह्म की नित्यता निरूपित की गयी है। वह परब्रह्म ही सर्वभावानुगामी है। अर्थात् सभी भावों में उसकी सत्ता है। वेदान्त का सिद्धान्त है कि वह परमपुरुष सृष्टि करके उसी में अनुप्रविष्ट हो गया–

कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः।
त्रयोविंशतितत्त्वानां गणं युगपदाविशत्।।
सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम्।
भिन्नं संयोजयामास सुप्तं कार्यं प्रबोधयन्।। (श्रीमद्भागवत, ३.६.२, ३)

यह परम तत्त्व ही जगत् में घटत्व, पटत्व आदि के रूप में अभिव्यक्त होता है। यही उपहित चैतन्य के रूप में 'ईश्वर' कहलाता है। अद्वैत वेदान्त में ब्रह्म की दो अवस्थाएं स्वीकृत हैं– १. माया की उपाधि से युक्त और २. माया की उपाधि से रहित। शङ्कराचार्य ने कहा है– द्विरूपं हि ब्रह्म अवगम्यते, नामरूपविकारभेदोपाधि–विशिष्टं, तद्विपरीतं च सर्वोपाधिविवर्जितम् (शां. भा. – १.१.११)। माया की उपाधि से युक्त होकर निर्गुण ब्रह्म सगुण बन जाता है और इसे ईश्वर की संज्ञा दे दी जाती है। राम, कृष्ण आदि इसके उदाहरण है। कवि ने अद्वैतवेदान्त के इन परमसत्ता विषयक सिद्धान्तों को समेट कर प्रस्तुत पद्य में निबद्ध किया है। इस नित्यचेतन को स्वीकार किये बिना क्षणिकसत्ता से जगत् के व्यवहार प्रसृत नहीं हो सकते। गीता के सातवें एवं दशवें अध्याय में श्रीकृष्ण ने स्वयं अपनी सर्वव्यापकता का कथन किया है।

।। ९४।।

स्फुरति ननु कदाचिद्व्यञ्जकानां समष्ट्या
शकलपटुसमष्ट्याऽऽच्छाद्यते वा घटत्वम्।
स्फुरति समनुगच्छत्येवमेषा सदेति
प्रथयति निजरूपं भावता ब्रह्मतत्त्वम्।।

अन्वयः – ननु घटत्वं कदाचित् व्यञ्जकानां समष्ट्या स्फुरति (कदाचित्) शकलपटुसमष्ट्या वा आच्छाद्यते। एवम् एषा भावता ब्रह्मतत्त्वं सदा स्फुरति समनुगच्छति इति निजरूपं प्रथयति।

गङ्गा – स्फुरतीति– नन्विति निश्चये। घटत्वं, घटत्वस्य सामान्यत्वाद् व्यापकत्वाच्च ब्रह्मोपलक्षणत्वम्। तदिदं घटत्वं कदाचिद् व्यञ्जकानां मृद्दण्डचक्रचीवरादीनां समष्ट्या स्फुरति प्रकाशतामुपगच्छति। दण्डादीनां भावसमूहे समारोपिते मृदि घट उत्पद्यते। तेन घटत्वं स्फुरति। कदाचिच्च शकलपटुसमष्ट्या शकलेषु कपालादिखण्डेषु, कपालादिखण्डकरण इति यावत्। या पटुः समर्था, या मुद्‌गरप्रहारावयवविभागादिसमष्टिस्तया घटत्वं घटनिष्ठा जातिराच्छाद्यते। विनष्टे घटे तत्र जातिर्न स्फुरतीत्यर्थः। तत् घटत्वं तत्राच्छाद्यते। न तत्र तद्विनाशो भवतीति बोध्यम्। एवं घटत्ववत् एषा भावता सद्रूपं ब्रह्मतत्त्वं सदा नित्यं स्फुरति प्रकाशिता भवति। समनुगच्छति, कार्येष्वन्वेति। यथा घटत्वं घटव्यक्तिष्वन्वेति तद्वत्। इत्येवं प्रकारेण इयं भावता निजरूपं त्रिकालाबाध्यत्वात्मकं निजस्वरूपं प्रथयति विस्तारयति। एकमेव सत् सर्वत्र व्याप्तो भवतीत्यर्थः।

अनुवाद – निश्चय ही घटत्व कभी व्यंजकों की समष्टि से स्फुरित होता है, तो कभी टुकड़े करने में समर्थ मुद्‌गर प्रहार और अवयव विभाग आदि के द्वारा वह आच्छादित कर लिया जाता है। घट के खण्ड–खण्ड हो जाने पर वह घटत्व वहाँ स्फुरित नहीं होता। इसी घटत्व की तरह यह भावता रूप ब्रह्मतत्त्व सदैव स्फुरित होता है। आवरण के आ जाने से कभी कभी वह प्रतीत नहीं होता। घटत्व की तरह वह घट व्यक्तिरूप कार्यों से अन्वित होता है तथा त्रिकालाबाध्यत्वात्मक अपने स्वरूप का विस्तार करता है।

।। ९५ ।।

सहकृतिपटवोऽस्मिन्सन्तु भावाः सहस्रं
ध्रुवमुपगमनीयाऽनादिता तेष्वगत्या।
न तु कथमपि नित्यास्तावतैवोपपत्त्या
फलजनकसमष्टेर्वादशेषे च बाधात्।।

अन्वयः – अस्मिन् सहकृतिपटवः सहस्रं भावाः सन्तु, तेषु अगत्या अनादिता ध्रुवम् उपगमनीया। तावता एव तु फलजनकसमष्टेः उपपत्त्या वादशेषे च बाधात् (ते) कथम् अपि नित्याः न (सन्ति)।

गङ्गा – सहकृतीति– अस्मिन् ब्रह्मतत्त्वे सहकृतिपटवः सहकारिकारणरूपाः सहस्रं भावाः पदार्थाः सन्तु तेषु सहकारिभावेषु अगत्या अनादिता आदिताराहित्यं किन्तु सान्तत्वं ध्रुवं निश्चयेन उपगमनीया अवगन्तव्या। यथा घटोत्पादने मृदः दण्डचक्राम्बुसूत्ररूपाणि नानासहकारीणि भवन्ति तथैव ब्रह्मणोऽपि सहकारिणो नाना भावा बोद्धव्याः। तावता अनादित्वमात्रेणैव फलजनकसमष्टेः कार्योत्पादककारणसमष्टेः उपपत्त्या सिद्ध्या वादशेषे च परमार्थविचारे च तेषां बाधात् ते सहकृतिपटवः भावा नित्या न सन्ति। नित्यस्तु एक एव परमात्मा ब्रह्मपदवाच्यः। वेदान्ते जीवजगदविद्यासृष्टिबन्धमोक्षाणामनादित्वं स्वीकृतम्।

अनुवाद – इस ब्रह्मतत्त्व में सहकारी के रूप असंख्य भाव हो सकते हैं। उनमें अगत्या अनादिता या उत्पत्ति शून्यता तो निश्चय ही मानी जा सकती है किन्तु उस अनादिता मात्र से फलजनकसमष्टि के उपपन्न हो जाने से तथा परमार्थ विचार में उनका बाध हो जाने से वे सहकारी भाव कथमपि नित्य नहीं हो सकते। अद्वैतवेदान्त में जीव, जगत्, अविद्या, सृष्टि, बन्ध और मोक्ष अनादि पदार्थ कहे गये हैं।

।। ९६ ।।

घटपटमुखकार्ये काऽपि नूनं समष्टिः
प्रकटयति फलं न त्वत्र पर्याप्तमेकम्।
क्रमिकसकलभावोद्भावनैकस्वभावा
जयति तु पुनरेका ब्रह्मरूपा समष्टिः।।

अन्वयः – घटपटमुखकार्ये नूनं काऽपि समष्टिः फलं प्रकटयति अत्र एकं तु न पर्याप्तम्। क्रमिकसकलभावोद्भावनैकस्वभावा पुनः एका ब्रह्मरूपा समष्टिः तु जयति।

गङ्गा – घटपटेति– घटपटमुखकार्ये घटपटाः प्रमुखाः यस्मिन् तादृशे कार्ये नूनं निश्चयेन काऽपि अपूर्वा समष्टिः फलं घटपटादिरूपं कार्यं प्रकटयति। कापीत्यनेन प्रतिकार्यं समष्टिभेदः सूचितः। घटकार्ये मृत्कुलालदण्डचक्राम्बुसमष्टिः। एवमन्यत्रापि बोध्यम्। अत्र फलोत्पादने एकं किमपि न पर्याप्तम्। एकेन फलोत्पत्त्यसम्भवात्। क्रमिकसकलभावोद्भावनैकस्वभावा क्रमिकाणां सकलभावानां सम्पूर्णपदार्थानाम् उद्भावना उत्पत्तिरेव एकः स्वभावः यस्याः सा पुनरेका ब्रह्मरूपा समष्टिः तु जयति सर्वातिशयेन वर्तते। ब्रह्मव्यतिरिक्ता न काचित्समष्टिः एकाकिनी कार्योत्पादने समर्था भवति। इयं तु एकैव कार्यमुत्पादयतीति सर्वोत्कर्षशालिनी विद्यते। अद्वैतप्रस्थानेऽज्ञानोपहितचैतन्येन सर्गविधानम्। तथा च श्रुतिः–

यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः।
तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते।। (मुण्डको. १.१.९)

श्रीमद्भगवद्गीतायामपि 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते' (१०.८) इत्युक्त्वा सिद्धान्तोऽयं समर्थितः।

अनुवाद – घट, पट आदि प्रमुख कार्य में निश्चय ही कारणों की कोई अपूर्व समष्टि फल को प्रकट करती है। इस फलोत्पादन में कोई एक पर्याप्त नहीं है। क्रमिक रूप से समस्त भावों को उत्पन्न करना ही जिसका एक मात्र स्वभाव है वह ब्रह्मरूपा समष्टि सर्वोत्कर्षशालिनी है। वह अकेले ही समस्त कार्यों को उत्पन्न करने में पर्याप्त है।

।। ९७।।

क्षण इति परसत्ताऽर्थक्रियाकारितेत्य-
प्यभिलप निजरुच्या तां स्वसङ्केतभेदात्।
स्थिरचितिसुखसारा भावरूपा समष्टिः
कथमपि भवता चेत्स्वीकृता सिद्धमिष्टम्।।

अन्वयः – क्षण इति अर्थक्रियाकारिता परमसत्ता (अस्ति) इति निजरुच्या तां स्वसङ्केतभेदात् अभिलप। भवता कथम् अपि स्थिरचितिसुखसारा भावरूपा समष्टिः स्वीकृता चेत्, इष्टं सिद्धम्।

गङ्गा – क्षण इतीति– क्षण इति अपरनामधेया अर्थक्रियाकारिता प्रयोजनभूता या क्रिया तत्कारितैव सत्ता, न तु शशविषाणवत् असद्वस्तु किमपि कार्यमुत्पादयतीति।

यत्सत् तत्क्षणिकमिति नियमाद् बौद्धमते क्षणस्यैव अर्थक्रियाकारिता सैव परमसत्ता। प्रपञ्चितं चैतत्पूर्वं 'विपणिविततरूप्यम्' (३.२६) इत्यादिश्लोकव्याख्याने। तामर्थक्रियाकारितां परमसत्तां निजरुच्या यथेच्छं स्वसङ्केतभेदात् स्वशक्तिग्रहपार्थक्यात् अभिलप। यद् वाञ्छसि तत्कथय। तेन नाऽस्माकं कापि क्षतिः। तव क्षणरूपायामर्थ-क्रियाकारित्वलक्षणसत्तायां सङ्केतग्रहो मम तु त्रिकालाबाधितब्रह्मरूपपरमसत्तायामिति तत्र सङ्केतग्रहभेद एव कारणम्। भवता बौद्धरूपविलासिना कथमपि कथञ्चिदपि स्थिरचितिसुखसारा स्थिरचितिसुखमेव सारो यस्यां सा भावरूपा ब्रह्मस्वरूपा समष्टिः स्वीकृता सत्तारूपेण अङ्गीकृता चेत्, इष्टं सिद्धम्। अस्माकमिति शेषः। त्वया नित्यसुखात्मकचिद्रूपसत्तास्वीकारेऽस्माकमेवेष्टसिद्धिरित्यर्थः।

अनुवाद – क्षणरूप अर्थक्रियाकारिता ही परमसत्ता है, यह कहते हुए तुम अपनी इच्छा के अनुसार उस सत्ता का अपने संकेतभेद के अनुसार अभिलाप करो। तुम्हारे द्वारा यदि स्थिर चेतना का सुखसार जिसमें है, ऐसी सत्ता स्वीकार कर ली गयी तो हमारी ही इष्टसिद्धि है।

॥ ९८॥

नयनरसननासात्वक्श्रुतिज्ञातपूर्वं
स्मरति पृथगमीषां चेतना तेन नेष्टा।
न च समुदयधर्मः सैकनाशेऽपि सत्त्वात्
स्थिरतदितरभावश्चेतनो यः स आत्मा॥

अन्वयः – (चेतनः) नयनरसननासात्वक्श्रुतिज्ञातपूर्वं स्मरति। तेन अमीषां पृथक् चेतना न इष्टा। एकनाशे अपि सत्त्वात् सा च समुदयधर्मः न (अस्ति)। यः स्थिरतदितरभावः चेतनः स आत्मा (भवति)।

गङ्गा – इन्द्रियात्मवादं खण्डयति– **स्थिरतदितरेति**– कश्चन चेतनः नयनरसननासात्वक्श्रुतिज्ञातपूर्वं नयनं च रसनं च नासा च त्वक् च श्रुतिश्चेति ज्ञानेन्द्रियैः इति यावत्। ज्ञातपूर्वम् अनुभूतपूर्वं स्मरति। तेन हेतुना अमीषां ज्ञानेन्द्रियाणां पृथक् चेतना न इष्टा। एकनाशे एकस्य कस्यचिदपि इन्द्रियविशेषस्य नाशे चेतनायाः सत्त्वात् सा चेतना समुदयधर्मः इन्द्रियाणां समुदायस्य। धर्मः न अस्ति। यः स्थिरतरभावः अतिस्थिरतत्त्वं नित्यः सन् इन्द्रियभिन्नभावः। चेतनः स आत्मा। न नेत्रादीन्द्रियवर्ग आत्मेत्यर्थः। एतेन 'ते ह प्राणाः प्रजापतिं पितरमेत्योचुः' इति श्रुतिं

प्रमाणतयोपन्यस्येन्द्रियात्मवादं निर्धारयतां मतं निराकृतम्। वेदान्तसारे सोऽयमिन्द्रियात्मवाद: प्रपञ्चितो निरस्तश्च।

अनुवाद – चेतन आँख, जिह्वा, नासिका, त्वक् और श्रुति नामक ज्ञानेन्द्रियों से ज्ञातपूर्व अर्थ का स्मरण करता है। इसलिए इन इन्द्रियों को पृथक् चेतन मानने की आवश्यकता नहीं है। किसी एक इन्द्रिय का विनाश हो जाने पर भी चेतना बनी रहती है, अत: चेतना समुदाय का धर्म नहीं है। जो स्थिर होकर भी इन्द्रियभिन्न चेतन भाव है, वह आत्मा है। अत: इन्द्रियों को आत्मा नहीं कहा जा सकता।

।। ९९।।

मनसि चपलवृत्तिग्रामभूपत्वमास्तां
भवतु च तदधीनो मोहभङ्गाधिकार:।
अणु वहतु कथं तन्नश्वरं सक्रियत्वात्
सकलतनुगभोगस्वप्रकाशाधिपत्यम्?।।

अन्वय: – मनसि चपलवृत्तिग्रामत्वभूपत्वम् आस्ताम्। मोहभङ्गाधिकार: तदधीन: भवतु। तत् नश्वरम् अणु सक्रियत्वात् सकलतनुगभोगस्वप्रकाशाधिपत्यं कथं वहतु?

गङ्गा – मनसोऽनात्मत्वं साधयन्नाह– **मनसीति**– केचन 'अन्योऽन्तर आत्मा मनोमय:' (२.३.१) इत्यादितैत्तिरीयवचनमादाय मनस आत्मत्वं स्वीकुर्वन्ति। पक्षोऽयं वेदान्तसारे विद्वन्मनोरञ्जिन्यां विशदीकृत:। मनसि चपलवृत्तिग्रामत्वभूपत्वम्, मन आख्येऽन्तरिन्द्रिये अन्त:करणवृत्तिभेदत्वात् सङ्कल्पविकल्पवृत्तिरूपत्वात्। चाञ्चल्यव्यवहारग्रामताया भूपता श्रेष्ठता आस्ताम्। मनश्चपलव्यवहारसमूहानां राजा भवतु। मोहभङ्गाधिकार: तदधीनो विशुद्धमनोऽधीनो भवतु। सक्रियत्वात् नश्वरम् अणुपरिमाणवत् तत् मन: सकलतनुगभोगस्वप्रकाशाधिपत्यं समस्तशरीरगतभोगानां य: स्वप्रकाशस्तस्याधिपत्यं स्वामित्वं कथं वहतु धारयतु। न कथमपीत्यर्थ:। तत्र तु आत्मन: स्वामित्वं स्वप्रकाशज्ञानरूपत्वादिति भाव:। मनस्तु सङ्कल्पविकल्पवृत्तिमच्चाञ्चल्यमात्रं भजते। मनसो नानावृत्तिरूपाण्युक्तानि वृहदारण्यके– 'काम: सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' (१.५.३)। 'मनसैवाऽनुद्रष्टव्य: नेह नानास्ति किञ्चन' इति वृहदारण्यके मनस आत्मत्वं खण्डितम्। अतो आत्मा मनोभिन्न: इति कवेराशय:।।

अनुवाद – मन चंचलव्यवहार समूहों का राजा रहे। मोहभंग का अधिकार भी उसके अधीन रहे, उससे कोई क्षति नहीं होती। वह नश्वर है, अणुपरिमाण है, सक्रिय है, अतः समस्त शरीर के भोगों के स्वप्रकाश का आधिपत्य कैसे धारण कर सकता है ?

।। १००।।

स्मृतिफलबलकल्प्यो वासनौघः सुषुप्ता-
वतिचलजडजाग्रद्वृत्तिसङ्घातजन्मा।
फलजनितविनाशः स्वप्रकाशाधिराज्ये
कलुषदृगनुरोधान्नाभिषेच्योऽप्रमत्तैः।।

अन्वयः – सुषुप्तौ स्मृतिफलबलकल्प्यः अतिबलजडजाग्रद्वृत्तिसङ्घातजन्मा फलजनितविनाशः वासनौघः अप्रमत्तैः कलुषदृगनुरोधात् स्वप्रकाशाधिराज्ये न अभिषेच्यः।

गङ्गा – वासनात्मवादं निराकरोति– **स्मृतिफलेति**– सुषुप्तौ सुषुप्त्यवस्थायां यस्यां ज्ञानकर्मेन्द्रियैः सह मनोऽपि पुरीतति नाड्यां विश्राम्यति। तस्यामवस्थायां स्मृतिफलबलकल्प्यः स्मृतिरूपफलसाहाय्येन ज्ञेयः। स्मृतिः वासनाजन्या भवतीति तस्याः 'संस्कारमात्रजन्यत्वं' निगद्यते। स्मृतिरूपकार्येण वासनानुमानम्। अतिचलजडजाग्रद्वृत्तिसङ्घातजन्मा, अतिचञ्चलानां जडानां जाग्रति जाग्रद्वस्थायां जायमानानां वृत्तीनां चित्तवृत्तीनां सङ्घातेन जन्म यस्याऽसौ। चित्तवृत्तीनां प्रकृतिजन्यत्वाच्चाञ्चल्यं जडत्वं चोक्तम्। फलजनितविनाशः, फलेन जनितः उत्पादितः विनाशः यस्य सः वासनौघः वासनानां समूहः अप्रमत्तैः बुद्धिमद्भिः कलुशदृगनुरोधात् कुत्सितदृष्टीनां बौद्धानामालयविज्ञानवादिनामनुरोधादाग्रहात् स्वप्रकाशाधिराज्ये स्वप्रकाशस्य आत्मनोऽधिराज्ये सम्राज्ये न अभिषेच्यो न स्थापनीयः। वासनेयमात्मभिन्नेत्यर्थः।

सुषुप्तौ जीवो न किमपि कामयते। स अस्यां दशायामानन्दमनुभवन् चेतोमुखो भवतीति कैवल्योपनिषदि निर्दिष्टम्–

सुषुप्तिकाले सकले विलीने
तमोऽभिभूतः सुखरूपमेति।

अत्र भवति जीवे चैतन्यदीप्ताज्ञानवृत्तेः प्राधान्यम्। एतेनाज्ञानेन सह स आनन्दमनुभवतीति 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति कथनेन प्रामाण्यमभ्युपगच्छति। स्मृत्यानया वासनाया अपि सुषुप्तौ स्थितिः प्रमाणिता भवति। सुषुप्तौ देहेन्द्रियान्तःकरणानां क्रिया न भवन्ति। प्रमाणप्रमेययोर्व्यवहारोऽपि समाप्तिं गच्छति। बुद्धिरविद्यायां बीजे वृक्षवत् स्थिता भवतीति पञ्चीकरणवार्तिके निर्दिष्टं सुरेश्वराचार्येण–

ज्ञानेनानुपसंहारो बुद्धेः कारणता स्थितिः।
वटबीजे वटस्यैव सुषुप्तिरभिधीयते।।

सुषुप्तावानन्दमात्रस्य प्रतीतेरात्मा सुखमनुभवति। तत्र सुषुप्तिदशायां वासनानामपि संस्काररूपाणामवस्थितेः कश्चन वासनानामत्मरूपत्वं न स्वीकुर्यादिति वासनात्मवादोऽत्र निराकृतः। वासना च प्राक्तनकर्मजन्यः संस्कारविशेषः। क्वचिदनुशयशब्देनाऽप्यस्य बोधः।

अनुवाद – सुषुप्ति अवस्था में स्मृतिरूप कार्य की सहायता से वासना ज्ञात होती है। (स्मृतिरूप कार्य से वासना का अनुमान किया जाता है) यह अतिचंचल, जड़ और जाग्रदवस्था की चित्तवृत्तियों से जन्म लेती है तथा फल (कार्य) से इसका विनाश होता है (जैसे कर्मभोग से वासना का क्षय)। ऐसे वासनाओं के समूह को कलुषदृष्टि आलयविज्ञानवादियों के अनुरोध से स्वप्रकाश आत्मा के साम्राज्य में अभिषिक्त नहीं करना चाहिए, उसे आत्मा का स्थान नहीं देना चाहिए। वासना संस्काररूप है, आत्मा स्वप्रकाश और नित्य।

टिप्पणी – सुषुप्ति में जीव आनन्दमात्र का अनुभव करता है। उस समय देह, इन्द्रिय आदि क्रियाहीन होते हैं। सुषुप्ति के आनन्द का अनुभव 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' रूप स्मरण से होता है। यह स्मरण उस समय वासना की सत्ता में भी प्रमाण है। अगर सुषुप्ति में वासना की स्थिति न होती तो उक्त स्मरण नहीं हो सकता था। यद्यपि सुषुप्ति में अनुभूत होने वाला सुख आत्मा का स्वरूप है तथापि उस समय वासनाओं की विद्यमानता से कोई वासनाओं को भी आत्मा न मान बैठे, इस दृष्टि से कवि ने वासनात्मवाद का खण्डन किया है।

।। १०१ ।।

स्थिरचितिसुखसत्तास्वर्णदीसूर्यकन्या-
कमलभवनजायाऽन्योन्ययोगप्रयागे।
सपदि निजमनस्त्वं मज्जयन्नात्मतीर्थे-
ऽनुभव सततसिद्धां मोक्षसाम्राज्यलक्ष्मीम्।।

अन्वयः - स्थिरचितिसुखसत्तास्वर्णदीसूर्यकन्याकमलभवनजायाऽन्योन्ययोगप्रयागे आत्मतीर्थे सपदि निजमनः मज्जयन् त्वं सततसिद्धां मोक्षसाम्राज्यलक्ष्मीम् अनुभव।

गङ्गा - सम्प्रति विलासिनमात्मतीर्थं निर्दिशति- **स्थिरचितीति**- स्थिरचितिसुखसत्तास्वर्णदीसूर्यकन्याकमलभवनजायाऽन्योन्ययोगप्रयागे, चितिः चित् च सुखमानन्दश्च सत्ता सच्चेति चितिसुखसत्ताः। स्थिराश्च ताः चितिसुखसत्ताः स्थिरचितिसुखसत्ताः। स्वर्णदी स्वर्गङ्गा च सूर्यकन्या यमुना च कमलभवनजाया सरस्वती चेति स्वर्णदीसूर्यकन्याकमलभवनजायाः। स्थिरचितिसुखसत्ता एव स्वर्णदीसूर्यकन्याकमलभवनजाया इति स्थिरचितिसुखसत्तास्वर्णदीसूर्यकन्या-कमलभवनजायास्तासाम् अन्योऽन्ययोगः एव प्रयागः, मयूरव्यंसकादित्वात् समासः। तादृशे आत्मतीर्थे आत्मरूपतीर्थे। आत्मनः सच्चिदानन्दरूपत्वात् प्रयागस्य च स्वर्णदीसूर्यकन्याकमलभवनजायानदीत्रयरूपत्वाद् उभयोः साम्यवर्णनम्। तादृशप्रयागरूप आत्मतीर्थे सपदि निजमनः मज्जयन् निमज्जयन्। प्रक्षालयन्निति यावत्। त्वं विलासी सततसिद्धां नित्यसिद्धां मोक्षसाम्राज्यलक्ष्मीं मोक्षरूपं यत्साम्राज्यं तस्य लक्ष्मीं सौभाग्यमनुभव। आत्मनो नित्यत्वं तत्सुखं तत्सत्तां चाङ्गीकृत्य सच्चिदानन्दघनरूपं ब्रह्मानुभवेत्यर्थः। अन्यत्राऽपि त्रिवेणीतीर्थे मज्जन्नात्मानः साम्राज्यमनुभवन्तीत्यागमिकाः।

अनुवाद - नित्यचिति, नित्यसुख तथा परमसत्तारूप गङ्गा, यमुना एवं सरस्वती का योग जहाँ है उस प्रयागरूप आत्मतीर्थ में शीघ्र ही अपने मन का प्रक्षालन कर तुम नित्यसिद्ध मोक्षरूप साम्राज्य लक्ष्मी का अनुभव करो।

टिप्पणी - आत्मा नित्य है तथा सच्चिदानन्दात्मक है। कवि ने रूपक के माध्यम से आत्मा और प्रयाग में साम्य प्रदर्शित किया है। सत्, चित् और आनन्द का परस्पर योग होने के कारण आत्मा प्रयागरूप त्रिवेणी संगम है। प्रयाग में जिस तरह गंगा, यमुना और सरस्वती का संगम होता है उसी तरह आत्मा में नित्यचिति,

नित्यसुख और परमसत्ता का संगम है। बौद्धरूप विलासी से कवि का कथन है कि ऐसे आत्मरूप प्रयाग में अपने मन को प्रक्षालित कर तथा क्षणिकता के पक्षपात को छोड़कर तुम नित्यसिद्ध मोक्षरूप साम्राज्य लक्ष्मी का भोग करो।

।। १०२।।

अथ दुरभिनिवेशाच्छून्यमाध्यास्यसि त्वं
स्वरुचिजनितमिथ्यादृष्टिसंस्कारादार्ढ्यात्।
अविशयमवशोऽन्ते लप्स्यसे शून्यभावं
तदुपरम सचेता आत्मनाशं क इच्छेत्।।

अन्वयः – अथ स्वरुचिजनितमिथ्यादृष्टिसंसकारदार्ढ्यात् दुरभिनिवेशात् त्वं शून्यम् आध्यास्यसि (चेत्) अवशः अन्ते शून्यभावम् अविशयं लप्स्यसे। तत् उपरम्। कः सचेताः आत्मनाशम् इच्छेत्?

गङ्गा – अथ दुरभीति– अथ मम चितिसुखसत्ताविषयकं सिद्धान्तमनङ्गीकृत्य त्वं स्वरुचिजनितमिथ्यादृष्टिसंस्कारदार्ढ्यात् निजप्रीत्युत्पन्नमृषादृष्टिवासनाप्राबल्यात् दुरभिनिवेशात् दुराग्रहात् शून्यम् अभावमाध्यास्यसि आ समन्तात् ध्यास्यसि ध्यानं करिष्यसि। चेत् अवशः वशरहितः। पक्षहीन इति यावत्। शून्यभावम् अभावमेव अविशयं निःसन्देहं लप्स्यसेऽधिगमिष्यसि। तत् तस्मात् शून्यस्य ध्यानादुपरम। कः सचेताः बुद्धिमान् आत्मनाशं स्वविनाशम् इच्छेत्? न कोऽपीत्यर्थः। पुरुषार्थप्राप्तावेव सचेतसां प्रयत्नः। न आत्मनाशे तत्पुरुषार्थप्राप्तिरिति भावः।

अनुवाद – मेरे द्वारा निर्दिष्ट नित्यचिति के सुख सत्ता आदि को न मानकर यदि तुम अपनी रुचि से उत्पन्न मिथ्या दृष्टि के संस्कार की दृढ़ता से दुराग्रहवश शून्य का ही ध्यान करते हो तो अन्त में तुम वशहीन हो जाओगे और तुम्हें निःसन्देह शून्यभाव की ही प्राप्ति होगी। इसलिए इस शून्य का अनुध्यान छोड़ो। कौन ऐसा बुद्धिमान् है जो आत्मनाश चाहता है। बुद्धिमान् लोग तो पुरुषार्थप्राप्ति के लिए प्रयास करते हैं। आत्मनाश पुरुषार्थ नहीं है।

।। १०३।।

यदि च चपलनानाभावनादीर्घशाखा–
प्लवननिरतचेताः कीशतां स्वीकरोषि।

क्षणगलदवलम्बः प्रस्खलन्नन्तराले
निरयसुहृदि शून्ये त्वं पतिष्यस्यवश्यम्।।

अन्वयः – यदि च चपलनानाभावनादीर्घशाखाप्लवननिरतचेताः कीशतां स्वीकरोषि (तर्हि) क्षणगलदवलम्बः अन्तराले प्रस्खलन् त्वम् अवश्यं निरयसुहृदि शून्ये पतिष्यसि।

गङ्गा – यदि च चपलेति– यदि पुनरपि चपलनानाभावनादीर्घशाखाप्लवन–निरतचेताः चपलाया सर्वं क्षणिकं क्षणिकं, सर्वं दुःखं दुःखं, सर्वं स्वलक्षणं स्वलक्षणं, सर्वं शून्यं शून्यमिति नानाभावनारूपविशालशाखाकूर्दनसंलग्नचित्तः कीशतां वानरतां स्वीकरोषि। 'मर्कटो वानरः कीशः' इत्यमरः। तर्हि क्षणगलदवलम्बः निमिषनिरस्ताश्रयः, सर्वं क्षणिकमिति कृत्वा भावनानामपि क्षणिकत्वाद्विनाशः। अन्तराले। 'अभ्यन्तरं त्वन्तरालम्' इत्यमरः। मध्ये प्रस्खलन् त्वमवश्यमेव निरयसुहृदि नरकमित्रे। 'स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्' इत्यमरः। शून्ये स्वाभीष्टे पतिष्यसि।

अनुवाद – यदि तुम चंचल नानाभावनारूपी दीर्घशाखाओं के प्लवन में मन लगाकर वानरता स्वीकार करते हो तो क्षण भर में तुम्हारा यह भावनारूपी अवलम्ब दूर हो जायेगा। क्योंकि तुम्हारे अनुसार जब सब कुछ क्षणिक है तो भावना भी क्षणिक ही होगी। उस भावनारूप अवलम्ब के छूट जाने से मध्य में ही प्रस्खलित होते हुए तुम नरकमित्र शून्य में गिरोगे।

टिप्पणी – कवि ने यहाँ 'नानाभावना' कह कर बौद्धों को अभिमत चार भावनाओं– 'सर्वं क्षणिकं क्षणिकं, सर्वं दुःखं दुःखम्, सर्वं स्वलक्षणं स्वलक्षणम्', तथा 'सर्वं शून्यं शून्यम्' का निर्देश किया है।

।।१०४।।

अभिदधदपि दुःखं धावसीष्टान्यवाप्तुं
प्रतिपदमनुमानं वक्षि सामान्यमुज्झन्।
क्षणिकमथ च शून्यं त्वं ब्रवीषि प्रपञ्चं
द्रढयसि च विहारं चेष्टितं ते विचित्रम्।।

अन्वयः – दुःखम् अभिदधत् अपि इष्टानि अवाप्तुं धावसि। प्रतिपदं सामान्यम् उज्झन् अनुमानं वक्षि। अथ त्वं क्षणिकं शून्यं प्रपञ्चं ब्रवीषि, विहारं च द्रढयसि। ते

चेष्टितं विचित्रम् (अस्ति)।

गङ्गा – अभिदधदपीति– दु:खं 'सर्वं दु:खं दु:खम्' इत्यभिधदपि भावनां कुर्वन्नपि इष्टानि प्रियतराणि वस्तूनि प्रियाणि सुखानीति यावत्। अवाप्तुं धावसि। भिक्षार्थमिति शेष:। प्रतिपदं सामान्यं सत्ताम् उज्झन् परित्यजन् अनुमानं वक्षि, अनुमानप्रमाणं स्वीकरोषि। तच्चानुमानं सामान्येन विना न भवितुमर्हति। यतो हि धूमत्वेनैव धूमस्य वह्नित्वेन वह्निना व्याप्तिग्रहो भवति। न तु धूमव्यक्ते: वह्निव्यक्त्या। तथा सति महानसीयधूमेन पर्वतीयवह्नेरनुमानस्य संशयस्य वाऽसम्भवात्। तत्तु सामान्यलक्षणप्रत्त्यासत्त्या भवति। तव मते सामान्याभावात् कथं सामान्यलक्षणप्रत्त्यासत्तिरिति भाव:। अथ त्वं क्षणिकं शून्यं क्षणविनाशि यच्छून्यं तत् प्रपञ्चं सविस्तरं ब्रवीषि। क्षणिकस्य न विस्तरावसर इत्यर्थ:। विहारं द्रढयसि स्वमठं दृढीकरोषि। ते चेष्टितम् आचरणं विचित्रमस्ति। कथने करणे च भेदादित्यर्थ:।

अनुवाद – तुम 'सब कुछ दु:ख है' यह कहते हो और प्रिय सुख साधनों को जुटाने के लिए दौड़ते हो। प्रतिपद सामान्य का खंडन करते हो और अनुमानप्रमाण मानते हो। क्षणिक शून्य का विस्तार करते हो और अपने मठों को मजबूत बनाते हो। तुम्हारा आचरण विचित्र है। कथनी और करनी में बहुत बड़ा अन्तर है।

टिप्पणी – 'प्रतिपदमनुमानं वक्षि सामान्यमुज्झन्' से कवि ने अनुमान में सामान्य की अनिवार्यता का प्रतिपादन किया है। अनुमानप्रमाण सामान्य के विना नहीं हो सकता। क्योंकि धूमत्व सामान्य से ही धूम का तथा वह्नित्व सामान्य से ही वह्नि का व्याप्तिग्रह होता है। धूमव्यक्ति का वह्नि व्यक्ति से व्याप्तिग्रह नहीं होता। व्यक्तिरूप से व्याप्तिग्रह मानने पर महानसीयधूम से पर्वतीय वह्नि का अनुमान या तद्विषयक संशय ही नहीं होगा। यह अनुमान सामान्यलक्षणप्रत्त्यासत्ति से होता है। तुम्हारे मत में सामान्य का अभाव होने से सामान्यलक्षणप्रत्यासत्ति कैसे होगी?

।। १०५ ।।

अपि च न सुलभस्ते द्वादशस्वेन्द्रियार्चो–
चितिविषयसमीहासंयतस्याऽवकाश:।
तदनुसर विविक्तं भावनां कामपीच्छन्
विविदिषितमहं ते तत्र वक्ष्ये क्रमेण।।

अन्वयः– अपि च, ते द्वादशेन्द्रियार्चोचितिविषयसमीहासंयतस्य अवकाशः न सुलभः। तत् काम् अपि भावनाम् इच्छन् विविक्तम् अनुसर। अत्र अहं ते विविदिषितं क्रमेण वक्ष्ये।

गङ्गा – अपि चेति– अपि च, निष्कर्षतया मम वचनं शृणु। ते विलासिनो बौद्धस्य द्वादशेन्द्रियार्चोचितिविषयसमीहासंयतस्य, द्वादशानां मनोबुद्धिसहितज्ञानकर्मेन्द्रियाणां तत्तद्विषयभोगसम्पादनेन या अर्चा पूजा तस्याः या उचितिः, औचित्यमिति यावत्। स एव विषयो वर्तते यस्याः तया समीहया चेष्टया संयतस्य बुद्धस्य अवकाशः न सुलभः, अवसर एव नोपलब्धः। प्रतिक्षणमिन्द्रियार्चनव्यापृतत्वादित्यर्थः। तत् तस्मात् कामप्यपूर्वां भावनामिच्छन् विविक्तमेकान्तं विहारमिन्द्रियार्चां च परित्यज्य अनुसर अनुगच्छ।'विविक्तं पूतविजनौ' इत्यमरः। अत्र विविक्ते अहमलिः ते विविदिषितं ज्ञातुमिष्टं क्रमेण गुरुसेवादिभिः परमपुरुषार्थप्राप्तिं यावत् यथाक्रमं वक्ष्ये कथयिष्यामि।

अनुवाद – और भी, द्वादश इन्द्रियों को उनके अनुसार भोग देने के लिए उचितविषय की चेष्टा में संयत (भोग की सामग्री को जुटाने में व्यापृत) तुझ विलासी को कोई अवकाश ही सुलभ नहीं है। इसलिए किसी अपूर्व भावना को लेकर एकान्त का अनुसरण करो। यहाँ मैं तुम्हें जानने योग्य विषयों का क्रमशः कथन करूँगा।

टिप्पणी – यहाँ द्वादशेन्द्रिय शब्द से पाँच ज्ञानेन्द्रियाँ, पाँच कर्मेन्द्रियाँ तथा मन और बुद्धि का कथन किया गया है। बौद्ध परोक्ष देवताओं की पूजा में विश्वास नहीं करते। इन्द्रियतृप्ति ही उनके लिए देवपूजा है। पूर्वमें कवि ने इस प्रसंग का कथन किया है।

।। १०६ ।।

मम मतमयमात्माऽन्योन्यतादात्म्यभाजां
ध्रुवचितिसुखसत्ताव्यापितानां समष्टिः।
स्फुरति सततमेतच्छादकानाद्यविद्या–
युतविषयसमष्ट्युत्सारणादेव मुक्तिः।।

अन्वयः – अयम् आत्मा अन्योन्यतादात्म्यभाजां ध्रुवचितिसुखसत्ताव्यापितानां समष्टिः (अस्ति)। एतच्छादकानाद्यविद्यायुतविषयसमष्ट्युत्सारणात् एव मुक्तिः सततं स्फुरति (इति) मम मतम्।

गङ्गा - मम मतमिति- अयं नित्यशुद्धबुद्धस्वभाव आत्मा अन्योन्यतादात्म्यभाजाम् अन्योऽन्यं परस्परं तादात्म्यं भजन्त इति तेषां प्राणिनाम्। एक एव आत्मा सर्वेषु प्राणिषु व्याप्त इति प्राणिनां परस्परं तादात्म्यम्। ध्रुवचितिसुखसत्ताव्यापितानां नित्यचेतनानन्दभावपूरितानां समष्टिः अस्ति। एतच्छादकानाद्यविद्यायुतविषय-समष्ट्युत्सारणात् एतस्य आत्मनश्छादिका या अनाद्यविद्या माया अज्ञानं वेति यावत्। तया अनाद्यविद्यया युता या विषयसमष्टिस्तस्या उत्सारणात् बाधात्। कारणेन सह कार्यस्य बाधादित्यर्थः। मुक्तिः परमपुरुषार्थरूपो मोक्षः सततं स्फुरतीति मम अलेः मतं सिद्धान्तः।

वेदान्तशास्त्रे आत्मन एकत्वं बहुत्र प्रतिपादितम्। स नित्यः सच्चिदानन्दस्वरूपः सर्वानुगामी च वर्तत इत्येकेनैवात्मना व्याप्तत्वात् सर्वेषु प्राणिषु तादात्म्यम्। कठोपनिषदात्मैकत्वं प्रतिपादयन्त्याह-

अग्निर्यथैको भुवनप्रविष्टो
रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपं बहिश्च।।२.५.८।।

अतश्चाऽयमात्मा परस्परतादात्म्यभाजां ध्रुवचितिसुखसत्ता-व्यापितानां समष्टिः कथितः कविना। तदिदमात्मैक्यं रामायणेऽपि हनूमन्मुखात् प्रतिपादितम्-

देहदृष्ट्या तु दासोऽहं जीवदृष्ट्या त्वदंशकः।
आत्मदृष्ट्या त्वमेवाहमिति मे निश्चला मतिः।।

सोऽयमात्माऽनाद्यविद्ययाऽज्ञानेन वाच्छादितो भवति। इयमविद्यैवावरण-शक्तिः। सच्चिदानन्दस्वरूपस्यावरणादेवाऽविद्येयमावरण-शक्तिरित्युच्यते। अस्याः सविषयानाद्यविद्याया उत्सारणादेव जीवस्य मुक्तिः-मोक्षोऽविद्यानिवृत्तिः (बृ.उ.शां.भा. १.४.१७)।

अतो न ते शून्यस्योपासनया मुक्तिरिति भावः।

अनुवाद - यह आत्मा परस्पर अभिन्न, नित्य चेतन, उसके सुख और सत्ता से व्याप्त प्राणियों की समष्टि है। अनादि अविद्या इस आत्मा की आच्छादक है।

अनादि अविद्या सहित विषय की समष्टि के उत्सारण से ही मुक्ति सदा स्फुरित होती है, यह मेरा मत है।

टिप्पणी – एक आत्मा ही समस्त प्राणियों में व्याप्त है। उसी सच्चिदानन्दरूप आत्मा की सुख और सत्ता सब में प्रतिष्ठित है। अत: कवि ने प्राणियों में परस्पर तादात्म्य माना है तथा आत्मा को उनकी समष्टि कहा है। यह आत्मा जब अनादि अविद्या तथा उसके विषय रूप अपने आच्छादकों से रहित हो जाता है तभी मुक्ति स्फुरित होती है। अर्थात् यह मुक्त कहलाता है। यह मुक्ति ज्ञान से ही सम्भव है। मैं शान्त, सच्चिदानन्द ब्रह्म ही हूँ। असद् रूप देह नहीं हूँ, इस प्रकार का तात्त्विक अनुभव ही यहाँ ज्ञानपद वाच्य है। अपरोक्षानुभूति में इस तथ्य का उल्लेख हुआ है–

ब्रह्म वाऽहं मम समः शान्तः सच्चिदानन्दलक्षणः।
नाऽहं देहोऽसद्रूपो ज्ञानमित्युच्यते बुधैः।।२४।।

यह ज्ञान ही मुक्ति है। इसी की अनुभूति जीवात्मा की मुक्ति है।

।।१०७।।

इति कथितमिदानीं वत्स! सिद्धान्तमात्रं
श्रुतिमतमविचाल्यं लौल्यहीनो जुषस्व।
कृतगुरुवरिवस्यो वेत्स्यसीहोपपत्तिं
न तु तदवसरोऽस्मिन्बौद्धभङ्गाधिकारे।।

अन्वयः – हे वत्स! इति इदानीं सिद्धान्तमात्रं कथितम्। लौल्यहीनः अविचाल्यं श्रुतिमतं जुषस्व। कृतगुरुवरिवस्यः इह उपपत्तिं वेत्स्यसि। अस्मिन् बौद्धभङ्गाधिकारे तु तदवसरः न (अस्ति)।

गङ्गा – इति कथितमिति– हे वत्स! विलासिन्! वत्सेत्यनेन वेदान्तसिद्धान्ते तस्य बालत्वं बोधयति। इति एवम्प्रकारेण सिद्धान्तमात्रं वेदान्तशास्त्रोक्तसिद्धान्तमात्रं कथितमुक्तम्। निदर्शनमेतत्तल्लक्षणानां न तु सम्यक्प्रतिपादनम्। लौल्यहीनश्चाञ्चल्य-रहितः इन्द्रियार्चनं परित्यज्य त्वम् अविचाल्यं कूटस्थं श्रुतिमतं श्रुतिसिद्धान्तं, श्रुत्या मतं ब्रह्मतत्त्वं वा जुषस्व सेवस्व। कृतगुरुवरिवस्यः सम्पादितगुरुसमर्चनः।'वरिवस्या तु शुश्रूषा परिचर्याप्युपासना' इत्यमरः।'आचार्याद्धैव विदिता विद्या साधिष्ठं प्रापयति' 'आचार्यवान् पुरुषो वेद' इति छान्दोग्येन गुरुसेवयैव ब्रह्मविद्यालाभः। 'श्रोत्रियोऽवृजिनकोऽपापहतः' इति बृहदारण्यकेऽपि ब्रह्मविज्ञानाय गुरोरुपासना

निरदेशि। इह अस्मिन् सिद्धान्ते उपपत्तिमुपायं वेत्स्यसि ज्ञास्यसि। परमतत्त्वज्ञानोपायं प्राप्स्यसीत्यर्थः। अस्मिन् बौद्धभङ्गाधिकारे बौद्धानां खण्डनप्रसङ्गे तदवसरः उपपत्तिप्रतिपादनस्य तु नास्ति। अत एव गुरोः समीपं गत्वा श्रुतिसिद्धान्तं सेवस्व।

अनुवाद – हे बालबुद्धि विलासिन्! इस प्रकार से इस समय यहाँ सिद्धान्तमात्र का कथन किया गया है। चंचलता छोड़कर, इन्द्रियों की तृप्ति आदि का परित्याग कर तुम अविचाली श्रुतिमत का सेवन करो। गुरु की पूजा से तुम परमतत्त्व के ज्ञान का उपाय जान सकोगे। इस बौद्धभंगाधिकार में उस उपपत्ति के प्रतिपादन का अवसर नहीं है।

।। १०८ ।।

अलिरिति विशदोक्त्या साधु धिक्कृत्य बौद्धं
चिरमरमत मौनी निर्विकल्पे समाधौ।
विवसनमतयुक्त्या तं जिगीषन् विलासी
पुनरपि तमवोचत् त्यक्तविज्ञानवादः।।

।। इत्यलिविलासिसंलापे खण्डकाव्ये तृतीयशतकम्।।

अन्वयः – अलिः इति विशदोक्त्या बौद्धं साधु धिक्कृत्य मौनी (सन्) निर्विकल्पे समाधौ चिरम् अरमत। त्यक्तविज्ञानवादः विलासी विवसनमतयुक्त्या तं जिगीषन् पुनः अपि तम् अवोचत्।

गङ्गा – अलिरितीति– अलिः ब्रह्मवित्प्रतीकभूतो भ्रमरः स्वीयया उपर्युक्तया विशदोक्त्या विशदया गभीरया उक्त्या वाचा बौद्धं तद्रूपं विलासिनं साधु सम्यक् प्रकारेण धिक्कृत्य तिरस्कृत्य। तस्य क्षणिकतासिद्धान्तं निराकृत्येति यावत्। मौनी मौनं भजमानः निर्विकल्पे समाधौ चिरं चिरकालम् अरमत, रमणम् अकरोत्। निर्विकल्पकसमाधिमाश्रित्य शान्तिमलभतेत्यर्थः। त्यक्तविज्ञानवादः तन्मताश्रयेण पराजितत्वात् त्यक्तो विज्ञानवादः बौद्धमतं येन सः। तादृशो विलासी विवसनमतयुक्त्या विवसनानां दिगम्बरार्हतानां मतस्य युक्त्याः तर्कैः तम् अलिं जिगीषन् जेतुमिच्छन् पुनः पराजितोऽपि पुनर्विजयसमीहया अवोचत् अवदत्। चार्वाकबौद्धमताश्रयेण द्विः पराजितोऽपि पुनर्दिगम्बरमतयुक्त्या विजयलिप्सुरवददित्यनेन चतुर्थशतकस्य वर्ण्यविषयः सूचितः।

।। इति विद्यावतीसुतरमाकान्तविरचितायां म.म. गङ्गाधरशास्त्रि-कृतालिविलासिसंलापगङ्गाटीकायां तृतीयशतकम्।।

अनुवाद – इस प्रकार अपनी विशद उक्ति से बौद्धरूप विलासी का अच्छी प्रकार से खंडन रके अलि मौन हो गया। उसने चिरकाल तक निर्विकल्पकसमाधि में रमण किया। विज्ञानवाद को छोड़कर विलासी दिगम्बरों के मत से उसे जीतने की इच्छा से उस अलि से पुन: बोला।

।। इति विद्यावतीसुतरमाकान्तपाण्डेयकृते हिन्द्यनुवादे तृतीयशतकम्।।

***

श्लोकानुक्रमणिका